Digitized by Arya Samaj Foundation Chennai and eGangotri

079076

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri 079076

LIBRARY
Gurukul Kangri Vishwa...
HARDWAR
079076

सागरिका

(58)

चतुस्त्रिंशद्वर्षे प्रथमोऽङ्कः

३४ / १

विक्रमसंवत् २०५५

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सागरिका

विक्रमसंवत् २०५५

चतुस्त्रिंशद्वर्षे प्रथमोऽङ्कः

३४.१

संस्थापकः प्रधान सम्पादकश्च

रामजी उपाध्यायः

सम्पादकाः

राधावल्लभत्रिपाठी

मनोरमा त्रिपाठी

रामगोपालमिश्रः

सागरिका-समितिः

गौरनगरम्

सागरम् -४७०-००३

(म.प्र.)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रचारिका व्यवस्थापिका च
सागरिका -समितिः
गौरनगरम्, सागरम् - ४७० ००३

देयम्

प्रत्यङ्कम्		६.०० रूप्यकाणि
वार्षिकम्		३०.०० रूप्यकाणि
आजीवनग्राहकस्य		५००.०० रूप्यकाणि
वर्ष १-५	प्रत्यङ्कम्	१५.०० रूप्यकाणि
वर्ष ६-१०	,,	१२.०० रूप्यकाणि
वर्ष ११-१५	,,	१०.०० रूप्यकाणि
वर्ष १६-२०	,,	८.०० रूप्यकाणि
वर्ष २१-३४	,,	७.०० रूप्यकाणि

अङ्कप्रकाशः प्रतिवर्षम् -- आषाढाश्विन --पौष - चैत्रमासेषु
(जून-सितम्बर-दिसम्बर-मार्च)

पत्रव्यवहारसङ्केतः - डॉ. राधावल्लभः त्रिपाठी,
संस्कृतविभागाध्यक्षः
डॉ. हरीसिंह गौर विश्वविद्यालयः
सागरम् ४७० - ००३

कंपोजिंग - - नरेश सैनी (संस्कृतविभागे)
डॉ. हरीसिंह गौर विश्वविद्यालयः सागरम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषय - सूची

१. संस्कृतसाहित्यस्य वैशिष्ट्यानि

राधावल्लभः ५

२. याथार्थ्यस्य भारतीयावधारणा भवभूतिश्च

इच्छारामो द्विवेदी २५

३. न्यायवैशेषिकयोः पदार्थानां पुनर्व्यवस्थापना

ज्ञानोपाह्वो बच्चूलालोऽवस्थी ३०

४. व्याकरण-काव्यपरम्परायां धातुकाव्यसमीक्षणम्

वनमाली विश्वालः ३३

५. गुणस्वरूपपरामर्शः

पूर्णचन्द्रउपाध्यायः ४३

६. शब्दानुशासने तृजाद्यर्थविमर्शः

मङ्गलारामः ४९

७. ग्रन्थसमीक्षणम्

(१) राधावल्लभः ५३

(२) रमाकान्तपाण्डेयः ६५

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सागरिका

(संस्कृतत्रैमासिकी)

LIBRARY
Gurukul Kangri Vishwavidyalaya
HARDWAR

विक्रमसंवत् २०[illegible]

चतुस्त्रिंशद्वर्षे द्वितीयोऽङ्कः

३४.२

संस्थापकः प्रधानसम्पादकश्च
रामजी उपाध्यायः

सम्पादकः
राधावल्लभत्रिपाठी

सागरिका-समितिः
संस्कृत विभागः,
डॉ. हरीसिंह गौर विश्वविद्यालयः
सागरम् -४७०-००३
(म.प्र.)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परामर्शदातृमण्डलम्
पं. विद्यानिवास मिश्रः (वाराणसी)
मनोरमा त्रिपाठी (लक्ष्मणपुरम्)
रामगोपालमिश्रः (देहली)

देयम्

प्रत्यङ्कम्	६.०० रूप्यका
वार्षिकम्	३०.०० रूप्यका
आजीवनग्राहकस्य	५००.०० रूप्यका

अङ्कप्रकाशः प्रतिवर्षम् -- आषाढाश्विन --पौष - चैत्रमासेषु
(जून-सितम्बर-दिसम्बर-मार्च)

पत्रव्यवहारसङ्केतः - डॉ. राधावल्लभः त्रिपाठी,
संस्कृतविभागाध्यक्षः
डॉ. हरीसिंह गौर विश्वविद्यालयः
सागरम् ४७० - ००३

कंपोजिंग - नरेश सैनी (संस्कृतविभागे)
डॉ. हरीसिंह गौर विश्वविद्यालयः सागरम्

मुद्रकः -- आर.के. आफसेट प्रिंटर्स,
भूतेश्वरमन्दिरसमीपम्, सागरम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषय - सूची

१. भारतीय' व्याख्यापद्धतिः (अनुमानविधिनां)

रेवाप्रसादो द्विवेदी १

२. भाट्टसम्प्रदाये प्रस्थानभेदाः

सोमनाथः नेने ७

३. काव्य-रसः

सदाशिवकुमारो द्विवेदी १७

४. लोकेमङ्गलचिह्नानां वैभवम्

कैलाशनाथः द्विवेदी २४

५. सर्वतन्त्रस्वतन्त्रो भट्टश्रीनागेशः

बालशास्त्री २६

६. रूपावतारे पाणिनिसूत्राणां पाठभेदाः

रमाकान्तपाण्डेयः ३३

७. नाज्झलावित्यस्मिन् सूत्रे आकारप्रश्लेषस्य समीक्षा

पाटसकर भाग्यलता ४०

८. शाकुन्तले विचिकित्सा

धर्मेन्द्रकुमारसिंहदेवः ४३

९. सागरे संस्कृतरङ्गमञ्चः

पूर्णचन्द्र उपाध्यायः ४८

१०. ग्रन्थसमीक्षा

समीक्षकाः रमाकान्तपाण्डेयः, पाटस्कर-भाग्यलता, अच्युतानन्दः, राधावल्लभः, भागीरथिर्नन्दश्च ५२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत विभाग,

डॉ. हरीसिंह गौर, विश्वविद्यालय, सागर

संस्कृत परिषद् के महत्त्वपूर्ण प्रकाशन

१ संस्कृत कवियों के व्यक्तित्व का विकास : डॉ. राधावल्लभ त्रिपाठी, २५रु.।
२. वाल्मीकिविमर्श : ले. वही। संस्कृत में (अप्राप्त)
३. आदिकवि वाल्मीकि : हिन्दी में (ले. वही। मूल्य २५रु.।)
४ नाट्यमण्डपम् : प्राचीन भारतीय रंगमंच पर नया प्रकाश । ले. वही ।
५. भारतीयरङ्गवृत्तम् : प्राचीन नाट्यपरंपरा पर शोध कृति। मूल्य १० रू.।
६. कुन्दमाला : संस्कृत नाटक का सरस सुपाठ्य हिन्दी अनुवाद। (अनु. वही)
७. प्रबुद्धरौहिणेय : (१९८३) संस्कृत नाटक का हिन्दी अनुवाद ५रु.।
८. मुकुन्दविलासम् : अप्रकाशित दुर्लभ महाकाव्य। (सं. वही। १५रु.)।
९. न्यायसत्रम् : (संपादक वही। मूल्य ६०रु.)।
१०. संस्कृत साहित्य को इस्लाम परम्परा का योगदान : (सं. वही। ७०रु.)।
११. संस्कृत कविता की लोकधर्मी परम्परा : (ले. वही प्रकाश्य। अनु. २०रु.)।
१२. आधुनिकसंस्कृतसाहित्यानुशीलनम् : (सं. रामजी उपाध्याय। मूल्य ३०रु.)
१३. श्री हर्ष के रूपक : (डॉ. गोकुलप्रसाद त्रिपाठी। मूल्य ४०रु.)।
१४. सिन्धुलिपिरहस्योद्घाटनम् : (डॉ. फतेहसिंह (सचित्र) मूल्य १५रु.)।
१५. कर्णभार : हिन्दी अनु. (डॉ. फतेहसिंह। सचित्र मूल्य १०रु.)।
१६. अप्राप्त नाट्यशास्त्रीय ग्रन्थ : (सं. राधावल्लभ त्रिपाठी, मूल्य २०रु.)।
१७ भरटकद्वात्रिंशिका : (प्राचीन कथा संग्रह सं. वही, मूल्य १५रु.)
१८. महाकवि भवभूति ओर उनका नाट्यलोक : (सं. वही, मूल्य १५रु.)।
१९. सन्धानम् : संस्कृत काव्य संग्रह। (राधावल्लभ त्रिपाठी, मूल्य १५रु.)
२० लहरीदशकम् : संस्कृत काव्य संग्रह। (ले. वही। मूल्य ३०रु.)
२१ प्रख्या : संस्कृतकाव्य सीरीज। (सं. वही। मूल्य ३०रु.)
२२. कालिदासपरिशीलन : (सं. वही। मू. २५रु.)
२३. कालिदास की समीक्षापरम्परा : (ले. वही। ३०रु.)
२४. भारतीयनाट्य : स्वरूप और परम्परा : (ले. वही । २५रु.।)
२५. शब्दादर्श : (सं. डॉ. बालशास्त्री। २०रु.)
२६. वाक्त्रयी : (पालि–प्राकृत–अपभ्रंशसंग्रह)–(डॉ. अच्युतानन्द दाश, २५रु.)
२७. वेददीपिका : (सं. डॉ. बाल शास्त्री, डॉ. रमाकान्त पांडेय, मूल्य ३०रु.)
२८ गीतधीवरम् – (काव्यसंग्रह) राधावल्लभ त्रिपाठी, मूल्य ३०रु.

प्राप्तिस्थान : संस्कृत परिषद् संस्कृत विभाग, सागर विश्वविद्यालय, सागर

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सागरिका

(संस्कृतत्रैमासिकी)

विक्रमसंवत् २०५६

चतुस्त्रिंशद्वर्षे तृतीयोऽङ्कः

३४.३

संस्थापकः प्रधान सम्पादकश्च
रामजी उपाध्यायः

सम्पादकः
राधावल्लभत्रिपाठी

सागरिका-समितिः
संस्कृत विभागः,
डॉ. हरीसिंह गौर विश्वविद्यालयः
सागरम् -४७०-००3
(म.प्र.)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परामर्शदातृमण्डलम्
पं. विद्यानिवास मिश्रः (वाराणसी)
मनोरमा त्रिपाठी (लक्ष्मणपुरम्)
रामगोपालमिश्रः (देहली)

देयम्

प्रत्यङ्कम्	६.०० रूप्यकाणि
वार्षिकम्	३०.०० रूप्यकाणि
आजीवनग्राहकस्य	५००.०० रूप्यकाणि

अङ्कप्रकाशः प्रतिवर्षम् -- आषाढाश्विन --पौष - चैत्रमासेषु
(जून-सितम्बर-दिसम्बर-मार्च)

पत्रव्यवहारसङ्केतः - डॉ. राधावल्लभः त्रिपाठी,
संस्कृतविभागाध्यक्षः
डॉ. हरीसिंह गौर विश्वविद्यालयः
सागरम् ४७० - ००३

कंपोजिंग - - नरेश सैनी (संस्कृतविभागे)
डॉ. हरीसिंह गौर विश्वविद्यालयः सागरम्

मुद्रकः - - आर .के. आफसेट प्रिंटर्स,
भूतेश्वरमन्दिरसमीपम् , सागरम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुक्रमः

१. श्रीमदादिशङ्करभगवत्पादानामवतारकालस्य अवतार-तिरोभावस्थानयोश्च पुनरीक्षणम्

अच्युतानन्दः दाश १

२. पूर्वमीमांसादर्शनानुसारेण ईश्वरस्वरूपविचारः

चिर्रावूरि श्रीराम शर्मा २८

३. नाट्यप्रयोदृशा बालरामायणे वस्तुविन्यासः

राधिकाप्रसादमिश्रः ३५

४. सुभाषितरत्नसन्दोहे पूर्ववर्तिकाव्यानां प्रभावः

महेशदत्तशर्मा ४३

५. भारतनामकरणविचारः

मल्लादिगोपालकृष्ण शर्मा ४६

६. वैदिकदेवरहस्यम्

मिताली देव ५६

७. ग्रन्थसमीक्षणम्

समीक्षकाः रमाकान्तपाण्डेयः, अच्युतानन्दः,

राधावल्लभः ६६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्याङ्कस्य लेखकाः

१. **अच्युतानन्दः**, प्रवाचकः, संस्कृत विभागे डॉ. हरीसिंहगौर विद्यालयः, सागरम्।

२. **चिर्रावूरिश्रीरामशर्मा**, प्रवाचकः, एस.जी.व्ही.पी.के.जी. ओरि कॉलेज, हाउस नं. १७-२-४/२२, टीचर्स कालोनी, राजामुंद ५३३ १०५ (आ.प्र.)।

३. **राधिकाप्रसादमिश्रः**, संस्कृतविभागे, रानीदुर्गावती विश्वविद्याल जबलपुरम् ।

४. **महेशदत्तशर्माः**, प्रवाचकः, संस्कृतविभागाध्यक्षश्च, एन.एम.एस. दास स्नातकोत्तरमहाविद्यालयः, बदायूँ, (उ.प्र.)

५. **गोपालकृष्णशर्मा**, प्लॉट नं. ९०, पंचममार्गे (पाँचवा रोड) कृष्णा कालोनी, मौलाली, हैदराबादम् - ५०० ०४०

६. **मितालीदेव**, रिसर्च एसोशिएट, संस्कृतविभागे, काशीहि विश्वविद्यालयः, वाराणसी।

७. **रमाकान्तपाण्डेयः**, रिसर्च एसोशिएट, प्रगत अध्ययन केन्द्रम्, विश्वविद्यालयः, पुणे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सागरिका

(संस्कृतत्रैमासिकी)

विक्रमसंवत् २०५६

चतुस्त्रिंशद्वर्षे चतुर्थोऽङ्कः

३४.४

संस्थापकः प्रधान सम्पादकश्च

रामजी उपाध्यायः

सम्पादकः

राधावल्लभत्रिपाठी

सागरिका-समितिः

संस्कृत विभागः,

डॉ. हरीसिंह गौर विश्वविद्यालयः

सागरम् -४७०-००३

(म.प्र.)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परामर्शदातृमण्डलम्

पं. विद्यानिवास मिश्रः (वाराणसी)

मनोरमा त्रिपाठी (लक्ष्मणपुरम्)

रामगोपालमिश्रः (देहली)

देयम्

प्रत्यङ्कम्	६.०० रूप्यकाणि
वार्षिकम्	३०.०० रूप्यकाणि
आजीवनग्राहकस्य	५००.०० रूप्यकाणि

अङ्कप्रकाशः प्रतिवर्षम् -- आषाढाश्विन --पौष - चैत्रमासेषु
(जून-सितम्बर-दिसम्बर-मार्च)

पत्रव्यवहारसङ्केतः - डॉ. राधावल्लभः त्रिपाठी.
संस्कृतविभागाध्यक्षः
डॉ. हरीसिंह गौर विश्वविद्यालयः
सागरम् ४७० - ००३

कंपोजिंग - - नरेश सैनी (संस्कृतविभागे)
डॉ. हरीसिंह गौर विश्वविद्यालयः सागरम्

मुद्रकः - - मुद्रणालय डॉ. हरीसिंह गौर विश्वविद्यालय, सागर

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुक्रमः

१. महाविद्यानुप्रयोगविषये चित्सुखाचार्यस्य दृष्टिः

प्रकाशपाण्डेयः ५-११

२. ऋषयो मन्त्राणां द्रष्टारः – मन्त्रकृत्पदस्यार्थः

वन्दना मालवीय १२-१५

३. भारतीयचिन्तने इस्लामपरम्परावदानम्

राधावल्लभः त्रिपाठी १६-२६

४. पूर्वमीमांसकानां मते मोक्षस्वरूपम्

सोमनाथ नेने २७-४०

५. अद्यावध्यप्रकाशिता शृङ्गारमाला

शिवशङ्करः त्रिपाठी ४१-४४

६. केशवचन्द्रदाशस्य काव्ययात्रा

धर्मेन्द्रकुमारसिंहदेवः ४५-६२

७. ऊँकारस्वरूपं महत्त्वञ्च

शिवदर्शनः तिवारी ६३-६६

८. संस्कृतकोशेषु रूपभेदसङ्ग्रहणम्

प्रातूरिश्रीनिवासः ६७-७०

९. ग्रन्थसमीक्षणम्

समीक्षकाः ❖ अच्युतानन्ददाशः ७१-१००

❖ रमाकान्तपाण्डेयः ❖ राधावल्लभः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्याङ्कस्य लेखकाः

१. **प्रकाशपाण्डेयः** गङ्गानाथ झा केन्द्रीय संस्कृत विद्यापीठ, चन्द्रशेखर आजाद पार्क, इलाहाबाद, उत्तरप्रदेश - २११ ००२

२. **वन्दनामालवीय**, रिसर्च एसोशिएट, प्रयाग विश्वविद्यालयः, इलाहाबाद।

४. **राधावल्लभः त्रिपाठी**, आचार्यः अध्यक्षश्च संस्कृतविभागे, डॉ. हरिसिंह- गौर- विश्वविद्यालयः, सागरम्

५. **सोमनाथ नेने**, उपाचार्यः संस्कृत अध्ययनशाला विक्रम विश्वविद्यालयः उज्जयिनी

६. **शिवशङ्कर त्रिपाठी**, दारागंज इलाहाबाद - २११ ००६

७. **धर्मेन्द्रकुमारसिंहदेवः**, शोधसहायकः, संस्कृतविभागे, डॉ. हरिसिंह- गौर - विश्वविद्यालयः, सागरम्

८. **शिवदर्शन तिवारी**, आचार्यः अध्यक्षश्च, संस्कृतविभागे, शासकीय- महाविद्यालयः दमोह (म.प्र.)

९. **प्रातूरिश्रीनिवासः**, १/१४३-५२ गान्धीनगरम् , राम्मिगनूर - ५१८-३६०

१०. **अच्युतानन्ददाशः**, उपाचार्यः संस्कृतविभागे, डॉ. हरिसिंह -गौर- विश्वविद्यालयः सागरम्

११. **रमाकान्त पाण्डेयः**, रिसर्च एसोशिएट, प्रगत संस्कृताध्ययनकेन्द्रम् पुणे विश्वविद्यालयः, पूणे - ४११ ००७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यस्य वैशिष्ट्यानि

राधावल्लभः त्रिपाठी

नैतत् तिरोहितं धीमतां यत् समग्रभारतीयपरम्पराणां शास्त्राणां च मूलं वरीवर्ति वेदः। तथैव संस्कृतकाव्य-धाराया अपि स एव मूलम् । वेदस्तावदपौरुषेयो मन्त्रात्मकश्च, काव्यदृष्ट्या तत्समीक्षणं न भारतीयपरम्परायां विधीयते। परन्तु यथा भारतीयधर्मदर्शनानां तानि तानि प्रस्थानानि ते ते सम्प्रदाया वेदमूला एव तथैव वेदमूलकत्वमूरीकर्तव्यं भारतीयकाव्यपरम्पराया अपि। राजशेखरस्तु वेद-काव्यशास्त्रयोः परस्परोपकार्योपकारकभावमङ्गीकरोति[१] , चतसृणां विद्यानां निष्यन्दभूतां पञ्चमीं साहित्यविद्यां सप्तमं वेदाङ्गमलङ्कारं च स्थापयति।[२] सकल विद्यास्थानैकायनं काव्यं पञ्चदशमं विद्यास्थानमित्यप्यसौ समुद्घोषयति।

दृश्यं श्रव्यमिति द्विधा समुल्लसितं नवनवोन्मेषशालिप्रज्ञाया निष्यन्दभूतम् अलौकिकवर्णनानिपुणस्य कवेः प्रातिभसंरम्भसमुद्भवं काव्यं नाम साहित्यविद्याया सर्वमनोहारि रमणीयतमं च रूपमिति न संशीतिः। अथैतस्य महाकाव्य-खण्डकाव्य-मुक्तकाद्या विधाः विचारिता एव पुरातनैरालङ्कारिकैः। कविभिस्तु प्रतिभापरिस्पन्द-वशाद् वा समय परिवर्तनाद् वा नवा नवाः काव्यविधाः परिकल्पिताः। एतासु च महाकाव्य-खण्डकाव्य-सन्देश-काव्य-स्तोत्र-रागकाव्यादिविविधविधासु विरचितं ललितसंस्कृतवाङ्मयं अनितरसाधारणैर्विशेषैः किमपि महत्त्वं भजते।

संस्कृतकवितायाः वाचिकी परम्परा

सुविदितमेवैतद् यत् अनादिकालादेव साक्षात्कृतधर्माण ऋषयो वेदान् वाचिक-परम्परया धारयाम्बभूवुः। अत एव वेदानां श्रुतिरिति संज्ञा। लौकिकमपि संस्कृतकाव्यम् इतिहासपुराणादिकं च आ सहस्राब्दं वाचिक-परम्परायामेव पल्लवितम् । सूताः कुशी-लवा वा इतिहासपुराणादिकं गायं गायं पाठं पाठं वा काव्यपरम्परामातेनुः। लिपिबद्ध-काव्यस्य वाचिकपरम्परासंवर्धितकाव्यस्य च भवति शिल्प- सङ्घटना-वस्तुवर्णना-दिदृष्ट्या विशेषः। अयं विशेषः लौकिकसंस्कृतकाव्य आमूलात् समुल्लसति स्म। अत एव लौकिककाव्यस्यापि वेदवत् प्राचीनत्वं श्रुतिसिद्धत्वं चोरीकृतम् । तथा चोक्तमथर्ववेदे-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स बृहतीं दिशमनुव्यचलत् । तमितिहासः पुराणं
च गाथाश्च नाराशंसीश्चानुव्यचलन् । इतिहासस्य
च वै पुराणस्य च गाथानां च नाराशंसीनां च
प्रियं धाम भवति य एवं वेद - (१५/६/११)

आ वैदिककालाद् "गाथा" - काव्यं लोकेषु अतितरां प्रचलनमवापेति रामायणेन महाभारतेन च विज्ञायते। यथाऽद्यत्वे विविधलोकभाषासु जना लोकगीतानि गायन्ति, तथा तदानीमगीयन्त गाथाः। आबालवृद्धाः स्त्रियः पुरुषा गाथाभिरहृष्यन् अरज्यन्त च।[3] एवमेव जना विविधाः कथाः कथयाम्बभूवुः। तथोक्तं तत्रैव - कथाविचित्राः पूतनाधिकारा इति (आदि, १८४/११, १८५/११)। नाटकानामपि कथनभङ्ग्या प्रस्तुतिर्मनोरञ्जनाय सञ्जायन्ते स्म। उक्तं वाल्मीकिरामायणे भरतस्य तन्मित्रैर्मनोविनोद-विवरणे - 'नाटकान्यपरे प्राहुर्हास्यानि विविधानि चे' ति (अयोध्या ६९/४) अन्यत्र चोक्तम् - 'नाटका विविधाः काव्याः कथाश्चाख्यायिकादयः। (महाभारत २/११/३६)

यथा गाथा तथैवाख्यानोपाख्यानानि इतिहासपुराणानि च आ वैदिककालादेव कविभिः सूतैः पौराणिकैरुद्भावितानि जनतासु गायं गायं लोकप्रियत्वं न नीतानि। महर्षिपाणिनेरष्टाध्याय्यामांआख्यानाख्यायिकेतिहासपुराणानामुल्लेखोऽपि मतमिदं द्रढयति। य एव सूता वैदिककाले यज्ञविधौ 'नृत्ताद्यनुष्ठानाय'[4] समाहूतास्त एव आख्यान-पुराणादिकस्य विस्तारं व्यदधुः। तथा च सूतर्षिणा नैमिषे अष्टादशपुराणानि समहा-भारतानि महर्षीणां शौनकादीनां समक्षं समाख्यातानि। वैदिकयज्ञसम्बद्ध एव 'सूतो रथकारः स्थपतिर्वास्तुकारः काव्यनिर्माता इतिहासपुराणादिव्याख्याता च बभूवेति महाभारते जनमेजयनागयज्ञानुष्ठाने यज्ञवेदिकानिर्माणाय समाहूतस्य सूतस्य वर्णनमिदं सूचयति -

स्थपतिर्बुद्धिसम्पन्नो वास्तुविद्याविशारदः।
इत्यब्रवीत् सूत्रधारः सूतः पौराणिकस्तथा।।
(आदिपर्वणि)

अत एव लौकिकसंस्कृतकाव्यस्योद्भवेऽस्य सूतस्य महदवदानं वर्तत इति न संशीतिः।

अन्यत्राथर्वणि एव पुराणस्य च्छन्दसां च समुद्भवः ब्रह्ममुखाद् व्यावर्णितः।

ऋचः सामानिच्छन्दांसि
पुराणं यजुषा सह।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उच्छिष्टाज्जज्ञिरे सर्वे
दिवि देवा दिवि श्रिताः।। (अथर्व. ११/७/२४)

याज्ञिकानुष्ठानेषु यथा वेदमन्त्रास्तथैव पुराणाङ्गभूतान्याख्यानोपाख्यानान्यपि विनियोजितानि। अश्वमेधयज्ञ आसंवत्सरान्तं पारिप्लवाख्यानानां वीणागाथिभिर्गायनं वर्णितमेव। राजेन्द्रप्रसादहाजरामहोदयस्तु तदेव लौकिकसंस्कृतकाव्यपरम्पराया मूलमिति स्थापयति।

वस्तुतस्तु वैदिकसंहितासु विशेषतो ऋग्वेदे भारतीयकवितायाः यः प्रकृष्टः प्रथमावतारः सञ्जातः स एव लौकिकसंस्कृतकाव्यसमुद्भवस्यापि प्रेरयिता प्रवर्तकश्च बभूव। वैदिकसंहिताभ्यः प्रसृता लौकिकसंस्कृतकाव्यपरम्परा वाचिकरूपेणैव प्रथमं समुल्ललास। पश्चाच्च सूतेषु केचन ग्रन्थिकाः समजायन्त, ते ग्रन्थेभ्यः पुराणाख्याना-दीन्यपठन् । महाभारते ग्रन्थिकस्योल्लेखः नट-नर्तक सूत–मल्लझल्लादिभिः सह विहितः। भोजराजेन च आख्यानोपाख्यानलक्षणे ग्रन्थिकस्य कर्तृत्वमित्थं विवेचितम्-

नलसावित्रीषोडशराजोपचारवत् प्रबन्धान्तः।
अन्यप्रबोधानार्थं यदुपाख्याति तदुपाख्यानम् ।।
आख्यानसत्तां तल्लभते यद्यभिनयन् पठन् गायन् ।
ग्रन्थिक एकः कथयति गोविन्दवदवहिते सदसि।।

वाचिकपरम्परायाः कवयः

वाल्मीकिर्व्यासश्चास्याः वाचिककाव्यपरम्पराया लौकिकसंस्कृतसाहित्ये प्रेरकौ प्रवर्तकौ च स्तः। अन्येऽपि केचन कवयः पुरातनवाङ्मये सनामग्राहं स्मृताः। केचन विद्वांसः वाल्मीकेः प्राग् विरचितं च्यवनर्षिणापि रामायणमिति मन्यन्ते, अश्वघोषस्योल्लेखं च तत्र प्रमाणयन्ति।[५] महाभारते शम्याक-मङ्किविदेहजनकप्रभृतयः वाचिकपरम्पराया गाथाकाव्यकारा अनेकत्र उद्धृताः।[६] वाल्मीकिरपि एवमेव महाभारतकारैः स्मृतः उदाहृतश्च तत्कर्तृकत्वेन एकः श्लोकः।

उशना कविः शुक्रो वा वाचिककाव्यपरम्परायां सर्वाधिकं स्मर्यते स्म इत्यपि महाभारतीयैरेवोल्लेखैः प्रतीयते। उशनसा प्रणीता गाथा भारते बहुशस्तन्नामनिर्देश-पुरस्सरं प्रस्तुताः । तथाहि-

अपि चोशनसा गीतः श्रूयतेऽयं पुरातनः।
श्लोकस्तत्त्वार्थसहितस्तन्मे निगदतः शृणु।।
पुनरावर्तमानानां भग्नानां जीवितैषिणाम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भेतव्यमरिशेषाणामेकायनगता हि ते।।
(शल्यपर्वणि, ५७/१२,१३)
उशना चाथ गाथे द्वे प्रह्लादायाब्रवीत् पुरा।
ये वैरिणः श्रद्दधते सत्ये सत्येतरेऽपि वा।
ते श्रद्दधाना वध्यन्ते मधुः शुष्कतृणैर्यथा।।
(शान्ति. ३७/६६,६७)
श्लोकश्चोशनसा गीतो पुरा तात महर्षिणा।
(शान्ति. १६९/९)
भगवानुशना चाह श्लोकमत्र विशाम्पते।।
(शान्ति. ५७/२)

वाचिककाव्यपरम्परायामासीदुशनस एतादृशो बहुमानो यत् कविः काव्यश्चास्यैव पर्यायौ सञ्जातौ। कविर्वाल्मीकिशुक्रयोः (मेदिनी. १५७/४), काव्यं ग्रन्थे पुमान् शुक्रे (तत्रैव ११३/११), शुक्रो देवगुरुः काव्य उशना भार्गवः कविः (अमर. १/३/२५) इति कोशकाराणामुक्तेः। विभूतियोगे चाह भगवान् श्रीकृष्णः - "कवीनामुशना कवि रिति। सोऽयमुशना अध्यायसहस्रमरचयत् गाथात्मकमिति "अध्यायानां सहस्रेण काव्यः सङ्क्षेपमब्रवी' दिति महाभारतादेव विज्ञायते (राजधर्मपर्वणि ५९/९१)

लिप्यामाविष्कृतायां प्रचलिते सत्यपि लेखनविधौ काव्यं तु वाचिकपरम्परया कर्णाकर्णिकया यथा प्रसारमाप, न तथा पाठ्यत्वेन । अत एव श्रव्यकाव्यमिति काव्यप्रकार आचार्यैर्व्यपदिष्टो न पाठ्यकाव्यमिति। सहृदयानां समाजे कविगोष्ठीसु राजसभासु वा काव्यमश्रूयत। कामसूत्रकारा वात्स्यायनमुनयो वर्णयन्ति सरस्वतीभवने आयोजितं समाजम् , यत्र काव्यपाठाय कवय आहूताः।[६] राजसभासु राजानोऽपि सबहुमानं कवीन् काव्यपाठाय न्यमन्त्रयन् । प्रसिद्ध एव खारवेल-समुद्रगुप्त-श्रीहर्ष-प्रभृति-भूभुजां काव्यक्रियां प्रति समादरः सहृदयत्वं च।

संस्कृतकाव्यधारा वाचिकपरम्परायामेव सर्वदा सर्वथा प्रकृष्यते स्म। एतस्माच्च कारणात् श्रव्यत्वं गुणः श्रुतिकटुत्वदोषनिराकरणं तत्र सदैवापेक्ष्यते स्म। सानुप्रासपदावली शब्दसौष्ठवं वर्णसावर्ण्यरम्यता चास्यां काव्यधारायां विकासमाप। कविनापि पाठविधिः सम्यग् ज्ञातव्योऽभूत् , अन्यथा सर्वथोत्कृष्टमपि काव्यमपपाठपुरस्कृतं विदग्धगोष्ठीसु न प्रशंसास्पदं स्यात् । राजशेखरस्त्वाह -

करोति काव्यं प्रायेण संस्कृतात्मा यथा तथा।
पठितुं वेत्ति यः स परं तस्य सिद्धा सरस्वती।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथा जन्मान्तराभ्यासात् कण्ठे कस्यापि रिक्तता।
तथैव पाठसौन्दर्यं नैकजन्मविनिर्मितम् ।।

(काव्यमीमांसायां सप्तमेऽध्याये)

प्राचीनकवीनां कोटयः

वैदिकसंहितासु मन्त्रद्रष्टार ऋषयः कविशब्देन व्यपदिष्टाः। तैर्दर्शिता मन्त्राः काव्यमिति संज्ञप्ताः। तदानीं कविरितिपदं चैतन्यस्य परां काष्ठामसूचयत् । उक्तं च -

कविर्मनीषी परिभूः स्वयम्भूः

(शुक्ल यजु. ४०/१/८)

मन्त्रात्मकं काव्यं देवताया आविर्भावाय क्षमते स्म। तेन देवा भाविताः । अग्निमधिकृत्य वक्ति ऋषिः

स वावृधे काव्येन।

वैदिककाल एव आख्यानपुराणादिप्रस्तावकाः सूताः पौराणिका वाऽऽत्मनोऽवदानं विशदयाञ्चक्रुः। इमे मन्त्रद्रष्टारो नासन् , लोकपरम्परायां सञ्चितं वाङ्मयमहानिधिमिमेऽरक्षन्नवर्धयंश्च। परवर्तिकाले राजसभासु नृपाः कविभ्यआश्रयमददुः इत्थं संस्कृतकाव्यपरम्परायामार्षकवयः, सूतकवयः, राजाश्रिताः कवयो लोककवयश्चेति बहुविधाः कवयः स्वं स्वं रचनाकर्म प्रकटयाम्बभूवुः।

प्रातिभोन्मेषतारतम्यवशादपि नानाविधाः कवयः समजायन्त। अङ्गुत्तर-निकाये (२/२३०) काव्यरचनाप्रक्रियाभेदेन चतुर्विधाः कवयः परिगणिताः - सूतकविः अर्थकविः प्रतिभानकविश्चिन्ताकविश्चेति। यः पुरातनमाख्यानजातं जनसमाजस्य पुरः प्रस्तौति स सूतकविः। प्रतिभानकविर्यथादृष्टं वर्णयति। अर्थकविः काव्यद्वारेण पुरुषार्थमुपदिशति। चिन्ताकविः समाधौ उदात्तं कवयति।

प्रतिभावन्त एव कवयन्ति। प्रतिभा तु पूर्वजन्मार्जितः संस्कारविशेषः। प्रतिभापरिस्पन्दभूतमलौकिकवर्णनमयं वस्तु काव्यम् । परन्तु राजसभासु कविपदं प्राप्तुमभिलषन्तः प्रायः अभ्यासाद् व्युत्पत्या वा कवयन्ति स्म। भामहेन "काव्यं तु जायते जातु कस्यचित् प्रतिभावत" इति वदता प्रतिभाया अविनाभाव ऊरीकृतः काव्यकर्मणि। दण्डिना तु -

न विद्यते यद्यपि पूर्ववासना
गुणानुबन्धि प्रतिभानमद्भुतम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रुतेन यत्नेन च वागुपासिता
ध्रुवं करोत्येव कमप्यनुग्रहम् ।।
तदस्ततन्द्रैरनिशं सरस्वती
श्रमादुपास्या खलु कीर्तिमीप्सुभिः।
कृशे कवित्वेऽपि जनाः कृतश्रमा
विदग्धगोष्ठीसु निहर्तुमीशते।।
(काव्यादर्शे १/१०४-५)

इति वदता प्रतिभाकृशत्वेऽपि काव्यनिष्पत्तिः स्वीकृता। अत्रेदमवधेयम् - न निष्प्रतिभं समुन्मिषति काव्यम् । प्रतिभा यस्य न प्ररोहति तेन वाचमुपास्य साधना विधेया, तस्माच्च तस्यापि प्रतिभा जागृयात्। तेन प्रतिभाकविः व्युत्पत्तिकविरिति कोटिद्वयं स्वयमुदियाय कविसमवाये। राजसभासु पण्डितानां विदग्धानां बाहुल्यात् शास्त्राणामनुशीलनं कविनाऽवश्यमेव करणीयभूत् , ऋते विविधशास्त्रपरिज्ञानात् पण्डितसभासु अभिरूपभूयिष्ठासु परिषत्सु वा पठ्यमानं तदीयं काव्यमुपहासास्पदं स्यात्। राजशेखरस्तु "प्रतिभाव्युत्पत्तिमांश्च" कविः कविरित्युच्यत इति निगदन् व्युत्पत्तेरवश्यम्भावितां स्वीचकार। तथापि काव्यक्रियायां क्वचिद् व्युत्पत्तेः समधिकतरं विनियोगः, क्वचित् प्रतिभाया अधिक उन्मेष इति भवति भेदः। तद् दृष्ट्या राजशेखरेण तिस्रः कविकोटयो निर्मिताः - शास्त्रकविः काव्यकविरुभयकविश्चेति। शास्त्रं रचयति, शास्त्रे काव्यं काव्ये वा शास्त्रं सङ्क्रमयतीति भेदेन शास्त्रकविरपि त्रिधा।

संस्कृतकविपरम्परायां शास्त्रानुशीलनविशदशेमुषीकाः सुकवयो बहवो बभूवुः यानुपलक्ष्य आभाणकोऽयं प्रचचाल -

विद्वत्कवयः कवयः केवलकवयस्तु केवलं कवयः।
कुलजा या सा जाया केवलजाया तु केवलं जाया।।

काव्यद्वारेण शास्त्रमेव प्रथयन्तोऽपि कवयो बहव आसन् । भट्टिकाव्यादिभिः परिपोषितायाः शास्त्रकाव्यपरम्परायाः सातत्यं सुदीर्घकालावधौ प्रथते।

प्रतिभाव्युत्पत्योरधिगमतारतम्यमुपलक्ष्यबुद्धिमानाहार्यबुद्धिरौपदेशिक इति त्रिविधाः, तेष्वपि कविकर्मकौशलभेदेन रचनाकविः, शब्दकविरर्थकविरलङ्कारकविरुक्तिकवी रसकविर्मार्गिकविः शास्त्रार्थकविरित्यष्टधा। तेषु च काव्यविद्यास्नातकः हृदयकविः अन्यापदेशो सेविता घटमानो महाकविः कविराज आवेशिकोऽविच्छेदी सङ्क्रामयिता चेति दशधा कवीनां वर्गीकरणं चक्रे यायावरीयो राजशेखरः ।[७]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिङ्गभूपालस्तु कविप्रकृतिदृशा उदात्त उद्धृतः प्रौढो विनीत इति चतुर्विधं कविं निरूपयति।[८]

लक्ष्यलक्षणयोः सम्बन्धः

लक्ष्यानुसारमेव लक्षणग्रन्था निर्मीयन्ते व्यवस्थाप्यन्ते च लक्षणानि। साहित्यपरम्परायां प्रतिभाजुषां महाकवीनां काव्यानि लक्ष्यभूतानि भवन्ति, तदनुसारमेव परिकल्प्यन्ते लक्षणानि। संस्कृतसाहित्ये वाल्मीकिव्यासकालिदासादयः तत्त्वदर्शिनः कवयः लक्ष्यं काव्यमानदण्डान् वा स्थापयाम्बभूवुर्यदवधार्य आचार्या लक्षणानि निरधारयन् । तथा चोक्तमानन्दवर्धनाचार्येण -

रामायणमहाभारतप्रभृतिनि लक्ष्ये
सर्वत्र प्रसिद्धिव्यवहारं लक्षयतां
सहृदयानाम् .... (ध्वन्यालोके १/१ वृत्तौ)

आर्षकवीनां काव्यं गाहं गाहमेव आचार्यः काव्यशास्त्रसिद्धान्तान् निश्चिनोऽतीत्यपि आनन्दवर्धनः स्वीकुरुते। तद्यथा -

वाल्मीकिव्यासमुख्याश्च
ये प्रख्याताः कवीश्वराः।
तदभिप्रायबाह्योऽयं
नास्माभिर्दर्शितो नयः।। ध्वन्या. ३/१९

परवर्तिनः कवयस्तु आचार्यैर्निर्धारितान् राद्धान्तान् परिभाव्य तदनुसारं काव्यकर्मणि प्रवृत्ताः। प्रतिभासम्पन्नाः सुकवयः शास्त्रबाह्यं कवयन्तः क्वचिन्नवीनसिद्धान्तनिर्धारणाय आचार्याणां प्रेरयितारोऽभूवन् । इत्थं लक्ष्यलक्षणयोः पारस्परिकः पोष्यपोषकभावोनुग्राह्यानुग्राहकभावो वा उभयथा घटमानः संस्कृतकाव्यपरम्परां संवर्धयाञ्चकार। तथाहि - महाकाव्यस्य सर्गबन्ध इति संज्ञा रामायणे काण्डानां सर्गेषु विभाजनेनायाता स्यात् । तथैव महाकाव्यमिति काव्यविधाविशेषस्य नामकरणम् -

कर्ता काव्यस्य महतः क्व चासौ मुनिपुङ्गवः
रामायणे १/९४/२३

महत्त्वाद् भारवत्त्वाच्च महाभारतमुच्यते
महा. आदि. १/२०९

इति इतिहासद्वये महत्पदप्रयोगात् अधिगतमाचार्यैरित्यनुमातुं सुकरम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महाकाव्ये महाकुलप्रसूतः धीरोदात्तो भवेन्नायक इति नियमेन पाणिनिप्रणीत-जाम्बवतीविजयप्रभृतिपुरातनमहाकाव्येभ्य आगतेन भवितव्यम् । परन्तु "एकवंशभवा भूपा कुलजा बहवोऽपि वे" ति यो विकल्पो नायकविषये विश्वनाथेनायोजि, तस्य स्रोतः वरीवर्ति कालिदासस्य रघुवंशमहाकाव्यमेव।

कालिदासस्यैव ऋतुसंहारमेघदूत उपजीव्य सङ्घातादयः काव्यप्रकारा आचार्यैरुद्भाविताः। मुक्तकमधिकृत्य आचार्येषु प्रचलितां धारणाममरुकः स्वकृतित्वेन परिवर्तयामासेति आनन्दवर्धनकृतेन विवेचनेन विज्ञायते। तथाहि वामनरुद्रटादिभि-र्महाकाव्यव्यतिरिक्ताः श्रव्यकाव्यविधाः क्षुद्रकाव्यमिति संज्ञप्ताः। एतेनोपेक्षाबुद्धि-स्तेषामाचार्याणां मुक्तकादिकाव्यानि प्रति प्रतीयते। वामनस्तु "नानिबद्धं चकास्त्येकतेजः परमाणुवदिति स्पष्टमूचिवान् । आनन्दवर्धनस्तु 'मुक्तकेष्वपि प्रबन्धेष्विव रसाभिनिवेशिनः कवयो दृश्यन्ते। तथाहि-अमरुककवेः शृङ्गाररसस्यन्दिनः प्रबन्धायमानाः श्लोकाः प्रसिद्धा' एवेति निगदन् मुक्तकस्य महावाक्यत्वमूरीचकार। तत्रामरुककवेः रसभावसमृद्धं कान्तिमयं कवित्वमेवास्या धारणाया मूलम् ।

अलङ्कार-गुण-रीति-काव्यपाक-पद-शय्यानां नाना काव्यकोटयो या आचार्यैर्निरूपितास्तासां प्रभवस्थानं सुकवीनामुत्तमकाव्यमेव। नाट्यशास्त्रे भरतमुनि-श्चतुर अलङ्कारान् लक्षयामास। ते यथा - उपमा, दीपकं, यमकं रूपकञ्च। दण्डिना ३७, भामहेन ४३, उद्भटेन ४८, आनन्दवर्धनेन ५०, रुद्रटेन ८३, भोजेन १११, मम्मटेन ११४, रुय्यकेण १२०, शोभाकरमिश्रेण १५७, जयदेवेन १७८, विश्नाथेन १८०, अप्पयदीक्षितेन च २०१ अलङ्कारा निरूपिता उल्लिखिता वेति तत्र उत्तरोत्तर-संख्यावृद्धेः कारणमपि संस्कृतकाव्यपरम्पराया विकासस्तदनुशीलनं च वर्तते।

कविप्रतिभाया विशिष्टाभिव्यक्तिः, तद्वशादुन्मीलितं पदार्थस्य अलौकिकं रूपं च कविसमयं निर्माति। राजशेखरस्तु कविसमयविषये कविबद्धमेव प्रमाणतया अमंस्त आह च -

देशेषु पदार्थानां व्यत्यासो दृश्यते स्वरूपस्य।
तत्र तथा बध्नीयात् कविबद्धमिह प्रमाणं नः।।
(काव्यमीमांसा अ. १८)

काव्यस्वाददृशा महाकवीनां रचनासु अनुभूयमानं तारतम्यमपि काव्यपाक-विवेचनाय प्रेरयामास आलङ्कारिकान् वामनराजशेखरादीन् । एवमेव ध्वनिप्रस्थानस्य तथैवौचित्यप्रस्थानस्यापि विचारदर्शनं काव्यभूमिकात एव उदभिद्यतेति स्फुटमेव।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पालिप्राकृतापभ्रंशकाव्यैः संवादः

आ वेदसंहिताभ्यः संस्कृतवाङ्मयमेव पालिप्राकृतादिभाषासु विरच्यमाणस्य विपुलसाहित्यस्य प्रेरकं चोपजीव्यं च बभूव, तेनानुप्राणितमितरभाषासु रचनाकर्म। अनन्तरं च आ बुद्धमहावीरयोराविर्भावात् संस्कृत-पालि-प्राकृत-भाषासु साहित्यरचना समं समुल्ललास। एतासां भाषाणां कवयः शास्त्रकाराः परस्परं भावयन्तः पूर्वसूरिणां दायमूरीकुर्वन्तः सरस्वतीमसेवन्त साहित्यभाण्डारं च समृद्धिमनयन्त। यदि प्रवरसेन-पुष्पदन्तप्रभृतयः प्राकृतापभ्रंशकवयः संस्कृतमहाकविभ्यः प्रभावितास्तर्हि सातवाहनहालेन सङ्कलिता "गाहासत्तसई" संस्कृतमुक्तकेष्ववितथां प्रभावमुद्रामङ्कयामास। अमरुकादिकविषु प्राकृतगाथासाहित्यस्य भावसाम्यं तत्प्रतिफलनं वा भृशमनुभूयत एव । आर्यासप्तशतीकारो महाकविर्गोवर्धनस्तु स्फुटमेव ऊरीकरोति प्राकृतगाथानां श्रेष्ठतां तासां स्वरचनासु प्रभावञ्च।[१]

अन्यच्च बहवो महाकवयः संस्कृतप्राकृतादिभाषासु समाननैपुण्येन कवयामासुः। आचार्य आनन्दवर्धनः संस्कृते देवीशतकं नाम चित्रकाव्यकौशलकलान्वितं काव्यं कलयामास, स एव प्राकृते विषमबाणलीलां नाम प्रसादगुणप्राञ्जलां रचनामपि ससर्ज । सेतुबन्धकारस्य प्रवरसेनस्य विलसन्ति संस्कृते सुभाषितश्लोकाः। तथैव गउडवहो-महाकाव्यकर्तुर्वाक्पतिराजस्यापि। संस्कृतमहाकवयोऽपि प्राकृतकाव्यं प्रति बहुमानपरा अभूवन् । तथा चोक्तं राजशेखरेण -

गिरः श्रव्या दिव्याः प्रकृतिमधुराः प्राकृतधुराः।

-बालरामायणे १.११

परुसा सक्कअबंधा पाउवबंधो वि होइ सुउमारो।

-कर्पूरमंजर्याम् १/८

सत्यामपि पालिप्राकृतयोः प्रचुरकाव्यरचनायां न तत्र काव्यशास्त्राणां तथा निर्माणमभूद् यथा संस्कृते। चिन्तनस्य शास्त्रविवेचनस्य च भाषा तु सदैव संस्कृतमेव बभूव। संस्कृतकाव्यशास्त्रस्य आचार्यैरपि लक्षणनिरूपणे प्राकृतगाथा अहमहमिकया उदाहृताः। आनन्दवर्धनः स्वोपज्ञप्राकृतकाव्यविषमबाणलीलातः स्वत एवोदाहरति ध्वन्यालोकवृत्तौ गाथाः। मम्मटादयोऽप्यालङ्कारिका उत्तमकाव्यमुदाहरन्ति प्राकृतगाथाभ्यः प्रायशः। भोजराजस्तु शृङ्गारप्रकाश-सरस्वतीकण्ठाभरणयोः प्रायशः प्राकृतगाथासहस्रमुद्धार वस्तुतः संस्कृतकाव्यशास्त्राचार्या अतिविपुलामन्यथाविलुप्तां प्राकृतकाव्यसम्पदमुद्धरणैरुद्धरन्तो ररक्षुरिति निश्चप्रचम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पालित्रिपिटकवाङ्मयान्तवर्तिनी दार्शनिकविचारधारा चिन्तनसरणिर्वा संस्कृतकाव्येषु न न स्वप्रभावमुट्टङ्कयाञ्चकार। केचन विद्वांसः सन्देशकाव्यपरम्पराया मूलं तत्रैव पश्यन्ति। अश्वघोषस्य महाकाव्यद्वये पद्यचूडामणौ वा बुद्धघोषप्रणीते तथा कफ्फिणाभ्युदये वा पालिबौद्धसाहित्यस्य प्रभावः स्फुटतितराम् ।

संस्कृतकाव्येषु भारतीयताया अभिज्ञानम्

संस्कृतवाङ्मये भारतराष्ट्रस्यात्मा सर्वाङ्गसुन्दरं सङ्क्रान्त इति न संशीतिः। तत्रापि तदीयं सर्वथा ललितरमणीयं कमनीयं हृद्यनिरवद्यं च रूपं संस्कृतकाव्येष्वभिव्यक्तिमुपागतम् । भारतानां भौगोलिकं स्वरूपम् आध्यात्मिकं वैभवं शास्त्रचिन्तनं जीवनदर्शनं चैतत् सर्वं संस्कृतकवय आत्मसात् कृत्वा ललितं प्रकटीचक्रुः काव्यरीत्या।

भूगोलदृष्ट्या आसेतुहिमाचलं आगान्धारकामरूपं रूपमस्य राष्ट्रस्य संस्कृतकवीनां कृते काम्यमभवत् , तदैव च पुराणकारा अपि निरदिशन् -

उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम् ।
वर्षं तद् भारतं नाम भारती तत्र सन्ततिः।।

(विष्णुपुराणे २/३/१, ब्रह्मपुराणे १९/१)

पुराणकाराणां व्यासानां देशप्रेम्णः पराकाष्ठैव वस्तुत इयं यत् ते देवानपि भारतभुवि समवतरणसमुत्सुकान् भारतीयजनतां च स्पृहणीयां धन्यां च मन्यमानान् निरूपयन्ति। तद्यथा विष्णुपुराणमाह -

गायन्ति देवाः किल गीतकानि
धन्यास्तु ते भारतभूमिभागे
स्वर्गापवर्गास्पद हेतुभूते
भवन्ति भूयः पुरुषाः सुरत्वात् ।। इति।

भारतस्य प्रतिष्ठेयं कर्मणः प्रतिष्ठामेव प्रगुणयति यतोहि 'कर्मभूमिरियमतोऽन्या भोगभूमयः।' भागवतमपि भारतीयां भावनामित्थमभिव्यानक् -

अहो भुवः सप्तसमुद्रवत्या द्वीपेषु वर्षेष्वधिपुण्यमेतत् ।
गायन्ति यत्रत्यजना मुरारेः कर्माणि भद्राण्यवतारवन्ति।। '

(भाग ५/६/१३)

पूर्वापरौ तोयनिधी वगाह्यस्थितस्य पृथिव्या मानदण्डस्येव हिमालयस्य रम्यमुज्ज्वल-चित्रमङ्कितं कुमारसम्भवे कविकुलगुरुणा, तथैव रघुवंशे क्वचिद् वङ्क्षुतीरे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्वचित् कामरूपेषु क्वचित् केरलेषु भृशं भ्रमणमकारि तेन। मेघदूतयात्रापथं निरूपयता च महाकविनाऽस्य देशस्य पावनानि तीर्थस्थलानि, नद्यः, पर्वता, नगराणि च स्वलेखन्या सजीवानीव परिस्फुरन्ति चक्षुःसमक्षमवतारितानि। कालिदासो वस्तुतोऽस्माकं राष्ट्रकविरिति शक्यते वक्तुम् । अस्य देशस्य ऋतवो निसर्गरामणीयकं नगरजीवनं ग्रामजीवनं च चित्रीकृतं महाकविभिरपरैरपि।

प्रकृत्याऽतीवरमणीयो भारतदेशो यत्र कामपि कमनीयां छटां प्रकटयन्ती नरीनृत्यति निसर्गनटी। महाकवयस्तु निसर्गसौन्दर्यमिह दर्शं दर्शं तदाकाराकारितां तत्तादात्म्यं चानुभवन्ति स्म।

निसर्गतादात्म्यावच्छिन्नचेतसास्तेऽनूचानाः सुकवय ऋतम् आनन्दं च साक्षाच्चक्रुः। तदेव तेषां मनीषासु परमं तत्त्वमिति भावितम् । उक्तं चोपनिषदि - "रसो वै सः। रसं ह्येवायं लब्ध्वाऽऽनन्दीभवति। आनन्दाद्ध्येव खल्विमानि भूतानि ज़ायन्ते, आनन्दं प्रयन्त्यभिसंविशन्ति चेति। काव्यानुभूतौ अयमेवानन्दो रस इति व्यपदेशेन व्यवस्थापित आलङ्कारिकैः। अत एव काव्यसृष्टेरीश्वरसृष्टिसमकक्षत्वं कवेश्च ऋषितुल्यता समाख्याता। उक्तमेव भट्टतौतेन —

नानृषिः कविरित्युक्त ऋषिश्च किलदर्शनात् ।
विचित्रभावधर्मांशतत्त्वप्रख्या च दर्शनम् ।
स तत्त्वदर्शनादेव शास्त्रेषु पठितः कविः।

इति।

अयमानन्दः समग्रायामपि सृष्टौ अनुस्यूतः। ईश्वरोऽपि समग्रसृष्टौ तथैव विलसति। अस्यैव जगतः सौन्दर्य आनन्दानुभूतौ चेश्वरस्य साक्षात्कारे पर्यवस्यति। संस्कृतकवयस्तु ईश्वरं जगति अवतरन्तम् अवतितीर्षन्तं च चित्रयाञ्चक्रुः, जागतिक-भावैः स्पृष्टं तं प्रदर्शयामासुश्चः। तथा चाह कालिदासः

स्वयं विधाता तपसः फलानां
केनापि कामेन तपश्चचार।।

(कुमारसम्भवे १/५७)

तथा -

कमपरमवशं न विप्रकुर्यु -
र्विभुमपि यदमी स्पृशन्ति भावाः ।। (तत्रैव ६/९५)

भक्तोऽपि कविः क्वचिदीश्वरमुपालभते, क्वचिच्च पारिवारिक-सम्बन्धैर्बन्ध-यति तम् । यथा निसर्गमनुष्ययोस्तथा देवत्व - मानवत्वयोर्नैकट्यमिह प्रत्यक्षमनुभूयते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतश्च मनुष्यस्य महती प्रतिष्ठाऽस्माकं साहित्ये विद्यते। देवास्तस्मै स्पृहयन्ति। देवानप्यसौ क्वचित् प्रत्यादिशति। तथा च कालिदासीयो रघुरिन्द्रमाह -

गृहाण शस्त्रं यदि सर्ग एष ते
न खल्वनिर्जित्य रघुं कृती भवान् ।। (३/५१)

पुराणेष्वपि प्रतिपादितमेतदेव विशदम् ---

देवानामपि विप्रर्षे सदेवैष मनोरथः।
अपि मानुष्यमाप्स्यामो देवत्वात् प्रच्युताः क्षितौ।
मनुष्यः कुरुते तत् तु यन्न शक्यं सुरासुरैः।।

(मार्कण्डेयपु. ५७/६३)

तथा च

अद्यापि देवा इच्छन्ति जन्म भारतभूतले।
कदा पुण्येन महतः प्राप्स्यामः परमं पदम् ।।

(बृहन्नारदीये ३/५१)

जीवनस्य यत् सर्वाङ्गरम्यमुदात्तं रूपं मनुष्यलोकेऽवलोक्यते तन्न स्वर्गादावपि सुलभमिति मन्यमाना महर्षयो मनुष्यस्याभ्युदयनिःश्रेयससिद्धिं निदर्शयामासुः। तेन पुरुषार्थचतुष्टयम् आश्रयचतुष्टयी च तैर्व्यवस्थापिता गुणकर्मविभागश्चातुर्वर्ण्यं च परिकल्पितम् । इमा भारतीया अवधारणाः संस्कृतकाव्येष्वपि प्रतिफलिताः। कालिदासीयनायकानाम्

शैशवेभ्यस्तविद्यानां यौवने विषयैषिणाम् ।
वार्धक्ये मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ।।

चरित्रे इयमेव रीतिः। आलङ्कारिका अपि पुरुषार्थचतुष्टयसिद्धिं काव्यानुशीलनेनाहुः। उक्तं हि भामहेन -

धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।
प्रीतिं करोति कीर्तिं च साधु काव्यनिषेवणम् ।।

(काव्यालङ्कारे १.२)

कुन्तकोऽपि सहृदयहृदयाह्लादकारकं काव्यबन्धं धर्मादिसाधनोपायममंस्त (वक्रोक्तिजीविते १/३)।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यद्यपि काव्येषु सर्वत्र रसप्रतीतिरेव परिणतिस्तथापि " रामादिवद्वर्तितव्यं न रावणादिवदित्याद्युपदेशसंवलिता पुरुषार्थसिद्धिः सर्वत्रैव काव्यानुभूतौ परोक्षतयाऽनुषक्ता। वस्तुतो भारतीयं जीवनदर्शनं धारयन्त्येव संस्कृतकाव्यानि रसात्मकबोधं प्रत्याययन्ति। भारतीयजीवनदृष्टौ कालस्य विशिष्ट एव बोधो विलसति। अथर्ववेदस्य कालसूक्ते (१९/५३) विशदं निरूपितोऽयं कालबोधस्तद्यथा तत्राद्यो मन्त्रः-

कालो अश्वो वहति सप्तरश्मिः
सहस्राक्षो अजिरो भूरिरेताः।
तमारोहन्ति कवयो विपश्चित -
स्तस्य चक्रा भुवनानि विश्वा।।

निखिलमपि भुवनमण्डलं भ्रमयन्तं कालाश्वं कवयो विपश्चितश्चारोहन्ति, त एव कालमतिक्रान्तुं क्षमन्ते। यदुक्तं कल्हणेन -

कोऽन्यः कालमतिक्रान्तं नेतुं प्रत्यक्षतां क्षमः।
कविप्रजापतींस्त्यक्त्वा रम्यनिर्माणशालिनः।।
(राजतरङ्गिण्याम् १/९)

कालचक्रस्यावर्तनं विवर्तनं च विविधं विशदयन्ति संस्कृतकवयः काव्यप्रसङ्गैः। कालातिक्रमणक्षमा प्रज्ञा नरं नैराश्यगर्ते निपतन्तमुत्थापयति, नात्मानमवसादयेदिति भावं हृदयङ्गमयति। मेघदूतीयो यक्ष एतस्या भावभूमेः साक्षान्निदर्शनम् । स आह -

कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण।।

कालविषये विशिष्टेयं दृष्टिर्न स्थूलजगतो नश्वरसत्तायां रमयति, "एकान्तविध्वंसिषु मद्विधानां पिण्डेष्वनास्था खलु भौतिकेषु" इति रघुवंशद्वितीयसर्गे कविवचःप्रामाण्यात् । कालिदासादिषु शृङ्गारस्यैकपक्षमयं चित्रणमिति यदाधुनिकाः केचन कथयन्ति तदपि न विचारसहम् । रघुवंशेऽग्निवर्णस्य निर्मर्यादं कामोपभोगं यथा ताटस्थ्येन कविना चित्रितं तथैव प्रादर्शि तदीया बीभत्सा परिणतिरपि -

तस्य पाण्डुवदनाल्पभूषणा
सावलम्बगमना मृदुस्वना।
राजयक्ष्मपरिहानिराययौ
कामयानसमवस्थया तुलाम् ।। (रघुवंशे १९/५०)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजयक्ष्मणः क्षीणदशायाः कामोपभोगदशायाश्च न कोऽपि विशेष महाकविदृष्ट्या।

भारतीयजीवनदर्शनस्य तद्गतविशिष्टकालबोधस्य भावनात् संस्कृतकवि भिर्जीवनस्यैकपक्षीयं रूपं न प्रस्तुतम्, तस्य सर्वाङ्गीण एव विकासो निर्दिष्टः। अयमेव हेतुर्यदस्माकं महाकाव्येषु प्रायशः पुरातनकथा एव रामायणमहाभारतादिभ्यो गृहीता कविभिः। केवलं समकालिकजीवनं क्षणिकवर्तमानमेव वा यानि काव्यानि विषयीकुर्वन्ति तेषु जीवनस्य खण्डितमेव रूपमायाति। संस्कृतमहाकवयो न कालस्य खण्डविशेषं केवल विषयीकुर्वन्त्यपितु अतीतानागतवर्तमानेषु सततमनुस्यूतां तदीयामखण्डसत्तामपि विषयीकुर्वन्ति। इयं च भारतीया दृष्टिरतीतस्यापि वर्तमाने सजीवां सत्तामनुभावयति, तद्यथाहुर्महाभारतकाराः —

यस्य बुद्धिः परिभवेत् तमतीतेन सान्त्वयेत् ।

(आदिपर्वणि, १४९/७४)

इत्थं च पुरातनं संस्कृतकाव्यपरम्परायां सदैव नवायते, अतीतस्य वर्तमाने साक्षात्क्रियमाणस्य पुनः सृष्टेः।

यस्य परमतत्त्वस्य सर्वव्यापित्वं सर्वात्मकत्वं च ऋषिभिः रानन्दरूपेण रसरूपेण वां साक्षात्कृतं मानवीयसम्बन्धेषु प्रेमरूपेण तस्यैव समुल्लासः कविभिरवालोकि। प्रेम्णि अनन्यनिष्ठाया अद्वितीयं चित्रणं संस्कृतकाव्येषु प्रस्तुतम् । दाम्पत्यस्य सर्वातिशायिनी प्रतिष्ठाप्यत्रैव समुल्लसति, नार्या गौरवमपि तथैवात्र परिभावितम् । कालिदासः स्वकाव्येषु प्रेम विषयीकुर्वंस्तस्य परिष्कारं परिव्याप्तिं च साधु प्रकटीकुरुते। मेघदूते

स्नेहानाहुः किमपि विरहे ध्वंसिनस्ते त्वभोगा -
दिष्टे वस्तुन्युपचितरसाः प्रेमराशीभवन्ति।।

इति यक्षस्योक्तौ सारं प्रेणोऽनुभूतेर्महाकविना समुपस्थापितम् ।

वैदिकपरम्परायां समुल्लसिता संस्कृतकाव्यधारा यथा नारीं गार्हस्थ्यं दाम्पत्यं च तीर्थजलाभिषेकैरिव पावयामास गौरवेण च मण्डयामास, न तथा निर्वेदपरायण- बौद्धजैनपरम्पराणां काव्यधारा । वेदेतिहासपुराणभावनापरायणाः सुकवयस्तु -

नास्ति भार्यासमं मित्रं नरस्यार्तस्य भेषजम् ।

(म.भा. ३/५८/२८)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यस्य वै तादृशी भार्या धन्यः स मनुजो भुवि।
भार्या हि परमो नाथः पुरुषस्येह विद्यते।।
नास्ति भार्यासमं किञ्चिन्नरस्यार्तस्य भेषजम्।

नास्ति भार्यासमो बन्धुर्नास्ति भार्यासमा गतिः।
नास्ति भार्यासमो लोके सहायो धर्मसाधनः।।
(तत्रैव १२/१४२/७-१०)

भारतीयपरम्परा पुरुषार्थचतुष्टयावाप्तौ जीवनस्य परिपूर्णविकासं कामयते। पुरुषार्थेष्वपि त्रिवर्गसिद्धिः प्रथमः कल्पः, सोऽपि दाम्पत्यं गार्हत्स्थ्यं च ऋते न सिद्ध्यति, तस्यापि सिद्धिः सद्भार्याधीनेति सर्वत्र नः संस्कृतिः नारीमपेक्षमाणा तिष्ठति उच्चतर-जीवनादर्शानाामुपलब्ध्यै। अतो मार्कण्डेय आह---

भर्तव्या रक्षितव्या च भार्या हि पतिना सदा।
धर्मार्थिकामसंसिद्ध्यै भार्या भर्तृसहायिनी।।
यदा भार्या च भर्ता च परस्परवशानुगौ।
तदा धर्मार्थिकामानां त्रयाणामपि सङ्गतम्।।
कथं भार्यामृते धर्ममर्थं वा पुरुषः प्रभो।
प्राप्नोति काममथवा तस्यां त्रितयमाहितम् ।।
तथैव भर्तारमृते भार्या धर्मादिसाधने।
न समर्था त्रिवर्गोऽयं दाम्पत्यं समुपाश्रितः।।
(मार्कण्डेयपुराणे २१/६८-७२ कालिकातासं. पृ. १३३)

कालिदासादिभिश्च त्रिवर्गसिद्ध्यै नार्या उपादेयतां वीक्ष्य शीलप्रकर्षदृष्ट्या स्त्रीपुंभिदा सर्वथा निरस्ता -

स्त्रीपुमानित्यनास्थैषा वृत्तं हि महितं सताम्
क्रियाणां खलु धर्म्याणां सत्पत्न्योमूलकारणम् ।।
(कुमारसम्भवे ६/१२,१३)

गृहिणीपदं किमपि गौरवास्पदं वर्तते संस्कृतकवीनां कृते। तथैव तत्साहचर्यात् पारिवारिकसम्बन्धानां या माधुर्यसम्भृता रसमयी अभिव्यक्तिः संस्कृतकाव्येषू जाता साापि विश्वसाहित्येऽद्वितीयैव। गृहिणीं प्रति पत्युः प्रणतिपरायणतामपि श्लाघते भारतीयेयं परम्परा, तदुदाहरणानि तु कालिदासामरुकादिषु दृश्यन्ते भूयांसि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुरुषप्रधाने समाजे नार्या यदा यदा अवमानना भवति, तदा तदा महाकवयस्तस्या गौरवस्य शक्तिश्च स्मारयन्ति जनान् । आदिकविस्तु सीतां पृथिव्याः साम्राज्ञीभूतां द्रष्टुमाचकाङ्क्ष। वसिष्ठमुखेन स आह -

आत्मा हि दाराः सर्वेषां दारसङ्ग्रहवर्तिनाम् ।
आत्मेयमिति रामस्य पालयिष्यति मेदिनीम् ।।
(अयोध्याकाण्डे ३७/२४)

कालिदासेन अग्निवर्णगृहिण्या राज्याभिषेकं विधाय वाल्मीकेरेव स्वप्नः साकारतां प्रापितः, राज्ञ्या राज्यपालनं तथैवाव्याहतादेशत्वं च तेन निरूपितम् -

राज्ञी राज्यं विधिवदशिषद्
भर्तुरव्याहताज्ञा।। (रघुवंशे १९/५७)

संस्कृतकाव्यधारा भारतीयताया प्रातिनिध्यं विधत्ते। अत एव तत्र निहितां समन्वयभावनां सहिष्णुतामप्यसौ सम्यक् चरितार्थयति। यद्यपि शास्त्रार्थदृष्ट्या दर्शनप्रस्थानभेदबुद्ध्या वा वैदिका बौद्धा जैनाश्च परस्परं कलहायन्ते, परन्तु संस्कृतकवयस्तु सर्वधर्मसमादरबुद्धिं प्रकटीकुर्वन्ति साम्प्रदायिकवैमत्यं रसतरङ्गिण्यां निमज्जयन्ति। क्षेमेन्द्रशिवस्वामिप्रभृतयः सुकवयो बुद्धस्य चरितं विषयीकृत्य काव्यानि निबबन्धुः। महाकविर्जयदेवस्तु दशावतारेषु बुद्धं समावेशयन् भक्तिविनम्रस्तं स्तौति-

निन्दसि यज्ञविधेरहह श्रुतिजातं
सदयहृदयदर्शितपशुघातम्
केशव धृतबुद्धशरीर !

यद्यपि पन्थानो भिद्यन्ते परन्तु लक्ष्यं समेषां मानवानामेकमेवेति महाकविः कालिदासः सम्यागाह।[१०] एतदेव द्रढयति महाकविः पुष्पदन्तोऽपि -

रुचीनां वैचित्र्याद् ऋजु कुटिलनानापथजुषां -
नृणामेको गम्यस्त्वमसि पयसामर्णव इव।।

भर्तृहरिश्चर्विविधधार्मिकसम्प्रदायानां समुपास्यदेवानां विरोधं परिजिहीर्षुः सामरस्यसंस्थापनेच्छुराह —

यं शैवा समुपासते शिव इति ब्रह्मेति वेदान्तिनो
बौद्धा बुद्ध इति प्रमाणपटवः कर्तेति नैयायिकाः।
अर्हन्नित्यथ जैनशासनरताः कर्मेतिमीमांसकाः
सोऽयं वो विदधातु वाञ्छितफलं त्रैलोक्यनाथो हरिः।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

079076

संस्कृतकाव्येषु समकालिकबोधः

संस्कृतमहाकाव्यानि प्रायशः पौराणिकं वस्तु विषयीकुर्वन्ति। ऐतिहासिकमहा-काव्यानामपि कापि परम्परा विलसति संस्कृतसाहित्ये। एतेषु ऐतिहासिकमहाकाव्येषु यद्यपि नायकः कवेः समकालिकः, परन्तु कविना तदीया दोषाश्छादिता गुणाश्च पर्वतीकृत्य विशदिताः। यथा नवसाहसाङ्कचरित-विक्रमाङ्कदेवचरितादिमहाकाव्येषु अलौकिकतत्त्वानां समावेशेन नायकानां दैवीकरणेन च पौराणिकमहाकाव्यवदेव विषयवस्तु प्रस्तुतं भवति। एवं हि सति संस्कृतकाव्येषु समकालिकबोधो यथार्थचित्रणं वा न विद्यत इत्याक्षिपन्ति नव्याः।

संस्कृतमुक्तकेषु समकालिकजीवनस्य अनेकत्र यथार्थचित्रणं विहितम्। तत्र नैकैः कविभिर्ग्रामजीवनस्य निम्नवर्गजनानां दारिद्र्यस्य अभावानां सङ्घर्षस्य चातीवसूक्ष्मेक्षिकया अत्यन्तं मर्मभेदि यथायथमुद्घाटनमकारि।[11] एवमेव अन्योक्तिष्वपि परोक्षतया कविः स्ववर्तमानं कटाक्षीकुरुते। महाकाव्येष्ववश्यमुदात्तमतीतगतं लौकिक-यथार्थातिक्रमणरम्यं किमपि वस्तु उपस्थाप्यते परन्तु तत्रापि समकालिकजीवन-गतो यथार्थः अवशं सङ्क्रामति, क्वचिच्च जानता कविना सचेतनभावेन अतीतवातायनाद् वर्तमानकाल एवावलोक्यते, पौराणिककथाद्वारेण स्वजीवनस्य स्वकालस्य स्वसमाजस्यैव वा व्याख्या विधीयते। महाकवीनामलोकसामान्यप्रतिभाजुषां तु अयमेव पन्थाः। तद्यथा कालिदासो रघुवंश इन्दुमतीस्वयंवरव्याजेन भारतभुवः शासकानां नाना राज्ञां चरितमुद्घाटयामास, रघोर्दिग्विजयप्रसङ्गेन वङ्क्षुतटे हूणानां पराजयमङ्कयामास, क्वचिच्च नगर-राज्यस्थित्यादिवर्णने स्वानुभूतं जीवनमपि आदर्शस्थितौ पुराणवस्तुनि वा संयोजयामास। यथा अयोध्यायां राजमार्गेऽर्धरात्रे सुप्तानां वाणिनीनामिदं चित्रम्-

यस्मिन् महीं शासति वाणिनीनां
निद्रां विहारार्धपथे गतानाम् ।
वातोऽपि नास्रंसयदंशुकानि
को लम्बयेदाहरणाय हस्तम् ।। (रघु. ६/७५)

अत्र स्वानुभूतस्य प्रत्यक्षदृष्टस्य वा स्मृतिरुपस्थापिता, आदर्शयथार्थयोः सम्मिश्रणं च विहितम् । एवमेव कविरयं रघुवंशे हैयङ्गवीनमादाय घोषवृद्धानुपस्थितान् विधत्ते (१/४५), पारसीकानां पाश्चात्त्येनाश्वसैन्येन युद्धं रघोः कारयति (४/६२), केरलेषु नारिकेलासवपानं शंसते (४/४२)। एतादृशवर्णनेषु साङ्कर्यं भवति कविप्रत्यक्षदृष्टवस्तु-जातस्य परम्परया ज्ञातस्यातीतस्य च। अग्निवर्णस्य कामलोलुपताया अतिरञ्जितं चित्रणं तु स्वसमकालिकसामन्तसमाजस्य च क्षयिष्णु चरित्रं साहसिकतयोद्घाटयति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्वचिन्महाकवयः पुरातने प्रागैतिहासिकेऽपि कथानक ऐतिहासिकमित्तिवृत्त सूचयन्तस्तद्द्वारेण पुराणस्यैतिहासदृशा इतिहासस्य च पुराणदृशा व्याख्यां कुर्वन्तः प्रतीयन्ते। तथाहि- भारविकृतकिरातार्जुनीये द्रौपदी युधिष्ठिरमाक्षिपति-

> **गुणानुरक्तामनुरक्तसाधनः**
> **कुलाभिमानी कुलजां नराधिपः।**
> **परैस्त्वदन्यः क इवापहारये-**
> **न्मनोरमामात्मवधूमिव श्रियम्** ।। (१/३१)

गुप्तकालस्यावसानवेलायां तदनन्तरं वा समुद्भूतो भारविरिह शकराजभिया भार्यां ध्रुवस्वामिनीं दित्सन्तं रामगुप्तं कटाक्षयति इति सुकरमनुमातुम् ।

विष्णुवर्धनयशोवर्मा दशपुरं षष्ठशतके शशास। आ ५८२ वैक्रमाब्दात्५९२ वैक्रमाब्दं यावत् वर्तते तस्य शासनकालः। दशपुरविजयस्तम्भशिलालेखे यादृशं चित्रितं वर्तते तदीयं चरित्रं शौर्यमवदानं वा तत् अन्धकारमये तस्मिन् काले दीप्यमानं ज्योतिरिव प्रतिभाति, अवसादवेलायामाशामिव सञ्चारयति, पराजितराष्ट्राय विजयप्रत्ययं प्रददाति। भारविः किरातार्जुनीयस्योपक्रम एवावसादं पराजयस्यानुभवं साकारयन्नर्जुनस्य चरित्रेण तत्र आशाया ज्योतिरिव दीपयति। भारविर्यशोवर्मणः समकालिकः अर्जुनस्य यशोवर्मणश्च च साम्यं सूचयति इति प्रतीयते।

माघस्य शिशुपालवधे तु समकालिकजीवनच्छविः सुस्पष्टं सजीवं स्फुरन्ती अनुभूतिमायाति। माघो मरुभुवि श्रीमालपुर उवास। राजस्थानगतं तदानीन्तनं जनजीवनं विशदं निरूपितं माघेन श्रीकृष्णस्य यात्राप्रसङ्गे। क्वचिदयं शालिक्षेत्ररक्षणे गोपिकायाः सम्भ्रमं (१२/८२), करभभीतेरुल्ललतो रासभान्निपतितामवरोधवधूं (५/७), प्रभाते आहूतं निद्रया शून्यशून्यां गिरं गदन्तं प्रहरिणं (११/८), दधिमथनरतान् कपिशं पिपासतो वा गोपान् (११/८, ३८) तथा निरूपयति यथा सामान्यजनजीवनं प्रत्यस्याभिनिवेशोऽनुरागः स्वसमकालिकसमाजस्य च प्रत्यक्षानुभवः प्रकटीभवति। एवमेव नैषधकारेणापि कुण्डिनपुरनगरापणं नलवरयात्राभोजनं वा वर्णयता स्वानुभूतजीवनं स्मृत्या तत्र सङ्क्रामितम् ।

वस्तुतो भारतीयधर्मदर्शनंसंस्कृतिविषयकपरिपूर्णबोधं वितरति संस्कृतकाव्यसाहित्यम् । तथैव भारतीयजनजीवनं यथार्थं समग्रामपि भारतीयपरम्परां परिचेतुमलं भवतीदं साहित्यम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इदमपरं वैशिष्ट्यं संस्कृतकाव्यजातस्य यन्न्यायस्य प्रतिष्ठापनमन्यायस्य विरोध इति। वस्तुतोऽन्यायस्य प्रतीकाराय प्रवर्तन्ते वाल्मीकिव्यासयोरार्षकव्योर्महाकवीनां भास-कालिदास-भवभूति-भारवि-माघादीनां च वाचः। दुर्मदान्धानां दीनान् दमयतां दुर्बलान् दुन्वतां राज्ञां कृते प्रत्यादेशायन्त इमा वाचः। तथाहि श्रीमद्भागवते भरतो राजानं रहूगणं शास्ति -

अंसेऽधि दार्वी शिबिका च यस्यां
सौवीरराजेत्यपदेश आस्ते।
यस्मिन् भवान् रूढनिजाभिमानो
राजास्मि सिन्धुष्विति दुर्मदान्धः।।

शोच्यानिमांस्त्वमधिकष्टदीनान्
विष्ट्या निगृह्णन्निरनुग्रहोऽसि।
जनस्य गोप्तास्मि विकत्थमानो
न शोभसे वृद्धसभासु धृष्टः ।।

(भाग. ५/१२/६,७)

सन्दर्भाः -

१. पञ्चमी साहित्यविद्येति यायावरीयः। सा हि चतसृणामपि विद्यानां निष्यन्दः। काव्यमीमांसायाम् , द्वितीयाध्याये, पटनासं.पृ. १०

२. उपकारकत्वादलङ्कारः सप्तममङ्गम् - तत्रैव, द्वि.अ., पृ.६

३. स्त्रियो बालाश्च वृद्धाश्च प्रायः क्रीडागता जनाः।
या गाथाः सम्प्रगायन्ति कुर्वन्तोऽध्ययनं तथा।
ता गाथाः शृणु मे शल्य मद्रकेषु दुरात्मसु।।
(कर्ण. २७/७१)

अत्र पिङ्गलया गीता गाथाः श्रूयन्ति पार्थिव।
शान्ति १६८/१४६

अत्राप्युदाहरन्तीमा गाथाः सत्यवता कृताः।
शान्ति १४८/९४

गाथा अप्यत्र गायन्ति ये पुराणविदो जनाः।
आदि. ११२/१३

अत्राप्युदाहरन्तीमा गाथा देवैरुदाहृताः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आर. १३५/१३

४. यजुर्वेदे ३०/६

५. वाल्मीकिरादौ च ससर्ज काव्यं
जग्रन्थ यन्न च्यवनो महर्षिः।।
बुद्धचरिते १/४३

६. पक्षस्य मासस्य वा प्रख्यातेऽहनि सरस्वत्या भवने नियुक्तानां नित्यं समाजः।
कामसूत्रे, नागरकवृत्ते, १५-१६

७. काव्यमीमांसायाम् , पञ्चमाध्याये।

८. रसार्णवसुधाकरे तृतीये विलासे - १४६-४९

९. वाणी प्राकृतसमुचितरसा बलेनैव संस्कृतं नीता।
निम्नानुरूपनीरा कलिन्दकन्येव गगनतलम् ।
-आर्यासप्त. प्रा. ५२

१०. बहुधाप्यागमैर्भिन्नाः पन्थानः सिद्धिहेतवः।
त्वय्येव निपतन्त्योघा जाह्नवीया इवार्णवे।
(रघुवंशे १०/२६)

११. द्र. संस्कृत कविता की लोकधर्मी परम्परे 'ति पुस्तकं ममैव।
संस्कृत परिषद्, सागरम् , १९८६

⊠⊠⊠⊠⊠⌘⌘⊠⊠⊠⊠⊠

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

याथार्थ्यस्य भारतीयावधारणा भवभूतिश्च

इच्छारामो द्विवेदी

भवभूतिधराभूमिर्भवभूतिप्रदो रसः।
भवभूतिकृतं काव्यं समेषां भवभूतये।।[1]

यथार्थस्य भावो याथार्थ्यम् । तस्य याथार्थ्यस्य भारतीया भारते भवा भारतदेशीया वाऽवधारणा विचारसरणिरिति भारतीया अवधारणा। तर्हि किन्नाम याथार्थ्यम्, यथार्थो नाम प्रमाया अर्थः प्रमा च यथार्थानुभवः।[2] यथार्थस्यानुभव एव याथार्थ्यम् । ननु सत्यवस्तुनोऽवधारणविषये नैकमत्यं मुनीनां दार्शनिकानां, विदुषां वा तत्कथं तदवधारणमिति।

उच्चते यथार्थो नाम अनुभवस्य तदुत्पन्नभावस्य न तु शब्दस्य। शब्दस्तु नित्योऽपि[3] सन् देशकालजातिव्यक्तिपरिच्छिन्नत्वाद् विविधार्थगमकत्वाच्च केवलं स्वानुभूतमर्थं बोधयति न तु सम्पूर्णतयोपस्थापयति तदर्थं यथा शर्करेति शब्दस्योच्चारणाद्भारतीयो जनो माधुर्यविशिष्टं सितं पदार्थं ज्ञातुं शक्नोति न पुनराङ्लदेशीयोऽफ्रीकादेशीयो वा भाषया सहाऽपरिचयात् । परं शर्करराया माधुर्यमयोऽनुभवस्तु द्वयोरपि पुरुषयोः समानत्वं भजते। अतः शाब्दिकी, अभिव्यक्तिरपि देशकालजीवादिधर्मापेक्षिणी भूत्वा यथासामर्थ्यमेव वस्तुप्रकाशने क्षमते। अनुभवस्तु भवति यथार्थः। संदेशकालादिपरि-च्छिन्नो नैव भवति। स तु केवलं भवत्यस्तित्वरूपः। ततः कथयितुं शक्यते यत्तस्यैवानुभूतानुभवस्य यथार्थस्य वस्तुनो विषये भारतीयविपश्चितां या अवधारणा आसंस्तासां परिप्रेक्ष्ये महाकवेर्भवभूतेश्चिन्तनं कीदृशमिति विचारयितुं प्रवर्तितोऽयं कल्पः।

भारते दार्शनिकप्रस्थानानां वर्गीकरणं नास्तिकास्तिकयोर्भेदद्वयेनाथवा षड्दर्शनरूपेण प्रायशः क्रियते। किन्तु मूलरूपेण नास्तिकेषु दर्शनेषु प्रायशोदेहाध्यात्मवादमधिकृत्य तज्जन्यसुखदुःखादिसंवेदनोत्थया, प्रज्ञया केवलं देहस्याथवा संसारस्य वर्णनं प्राधान्येनोपन्यस्तम् । तस्मात्कारणादेवात्र तत्तद्दर्शनेषु येऽपि नियमा यमाश्च निर्धारिताः सत्यवस्तुन उपलब्धये, तेषु स्वविचारजन्यस्य ज्ञानस्य प्रामुख्यमुपन्यस्तम् न तु पारम्परिकार्षपरम्परायाः। तानि दर्शनानि सर्वमपि तथ्यं तदैव स्वीकर्तुं प्रेरयन्ति यदा तानि प्रतिवारं प्रतिपुरुषञ्च स्वयं परीक्षितानि स्युः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आस्तिकदर्शनप्रस्थानेषु पुनः ऋषिपरम्परयाऽनुभूतानि तथ्यानि यथा वर्णाश्रमधर्मादीनि यथावत्स्वीकृतानि भवन्ति तथा च तदग्रे तत्त्वविचारपरम्पराऽनुसन्धानं विधीयते। सुमृष्टे, सरले, समतले च पथि यदि अन्धोऽपि प्रचलति तर्हि तत्कृते यात्रा भवति विपत्कारिणी।[४] स सुखेन गन्तुं शक्नोति। अत एव प्रायश समस्तेऽपि भारते तादृशानां मीमांसाद्वैतवेदान्तन्यायादिदर्शनानां बाहुल्येन प्रसरं जातः। एतानि सर्वाण्यपि दर्शनानि यथार्थवस्तुनः संज्ञाने स्वविधिमुपवर्णयन्त्यपि ऋषिपरम्पराप्रणीतं वर्णाश्रमधर्मानुमोदितं शाश्वतं स्वरूपं मानवजीवनस्य स्वीकुर्वन्ति प्रकृतमनुसरामः।

एवम्भूतस्य सत्यवस्तुनो विषये महाकवेर्भवभूतेर्विमर्शः कीदृश आसीदिति विचार्य्यते। एकस्मिन् सुभाषिते नैके सिद्धान्ताः केनाप्येवं वर्णिताः ---

यं शैवाः समुपासते शिव इति ब्रह्मेति वेदान्तिनो
बौद्धा बुद्ध इति प्रमाणपटवः कर्तेति नैयायिकाः।
अर्हन्नित्यथ जैनशासनरताः कर्मेति मीमांसकाः
सोऽयं वो विदधातु वाञ्छितफलं त्रैलोक्यनाथो हरिः।।

तर्हि शिव-ब्रह्म-बुद्ध-कर्तृ-अर्हत्कर्मादिशब्दैस्तत्तत्सम्प्रदायविद्भिः सत्यवस्तुनो निरूपणं विहितम् । तदत्र पदवाक्यप्रमाणज्ञो महाकविर्भवभूतिः श्रीकण्ठपदलाञ्छनः केषाञ्चिन्मते च मीमांसाभाष्यकारक उम्बेकाचार्योऽयं कथं स्वीकरोति सत्यं वस्तु यथार्थं वा एतद् विषये मया समुदाह्रियते मङ्गलाचरणात्मकं प्रथमं पद्यमुत्तररामचरितस्य -

इदं कविभ्यः पूर्वेभ्यो नमोवाकं प्रशास्महे।
विन्देम देवतां वाचममृतामात्मनः कलाम् ।।[५]

नेयं पदावली कस्यापि भावुकस्य कवेः कल्पनाप्रसूताऽपितु भवभूतेः शास्त्रपण्डितत्वादत्र यादृशं यथार्थं ज्ञातुं प्रार्थना विहिता तां सर्वथा कोऽपि शास्त्रवैपश्चितीं विवृण्वानो विद्वान् एव कर्तुं शक्नोति न सामान्यो जनः। मंगलाचरणस्यास्य नैकेऽर्था टीकाकारैर्व्याख्याताः। अत्र पुनः "इद" मिति पदं- "सर्वं खल्विदं ब्रह्मेति[६] वेदान्तवाक्यं स्मारयति। इदं दृश्यमानं जगत् । तस्य कविभ्यो नमोवाकं प्रशास्महे। परमात्मनः कवित्वं तु सर्वस्वीकृतमेव- कविर्मनीषी परिभूः स्वयम्भूः पश्यदेवस्य काव्यं न ममार न जीर्यते इत्यादिश्रुतेश्च। "पूर्वेभ्यः" इति पदमपि पुराणपुरुषस्य कृते युज्यत एव तदा तस्मै नमोवाकं निवेद्य- "अमृतां देवतां वाचमात्मनः कलां विन्देम" इति फलप्राप्तये प्रार्थना। अमृता वाक् या खलु आत्मनः कलात्वेन स्वीकृता ऋषिपरम्परया सा एव दैवी वाक्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चाख्याता [7] तां विन्देम "इत्युक्त्वा महाकविर्भवभूतिः स्वनिष्ठामुद्घोषयन्निवाभाति स्वसत्यवस्तुनः सर्वाधिकाभिलषितवस्तुनश्च विषये।

महाकविरत्र वेदान्तोक्तदिशा तस्मा एवाद्वयाय ब्रह्मणे नमस्कृत्य स्वात्मनि शब्दब्रह्मभावजागरणाय प्रार्थयते। "शाब्दे परे च निष्णात इत्यादि वाक्यैः शब्दब्रह्मणि निष्णात एव परे ब्रह्मणि स्थातुं शक्नोति। यस्य पुरुषस्य छान्दस आत्मा विधिवदधीत-वेदवेदाङ्गत्वेनापाततोऽधिगताखिलार्थोऽस्मिन्जन्मनि जन्मान्तरे वा काम्यनिषिद्ध-वर्जनपुरस्सरं नित्यनैमित्तिकप्रायश्चित्तोपासनानामनुष्ठानेन निर्गतनिखिल-कल्मषतया नितान्तनिर्मलस्वान्तो भवति स एवाधिकारी सत्यवस्तुनो नान्यः कश्चन पुरुषः। [8]

महाकविर्भवभूतिः पदे पदे निदर्शयति स्वसिद्धान्तममुं स्वनाटक उत्तरराम-चरिते। अत एव तस्य नाटके केवलं शास्त्रानुमोदितं भारतीयपरम्परानुप्राणितमेव जगत् प्रतिभासते न तु शास्त्रविरुद्धम्। शृङ्गार-वीर-रौद्र-भयानक-करुणादयो रसा, नानाविधा भावा, जागतिकपरम्पराश्च सर्वेऽपि धर्मा यदि भारतीयमर्यादां स्पृशन्ति तदेव महाकविर्भवभूतिस्तान् वर्णयति नान्यथा। यथा कविकुलगुरुः कालिदासो गान्धर्वविवाहानन्तरं गर्भनिर्भरां, पर्याकुलां स्वकृत्येन शंकितां शकुन्तलां यथा वा दुष्यन्तस्य राजर्षेरार्यं चरितं केवलं भावुकदृष्ट्या वर्णयति न तथा भवभूतिः कर्तुं शक्नोति। महाकविर्भवभूतिर्मर्यादायाः कविः। मर्यादापुरुष एव तस्य नायकः, भारतीयार्षपरम्परा एव तस्य प्राणतत्त्वमतस्तस्य कृते मर्यादानुसारि एव वृत्तं वर्ण्यमासीत्। अस्य विचारस्य समर्थने प्रभूतान्युदाहरणान्युत्तरे रामचरिते द्रष्टुं शक्यन्ते।

अपरञ्च - "यं ब्रह्माणमियं देवी वाग्वश्येवानुवर्तते"[9] इति द्वितीये श्लोके भणति भवभूतिः। अत्र "इव" इति पदं विचारणीयं प्रतिभाति। देवी वाग् वश्या इव प्रतीयतेऽनुवर्तते न तु पूर्णतया वश्या। मङ्गलाचरणे पुनः तस्या एवाधिगमाय प्रार्थना विहिता। तदा —

"उत्पस्यते च मम कोऽपिसमानधर्मा
कालो ह्ययं निरवधिर्विपुला च पृथ्वी।"

इति वाक्यप्रतिपादकस्य कवेः कृते परमावश्यकमेवेदं यद् वाक् तस्य वश्या स्यादेव। तदैव यशंसां चिरस्थ्यायित्वं पूर्णत्वममृतवञ्च सम्भाव्यते।

अस्मिन्नेव क्रमे -

स्नेहं दयाञ्च सौख्यञ्च यदि वा जानकीमपि।
आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा।।[10]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति पद्ये रामेण लोकाराधनाय चत्वारि वस्तूनि त्यक्तुं प्रतिज्ञातम् – स्नेहं, दयां, सौख्यं जानकीञ्च । कस्याराधनाय ? लोकस्य। कोऽयं लोक : ? लोको विष्णुः। "ॐ विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः[१५] इति विष्णोः सहस्रनाम्नि स्पष्टमेव। तस्यैव परब्रह्मण आराधनाय सर्वमेतन्मया त्याज्यम् चत्वारि पदजातानि भवन्ति-नामाख्यातोपसर्ग-निपाताश्च।[११] नाम-क्रिया-कषायाद्युपसर्गा निद्रादयो निपाताश्च। तदेतान् सर्वान् परित्यज्यैव कोऽपि तत्पदमन्वेष्टुं शक्नोति। वेदान्तसिद्धान्तममुं स्वीकृत्य महाकविर्भव-भूतिश्चतुर्णां पदार्थानां परित्यागं दर्शयति।

अत्रेदमाकूतम्। स्नेह-दया-सौख्य-जानकीति शब्दैः किञ्चिद् विशिष्टमर्थं प्रतिपाद-यितुमिच्छति भवभूतिः पदवाक्यप्रमाणज्ञः। महाभारते यथाऽनिरुद्धप्रद्युम्न-संकर्षणरुक्मिणीवासुदेवेति[१२] प्रकारेण वैष्णवपञ्चायतनं वर्णितं यत्र अनिरुद्धः स्थूलचैतन्याभिमानी पुरुषविशेषः, प्रद्युम्नः सूक्ष्मशरीराभिमानी पुरुषविशेषः, संकर्षणः कारणशरीराभिमानीपुरुषविशेषो रुक्मिणी सैवाद्यापराशक्तिः या खलु पूर्णे सति साधनोप्रक्रमे जीवायात्मने वा साम्मुख्यं प्रयच्छति परब्रह्मणः स्वयञ्च विनिवृत्ता भवति। वासुदवेश्च तदेवाद्वयं ब्रह्म। तद्वदत्रापि स्नेहः स्थूलदेहमधिकृत्य प्रवर्तते, दया च मनोव्या-पारजन्यत्वात् सूक्ष्मशरीरापेक्षिणीवाभाति, सौख्यं पुनः कारणशरीरावच्छिन्नतया - सुखमहमस्वाप्सं न किञ्चिदवेदिषमिति परामर्शादथ चानन्दप्रचुरत्वात् सर्वकारणत्वाच्च कारणशरीरेण सह संगच्छते । जानकी जनि प्रादुर्भावे इति धातोर्निष्पन्ना सती जगदुत्पादिका सैव पराशक्तिश्चैतन्याभिमुखी चित्तवृत्तिर्या सर्वं प्रकाश्य रङ्गवद्विनिवर्तते। एतत्सर्वं लोकाराधनाय, विष्णोराराधनाय, परब्रह्मणः प्राप्तये मुञ्चतो मे व्यथा नास्तीति-"न चेदिहावेदीन्महती विनष्टिरित्यादि श्रुतेः।

आलेखस्यास्य परिसमाप्तावेकमन्यदपि तथ्यं वर्णयितुमीहे यदुत्तररामचरितस्य भरते वाक्ये महाकविर्भवभूतिः पुनरपि तामेव वाणीं स्मरति अमृतामात्मनः कलां या तेन मंगलाचरणे स्मृता कांक्षिता च -

तामेतां परिभावयन्त्वभिनयैर्विन्यस्तरूपां बुधाः
शब्दब्रह्मविदः कवेः परिणतां प्राज्ञस्य वाणीमिमाम् ।।

अत्रापि "प्राज्ञस्य" इति पारिभाषिकं पदम् । कारणशरीरं यावदेव वाक्प्रवेशात् तावदेव वाग्व्यापाराश्रयः प्रवर्तितो भवभूतिना यतोहि ततः परं तस्मिन्नवाङ्मनसगोचरे परब्रह्मणि वाक्प्रयोजनाभावात् - "यतोऽप्राप्य निवर्तन्ते वाचश्च मनसा सह " इत्यादि श्रुतेः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथार्थस्य भारतीयाया अवधारणाया विषये महाकवेर्भवभूतेर्विचारसम्मत् सर्वथा शास्त्रसमर्थितां परम्परामेवानुगच्छीति कथने नास्ति संशीतिलेश इति दिक्।

सन्दर्भाः

१. गीतमन्दाकिनी - डॉ. इच्छाराम द्विवेदी "प्रणव" नागप्रकाशक १९९३ ई. पृष्ठ ७३ पद्य सं. ७

२. तर्कभाषा - केशवमिश्रः प्रमाणपरिभाषाप्रकरणे

३. तर्कसंग्रहः अन्नम्भट्टस्य शब्दगुणकमाकाशं तच्चैकं विभु नित्यञ्च।

४. श्रीमद्भागवतएकादशस्कन्ध अं. २ श्लो.

५. उत्तररामचरितम् प्रथमोऽङ्कः श्लो. १

६. वेन्दान्तसारः, महावाक्यार्थप्रकरणे

७. देवीं वाचमजयन्त देवास्तां विश्वरूपाः पशवो वदन्ति।

८. वेदान्तसारे अनुबन्धचतुष्टयप्रकरणे।

९. उत्तररामचरितम् प्रथमोऽङ्कः श्लो.२

१०. उत्तररामचरितम् प्रथमोऽङ्कः श्लो. १२

११. विष्णुसहस्रनामस्तोत्रम् श्लो. १

१२. महाभारतम् मोक्षधर्मपर्व अ. ३३९/श्लो.३२,४६,७२,७४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्यायवैशेषिकयोः पदार्थानां पुनर्व्यवस्थापना

ज्ञानोपाह्वो बच्चूलालोऽवस्थी

अथ धर्मं व्याख्यास्यामः।

इति प्रतिज्ञाय भगवता कणादेन सूत्रितम् —

धर्मविशेषप्रसूताद् द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम् ।
वै. सू. १/१/४

ननु युगेऽस्मिन् कलियुगे कार्यकारणसम्बन्धमात्रेण मीमांसितैः पदार्थैरेव पर्याप्तिमश्नुवानाः किमर्थं धर्मं निःश्रेयसं चाद्रियेरन्निति चेदत्र ब्रूमः। द्विधा हि धर्मशब्दस्य व्यवस्थापनं काणादन्याये परिदृश्यते -

यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः।

इति तावत् प्रथमः कल्पः। द्वितीयश्च साधर्म्यवैधर्म्यपदयोर्दृश्यते। तथा हि -

यस्याधारता निरूपिताऽऽधेयता यस्मिन् प्रतीयते
स प्रतियोगी तस्यानुयोगिनो धर्मः।

यथा घटो भूतलस्य धर्म इति भूतलमनुयोगी भवद् धर्मि निगद्यते, घटश्च तदपेक्षया प्रतियोगीति। द्वितीयं धर्मपदार्थमवलम्ब्य साथर्म्यवैधर्म्ये इह विवेक्तव्ये भवतः। तथा हि

द्रव्यनिष्ठावच्छेद्यता - निरूपितावच्छेदकता गुण-कर्मसामान्यानां साधर्म्यम् - किं वा गुणकर्मसामान्यान्यतमनिष्ठावच्छेदकतानिरूपितावच्छेद्यता द्रव्यनिष्ठेति तेषां साधर्म्यमवसेयम् । समवायसम्बन्धावच्छिन्ना च प्रतियोगिता सामान्ये, तन्निरूपितानुयोगिता द्रव्यगुणकर्मणामिति तेषां साधर्म्यम् । पदार्थत्वेन सर्वेषां साधर्म्यमिति न कापि विप्रतिपत्तिः। समवायिकारणतावच्छेदकाविच्छिन्नत्वं सर्वेषां द्रव्याणां साधर्म्यम् , असमवायिकारणत्वेन गुणकर्मणोः साधर्म्यम् । एवं वैधर्म्यमप्यवसेयम्। न हि वैधर्म्यं विहाय षट्संख्याकत्वं पदार्थानां घटेत।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुण्यकर्मजनकत्वे सति आत्मगुणत्वं धर्म इत्यन्यद् धर्मस्य स्वरूपम् । तं विनोक्तसाधर्म्यवैधर्म्ये नोपस्थातुमर्हतः। न मानवमात्रसाधारणं तत्त्वज्ञानम् , येन सर्वे निः श्रेयसमधिगच्छेयुरिति दिक् ।

प्रमाणप्रमेय - संशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णय-
वादजल्पवितण्डा - हेत्वाभासच्छलजातिनिग्रहस्थानानां
तत्त्वज्ञानान्निःश्रेयसाधिगमः

न्यासू १/१/१

अत्र निःश्रेयसं संशयादिकानां चतुर्दशानामेव पदार्थानां न्यायशास्त्रे गौतमीये माहात्म्यमुल्लसति, प्रमाणप्रमेययोः सर्वदर्शनसाधारण्यात् । तेषु संशयः प्राथम्य गाहते, प्रत्यक्षस्यापि प्रामाण्यस्यानुमानाधीनत्वात् , अनुमानमृते पक्षतायाः संशयाधीनत्वात्, काणादानां गौतमीयानां च परतः प्रामाण्यस्वीकारात् । तत्र संशयस्यैव स्वतोऽप्रामाण्यात्।

उद्योतकरेण संशयस्य याथार्थ्यस्वीकारेण स्पष्टं ज्ञायते तस्यात्रत्यो महिमा। न हि कोऽपि संशयं संशेत इति। तथा हि गौतमपादाः —

संशये नासंशयो नात्यन्तसंशयो वा।

न्यासू २/१/६

सर्वपरीक्षाव्यापित्वात् प्रथमं संशयः परीक्षितः।

न्यायभाष्य २/१/७

ननु को नाम न्यायः ? निगमनं न्यायः। तच्च नितरामुपलब्धिरूपम् । उपलब्धिश्चेहानुमितिरूपा। नानुमितिं विना प्रत्यक्षस्यापि प्रमाणतेति समवोचमेव। अनुमितिश्चेहानुमानप्रमाणेन जातं ज्ञानमिति निश्चयः। सिद्धान्तावयवाविह मेरुभूतौ। तयोः पूर्वाङ्गानि संशयप्रयोजनदृष्टान्ताः। उत्तराङ्गे च तर्कनिर्णयाविति। इत्थं च सप्तकस्यैव विचारेण शास्त्रस्य पर्यालोचनं सम्भवति।

१ - संशयः

समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्धिव्यवस्थातश्च
विशेषापेक्षो विमर्शः संशयः।

न्यासू १/१/२३

अथ क्वचिदारोपित औपचारिकोऽपि दृश्यते, यत्र प्रमाणान्तरसिद्धमप्यर्थमनुमानेन पुष्णीयात् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सिसाधयिषाविरहसहकृतसिद्धभावरूपः संशयः सर्वत्रत्यः।

२- प्रयोजनम्

यमर्थमधिकृत्य प्रवर्तते तत् प्रयोजनम् ।

न्यासू १/१/२४

न हि संशयस्यापि विषये संशयिता निष्प्रयोजनः प्रवर्तत इति।

३ - दृष्टान्तः

लौकिकपरीक्षणं यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः।

न्यासू १/१/२५

४- सिद्धान्तः

तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्तः।

न्यासू १/१/२६

तन्त्रमितरेतराभिसम्बद्धस्यार्थसमूहस्योपदेशः शास्त्रम् । अधिकरणानुषक्तार्थसंस्थितिः। अभ्युपगमसंस्थितिरनवधारितार्थपरिग्रहः।

भाष्यम्

५- अवयवाः

प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः।

१/१/३२

६- तर्कः

अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः

१/१/४०

७- निर्णयः

विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः।

१/१/४१

ननु प्रमाणप्रमेययोः प्रथमता किमर्थेति चेत्, तत्त्वमीमांसामपेक्ष्य ज्ञानमीमांसाया न्यायशास्त्रे महिमेति ब्रूमः। मानाधीना मेयसिद्धिरिति प्रमाणस्य प्राग्ग्रहणम् । अग्रे सप्तपदार्थी प्रमाणमेव साधयितुं प्रवृत्ता। प्रमात्वस्य परतस्त्वं हि सिद्धान्त इति। न च निर्णयानन्तरं किमर्थमतिरिक्तानां सप्तानां ग्रहणमिति संशयितव्यम्। तेषामपि ज्ञानेनैव सिसाधयिषा शाम्यतीति साम्प्रतिकन्यायाधिकरणानां स्थितिर्द्रष्टव्या।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्याकरण-काव्यपरम्परायां धातुकाव्यसमीक्षणम्

वनमाली विश्वाल:

प्रास्ताविकम् -

धातुकाव्यमिति काव्यस्य शीर्षकमेव सूचयति यत् समीक्षार्थं प्रस्तुतं काव्यमिदं संस्कृतव्याकरणस्य प्रचलितानामप्रचलितानां च प्रायः सर्वेषां धातूनां प्रयोगार्हतां प्रदर्शयति। संस्कृतवाङ्मये बहुन्येतादृशानि व्याकरणोदाहरणपरकाणि काव्यरत्नानि उपलभ्यन्ते। ईदृशानि काव्यानि मुख्यतया प्रयोजनद्वयं साधयितुमुद्दिष्टानि सन्ति—

१. सरलसुगमोपायेन क्लिष्टातिक्लिष्टव्याकरणतत्त्वानां साधुप्रयोगज्ञानम् ।

२. व्याकरणाध्ययनकाले एव काव्यरसास्वादश्च।

प्रख्यात आलङ्कारिकः क्षेमेन्द्र एतादृशं काव्यं काव्यशास्त्रमित्याख्यया विभूषयति।[1] यतः शास्त्रीयोदाहरणान्यधिकृत्येवैतानि काव्यानि विरचितानि सन्ति। भारतीय-संस्कृतसाहित्यस्यातीव प्राचीनेयं परम्परा। उपान्मन्त्रकरणे[2] तथा अनुवादे चरणानाम्[3] इत्यनयोः सूत्रयोरुदाहरणव्याख्यानप्रसङ्गे महर्षिपतञ्जलिनोक्तम् -

(क) बहूनामप्यचित्तानामेको भवति चित्तवान् ।
पश्य वानरसैन्येऽस्मिन् यदर्कमुपतिष्ठते।।

मैवं मंस्था सचित्तोऽयमेषोऽपि हि यथा वयम्।
एतदप्यस्य कापेयं यदर्कमुपतिष्ठति।।[4]

(ख) नन्दन्तु कठकलापाः । वर्धन्ता कठकोयुमाः।
उदगात् कठकलापम् । प्रत्यष्ठात् कठकौयुमम् ।। इति।

यद्यपि व्याकरणविषयप्रधाना एताः कारिकाः सन्ति तथाप्यासु कारिकासु काव्यसौन्दर्य क्षीणाभासोऽवश्यं परिलक्ष्यते। परन्तु काव्यस्वरूपेण इदम्प्रथमतया खीष्टीय-षष्ठशतके महाकविभट्टिना भट्टिकाव्यमित्यभिधं काव्यं विरचितम् । दीपतुल्यः प्रबन्धोऽयं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शब्दलक्षणचक्षुषाम् '[६] इति कवेः स्ववचनादस्य काव्यस्य व्याकरणपटुत्वं सिद्धयत्येव। द्वादशसर्गात्मकमिदं काव्यं चतुर्षु भागेषु विभक्तमस्ति। तत्र भागद्वये पाणिनीयप्रमुख-सूत्राणामुदाहरणानि, तृतीये च भागे अलङ्काराणामुदाहरणानि, अन्तिमे भागे पुनर्धातूनां लकारानुक्रमेणोदाहरणानि प्रयुक्तानि सन्ति।

तस्मात् कालादारभ्य इदानीम् यावद् बहवः काव्यग्रन्था विरचिता दृश्यन्ते। तेषु भट्टभीमस्स रावणार्जुनीयम्, हलायुधस्य कविरहस्यम्, हेमचन्द्रस्य कुमारपालचरितम् शिवरामत्रिपाठिनः नक्षत्रमाला, मङ्गलेशस्य विभक्तिविलासम्, वासुदेवस्य वासुदेव-विजयम् तथा नारायणभट्टस्य धातुकाव्यमुल्लेखनीयमस्ति। सा च काव्यशास्त्रपरंपरा संस्कृतव्याकरण एव सीमिता नास्ति। लौकिकछन्दांसि प्राकृतव्याकरणनियमांश्चोदाहर्तुं नैकानि काव्यरत्नानि विरचितानि दृश्यन्ते। तत्र लौकिकछन्दः पक्षे गजमोक्ष—नक्षत्रावली। रासक्रीडादिकाव्यानां तथा प्राकृतव्याकरणपक्षे श्रीचिह्नकाव्यस्याथवा गोविन्दाभिषेक-काव्यस्य नामान्युल्लिखितुं शक्यते।

ग्रन्थस्य ग्रन्थकर्तुश्च परिचय -

धातुकाव्यमित्यभिधस्य व्याकरणस्य रचयिता प्रसिद्धवैयाकरणकविः श्री मेलपुत्तूर नारायणभट्टतिरिः केवलं नारायणभट्ट इति नाम्ना ज्ञातोऽस्ति विदुषां समाजे। प्रक्रियासर्वस्वधातुकाव्यनारायणीय-मानमेयोदय-पाञ्चालीस्वयंवर-सुभद्राहरण-राजसूयशूर्पणखाप्रलाप-मत्स्यावताराद्यनेकेषां ग्रन्थानां प्रणेता नारायणभट्टः स्वजन्मना केरलप्रान्तस्योदीच्यामवस्थिततिरूनावायसमीपस्थे चन्दनक्वावुग्रामस्य नम्पूतिरि-ब्राह्मणकुलमलङ्कृतवान्।

अस्य केरलकवेः जीवनकालविषये कश्चिद् विवादोऽवश्यं दृश्यते। परन्तु अन्तः-प्रमाणानि बहिःप्रमाणानि चाधारीकृत्य ऐतिहासिकाः नारायणभट्टं षोडशसप्त-दशशताब्दयोर्मध्ये एव स्थापयन्ति (१५६०-१६६६)[७]।

नारायणभट्टो वैष्णवः कृष्णभक्तश्चासीदिति न केवलं धातुकाव्यादपितु तस्य नारायणीयाभिधाद् भक्तिकाव्यात्, प्रक्रियासर्वस्वस्थकृष्णपरकोदाहरणाच्च[८] प्रतीयते। पुनश्च -

जुगुप्सतेऽघाद् व्यसनं तितिक्षु -
मीमांसते ब्रह्म च यो दृढात्मा ।[९]

तथा

ताक्ष्येऽस्थितं प्राप्य तरामि मायाम् ।[१०]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्यादि वचनाच्च सोऽयं भक्तकविः अद्वैतवेदान्तदर्शनस्य समर्थक आसीदिति उपसंहर्तुं शक्यते।

साम्प्रतमस्य धातुकाव्यस्योपरि कृष्णार्पणाविवरणाख्यं टीकाद्वयमुपलभ्यते। अनयोः कृष्णार्पणाख्या टीका नारायणभट्टस्य कैश्चित् शिष्यैरेव लिखिता।[11] (येषां नामानि नोपलभ्यन्ते) अपरा च विवरणाख्या टीका रामपाणिवादेन विरचितास्ति। काव्यमिदं सम्पूर्णरूपेणेदम्प्रथमतया वेरङ्किटसुब्रह्मण्येन अय्यरमहोदयेन संपादितम्, १९७० तमे वर्षे तिरुवनन्तपुरतश्च प्रकाशितमस्ति। उपर्युक्त टीकाद्वयमपि तस्मिन्नेव संस्करणे प्रकाशितं वर्तते। परन्तु, अस्य ग्रन्थस्योपरि किमप्युल्लेखनीयं समालोचनात्मकं कार्यमद्यापि नैव सञ्जातम् ।

कथावस्तुनः स्रोत -

धातुकाव्यस्य कथावस्तुनः स्रोतः श्रीमद्भागवतमिति निर्विवादं स्वीक्रियते विद्वद्भिः। श्रीमद्भागवतस्य दशमस्कन्धस्य ३८- तम अध्यायादारभ्य ४४ तमाध्यायं यावत् सप्तस्वध्यायेषु वर्णितां कथामाधारीकृत्य काव्यमिदं विरचितं कविवरेण।

कथानकविवरणम् -

काव्यस्थास्य कथानकमक्रूरप्रयाणादारभ्य कंसवधं यावत् प्रवर्तते। त्रिष्वेव सर्गेषु विरचितमिदं काव्यं कृष्णचरितस्य दिनत्रयस्य कथां वर्णयतीति कृष्णार्पणटीका-कर्तुर्वचनात्[12] प्रमाणितं भवति। प्रथमे सर्गे अक्रूरस्य गोकुलयात्रा, तस्य नन्देन सह साक्षात्कारश्च वर्णितोऽस्ति। द्वितीये सर्गे कृष्णस्य गोपपुरवियोग-मथुरायात्रा-रजकवध-कुब्जामेलन-धनुर्भङ्गादीन्याख्यानानि वर्णितानि सन्ति। कंसप्रेरितहस्तिचाणूर-मुष्टिकादिभिः सह कृष्णबलरामायोर्युद्धं तथा कंसवधश्चान्तिमसर्गस्य विषयः। अत्र कविना एकदिनात्मकं वृत्तान्तमेकस्मिन्नेव सर्गे पल्लवितम् पुष्पितञ्च।

ग्रन्थस्य पृष्ठभूमिः

काव्यमिदमेकादशशताब्द्यां विरचितस्य वासुदेवकवेः वासुदेवविजयाभिधस्य व्याकरणोदाहरणकाव्यस्य शेषं परिपूरयतीति कवेर्नाराणभट्टस्य स्वकीयवचनादेव[13] सिद्ध्यति। सप्तसर्गात्मकेऽस्मिन् वासुदेवविजयकाव्ये सम्पूर्णस्य पाणिनीयसूत्रगन्य-स्योदाहरणानि प्रदर्शितानि सन्ति। परन्तु तत्र कथा अपूर्णा दृश्यते। तत्र केवलं व्योमासुर-वधम् यावत् कथा वर्णितास्ति। अतोऽनुमातुं शक्यते यत् स्वकाव्ये पाणिनीयधातुपाठस्य तथोणादिसूत्राणाञ्चोदाहरणानि प्रदर्शयितुं प्रतिज्ञात आसीद् वासुदेवविजयकारः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परं तु कस्मादप्यज्ञातकारणवशात्तस्य सा प्रतिज्ञाभिलाषो वा कार्यत्वेन नैव परिणतः समेवाभिलाषं पूरयितुकामेन नारायणभट्टेन पाणिनीयधातुपाठपठितान् धातून् उदाहृ वा सूदाहरणरूपं धातुकाव्याभिधमतिभव्यं काव्यं विरचितम्। परन्तु सोऽप्यर्द्धसफलो सञ्जातः। फलतः उणादि सूत्राण्यद्याप्यवशिष्यन्ते। सा भागवत-कथाप्यपूर्णा तिष्ठति। सम्भवतः उणादिसूत्रोदाहरणैः कश्चिदिमां कथां पूरयिष्यतीति धिया कविनारायणभट्टेना- पीदं कथानकमपूर्णं त्यक्तम् ।

ग्रन्थस्य व्याकरणस्रोतः

'धातून् क्रमेणैव हि माधवाश्रयात्' इति वस्तुनिर्देशात्मकमङ्गलाचरणस्य 'माधवाश्रयादिति वचनामधारीकृत्योभावेव टीकाकारौ मन्येते यन्माधवीयधा- तुवृत्तिमाश्रित्यैव कविना नारायणभट्टेन पाणिनीधातुपाठस्य धातवः स्वकाव्ये उदाहृताः। पक्षान्तरेऽत्र "माधव" इति पदमुल्लिख्य कविः मङ्गलार्थं स्वीयामिष्टदेवतां संस्मरतीत्यपि वक्तुं शक्यते। परन्त्वपरस्मिन् ग्रन्थे प्रक्रियासर्वस्वे सोऽयं वैयाकरणकविः माधवीयधातु- वृत्तिमुद्दिश्यैव "माधव" इति पदं प्रयुङ्क्ते। अतोऽनुमातुं शक्यते यदत्रापि धातुकाव्ये "माधव" इति पदेन कविः माधवीधातुवृत्तिमेव सूचयति। तत्र निर्दिष्टमेवार्थमनुसृत्य काव्येऽस्मिन् धातव उदाहृताः प्रयुक्ताश्च वर्तन्ते।

उदाहृतधातूनां गणदृष्ट्या वर्गीकरणम्

प्रथमे सर्गे, भ्वादिगणपठितः "भू" इत्यत आरभ्य अर्हान्ता येऽन्तर्गणविरहिताः धातवः सन्ति त एवोदाहताः । तदनु, द्वितीयसर्गे भ्वादिगणपठितधुताद्यन्तर्गणादारभ्य तुदादिगणान्तम् यावत् पठितानां धातूनामुदाहरणानि प्रयुक्तानि। अवशिष्टाश्च रुधादि- गणादारभ्य चुरादिगणान्ताः धातवोऽन्तिमे सर्गे सम्यगुदाहृदताः एवं धातुकाव्यस्य त्रिष्वेव सर्गेषु समग्रपाणिनीयधातुपाठस्थदशगणेषु पठिताः धातवः यथाक्रमं समुदाहृतास्तिष्ठन्ति। काव्येऽस्मिन् विविधगणपठितोदाहरणानां विभागो निम्नाङ्कितप्रकारेण कर्तुं शक्यते-

भ्वादिः	१.१ - २.४३
अदादिः	२.४४-५३
जुहोत्यादिः	२.५४-५५
दिवादिः	२.५६-६७
स्वादिः	२.६८-७१
तुदादिः	२.७२-८४
रुधादिः	३.१-३
तनादिः	३.४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्र्यादिः	३.५-१२
चुरादिः	३.१३-६६

धातूदाहरणप्रयोगे सामान्यनियमास्तेषामपवादाश्च -

काव्येऽस्मिन् धातूनां कृदन्तं तिङन्तञ्चोभयविधरूपमुदाहृतं वर्तते। परन्तु तत्र सामान्यतयैकस्यैव धातोरेकमेवोदाहरणं प्रदत्तं धातुकाव्यकारेण कस्यचिद्धातोः कृदन्तोदाहरणमुपलभ्यते, कस्य वान्यस्य तिङन्तोदाहरणं प्राप्यते। तत्र च स्वाभाविकतया कृदन्तरूपाणां संख्याधिक्यं दृश्यते। परन्तूपर्युक्तनियमस्यापवादोऽपि दृष्टिमथमायाति।

कदाचिदेक एव धातुः वारद्वयं वारत्रयं वा कृदन्ततिङन्तरूपेणोभयथा समुदाहृतो दृश्यते। तद्यथा, 'पिप्रत् कृपाभारभृतैरपाङ्गैरित्यत्र "डुभृञ् धारणपोषणयोरिति धातोः भारः भृतञ्चेति रूपद्वयमुपलभ्यते। तथैव "लाटार्हशाटोवटितेर्वटुब्रजैरित्यत्र"[१६] "वट वेष्टने" इति धातोरपि "वटित" "वटुः" इति रूपद्वयमुपलभ्यते।एवमन्येऽपि केचन धातवः सन्ति येषामेकाधिकान्युदाहरणानि प्राप्यन्ते। यद्यप्येतादृशाः प्रयोगाः विरलास्तथाप्यनर्थकाः न सन्ति। तैः किमपीष्टं सिद्ध्यत्येव।

जुहोत्यादिगणपठिता ये धातवः पाणिनिना वैदिका उद्घोषितास्ते सामान्यतयात्र नैव समाविष्टाः। परन्तु तेषु" घृ क्षरणदीप्त्योः", "ऋ गतौ", भस भर्त्सनदीप्त्योः", "सुर त्वरणे" "वन धान्ये" इत्यादयः धातवः, ये वैदिकाः सन्तोऽपि भाषायां प्रयुक्ताः तेषामुदाहरणान्यत्र प्रयुक्तानि सन्ति।[१७]

अदादिगणपठितं दीधीङ्वेवीङ्इति धातुद्वयं 'दीधीवेव्योश्छन्दोविषयत्वादित्युक्त्या[१८] महाभाष्यकारेण वैदिकत्वेनोद्घोषितम्। परन्तु तयोरपि प्रयोगोऽत्र दृश्यते।[१९] एवमन्येऽप्यस्य नियमस्यापवादाः दृश्यन्ते यत्र तत्र।

पाणिनीयधातुपाठस्य बह्वर्थप्रतिपादकाः धातवोऽत्रैकस्मिन्नेवार्थे प्रयुक्ताः दृश्यन्ते। यथा "अव" इत्यस्य धातोरष्टादशार्था[२०] निर्दिष्टाः वर्तन्ते धातुपाठे, परन्तु धातुकाव्ये "रक्षणम् " इत्येकस्मिन्नेवार्थे प्रयुक्तो वर्ततेऽयं धातुः।[२१] अस्य नियमस्याप वादोऽपि दृश्यतेऽस्मिन् काव्ये। क्वचित् बह्वर्थप्रतिपादकाः धातवः धातुपाठनिर्दिष्टेषु सर्वेष्वप्यर्थेयु प्रयुक्ताः सन्ति। तद्यथा, "शा" धातुः मारणपोषणनिशामननिशातनाद्यर्थेषु दृश्यते।[२२]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धातुकाव्यमाधवीयधातुवृत्त्योस्तुलना -

व्याकरणशास्त्रपक्षे प्रायः काव्यमिदं माधवीयधातुवृत्तिमेवानुकरोति। विवादास्पदस्थलेषु माधवीयधातुवृतिमेव समर्थयति धातुकाव्यकारः। "इत्याद्यवस्खादितमानसास्ता, बालाः परिस्खादितधैर्यबन्धाः" इत्यत्र "अवस्खादितं," "परिस्खादितमिति रूपद्वयमुपलभ्यते धातुकाव्ये। एततद्धिरूपद्वयं" स्खदिर अवपरिभ्यां च[२४] "इत्यनेन "न कम्यमिचमामित्यतः" "न" इत्यनुवृत्त्य मित्त्वनिषेधाण्णिचि दीर्घे कर्मणि क्तप्रत्यये च सिद्धयति। परन्त्विमौ प्रयोगौ माधवीयधातुवृत्यनुमतौ वर्तेते। क्षीरतरङ्गिण्यां तु "न" इत्यस्यानुवृत्तिर्नानुमता। अत एव तत्र अवपरिभ्यां योगेऽपि स्खदिश्परिभ्यां चेत्यनेन स्खदिर इत्यस्य मित्त्वस्वीकारे दीर्घाभावे च अवस्खदयतीति रूपं सिद्धयति।[२५]

अयमपि नियमो निरपवादो नास्ति। धातुकाव्यमपि कदाचिन्माधवीयधातुवृत्तिं पूर्णतया नानुकरोति। कदाचिन्माधवीयधातुवृत्तावनुपलब्धा अपि धातवः धातुकाव्ये उदाहृताः दृश्यन्ते। तद्यथा, "प्रमान्थनं सेधतु को निषेत्स्यति [२६]"इत्यत्र प्रयुक्तं प्रमान्थनमिति रूपं" प्र" उपसर्गक "मान्थ हिंसा क्लेशनयोरिति धातोः "ल्युट् " प्रत्यययोगेन सिद्धयति। परंतु माधवीयधातुवृत्तौ "मान्थ" इति धातुर्नोपलभ्यते।

कदाचिद्धातुकाव्ये माधवीधातुवृत्तावुपलब्धा अपि धातवः नैवोदाहताः। तद्यथा, धातुकाव्ये "म्रेसृ गतौ [२७]" इत्यस्योदाहरणमुपलभ्यते। माधवीयधातुवृत्तौ तथा पाणिनीयधातुपाठे निर्दिष्टस्य गत्यर्थक "म्लेसृ " धातोरुदाहरणमत्र नैव लभ्यते।

कदाचिदुभयोः ग्रन्थयोर्धातूनां स्वरूपेऽपि कश्चन भेदः परिलक्ष्यते। तद्यथा, "घर्घ" इति धातोः स्वरूपमुपलभ्यते धातुवृत्तौ। धातुकाव्येतु " अलंथितानन्दःरसात्तघर्घनाः[२८] इत्यत्र "घर्घ हसने" इत्येवं धातोः स्वरूपमुपलभ्यते, यस्मात् "ल्युद्" प्रत्ययेन घर्घनः इति रूपं सिद्धयति।

कदाविदुभयत्र धातोः सरसत्वेऽपि अर्थभेदोऽवलोक्यते। तद्यथा, "सुजि" धातोः पालनमेवार्थः धातुवृत्तावुल्लिखितो वर्ततो। परन्तु धातुकाव्ये "जहर्ष जजातुजितस्थलैरसौ"[२९] इत्यत्र हिंसार्थेऽपि तुजिधातोः प्रयोगोदृश्यते। पाणिनीयधातुपाठे तु 'तुज' धातुः हिंसार्थकः "तुजि" धातुश्च पालनार्थको निर्दिष्टोऽस्ति।

एवम् यद्यपि धातुकाव्यस्य धातुवृत्त्या साकं बहुत्र साम्यमनुभूयते तथापि स्थलविशेषेषु ग्रन्थद्वयं परस्परं भिद्यते इत्यत्र नास्ति सन्देहस्यावसरः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धातुकास्य काव्यत्त्वम् -

धातुकाव्यं न केवलं श्रीमद्भागवतस्य कथानकमनुकरोति, अपितु बहुत्र तस्य रचनाशैलीमपि पदशोऽनुकरोति। तुलनार्थमत्रोभयग्रन्थयोः केचन श्लोकाः प्रस्तूयन्ते। तद्यथा भागवतस्य-

(क) तां संप्रविष्टौ वसुदेवनन्दनौ
वृत्तौ वयस्यैर्नरदेववर्त्मना।
द्रष्टुं समीयुस्त्वरिताः पुरस्त्रियो
हर्म्याणि चैवारुरुहुर्नृपोत्सुकाः।।[30]

(ख) अश्नन्त्य एकास्तदपास्य सोत्सवा
अभ्यज्यमाना अकृतोपमज्जनाः।
स्वपन्त्य उत्थाय निशम्य निःस्वनं
प्रपाययन्त्योऽर्भमपोह्य मातरः।।[31]

श्लोकद्वयस्यास्य भावं रचनाशैलीञ्चानुकृत्य बहून् धातूनुदाहरता धातुकाव्यकारेणोक्तम् -

(क) स्नान्त्यस्तदा श्राणमुपाश्य वान्नं
निद्रां गताः प्सातिपरास्तथान्याः।
पान्त्यः शिशून् धान्यधनानि रान्त्यो
लान्त्यश्च काश्चित् कुसुमानि दान्त्यः।।

(ख) ख्यान्त्यः कथाः प्राणमुदां पतीनां
निर्मान्त्य इष्टानि चटून् वचन्त्यः।
नार्यो विदित्वोपगतं मुरारे
रासन् गता राजपथं सुमृष्टम् ।। [32]

उपर्युक्तश्लोकचतुष्टयस्याध्ययनात् प्रतीयते यत् धातुकाव्यकारो नारायणभट्टः श्रीमद्भागवतस्य भाषाशैल्या काव्यगुणैश्च प्रभावित आसीत् । परन्तु समग्रधातुकाव्यस्य परिशीलनादेवमपि वक्तुं शक्यते यदस्य वैयाकरणकवेः रचनायामासीत् काचिदभिनवा काव्यशैली। बहुत्र वृन्दावन[33]-सन्ध्या[34]-यमुना[35]-मथुरादिवर्णनप्रङ्सगेषु कविः स्वकीयां कवित्वप्रतिभां पूर्णतया प्रकटयितुं समर्थो भवति। नीरसातिनीरसानपि धातुसमुदायानुदाहरन्नसौ कविरेतादृशसरसकाव्यरचनायां पूर्णसफलः सञ्जात इति तत्र पाठका एव प्रमाणम् । यद्यपि धातूदाहरणप्रयोगे दत्तचित्तस्य कवेः कविप्रतिभा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्वचित् सङ्कुचिता दृश्यते, तथापि व्याकरणोदाहरणपरकमिदं काव्यरत्नं प्रायः सर्वैरुत्तमकाकाव्यगुणैर्विभूषितं सदनुक्षणं सचेतसां सुकुमारचेतः विनोदयति संमोहयति च।

भक्तिकाव्येऽस्मिन् मुख्यतया रसद्वयस्यानुभूतिर्जायते।१। भक्तेः ।२। वीरस्य च। द्वितीये सर्गे कृष्णबलरामयोर्मथुरायात्राप्रसङ्गे, शृङ्गाररसस्यानुभवो जायते यत्र तत्र।

काव्यस्यास्य मुख्यं छन्दो यद्यपि वंशस्थमस्ति तथापि तृतीये सर्गे मुख्यतया वसन्ततिलकच्छन्दसः प्रयोगो दृश्यते। परन्तु प्रथमसर्गान्ते द्वादशश्लोकाः, द्वितीयसर्गान्ते पञ्चविंशतिश्लोकाः तृतीयसर्गान्ते षड्विंशतिश्लोकाश्च उपजाति-वसन्ततिलका-आर्या-स्रग्धरा - शिखरिण्यादिभिः बहुभिः छन्दोभिः विरचिताः सन्ति।

अलङ्कारदृष्ट्यापि काव्यमिदं समृद्धमस्ति। तत्र स्वभावोक्ति [३७] श्लेष [३८] - विरोधाभास [३९] उत्प्रेक्षाद्यलङ्काराणां तथा यत्र तत्र शब्दालंकाराणामप्यभिनवचित्रणं समुपलभ्यते।

उपसंहारः -

"यद्यपि वहु नाधीषे पठ पुत्र व्याकरणम् ", ब्राह्मणेन निष्कारणं धर्मः षडङ्गो वेदोऽध्येय ज्ञेय इति। प्रधानं च षट्स्वङ्गेषु व्याकरणम् । प्रधाने व कृतो यत्नः फलवान् भवति [४१], "तत्त्वाववोधः शब्दानां नास्ति व्याकरणादृते [४२] इत्यादिवचनादेवमनुमातुं शक्यते यत् पुरा शिक्षाक्षेत्रे व्याकरणाध्ययनस्य महती भूमिकासीत् । तामेव भूमिकां सहजतया सम्पादयितुं भारते नैकाः व्याकरणपरम्पराः जनिं लेभिरे। परन्तु तथापि शार्दूलोपमं व्याकरणं क्लिष्टत्वदोषान्मुक्तं नाभवदिति महती चिन्तासीदस्माकं पूर्वजानाम्[४३]। अत एव भारतवर्षस्य (विशिष्य केरलस्य) केचन वैयाकरणाः व्याकरणे छात्राणामध्येतृणां च रुचिं जनयितुं क्लिष्टातिक्लिष्टव्याकरणबिन्दूनामुदाहरणानि गृहीत्वा सरसातिसरसकाव्यनिचयं विरचितवन्तः । व्याकरणस्य प्रयोगज्ञानं तस्य चावधारणं व्याकरण-पठन-मात्रेण तथा न भवति यथानेन माध्यमेन। इदमेव कारणमस्ति येन कालान्तरेऽस्यां दिशि बह्व्यः सरसरचनाः सञ्जाताः। फलतः, आलङ्कारिकैरेतादृशीनां रचनानां कृते काव्यशास्त्रमथवा शास्त्रकाव्यमित्यभिधः कश्चित् स्वतन्त्रो वर्गः संरक्षितः। यद्यप्येकस्मिन्नेव काव्ये सर्वे व्याकरणविन्दवः समुदाहृताः न वर्तन्ते तथाप्यस्य वर्गस्योपलब्धसमग्रकाव्यराशिमधीत्य कश्चिद् व्याकरणे निष्णातो भवितुमर्हतीति निःसन्देहं वक्तुं शक्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संदर्भाः -

१. भट्टिभौमककाव्यादिकाव्यशास्त्रं प्रचक्षते। सुवृत्ततिलकम् ३/४

२. पा. सू. १.३.२५

३. तत्रैव २.४.३

४. म. भा. (किलहर्ण संपादिते) भाग - १, पृ. २८।

५. तत्रैव पृ. ४७३-७४

६. भट्टिकाव्ये ३२-३३

७. (क) द्र. भूमिका, एस. वेंकिटसुब्रमोनिआ अय्यर संपादितं धातुकाव्यम्, १९७०, पृ. ४७-४८
(ख) द्र. भूमिका, भाग - १। प्रक्रियासर्वस्वम्, के. साम्यशिव संपादितम् १९३१।

८. कंसच्छेदी, प्रक्रियासर्वस्वे ८.४.६५, कृष्णोहि, तत्रैव ६.१.९५

९. धातुकाव्ये २-३८

१०. तत्रैव २.३७

११. गुरुपादाब्जसंसेवानितान्तविमलाशयैः।
सतीर्थ्यैरद्य लिख्यन्ते धातुकाव्यार्थयोजनाः।।
तत्रैव, कृष्णार्पणटीका, पृष्ठ - १

१२. त्रिभिः र्दिनैः कृतं कर्म त्रिभिः सर्गैश्चः कथ्यते - तत्रैव पृ. ३

१३. उदाहृतं पाणिनिसूत्रमण्डलं
प्राग्वासुदेवेन तदूर्ध्वतोऽपरः।।धातुकाव्ये १-१

१४. तत्रैव

१५. तत्रैव २-५४

१६. तत्रैव १-४०

१७. तत्रैव २-५५

१८. म. भा. पा. स. १.१.६, भाग - १ पृ. ५५

१९. धातुकाव्ये २.५२

२०. अव रक्षणमतिकान्तिप्रीतिसृप्त्यवगमप्रवेशश्रवणस्वाम्यर्थयावनक्रियेच्छादीप्त्यवाप्त्यालिङ्गनहिंसादानभाववृद्धिषु, पाणिनीय धातुपाठे भ्वादिः।

२१. धातुकाव्ये १-७६

२२. तत्रैव २-११

२३. तत्रैव २-१९

२४. माधवीयधातुवृत्तौ भ्वादिः - ५४९

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२५. क्षीरतरङ्गिण्याम् भ्वादिः - ५६०
२६. धातुकाव्ये १-७
२७. धातुकाव्ये २-२७
२८. तत्रैव १.२२
२९. तत्रैव १.३३
३०. भागवते १०.४१-२४
३१. तत्रैव १०.४१.२६
३२. धातुकाव्ये २.४९-५०
३३. तत्रैव १.१८-३०
३४. तत्रैव १.४९-६०
३५. तत्रैव २.२२-२८
३६. तत्रैव २-७१-७९
३७. तत्रैव २.५६
३८. तत्रैव १.२८
३९. तत्रैव २.१३
४०. तत्रैव १.५४
४१. म.भा. १.१ १, भाग - १, पृ.१
४२. वाक्यपदीये - १३
४३. दुष्टग्रहगृहीतो वा भीतो वा राजदण्डतः।
पितृभ्यामभिशप्तो वा कुर्याद् व्याकरणे श्रमम् ।।
जयन्तभट्टस्य न्यायमञ्जर्याम् , काशि संस्कृत-सीरीज, १९३६, पृ. ४१८

⊠⊠⊠⊠⊠⌘⌘⊠⊠⊠⊠⊠

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुणस्वरूपपरामर्शः

पूर्णचन्द उपाध्यायः

अपूर्वेयं प्राच्यपरम्परा समग्रेऽपि विश्वसंस्कृतिनिवहे। अद्‌भुता च तत्र संस्कृत-काव्यधारा। अखिलमपि शास्त्रीयतत्त्वजातं दैवसंस्कृतिनिःसृतमिति नैकानि प्रमाणानि तत्र प्रामाणिकग्रन्थेषु लब्धसत्ताकानि। तथा हि काव्यशास्त्रीयग्रन्थानामनुकार्यत्वमूरी-कुर्वतः भरतकृतनाट्यशास्त्रस्य "एवं संकल्प्य भगवानि" त्यादि स्वोत्पतितथ्यान्वितं पद्यं तदित्थन्तया आवेदयति यत् ब्रह्मणैव निर्मितं नाट्यशास्त्रं चतुर्णां वेदानां सङ्ग्रहात्मकम्। राजशेखरस्य काव्यमीमांसाऽपि प्रकटयति काव्यशास्त्रस्य दिव्यत्वं काव्यपुरुषस्य जननी भगवती सरस्वतीति आख्यानकमुपपादयन्ती। उक्तश्च तत्रैव -

"पुरा पुत्रीयन्ती सरस्वती तुषारगिरौ तपस्यामास। प्रीतेन मनसा तां विरिञ्चः प्रोवाच - पुत्रं ते सृजामि। अथैषा काव्यपुरुषं सुषुवे[2]। इति। तदस्यामलौकिकपरम्परायां समुल्लसितान्यनेकानि काव्यतत्त्वानि। तत्तत्काव्यतत्त्वेष्वन्यतमयोः गुणालङ्कारयोरुपा-देयताऽनितरविशेषमावहति।

कोऽयं गुणः किञ्चास्य भेदकतत्त्वमलङ्कारव्यावर्तकत्वेनेति विचिकित्सायां तत्र केचन आत्मतत्त्वाश्रयवादिनः अपरे च सङ्घटनाश्रयत्ववादिन इति प्रस्थानद्वयं परिलक्ष्यते। तत्तत्काव्यशास्त्रिणां निर्वचननिरूपणप्रस्थाने प्राथम्यमुद्वहत आचार्यभरतस्य प्रस्थानं सङ्घटनाश्रयत्वमवलम्बते। तद्यथा -

एते दोषा हि काव्यस्य मया सम्यक् प्रकीर्तिताः।
गुणा विपर्ययादेषां माधुर्यौदार्यलक्षणाः।। [3] **इति।**

अत्रैवारुचिवीजम् अग्निपुराणकारस्य। तदभिमतं यत् -

न च वाच्यं गुणो दोषाभाव एव भविष्यति।
गुणाः श्लेषादयो दोषाः गूढार्थाद्याः पृथक्कृताः ।।[4] **इति।**

अनेन गुणानां दोषाभावत्वमिति स्वरूपमपास्तम् । यद्यप्यग्निपुराणकारः सङ्घटनाश्रयत्ववादी, तथापि भरतकृतगुणनिर्वचने दोषाभावरूपेऽभिमते न तस्याभि-रुचिः। यतो हि काव्यस्योत्कर्षनिष्पादने गुणस्य महती भूमिका वर्तते। तत्रैवोक्तं तेन-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यः काव्ये महतीं च्छायामनुगृह्णात्यसौ गुणः।
सम्भवत्येष सामान्यो वैशेषिक इति द्विधा।। [५] **इति।**

"काव्यशोभायाः कर्तारो गुणाः"[६] इति वामनस्य गुणनिर्वचनमेवाग्निपुराणकारस्यानुकार्यम् । आचार्यदण्डिना यद्यपि स्वतन्त्रतया गुणनिर्वचनं नैव कृतम् , तथापि "काव्यशोभाकरान् धर्मान् अलङ्कारान् प्रचक्षते"[७] इति कारिकानुगतेनालङ्कार इति पदेन सर्वस्यापि काव्यतत्त्वस्य ग्रहणात् गुणस्याप्याकलनं सङ्घटनाश्रयत्वेनेति स्पष्टम् । विद्यानाथोऽपि गुणस्य सङ्घटनाधर्मत्वं प्रतिपादयति -

अतो गुणानां सङ्घटनाश्रयत्वमेव युक्तम् [८]। **इति।**

तदित्थमेव गुणनिर्वचनं सङ्घटनाश्रयत्ववादिभिः स्वस्वभणितिभङ्ग्या बहुत्र बहुधा चर्च्चितम् ।

गुणस्यात्मतत्त्वाश्रयत्वप्रस्थाने त्वाचार्यानन्दवर्धनस्य स्थानं प्राथम्यमावहति। नायं मनुते गुणस्य सङ्घटनाधर्मत्वम् । गुणस्तु काव्यात्मनो रसस्यैव धर्मः। तदित्थम् -

तमर्थमवलम्बन्ते मेऽङ्गिनं ते गुणाः स्मृताः[९]। **इति।**

मम्मटोऽपि आनन्दवर्धनस्यानुयायित्वमवलम्बमानो गुणं काव्यस्याङ्गिनो रसस्योपकारकत्वेन प्रतिपादयति। उक्तञ्च तेन -

ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः।
उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः [१०]**।।इति।**

ध्वनिप्रस्थानस्यान्यतम आचार्यः विश्वनाथस्तु पूर्ववर्तिनोरानन्दवर्धनमम्मटयोरभिमतमनुल्लङ्घयन् गुणस्य रसधर्मत्वमेव स्वीकरोति। तदुक्तम् -

रसस्याङ्गित्वमाप्तस्य धर्माः शौर्यादयो यथा गुणः [११]**।। इति।**

गुणनिर्वचनप्रस्थानेऽन्यतम आचार्यः हेमचन्द्रः आनन्दवर्धनस्याभिमतमेव समर्थयत्यन्वयव्यतिरेकाभ्यां गुणस्य रसधर्मत्वमुपपादयन् । तद्यथा -
"ते गुणाः च रसस्यैव धर्माः, उपचारेण तु तदुपकारिणोः शब्दार्थयोरुच्यन्ते। रसाश्रयत्वञ्च गुणदोषयोरन्वयव्यतिरेकानुविधानात्" [१२]। इति।
एवमेव तत्तत्साहित्यशास्त्रिणां गुणस्वरूपविमर्शनेन लोके शौर्यादीनां गुणानामात्मधर्मत्वमिव काव्येऽपि माधुर्यादिनां गुणानां रसधर्मत्वमिति समुचिताभिधानम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किञ्च गुणालङ्कारयोः कस्तावद्भेदोऽभेदो वेति विचिकित्सायां प्राचीनाचार्याणां मतद्वयं दरीदृश्यते। केचन अभेदवादिनः, अपरे च भेदवादिनः। अभेदवादिष्वाद्यपुरोधसाऽऽचार्यभरतेन यद्यपि गुणालङ्कारयोरभेदत्वं स्पष्टं नोल्लिखितं, तथापि समतागुणनिरूपणावसरे तयोः समानाश्रयत्वं समर्थयता मिथः विभूषणत्वं स्वीकृतम् । तदुक्तौ -

अन्योन्यसदृशा यत्र तथा ह्यन्योन्यभूषणाः।
अलङ्काराः गुणाश्चैव समाः स्युः समता मताः[१३]।।इति।

नेदं तथ्यं दण्डी मनुते इति हेमचन्द्रस्योक्तिः तन्मतेन भिन्नाश्रितावेव गुणालङ्काराविति परस्परं विभूषणवत्त्वमसम्भवम् । उक्तञ्च तेन -

भिन्नाधिकरणा हि गुणालङ्कारास्तत्कथमन्योन्यं भूषयेयुरिति
दण्डी[१४]।। इति।

तत्राभेदवादिष्वन्यतम आचार्यः भट्टोद्भटः । भामहविवरणाख्ये टीकाग्रन्थे तदभिमतं यत् - नास्ति गुणालङ्कारयोः किमपि भेदकतत्त्वम् । यतोहि गुणालङ्कारयोर्भेदः लोक एव विद्यते, न तु काव्ये। तथाहि लोके शरीरेण सह कटककुण्डलादीनामलङ्काराणां संयोगसम्बन्धः शौर्यादिगुणानाञ्च समवायसम्बन्धः विद्यते। काव्ये तु गुणालङ्कारयोः समवायसम्बन्ध एव लब्धसताकः । गड्डारिकाप्रवाहन्यायेन त्वेतयोर्भेदः स्वीक्रियते। ध्वनिवादिभिरानन्दवर्धनप्रभृतिभिराचार्यैस्त्वभिमतमिदमुद्धृत्य सयुक्तिकं खण्डितम्। अस्याः परम्परायाः परिपोषकेण मम्मटेन भट्टोद्भटस्याभिधानमिदमसदित्युक्त्वा तन्निरस्तम् । हेमचन्द्रोऽपि भट्टोद्भटस्य मतमिद निरस्यति। तदित्थमेव - "इह तु उभयोः समवायेन स्थितिरिति अभिधाय तस्मात् गड्डारिकाप्रवाहेण गुणालङ्कारप्रवाहेण गुणालङ्कारमेव इति भामहविवरणे यद् भट्टोद्भटोऽभ्यधात् , तन्निरस्तम् ।[१५] इति। भेदवादिपरम्परापोषकेन वामनेनैव सर्वप्रथमं गुणालङ्कारयोर्भेदकतत्त्वं निरूपितम् । डॉ. ह्वी. राघवन् महोदयानामभिमतमिदं यत् - "भट्टोद्भटस्य सिद्धान्तं निराकर्तुमेव वामनेन गुणाङ्कारयोर्भेदः प्रदर्शितः।[१६] इति। वामनस्य प्रतिपाद्यं यथा -

'काव्यशोभायाः कर्तारो धर्मा गुणाः।
तदतिशयहेतवस्त्वलङ्काराः।।
पूर्वे नित्याः ।।[१७] इति।

अत्रैव मम्मट आक्षिपति, ननु समस्तगुणैः काव्यव्यवहारः कतिपयैर्वा ? आद्यश्चेन्न तद् युक्तम् । असमस्तगुणान्वितयोः गौडीपाञ्चलीति रीत्योः काव्यस्यात्मत्वात् । न च द्वितीयम् । यतोहि -

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अद्रावत्र प्रज्वलत्यग्निरुच्चैः प्राज्यः
प्रोद्यन्नुल्लसत्येष धूमः । [१८] इति।

पद्येऽस्मिन्नोजः प्रभुतीनां कतिपयगुणानां सद्भावात्काव्यत्त्वव्यवहारापत्तेः परं न तथा। तथा च 'गुणनिष्पादितायाः काव्यशोभायाः वर्धका अलङ्काराः। इत्येतदप्यविचारिता भिधानम् । यतोहि गुणानामसत्त्वेऽपि केवलमलङ्कारसद्भावादेव काव्यव्यवहार: चित्रकाव्यादिषु । यथा -

स्वर्गप्राप्तिरनेनैव देहेन वरवर्णिनी ।
अस्या रदच्छदरसो न्यक्कारोऽतितरां सुधाम् ।। [१९] इति।

अत्र माधुर्यादिगुणानामसत्त्वेऽपि विशेषोक्ति-व्यतिरेकयोरलङ्कारयोः सद्भावादेव काव्यव्यवहारः। यद्यपि गुणालङ्कारयोर्भेदकतत्त्वसापेक्ष एव आचार्य मम्मटः तथापि न तदभिमतं वामनाद्यालङ्कारिकाणां लक्ष्ये संगच्छते। यतोहि वामनादिभिः शब्दार्थयोः काव्यत्त्वव्यवहारे सति तत्रैव तेषां गुणानामुत्कर्षाधायकत्वे विश्रान्तिर्मता । परन्तु ध्वनिवादिनाऽऽचार्यमम्मटेन गुणानां रसधर्मत्वेन नित्यत्वमेव स्वीकृतम्, अलङ्काराणान्त्व नियतधर्मत्वम् । उक्तञ्च तेन गुणेभोऽलङ्काराणां व्यावर्तकत्वं निरूपयता -

उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित् ।
हारादिवदलङ्कारास्तेनुप्रासोपमादयः।। [२०] इति।

एवमेव काव्ये गुणस्यापरिहार्यत्वं नाम नित्यत्वम् । अलङ्काराणान्तु क्वचित् परिहार्यत्वमेवेति निष्कर्षः। तेनैव काव्यलक्षणनिरूपणेऽपि एतत्सम्यग् विमृष्टम् । तद्धि

तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि [२१], इति।

मम्मटस्यानुकार्येणानन्दवर्धनेन तु तदित्थन्तयैव गुणानां नित्यसम्बन्धः काव्यात्मना रसेन सह संस्थापितः न तु तदङ्गाभ्यां शब्दार्थाभ्याम् । अलङ्कारा एव शरीरेण सह कटककुण्डलादिवत् शब्दार्थयोराश्रिताः। तद्यथा -

तदङ्गाश्रितास्त्वलङ्कारा मन्तव्याः कटकादिवत् । [२२] इति।

विश्वनाथकविराजोऽपि गुणालङ्कारयोर्भेदकतत्त्वनिरूपणप्रसङ्गे आनन्दवर्धनमम्मटयोरभिमतमेवाङ्गीकरोति। तेन काव्यस्योत्कर्षाधायकत्वेन गुणालङ्कारीतिय इति त्रीण्येव तत्त्वानि स्वीकृतानि। तदुक्तम् -

उत्कर्षहेतवः प्रोक्ताः गुणालङ्काररीतयः । [२३] इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदभिमतं यत् - यद्यपि गुणालङ्कारौ काव्यस्यौत्कर्षाधायकौ, तथापि नानयोः साधर्म्यम् । यतोहि रसधर्मत्वेन गुणस्य नित्यत्वम् । परन्तु शब्दार्थधर्मत्वेनालङ्कारस्यानियतत्वमित्युभयोर्भेदः । अत्रैवोक्तं तेन —

शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः।
रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत् । [२४] इति।

पण्डितराजप्रभृतिभिः ध्वनिवादिभिरन्यैरर्वाचीनैरप्याचार्यैः परम्परया तदिदमेवाभिमतं शिरसि कृतम् । नैतावन्मात्रम् , अग्निपुराणेऽपि काव्येऽलङ्कारस्यापेक्षया गुणस्य महत्त्वमनिवार्यत्वञ्च प्रतिपादितं लौकिकोदाहरणपुरःसरम् । तद्यथा -

अलङ्कृतमपि प्रीत्यै न काव्यं निर्गुणं भवेत् ।
वपुष्यललिते स्त्रीणां हारो भारायते परम् ।। [२५] इति।

इत्थमेव तत्तल्लक्षणकृतां तत्तद्विशेषगुणनिर्वचनजातं परिशील्य काव्यात्मनो रसस्यैव धर्मो गुणः, न तु शब्दार्थयोरिति निश्चीयते। तथाहि "यत्र यत्र रसाः तत्र तत्र गुणाः " इति साहचर्यनियममवलम्ब्यैव काव्यात्मना रसेन सह गुणस्य समवायसम्बन्धः, शब्दार्थगुम्फेन काव्यशरीरेण सह त्वलङ्काराणां संयोगसम्बन्ध इति राद्धान्तः। सोऽयं गुणः प्राचीनैरालङ्कारिकैः कैश्चिद् दशधाऽपरैश्च विंशतिधा इत्यनेकधा प्रतिपादितः १. परन्त्वात्मतत्त्वाश्रयवादिभिः मम्मटप्रभृतिभिः "माधुर्यौजःप्रसादाख्यास्त्रयस्ते न पुनर्दश" [२६] इति गुणस्य यत्त्रैविध्यं निरूपितं तदेव समुचिताभिधानम् । तत्र कोमलवर्णविन्यस्तं माधुर्यं सम्भोगः शृङ्गारः, करुणः, विप्रलम्भशृङ्गारः, शान्तश्चेति रसचतुष्टया-न्तःर्वर्ती कठोरवर्णानुगुणितमोजस्तु वीरबीभत्सरौद्रेष्विति रसत्रय एव लब्धसताकम्। प्रसादगुणः पुनः सर्वेष्वेव रसेषु नियतस्थः। तत्र पुनः शृङ्गारद्योतकं माधुर्यं शृङ्गारापेक्षया करुणे, करुणापेक्षया विप्रलम्भे, विप्रलम्भापेक्षया शान्ते चातिशय्येन द्योत्यते। उक्तञ्चात्र मम्मटेन -

करुणे विप्रलम्भे तच्छान्ते वातिशयान्वितम् । [२७] इति।

पुनश्च वीररसान्वितमोज अपि वीभत्सरौद्ररसयोः क्रमेणाधिक्यं भजते।

स्वच्छजलवन्निर्मलः प्रसादस्तु सर्वेष्वेव रसेषु समत्वं भजते। तदित्थमेव रसस्यात्मतत्त्वस्य नित्यधर्मत्वेनैव गुणस्यालङ्काराद् व्यावर्तकत्वमिति दिक् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संदर्भाः

१. आचार्यभरतकृतं ना. शा. १/४७
२. राजशेखरकृता का.मी. ३/२५ पृ.
३. ना.शा. १७/९४
४. अ.पु. ३४६/ अ. - २
५. अ. पु. ३४६/३
६. वामनकृतानि काव्या. सू. ३/१-१
७. दण्डिकृतः काव्यादर्शः २/१
८. विद्यानाथकृतं प्रताप, भू० ३३५ पृ.
९. आनन्दवर्धनकृतः ध्वन्या० २/२०
१०. मम्मटकृतः का.प्र. ८/१
११. विश्वनाथकृतः सा. द. ८/१
१२. हेमचन्द्रकृतं काव्यानु १९ पृ.
१३. नाट्यशास्त्रम् १७ अ.
१४. काव्यानु. व्याख्या २३५ पृ.
१५. काव्यानु. व्याख्या २० पृ.
१६. Bhoja's Srngaraprakasa p. 305.
१७. काव्या. सू. ३/१-१, २, ३
१८. का. प्र. ८/३४५
१९. का. प्र. ८/३४६
२०. का. प्र. ८/६७
२१. का. प्र. १/४
२२. ध्वन्या २/६
२३. सा.द. १/२२ पृ.
२४. सा. द. १०/५५७ पृ.
२५. अ. पु. ३४६/१
२६. का. प्र. ८/८९
२७. का. प्र. ८/९१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शब्दानुशासने तृजाद्यर्थविमर्शः

मङ्गलाचरणम्

मानवानां विभिन्नभावाभिव्यक्तये भाषा एव शक्तं साधनं वर्तते। मनुष्याणां मुखगततात्वाद्युच्चारणावयवेभ्यः समुच्चरितानां सार्थकध्वनिसमूहानां समष्टिरेव भाषा कथ्यते। भाषा वाग्वा अनादिनिधना नित्या या स्वयम्भुवा आदौ वेदमयी दिव्या सृष्टा यतः सर्वाः प्रवृत्तयः समुद्भूताः । भाषायाः संस्कारो व्याकरणेन सिध्यति व्याकरणं प्रकृतिप्रत्ययविभागेन शब्दसाध्वसाधुताविवेचकशास्त्रम् । आचार्यपतञ्जलिस्तु व्याकरणं शब्दानुशासनशब्देन व्यवहरति। अस्मिन् शब्दानुशासनशास्त्रे वर्तमानाः कतिपय-महत्त्वपूर्णा अवधारणा अत्र निर्दिश्यन्ते।

तृजर्थावधारणा - तृच्प्रत्ययप्रयोगो वर्तमान एव भविष्यतीत्यत्र विषये भाष्यप्रमाणन्त्वस्त्येव (**तृजादिषु वर्तमानकालोपदानं कर्त्तव्यम्**[1]) सममेव सारमञ्जरीव्याख्याकारः श्रीयुताशुबोधविद्याभूषणोऽपि प्रमाणद्वयमुल्लिलेख। तत्र प्रथमस्तावत् संक्षिप्तसारग्रन्थस्य 'शीलाचारसाधुषु वर्त्तमाने तृङ् ' इत्यस्य सूत्रस्य व्याख्यायां क्रमदीश्वरस्त वर्त्तमानत्ववाचकं कथितवान् । तृङ्इत्यत्रोपलक्षणमवगन्तव्यम्। तृङा तृचोऽपि बोधः स्वीकार्यः। द्वितीयन्तु प्रमाणं मुग्धबोधव्याकरणस्य 'तृङ्णकौ घे'[2] इति सूत्रमस्ति। सूत्रस्यास्य व्याख्यायां श्रीयुतरामतर्कवागीशः 'तृ' इत्यस्य वर्तमानकालार्थे विधानमकरोत् । अतस्तृचो वर्तमानान्वर्थकत्वमप्रामाणिकं न भजते। स्वावच्छिन्नकालस्य वृत्तितैव वर्तमानायास्तात्पर्यमथवा स्वप्रयोगाधिकरणस्य कालवृत्तिता अथवा आवसाना प्रारम्भमाणावस्थितां कल्प्यते, क्रिया वर्तमानता। इत्थं 'ज्ञाता' तृजन्तमाश्रय-त्वार्थकं कल्प्यते, तथा च, कर्तरि विहितस्य तृचः शक्तिः कृतिप्रत्यय एव मन्यते। तृचो वर्तमानत्वार्थस्यान्वयः कृतावेव भवति अतः 'ज्ञाता' इत्यनेन ' ज्ञानानुकूलवर्तमान-कृत्याश्रयः' इति शाब्दबोधो जायते।

कारकार्थावधारणा - 'करोति क्रियां निर्वर्तयति अथवा साधकं निर्वर्त्तकं कारकसञ्ज्ञकं भवति[3] ' अनेन भाष्यवचनेन 'क्रियाजनकत्वं कारकत्वम् ' इति कारक-परिभाषा वर्तते। कारणत्वस्वरूपमेव भवति जनकत्वं, सा च कारणता अन्यथासिद्धि-शून्या सती क्रियाया अव्यवहितपूर्वक्षणावच्छेदेन विद्यमानस्वरूपा एव भवति'।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कारणातामेव निष्पादकतामुत्पादकतां वा कथयन्ति वैयाकरणाः, अतः 'क्रियानिष्पादकत्वं हि कारकत्वम्' इत्यपि कारकसामान्यलक्षणं भवति। आचार्यः कैय्यटः क्रियामेव कारकम्मनुते 'क्रियात्रसूत्रे कारकशब्देनोच्यते। सा हि कर्त्रादीनि विशिष्टव्यपदेश युक्तानि करोति'[४]। नैयायिकानां मतमस्ति यत् 'क्रियानिमित्तत्वं कारकत्वम्' इति कारकलक्षणं न सङ्गच्छते 'तत्र क्रियानिमित्तत्वं कारकत्वमिति वैयाकरणाः, तन्न'[५], अपितु 'विभक्त्यर्थद्वारा क्रियान्वयित्वं कारकत्वम्'[६] इत्येव कारकलक्षणो भवेत् येन 'चैत्रस्य तण्डुलं पचति' इत्यत्र वाक्यस्थले चैत्रपदस्य पचतिक्रियया सह साक्षादनन्विते सति षष्ठीयुक्ते चैत्रपदे कारकत्वन्न व्यवह्रियते।

यद्यपि कर्त्ताकर्मकरणसम्प्रदानापादानाधिकरणानि षट्कारकाणि, परन्तु कारकरूपेण मूलतः कर्तृत्वभावनैव सर्वातिशायिनी वर्तते, अन्यानि कारकाणि तस्यैव परिवर्तितान्यभिनिष्पन्नानि वा रूपाणि सन्ति। कर्तृत्वस्यास्याविर्भाव एव कर्तृकर्मादिभ्यः षड्भ्यः प्रकारेभ्यो भवति। इमानि षट्कारकाणि निमित्तभेदेनैव स्वीक्रियन्ते, प्रयोजनन्तु कर्तृत्वनिष्पादनेनैवास्ति अन्ततः -

निमित्तभेदादेकैव भिन्ना शक्तिः प्रतीयते।
षोढा कर्तृत्वमेवाहुस्तत्प्रवृत्तेर्निबन्धनम् ।।[७]

समासार्थावधारणा विभक्तानां काल्पनिकपदानां, तथा च, तेषां विभक्तार्थानामेकीकरणमेवैकार्थीभावसामर्थ्यं कथ्यते, यथोक्तं महाभाष्यप्रदीपे 'यत्र पदान्युपसर्जनीभूतस्वार्थानि वा प्रधानार्थोपादानाद्व्यर्थान्यर्थान्तराभिधायीनि वा स एकार्थीभावः'[८]। सामासिकीशक्तिरेकार्थीभावसामर्थ्य एव मन्यते। अखण्डोपाधिविशेषे भवति समासः, यथोक्तं सारमञ्जर्यां 'तत्र समासत्वमखण्डोपाधिविशेषः'[९]। अबुधावगमनोपायमात्रमवास्तविकं चास्ति समासे शब्दान्तरकल्पनम्। सत्योलब्धये तत् श्रमसाधनमात्रमेव। अतः विभक्त्यादियुक्तानि सुबन्तरूपाणि यदैकपदं भवति तदा तदविभाज्यमेकमखण्डपदं भवति। तस्यार्थोऽपि संहितार्थो भवति। तदैव तेन पदविधिः सम्भवति।

अव्ययीभावतत्पुरुषकर्मधारयद्विगुबहुव्रीहिद्वन्द्वान्समस्यमानानां पदानां प्रकृत्या षडेव समासभेदान्स्वीकुर्वन्ति संस्कृतवैयाकरणाः। सुबन्ततिङन्तधात्वन्तनामान्तानाञ्च पदानां मिथः समस्यमानतयापि षड्भेदा भवन्ति समासस्य, यथा सुपां सुपा सुपां तिङा सुपां नामभिः सुपां धातुभिः तिङां तिङा तिङाञ्च सुपा सह। यथोक्तं भट्टोजिदीक्षितवैयाकरणेन भूषणसारे -

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुपां सुपा तिङा नाम्ना धातुनाथ तिङां तिङा ।
सुबन्तेनेति च ज्ञेयः समासः षड्विधो बुधैः।।[10]

निपातार्थावधारणा - निपातान्द्योतकान्मन्यन्ते वैयाकरणाः। अत 'एव' निपातोऽपि निपातत्वादवधारणमसम्भवञ्चार्थं द्योतयति। न्यायपरम्परायां निपाता द्योतका न, किन्तु वाचका मन्यन्ते। एवापि निपातत्वाद्वाचको विद्यते। व्यवच्छेदकत्वमेव कथ्यते। व्यवच्छेदं विरहं निगदन्ति 'तस्य व्यवच्छेदकत्वमेव शक्यतावच्छेदकं व्यवच्छेदः शक्यो व्यवच्छेदो विरहः।[11] इति जयकृष्णतर्कालंकारवचनात् ।

शाब्दबोधार्थावधारणा - व्याकरणदर्शनस्य शाब्दबोधो मुख्यो विषयः। नैयायिकाभिमते प्रथमान्तार्थमुख्यविशेष्यकः शाब्दबोधो भवति। वैयाकरणानाम्मते व्यापारमुख्यविशेष्यकः शाब्दबोधो मीमांसाभिमते च भावनामुख्यविशेष्यकः शाब्दबोधो वर्तते। यथा 'घटमानय' इत्यत्र स्थले नैयायिकमते घटपदेन घटद्रव्यं स्मर्यते। द्वितीयया विभक्त्या च कर्मत्वं स्मर्यते। आङ्पूर्वकेन नीञ्धातुना चाभिमतदेशसंयोगः तदनुकूलश्च यो व्यापारस्तस्य व्यापारस्य जनकभूतो यो व्यापारस्तद्रूपमानयनमिति स्मर्यते। इत्थमनेन वाक्येन 'घटनिष्ठकर्मत्वानुकूलं यदिष्टसाधनतावत्कार्यतावच्चानयनं तदनुकूलकृतिमान्[12] इति शाब्दबोधो भवति। वैयाकरणमते प्रकृतवाक्यस्थलेन 'घटकर्मकानयनानुकूलवर्तमानकालिकत्वव्यापारः' इति, तथा च मीमांसकमते 'घटकर्मिका आनयनानुकूलाः वर्तमानकालिकी भावना' इति शाब्दबोधो भवति।[13]

सन्दर्भाः

१. पतञ्जलिः, व्याकरणमहाभाष्यम् (दिल्ली, १९६७) ३.१.१.३३
२. वोपदेवः मुग्धबोधव्याकरणम् , १०.२.१
३. व्याकरणमहाभाष्यम् , १.४.२३
४. कैय्यटः, व्याकरणमहाभाष्यप्रदीपः (प्रथम संस्करणं, मोतीलालः बनारसीदासः, दिल्ली, १९६७) १.४.२३
५. श्रीजयकृष्णतर्कालङ्कारः, सारमञ्जरी (द्वितीयसंस्करणम् , कलकत्ता, १९३५) पृष्ठे ३२-३३
६. तत्रैव, पृष्ठे ३३
७. भर्तृहरिः, वाक्यपदीयम् (के.वी. अभ्यङ्करेण सम्पादितम् , पूना, १९६५) ३.७.३७.
८. व्याकरणमहाभाष्यप्रदीपः , २.१.१
९. सारमञ्जरी, पृष्ठे ४६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१०. कौण्डभट्टाः, वैयाकरणभूषणसारम् , समासशक्तिनिर्णयः (प्रथमसंस्करणम्) चौखम्बा-ओरियण्टालिया प्रकाशनम् दिल्ली, १९८५) कारिका २८

११. सारमञ्जरी, पृष्ठे ५७

१२. तत्रैव, पृष्ठे १९

१३. संस्कृतव्याकरणदर्शनस्य कृतेऽवलोकनीयो ग्रन्थः - शर्मा, श्रीकृष्णः, व्याकरण-साहित्यदर्शनशास्त्रानुसारिणी वृत्तिमीमांसा (प्रथमसंस्करणम् राजस्थानी-ग्रन्थागारः , जोधपुरम् , १९९१)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्रन्थ समीक्षणम्

सर्वमङ्गला - कवितासङ्ग्रहः - रामकरण शर्मा।
प्र. - नागप्रकाशकः, ११- ए.यू.ए.
जवाहरनगरम् , दिल्ली - ७/१९९६

तुलसीस्तव - पाथेयशतक - मदलसाकाव्यादिविविधखण्डकाव्योपन्यासनिबन्धरचयितू रामकरण शर्मणः शिवशुकीयम् , वीणा, दीपिका चेति काव्यसङ्ग्रहाः प्रथिताः। सर्वमङ्गलायामस्य कवेः सप्ततिर्नवाः कविताः सङ्कलिताः। कवितासु भारतीया प्रज्ञा नूतनसन्दर्भपुरस्सरं स्फुरति। आधुनिकयुगगताया विभीषिकाया समाप्तये कविः त्रिलोचनतृतीयनेत्रोन्मीलनं कामयते -

असुन्दरं निहन्ति सुन्दराणि काञ्चनावृत्तं
छलावृतं तथाऽशिवं शिवानि हन्ति निर्दयम् ।
असत्यमेव दाम्भिकं निहन्ति सत्यवाहिनी
तृतीयमाह्वयेत नेत्रमीश ते स्थितिस्तु का ?
(उपालम्भशतकम् , पृ. ५)

'जागरणम् ' इति काव्ये कालीं कविरुपालभते -

समं समत्वशालि कालिभेदवादलाच्छितं
धुरं निजां विहाय याति कुत्रचित् ततोऽन्यतः
अमायतेऽत्र पूर्णिमा च पूर्णिमायतेऽप्यमा
कथं नु मृष्यसे स्थितिं महेश्वरि त्वमीदृशीम्
(पृ. २३)

एवमेव निरुत्तरशतकादिषु विविधकाव्येषु समकालिक्यो विडम्बना विपरिवर्तिताः स्थितयश्च कविना विवृताः, समाधानाय च मार्गोऽप्यन्विष्टः। संस्कारशीलानसौ स्मारयति स्वगौरवस्य -

का चिन्ता द्विजकर ते वीणापाणिं तनौ मनसि दधतः।
भेकास्तटेषु काकाः कार्कश्यं तन्वतां नाम।।
(पृ. ९१)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रामकरणशर्मणः काव्ये सर्वत्र भागीरथीप्रवाह इव प्रसादगुणो व्याप्तः अभिव्यक्तेरनाविलता नूतना पदशय्या च प्रभविष्णतामिह वर्धयति।

तदेव गगनं सैव धरा - (गीतिसङ्ग्रहः) श्रीश्रीनिवासरथः, राष्ट्रियसंस्कृतसंस्थानम् , नई दिल्ली, १९९५)

संस्कृतजगति कर्णाकर्णिकया प्रायश आदशकत्रयाब्देभ्यः स्यन्दमाना कवेः श्रीनिवासरथस्य गीतमाधुरी सहृदयैः शंसितास्ते। तस्येदं प्रथमं गीतसङ्कलनम् । गीतेष्वस्य लालित्यं मसृणता नूतनभावाभिव्यक्तिश्च गुणा लसन्ति। क्वचिन्नूतनबिम्बविधानं क्वचिच्चापृथग्यत्ननिर्वर्त्या अलङ्कारा काव्येऽस्य कामनीयकं कलयन्ति। अन्तःप्रकृत्या बाह्यप्रकृतेरन्वयोऽत्र विशिष्यते। तद्यथा 'सुपरिचिते पथि धावति यानम् ' इति गीते रेलयानस्याग्रे गमनं मनसि तासां तासामनुभूतीनां चोद्गमनं संश्लिष्य मनोहरमभिव्यक्तम् । क्वचिदयं कविरन्तर्जगति चराचरं जगद् विश्रान्तं प्रत्यक्षीकुरुते। तद्यथा-

चैतन्यानुगतोषसिविजने
मम नयनोपवने
तुषारलेखाऽनुदिनं विलिखति
तव मुकुलितनयने।

स्थगयति तव सीमन्तारुणिमा
तरलिततिमिरं गगनमनन्तम् ।
दिशि दिशि नीरवतातनिमानं
विदलति सहसा विहगकूजितम् ।
उदयति तव सिन्दूरबिन्दुरिव
सविताचितिगगने।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मरीचिका : काव्य सङ्ग्रहः ,
राजेन्द्रो नाणावटी, बी - १०३,
राजलक्ष्मी सोसायटी, जूना पादरा रोड,
बडोदरा - १५, प्र.स. १९९३

मुक्तच्छन्दोभी रचितेऽस्मिन् काव्ये समकालिकजीवनस्य मृगमरीचिका निरूपिता। तत्र कविकृतं च रसान्वेषणमाधुनिकभावबोधसमन्वितमवतारितम् । रचयिता वर्तते मध्यवर्गीयो बुद्धिजीवी। स स्वजीवने विलुप्यमानं प्रेम गवेषयति । गवेषणयानया संस्कृतकवितायां क्वचित् सर्वथा अस्पृष्टपूर्वा भावा अप्रस्तुतविधानं प्रतीकात्मकाश्च सन्दर्भा अवतारितानि। गुर्जरदेशप्रचलितं गरबानृत्यदृश्यं कविरभिनवसंवेदनया गोचरीकुरुते -

पश्य प्रिये
मण्डलगाने
मध्ये निहितस्य गर्भदीपस्य
दीपस्तु निर्वापितः।
मण्डलाकारेण गच्छन्त्यः स्त्रियः
अधुना केवलम्
रेखा रचयताम्
कस्यचित् असत्केन्द्रस्य
त्रिज्यामवलगताम्
बिन्दूनां निरर्थका गतिः
शून्यं द्रढयन्ती।।

(पृ. ३१)

विरहविकलतां नवयुगसन्दर्भे कविरिहाभिव्यानक्। तत्र क्वचिद् रहस्यवाद आनन्त्यस्य वा आविष्कारः प्रतिभाति -

आरुह्य मम कायपक्षौ
निजेऽनन्ते चिदाकाशे
विगलितनिजास्मितायाः
परिमलप्रवाहोपरि तरन्ती
लीनासि सञ्जाता
स्वस्यैव स्वप्नजगति।।

(पृ. १३)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कविरिहात्मानं विपरीतरतिप्रतिकृतं क्वचित्, क्वचित् सीतान्वेषणव्यापृतं रावणं वा कलयति। कबन्धवस्त्रम्, कर्मकरी, मोहद्रवसूच्यग्रम् (morphia) इत्यादयो नवीना अपि शब्दाः कविना निर्मिताः।

कल्पनापि क्वचिन्नवीनास्य लसति। यथा हि -

विषमे कर्करिते
काचपत्रे घृष्यमाणा लेखनी
कर्कशं खर्ज्यते
तीक्ष्णाग्रा च भवति
विषमास्ति सञ्जाता कर्करिता
मम मनोभूरपि।
तस्यां खर्जं खर्जं
ईदृशी तीक्ष्णा
ईदृशी सूक्ष्मा सूच्यग्रा च
भविष्यति तव वियोगधारा ..

(पृ. २९)

पारम्परिक काव्यपरम्परायाः भिद्यमानेयं शैली नूतनवातायनमुद्घाटयति संस्कृतसाहित्य प्रासाद इति दिक्।

हा-हा लघुव्यङ्ग्यकथासङ्ग्रहः इच्छाराम द्विवेदी 'प्रणव', नागप्रकाशकः, दिल्ली, १९९६।

अस्मिन् कथासङ्ग्रहे आङ्ग्लभाषायां 'सेटायर' इति व्यपदिश्यमानायां विधायां त्रयश्चत्वारिंशत् कथा निबद्धाः। कथास्तु सोत्प्रासं सोल्लुण्ठनं सविडम्बनं चाधुनिक्य स्थितीः विषयीकृताः। सर्वासु कथासु हास्यमपि समं सञ्चरति। सरलभाषया रोचकलघुकथनिकानां पाठो बालानां मनोरञ्जनाय बोधाय बुद्धिविकासाय च स्यात्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उन्मीलनम् - (बटुकनाथशास्त्र्यभिनन्दनगन्थः) - सम्पादकः- डॉ. सूर्यप्रकाशव्यासः प्र. प्रशान्त प्रकाशन १२८ बालाजी कॉलोनी, नगवा, वाराणसी - २२१ ००५ प्र.सं. १९९८

पण्डितप्रवरखिस्तेमहोदयानाभिनन्दनग्रन्थोऽयं चतुर्षु खण्डेषु विभाजितः। आद्ये खण्डेऽभिनन्द्यविदुषो व्यक्तित्वकृतित्वसमीक्षणपरा लेखाः तस्मै श्रद्धासुमनः-समर्पणपराणि काव्यानि च योजितानि। तत्र खिस्ते-महोदयानां संस्कृतकाव्यसङ्कलनभूतां 'कल्लोलिनी' - मधिकृत्य श्रीमतां कमलेशदत्तत्रिपाठिनां विवेचनं पारम्परिकसंस्कृत-काव्यरचनायाः सातत्यं तस्या अद्यतनत्वं तद्गतां च विश्वदृष्टिं गम्भीरं समुन्मीलयति। शिष्टेषु खण्डेषु विविधविषयविमर्शजुषः सन्दर्भाः अन्वीयन्ते। तद्यथा - **कालिदासस्य माहेश्वरत्वं श्रीमदभिनवगुप्तपाददृष्ट्या** - श्री बटुकनाथशास्त्री खिस्ते, **आचार्यशङ्करीयः प्रपञ्चसारः** - पं. व्रजवल्लभ द्विवेदी, **प्रत्यभिज्ञादर्शनेऽद्वैतभूमिः** - डॉ. कपिलदेवपाण्डेयः, **आगमशास्त्रं तत्र वाक्तत्त्वञ्च** - राधेश्याम चतुर्वेदी, **शाक्ताद्वैत-तत्त्वविमर्शः**- श्री शिवजी उपाध्यायः, **तन्त्रे प्रयोगात्मकसाधना**- डॉ. व्र. अमलशास्त्री, **कामरूप और शाक्ततन्त्र**- डॉ. कृष्णकान्त शर्मा, Kashmira Saivism and The Vedanta of Sankara - (Late) Prof. R.C. Dwivedi, **महाकवेः कालिदासस्य रचनासु दोषाभासनिरासाः** - श्रीबटुकनाथशास्त्री खिस्ते, **महिमाचार्यस्य शब्ददर्शनम्** - रेवाप्रसाद द्विवेदी, **आधुनिक संस्कृत काव्य-रचनाएँ : एक समीक्षण** - डॉ. मनुलता शर्मा, **आधुनिकसंस्कृतकविताया अग्रदूतः केशवचन्द्रः** - प्रो. राधावल्लभः त्रिपाठीः, **अलङ्कार-लक्षणमाला** - डॉ. श्री भा. वर्णेकरः "प्रज्ञाभारती", **अभिधर्मकोश में निरूपित धर्म, स्कन्ध एवं धातु** - डॉ. सीमा मुंशी, **प्राचीन स्वप्न- साहित्य**- प्रो. सत्यव्रत शर्मा, **यागविधिषु तन्त्रस्वरूपानुशीनम्** - प्रो. युगलकिशोरमिश्रः, **वेदे शिक्षाङ्गोपकारिता** - प्रो. जयशङ्करलाल त्रिपाठी च ग्रन्थसम्पादकस्य श्रीमतः सूर्यप्रकाशव्यासस्य समुद्यमः सर्वथा श्लाध्यः। तन्त्रागमं तथाऽऽधुनिकसंस्कृतसाहित्यमधिकृत्यात्यन्तमुपादेया सामग्री ग्रन्थेऽस्मिन् गुम्फितेति निश्चप्रचम् ।

सांख्य एवं काश्मीरशैवदर्शन में सृष्टि
ले. डॉ. विजयशङ्कर द्विवदी, प्र. स.एव / १९८८

ग्रन्थेऽस्मिन् सांख्यशैवदर्शनयोस्तारतम्यं सृष्टिप्रक्रियाविमर्शेऽनुसन्दधाति प्रवन्धकारः। प्रसङ्गोपात्तमितरदर्शनप्रस्थानगतं सृष्टिप्रक्रियाविषयकं चिन्तनमपि स्पृष्टम् स्पन्ददर्शन - प्रत्यभिज्ञाशास्त्रयोर्विशेषाः सम्यगनेन ग्रन्थेन परिचेतुं शक्यन्ते। जडप्रकृतिवादं निराकृत्य चेतनकारणतावादमिह ग्रन्थकारः समर्थयति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निष्क्रान्ताः सर्वे - प्रणेता - हर्षदेवो माधवः, प्र. - संस्कृत साहित्य अकादेमी, पुराणविधानसभागृहम् , गान्धीनगरम् - ३८२ ०१७ प्र. सं. १९९७

बृहन्नलामहाकाव्यखण्डेन समं सार्धशताधिककाव्यैः संगलितो विविधवि त्तिरम्यस्त्रिशतपृष्ठेषु विततः श्रीहर्षदेवमाधवस्याष्टमः संस्कृतकाव्यसङ्ग्रहोऽयं कवेः सुदीर्घां काव्ययात्रां विशदीकरोति। प्रयोगपटुना कविनाऽमुना परम्पराया अवबो आधुनिकतायाश्च प्रत्यय इह प्रतिभया व्युत्पत्या च प्रकटीकृतः। पुरा यत्र स्रोत शकुन्तलायाः स्वगतोक्तिः, तव न जाने हृदयम् , यक्षस्य स्वगतोक्ति, उर्वश्याः स्वगतोक्ति श्चेत्यादि काव्येषु प्रेरणास्रोतांसि प्राचीनसंस्कृतमहाकवीनां कालिदासादीनां काव्यां सन्ति, परन्तु सत्यपि प्राचीनप्रबन्धगतपात्रस्य पुरातनपदावल्या वा परिग्रहे काव्यानीमा वस्तुतो नूतनसंवेदनया संवलितानि आधुनिकयुगस्य विपर्यासं सविशेषं विषयीकुर्वन्ति कविनेमानि काव्यानि पुराकल्पनकाव्यानि (mythical poems) इति संज्ञप्तानि एतेषु प्रत्येकं काव्यं बहुषु खण्डेषु विभक्तम् । नवखण्डात्मके 'पुरा यत्र स्रोत आसी दिति भवभूतिवचःप्रेरिते काव्ये क्वचित् कविरतीतरामणीयकं वर्तमानवैषम्यं च युग साक्षात्करोति, क्वचिच्च विश्राम्यत्यस्य चेतना महाकवीनामनन्तेकाव्यजगति। तथा

पुरा यत्र स्रोत आसीत्
तत्राधुना समयस्य सिकताः सन्ति।
पुरा यत्र स्रोत आसीत्
तत्राधुना प्रेम्णः क्षारं जलमस्ति।
पुरा यत्र स्रोत आसीत्
तत्राधुना टेलिफोनप्रणयवचनानि
चलचित्रप्रणयचेष्टाः ....(पृ. ५)
xxxxxxxxxxxxxxxxxxxxx
यत्र पुरा स्रोत आसीत्
तत्रैव मे मस्तकं वर्तते।
रोपय तत् पुष्पपात्रे 'कीट्स कवेः' इझाबेलावत् ।
यत्र पुरा स्रोत आसीत्
तत्रैव मे नाममुद्रिका पतितास्ति
अन्विष्य वाचय मे नाम त्वं शकुन्तलावत्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत्र पुरा स्रोत आसीत्
तत्रैव मे पदचिह्नानि सन्ति
तानि द्रष्टुं वल्कलावृता उमा भूत्वा
प्रतिपालय माम् ।
- (पृ. ९)

अतीव विशालो वर्तते हर्षदेवस्य काव्यपरिधिः। योरोपस्य साहित्यं सभ्यतां, ग्रीक-रोम-मिश्र- प्रभृतिदेशानां तास्ताः कथाः संस्कृतमहाकवीनां सदुक्तीर्नव्यसाहित्य-गतान् सर्वथा अद्यतनानुन्मेषानसौ कविः समं कौशलेनात्मसात् करोति। हायकू - ताङ्का-शिजो - प्रभृतिकाव्यविधानां संस्कृतसाहित्येऽनेन पुरा नवावतारः पुरा कृतः, अस्मिन् सङ्ग्रहेऽयं क्वचिद् भित्तिचित्रकाव्यानि (murals) क्वचिन्मुद्रणकलाकाव्यानि (typographical) क्वचित् स्तूपकाव्यानि (Pyramid) क्वचित् सुचित्र (graph)-काव्यानि, मानचित्रकाव्यानि क्वचित् सञ्चयकाव्यानि (Collage) इत्येवं विविधविधान् अद्यावधि संस्कृतकाव्येऽस्पृष्टप्रायान् काव्यप्रकारानानीतवान् । आधुनिक-मुद्रणकलाविन्यासप्रेरितानां काव्यानां 'सम्प्रति' इति शीर्षकेणात्र स्वतन्त्रः खण्डो वर्तते, इति शीर्षकेणात्र स्वतन्त्रः खण्डो वर्तते, अन्यत्रापि वर्णविन्यासेन चमत्काराधानं कविः करोति। यथा तव न जाने हृदय' मिति काव्ये -

चक्रवाक्याश्चीत्कारं कण्ठे सङ्गोप्य
मालिनीनदीं मनसि निक्षिप्य
उटजविविक्तं हृदये परिगृह्य
अहं
तव हृदयं वाचयितुं प्रयत्नं करोमि
तदा
मम हृदयं
मुद्रिका भूत्वा कुत्रचित्
प्र
भ्रं
श
ते
(पृ. १३)

एतादृशकाव्येषु न केवलं बाह्यविन्यासचमत्कारः पृथगारोपितोऽपितु अपृथग्यत्ननिर्वर्त्यं प्रतीकविधानमपि गुम्फितम् । तथाहि भित्तिचित्रसंज्ञकेषु काव्येषु जीवनगता निगूढाः प्रश्नाः गम्भीराश्च सङ्केता लसन्ति। दिङ्मात्रमुदाह्रियते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भितौ
चित्रमालेखनीयमस्ति
किन्तु भित्तिर्न दृश्यते
मम चित्रं मनसि विशीर्यते
हे भित्ते ! अपि त्वं छलनामयी मायाऽसि ?
अहं
चित्रं भूत्वा
अधिकरणमन्विष्यामि।

(पृ. २७)

माधवकवेरेकबिम्बकाव्यानि (mono - image - poems) अर्थशक्त्युत्थध्वनीनां संहतिं धारयन्ति सविशेषं प्रभावयन्ति। एतादृशेषु काव्येषु लघूनि वस्तून्यपि महान्तमर्थराशिं द्योतयन्ति। यथा 'पिपीलिके' ति काव्यस्य इमाः पङ्क्तयः-

पिपीलिका भूत्वा
तव पूर्वस्मृतिर्दशति माम् ।
x x x
पिपीलिकादंशेन
पर्वतः समूलोऽकम्पत।।

(पृ. १३६)

नास्ति अविषयः कविताया इति तथ्यं प्रमाणीकुर्वन्ति काव्यानीमानि। कवेर्माधवस्य बहूनि काव्यानि आकारेण संरचनया संघटनया च प्रबन्धायमाणानि प्रतिभान्ति। बृहन्नला-महाकाव्यखण्डस्तु कवेरस्य साहित्यसृष्टेरभिनवं सोपानम् । अत्र बृहन्नलावेषधारिणोऽर्जुनस्य व्यथाऽधिमहाभारतीयकथाफलकं विन्यस्ता। मुक्तच्छन्दोबद्धं सप्तसर्गात्मक मिदं काव्यं संस्कृत महाकाव्यस्य नवीनं मानदण्डमुद्घाटयेदिति मन्यामहे।

दार्शनिकतत्त्वावगमः साम्प्रतिकविश्वे साहित्यसृष्टेरायतिमधिकृत्य चिन्ता च क्वचित् परिलक्ष्यते माधव-कवि-काव्ये। स्वकाव्यरचनाया उद्देश्यं स्वयमसावित्थं विवृणुते-

कवितायाः प्रसवक्षमतां ज्ञातुं
वात्यासारस्य वृक्षे
नीडं रचयितुम्
अहं लिखामि।
लावारसस्य क्षेत्रे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वप्नं वप्तुम्
अहं शब्दैः सह क्रीडामि।

(पृ. ३०६)

मृत्युरयं कस्तूरीमृगोऽस्ति - प्रणेता स एव ।
प्र. पार्श्व पब्लिकेशन, निशापोल, झवेरीवाड, रिलीफ रोड, अमदाबाद - ३८० ००१ प्र.सं. १९९८

सङ्कलनेऽस्मिन् हर्षदेवमाधवस्य विविधा रचना विलसन्ति। तत्र प्रथमो विभागो नाट्यसङ्ग्रहरूपो द्वितीयश्च संस्कृतलेखसङ्ग्रहात्मकः। प्रथमे विभागे सप्तरूपकाणि सन्ति, द्वितीये च विभागे आधुनिकसंस्कृतसाहित्यमधिकृत्य सप्त लेखाः। यथा काव्यरचनायामपरिचितेषु क्षेत्रेषु साहसिकोऽयं कविः सञ्चरति, तथैव रूपककर्तृत्वेनाप्ययं सर्वथा नवीनामेव सरणिं श्रयते। तस्य रूपकाणि पाश्चात्त्यरङ्गमञ्चे प्रचलितां विसङ्गतनाट्यशैलीं प्रकटयन्ति। एतेषां पाठेन न भास - कालिदासादीनामपितु सेमुएलबेकेट - प्रभृतीनां स्मरणं जायते। 'कब्रस्थाने' इति रूपकं मृतपुरुषयोः संवाद प्रस्तौति। प्रत्येकं संवादे स्खलदक्षरा द्वित्राः पञ्चषा वा शब्दाः सङ्केतगर्भभाषाया अद्भुतं रूपमाविष्कुर्वन्ति। रूपकमिदमाकाशवाण्याः प्रसारितपूर्वम् । 'चिताग्निः साक्षिरूपो वर्तते ' इति रूपके पात्राणि सन्ति प्रेतद्वयम् आसन्नमृत्युश्चैका कन्या। मृत्युबोधस्य साक्षात्कारो रूपकमिदं विशेषयति। संवादास्त्वेवं प्रचलन्ति -

१- अन्धकारः .....
२- अन्धकार एवात्र ....
१- अन्धकारे विजने श्मशाने .....
२- शमीवृक्षः ....

(पृ. ५)

'कामला' इति लीलानाट्यमिह व्यपदिष्टम् । अत्र सूत्रधारस्य सङ्केतेन दर्शकवर्गादुत्थायोत्थाय नवयुवानो नाट्ये सम्मिलिता भवन्ति। शर्मण्यदेशीयनाट्यकर्तृ रङ्गकर्मिणो ब्रेख्तमहोदयस्य पद्धतिरिह अङ्गीकृता। एवमेव परीक्षेति रूपकमपि लीलानाट्यम् । एतयो रूपकयो पात्राणां समूहो मञ्चे प्रभवति।

'जिगमिषे' ति रूपकमनन्तयात्रायाः साङ्केतिकीमभिव्यक्तिं विदधति। अत्र यातृद्वयं शैलेशश्च पात्राणि। 'कस्तूरीमृगोऽस्त्ययं मृत्यु' रिति रूपके कालोद्याने

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुरभिपुष्पमाघ्राय राजपुत्रो मृत्युं याति तदनु प्रमत्तकः रक्षकौ चापि तमनुकुर्वन्ति। सर्वथा प्रतीकात्मकमिदं रूपकम् । अस्तित्ववाददर्शनच्छाया एतादृशरूपकेषु श्लिष्टा। एवमेव विद्यते 'नवं जन्म, नवानि कर्माणि नवं फल' मिति रूपकम् । अत्र पात्राणि सन्ति स्वर्गात् पलायितो मानवः , नरकाद् विसृष्टो मानवः स्वर्गनरकद्वाररक्षकश्च। उभौ मानवौ पुण्यत्यागं कर्मन्यासं च कृत्वा नवकर्मणो नवफलस्य च कृते धरामवतरतः।

ग्रन्थस्यास्य द्वितीये भागे सङ्कलिता लेखा हर्षदेवमाधवस्य समीक्षकरूपं पुरस्कुर्वन्ति। 'सन्धानस्यानुसन्धानम् ' इति लेखे राधावल्लभकृतं सन्धानम् इति काव्यसङ्कलनं मीमांसितम् । द्वितीये लेखे तस्यैव कवेः 'गीतधीवरम् ' इति रागकाव्यस्य विश्लेषणं चिन्तनगर्भं सूक्ष्मेक्षिकासंवलितं विश्लेषणप्रधानं च वर्तते। लेखद्वयमिह कविमुपन्यासकारं च केशवचन्द्रदाशं विषयीकरोति। लेखद्वये क्रमशो जापानदेशीयं काव्यद्वयं ताङ्का तथा च हाइकू इति संज्ञितं परामृष्टम् । एतयोः काव्यप्रकारयोर्लक्षणं संरचनागतो विशेषः वस्तुवैशिष्ट्यं च प्रामाणिकतयेह विवेचितानि। आधुनिकसंस्कृत-कविता जगति मदीया साहित्ययात्रे ' लेखः सङ्कलनेऽस्मिन् नितरां महत्त्वपूर्णः । अनेन कवेहर्षदेवमाधवस्य काव्यदृष्टिः काव्यसाधना च ज्ञातुं शक्यते।

सीताभ्युदयम् - नाटकम् सीतादेव्या आत्मकथासंवलितम्
हिन्दीभाषानुवादसहितं च **प्रणेता - रामजी उपाध्यायः।**
प्र. भारतीय - संस्कृति - संस्थानम् ३५७, महामनापुरी, वाराणसी - ५, १९९८।

षडङ्के सीताभ्युदयनाटके सीतादेव्या गौरवमयं चरित्रं नूतनदृशा समुन्मीलित-मुपाध्यायवर्यैः। अत्र राष्ट्रभावना सांस्कृतिकबोधश्च सविशेषं समुन्मिषतः। नाटकोपक्रमे सीताया आत्मकथा पृथक् सन्निवेशिता। आत्मकथायां वाल्मीकिरामायण-महाभारत-पद्मपुराणादि -प्रमाणितं सन्दर्भसहितं सीतावृत्तं प्रणेतुरभिनवकल्पनया प्रेरणास्पदं हृदयावर्जकं च सञ्जातम् । तत्र पृथिव्याः प्रार्थनया तत्साहाय्याय कार्यभारसंविभागाय च ब्रह्मणा तत्कन्यात्वेन सीतायास्तस्यै प्रदानम् , जनकेन वारुणद्वीपमागतेन तस्याः पुत्रीकरणम् , मिथिलाया विद्यापीठे तस्या अध्ययनम् , मुनिपत्नीभिर्गोदावर्यां गाहमानायास्तस्या रावणेनापहरणम् , अभुक्तमूलनक्षत्रसमुत्पन्नयोः कुशलवयोरनिष्ट-निवारणाय सीताया वाल्मीकेराश्रमगमनं रामायणप्रणयने तस्याः सहयोग इति नैकानि वृत्तानि प्रबन्धवक्रतां पुष्णन्ति। भारतराष्ट्रस्य महिमशालिस्वरूपं सीतादेव्या वाचि समुन्मीलति। तथाहि -

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

> "वारुणद्वीपाद् भारतयात्रा महामहिमशानिली प्रावर्तत। समुद्रस्योत्तालतरङ्गेषु वरुणप्रभावात् क्वचिद्स्माकं पोतो वियद्गतो धारासु प्रनर्त्यमान इव भारताभिमुखं नित्यनूतनोत्क्षेपणात् प्रयाणपथे प्लवमानो वङ्गतटं प्रत्यपद्यत। ततश्छात्राणां मिथिलां प्रति यात्रा रथैः समारब्धा।" (पृ.५)

> "वनयात्रा मह्यं सर्वथा प्रशान्तिधायिनी रोचतेस्म। शिववारिवहा वेदश्रुतिः, गोधना गोमती, प्रखरस्यन्दे लघुकशकुलीर्नर्तयन्ती स्यन्दिका चेति स्रोतस्विनीः पारयन्नस्माकं रथ उपगङ्गं समायात् । तत्रत्यनिषादराजस्यार्य-पुत्रस्य च पैत्रायणी मैत्री आनन्दानन्त्यमादर्शयत् । गङ्गायाः स्वपूर्वजानामुद्धारणवृत्तान्तेनोपचीयमाना आत्मीयता मां महोद्योगाय प्रोत्साहयतिस्म। ततो नातिदूरमासीत् प्रयागे नदीत्रयस्य संगमो यत्र महर्षीणां ज्ञानधारासु अवगाहनेन संगमस्य पावित्र्यजनन- सामर्थ्येन च मम रक्षोनिवेशविघ्ना विहता भविष्यन्तीति विश्वासोऽजायत। ततः परं मनुर्भारद्वाजस्य निर्देशानुसारेण चित्रकूटायात्रा समारब्धा।"
> (पृ.७)

वाल्मीकेः काव्यं भावितवता कथाकारेण रामायणाद् यथावसरं पद्यान्यपत्रोद्-धृतानि। संस्कृतगद्यस्य सर्वथा प्राञ्जलं परिष्कृतं सहजं च रूपमत्र मनोहरति।

सीताभ्युदयनाटके इदमेव सीताचरितं रूपकात्मकतया प्रस्तुतम् । स्वयं ब्रह्माऽत्र चरितस्यास्य योजनां विवृण्वन् प्रथमाङ्के वसिष्ठमाह -

> "शृणोतु तावद् वृत्तान्त - व्याख्यानम्। सुदूरातीते नागलोकस्य सम्राट् सलिलेश्वरो वरुण आर्येतराणां मानव-संस्कृतेः स्वीकारणमियेष। आदौ स बृहत्तरभारतस्य स्वाधिष्ठिते - द्वीपवासिनां सांस्कृतिकोत्थानाय प्रयासपरायणो मम परामर्शेन स्वदेशाच्छात्रान् भारतेऽध्येतुं प्रेषितुकामोऽभवत् । तदानीं धर्मविजय - प्रसङ्गे तत्र गतो मिथिलाधिपतिर्जनक आवयोः प्रस्तावानुसारेण नागलोकात् प्रतिभाशालिनः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

छात्रान् वृत्वा स्वीयविश्व - विद्यापीठे प्रेषयतिस्म। तेषु छात्रे पृथिवीदेव्याः कन्या सीता वरुणस्य पुत्रो वाल्मीकिश्चानन्यतमौ अभवताम् । सीतायाः प्रातिभगुणोत्कर्षेण प्रभावितोऽनपत्यो जनकस्तां पुत्रीकरोतिस्म परस्तात् रामेणोदूढवांश्च अस्मद्योजनानुसारेण सीतायाः संयोगेन रामो लोकविद्रावकं रावणं हतवान् । भविष्ये वाल्मीकेराश्रममुपवसन्ती सीता रामायणनिबन्धने साह्यं करिष्यति। सर्वमेतद् घटनाचक्रं भृगुशापमेवानुवर्तिष्यते। अथ किम् सीता वाल्मीकेराश्रमे रामेण न्यासीकरिष्यते।" (पृ.७-८)

प्रथमाङ्के ब्रह्मलोके, द्वितीये वसिष्ठाश्रमे तृतीय उपगङ्गं तमसातटे, चतु वाल्मीक्याश्रमपरिसरे, पञ्चमे वरुणलोके षष्ठे गङ्गातमसयोरन्तर्देशे च नाट्यकृतिः सञ्चरति। भारतमुव उद्धाराय सीताया जन्म कर्म च प्रवृत्तमित्यत्र सम्यक् प्रत्यपा प्रणेत्रा। षष्ठेऽङ्के गन्धर्वा "वन्दे मातर" मिति राष्ट्रगानं गायन्ति। नाट्योपसंहारे युक्तमाह श्रीरामः -

"अद्यावधि मया देवर्षीणां विघ्नोपशान्तये लोकाराधनाय च जीवितव्ययं सबाधं निर्बाधं च दैवनियोगेन निष्ठापितम् । भारतं मे कर्मभूमिः अत्र मया देवर्षिगन्धर्वासुरनागादीनां सुरक्षा प्रातिपालिता। रामायणं हि मम प्रज्ञानरूपं सत्पथकामानामुन्नयनं विधास्यतीति महर्षिवाल्मीकेर्लोकान् प्रति दाक्षिण्य- फलम् । अहं तु सीतापतिः स्वीयप्रभारूपेण सीतैव वारुणे लोके जगदखिलं राममयं विधास्ये। एतदर्थं सीतायास्तत्र पाताले प्रयाणं वरुणप्रस्तावानुवर्तनेनानुमोदयामि।"

[समीक्षकः -राधावल्लभः]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(२)

मरीचिका, कवी राजेन्द्रनाणावटीः, प्रका.- राजेन्द्रनाणावटी बी-१०३, राजलक्ष्मीसोसायटी, जुनापादरारोड, शिव महलपैलेस के पास, बड़ोदा - १५, मू. ४० रुप्य.

कवी राजेन्द्रो नाणावटीः समुपायनीकरोति सहृदयेभ्यो नूतनभावसंवलितं कामपि मरीचिकाभिधां काव्यकल्पवक्षाटवीम् । इह लसन्ति द्विचत्वारिंशद् गीतयः शीर्षावगुण्ठनोन्मुक्ता मुक्तसरण्यामभिसरन्त्योऽपि सहृदयहृदयस्य मर्मस्थानं संस्पृश्य कामपि वदान्यां रहोवेदनामथ च तद्बीजभूतं कमपि संस्कारविशेषमुद्बोधयन्त्यः । न दृश्यतेऽमूषां पारम्परिको बन्धविशेषः, न वा लक्ष्यते संस्कृतवितावनितया सामञ्जस्यमेव। पाश्चात्यालङ्कारलङ्कृतेयं स्वल्पवस्त्रं दधाना प्रणयमदविह्वला मरीचिका षोडशी क्षीवेब प्रस्तौति कमप्यभिनवविभावानुभावसञ्चारिसंयोगादभिव्यक्तं रसचषकम् । नूनं मरीचिका प्रणयाकुलहृदयस्य कापि पिपासा, कापि तृष्णा वा प्रणयतृषार्तस्य। कविरभिव्यनाग् विविधरूपेणाभिनवसर्जनधारामिह -

किं न मूल्यं ममैतावद
यत्स्नेहमहमाप्नुयाम् ?

किं च, कवित्वशक्त्युद्बोधिका कापि पीडा कवेर्तर्तत एवेति स तां पुरस्कुर्वन्नाह-

इयमपि किम्
विपरीतरतिरेव ?
विरहवेदनाबीजम्
त्वया निक्षिप्तम्
मयि
अथ पश्य
जायमानामिमाम्
काव्यसन्ततिम् ।
अप्यवशेषितोऽस्ति
नियतिकृतः कोऽपि नियमक्रमः
त्वया
मयि ? ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवं पृष्ठे पृष्ठे कमपि नूत्नमेवभावं कामप्यभिनवामेव विच्छित्तिं रचनादि वाऽस्पृष्टां साक्षात्करोति कवी राजेन्द्रः । प्रणयवेदना तस्या अशक्यता च नैपण्ये निरूप्येते कविना। यत्सत्यमभिनवप्रयोगपद्धत्याऽऽविष्कारदृष्ट्या च महत्त्वमस्या भवेत् मरीचिकायाः संस्कृतकाव्यक्षेत्रे किन्तु सरणिरियं साहित्यजगत्यस्मिन् कामपि शोभ नवविकासं वाविष्करिष्यति तद्गौरवाय वा न वेति विचारणीयं काव्यतत्त्वविद्भि यद्यपि भृशं प्रशंसितेयं साम्प्रतिककविशिरोमणिना राधावल्लभेन नवप्रयोगदृष्ट्या किन्तु संस्कृतकाव्यधाराया यद्धि सातत्यं तस्याविरतत्त्वं कुत्रचिद् विलीयते वर्धते वेत्यपि विचारणीय सुधीभिः।

प्रतीकप्रयोगे यद्यपि विशिष्यते कविरिह किन्तु तद् व्यामोहेन समागता केचन भाषाप्रवाहविच्छेदाः सत्यं सिकतायन्ते काव्यास्वादे। यथा चोदाह्रियन्ते केचन *मेघमय्या सरन्त्याम्* (पृ.४), *प्रावृणनभः* (पृ.५) इह 'ष्टुना ष्टुः' इत्यनेन प्रावृण्णभ इति युज्यते वा ? *पृष्ठवर्तिनो* दीपतेजसि (पृ.६) इह दीपस्य तेजसि युक्तमुक्ते तु समासपूर्वपदे दीपेन 'पृष्ठवर्तिनोऽन्वयानुपयन्तेः। *तवोरोजः कम्पः* (पृ.१२) अपि सकारान्त उरोजशब्दः *प्रिये, तरन्तौ निरालम्बौ* (पृ.१८) अत्र कथं सामानाधिकरण्यं, कुतो वा लिङ्गभेदः पुनश्च तत्रैव *'समीपो एतादृग् यथा हस्तौ,* इति कथं समन्वयः ? *विरजयित्वा* (पृ.२१ को वाऽर्थः ? *मोहद्रवसूच्यग्रमिव* (पृ.२८) उपमानस्याप्यप्रसिद्धिः। *हृदयं पीडयति पीडयत्येनम्* (पृ.३०) अपि हृदयशब्दः पुल्लिङ्गे। *लवत्कार* (पृ.३०) ? *स्त्रियः रचयताम्* (पृ.३१) कर्तृसामानाधिकरण्यं क्रिया-वचने विद्यते वा ? अपि च को वा लकारः रचयताम्) इति पदे ? *चास्तमयसि* (पृ.३३) इह वर्तमानत्वं कथम् ? यदि वर्तमानत्वं पूर्वम् 'आसीत्तदा' इति कथम् ? 'अस्तमिता' इति भूतप्रयोगेण भाव्यम् । *उत्प्लोषयिष्यामि* (पृ.३६) को वा धातुः ? *अरक्षिष्यम्* (पृ.४२) अत्र भ्रमः। *प्रज्वालयन्तीं* (पृ.४५) अत्र *प्रज्ज्वलन्तीम्* इति युक्तम् । *कतमं काष्ठं* (पृ.४८) यदि नपुंसकं 'कतमत् ' इति स्यात् किल। *महद्वशिकम्* (पृ.५७)? *वासु ? तदिष* (पृ.६०) *कटाक्षशरराः* (पृ.६०)?

एवं बहुत्र संशयः। च्युतसंस्कारो दूरान्वययादयो दोषाश्च केचन काव्यास्वादम् रुन्धत्येव। तत्र सहृदयाः काव्यमर्मज्ञा एव प्रमाणम् ।

कवेर्भावाः पुनः पुनर्नवायन्ते, दृश्यते तेषां स्वरूपे काचित् प्राञ्जलता प्रथमा संस्कृतकाव्यक्षेत्रेऽन्यतमा। प्रयोगस्याधुनिकत्वं भाषाभावसौष्ठवमन्ये च विशे प्रमाणयन्ति कवे राजेन्द्रस्य काव्यप्रणयनेऽनुत्तमताम् । सर्वमन्यद्वैशिष्ट्यं व्यतनोत क राधावल्लभः केवलमेतदेव यत् 'मरीचिका' वस्तुतः समकालिकसंस्कृतक्षेत्रे भज विशिष्टस्थानमिति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वामनचरितम् , प्रणेता - इच्छारामो द्विवेदी, 'प्रणवः', प्रका. - नागप्रकाशकः दिल्ली, १९९७, मू. - ५६ रूप्यकाणि

वामनचरितं नाम श्रीमद्भागवतमुपजीव्य विरचितं पञ्चदशसर्गात्मकं महाकाव्यम् । प्रायशः सार्धपञ्चशतश्लोकेषु भगवतो वामनस्य पुराणप्रसिद्धं चरितमिह स्वभक्त्युपहितया गिरा वर्णयन् महाकवित्वकोटौ पदं धत्ते कविः प्रणवः । सरला प्रसादगुणोपिता च भाषा, स्वाभाविका अलङ्कारा, वर्ण्यविषयानुसारि छन्दोविधानं लघुलघुतरसर्गेषु विहितः प्रबन्धविभागश्च पिशुनयन्ति महाकवेरस्य काव्यसर्जनायां नैपुण्यातिशयम् । पूर्वेषां कवीनां प्रभावोऽपीह लक्ष्यत एव। यथा च प्रकृतिवर्णने कालिदासस्य -

प्रालेयबिन्दून्नथ दर्शयन्ती,
स्वेदान्वितेयं नु नवोदलज्जाम् ।
प्रादर्शयन्नूतनसङ्गमे सा,
नव्यं भयं यत् सरसं वधूनाम् ।।२.३।।

वामनचरिते यद्यपि भगवतो वामनस्य प्राधान्यं, तथापि बलेर्यच्चरितमिह महाकविनोट्टङ्कितं तन्नूनं भगवन्तमपि तमतिशेते। दानवीरस्य सर्वेऽपि विभावानुभावसञ्चारिणोऽत्र नैपुण्येन कल्पिताः। राक्षसः सन्नपि बलिः शुक्राचार्यमुखात् स्वभाविपराभवं श्रुत्वा निश्चयान्न पलायते। स संसारस्य असारतां, याचकत्वेन समागतस्य च भगवतो वामनस्य प्रभावं जानाति। अतो गुरुवाक्यमपि न्यक्करोति -

जगति दानपरा बहवो जनाः
ददति दीनजनाय निरन्तरम् ।
सकललोकविशाम्पतये गुरो !
बलिरयं खलु दास्यति दानकम् ।।११.१६।।

पुराणपटुरयं महाकविः लौकिकव्यवहारेऽपि भजते तथैव पटुत्वम् समाजेऽपि क्वचित् प्रियाया अपाङ्गनिर्देशमवाप्य किमप्यलौकिकत्वमनुभवति -

प्रियो यदा चञ्चलनेत्रकोणैः ,
प्रियाऽपि चाऽपाङ्गनिदर्शनेन।
प्रवक्तुकामौ भवतः समाजे,
स शाब्दबोधोऽद्भुत एव लोके ।।१२.५।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पत्नीत्वस्य कोऽपि नूतन एव मानदण्डोऽत्र निर्धारितः प्रणवेन -

विनापि शब्दैरखिलं स्वभर्तुः ,
भावं विजानाति च चित्तवृत्तिम्
असंशयं सा हृदयं द्वितीयं,
प्रिया सदा सैव च धर्मपत्नी ।।१२.६।।

"पिय हिय की सिय जाननिहारी" इति तुलसीदासोक्तिसामञ्जस्यमिह कथञ्चिद् दृश्य

समकालिकसंस्कृतसाहित्यसर्जनाक्षेत्रे यद्यपि महानयं प्रयासः कवेः प्रणव तथापि समकालिकसमस्यानामुल्लेखः द्विवेदिसदृशमहाकवीनां कृतिषु स्यादेवाऽन्य युगबोधादीनां साहित्याध्ययनाद् ज्ञानं न स्यात् । भाषायाः स्वाभाविकताऽपि कवि संरक्षणीया। 'समय आगते' (६.१६) इत्यादयः प्रयोगा अत्र हिन्दीभाषायाः प्रभावं वद "हरिकथारसिकोऽतिवल्लभः" (४.७) इत्यत्र छन्दोभङ्गः। "जगति दुःखमहो कस्यचि नहि" (४.५) इत्यत्र च "जगति दुःखमहो नहि कस्यचित् " इति पाठः स्यात्।

वामनचरितप्रणयनव्याजेन भारतीयसंस्कृतेर्यदौदार्यं महाकविना प्रणवेन वर्णि तन्नूनं समकालिकसमाजस्य महत उपकाराय कल्प्यते इति सहृदयैरवश्यं महाकाव्यमि साम्प्रतिकसंस्कृतसाहित्यस्योपलब्धित्वेन स्वीकरिष्यते।

प्रेरक्षणसप्तकम् ,प्रणेता - राधावल्लभत्रिपाठी, प्रकाशकः - प्रतिभाप्रकाशनम् , दिल्ली, १९९७

प्रेक्षणसप्तकेऽस्मिन् लसन्ति विश्रुतकविना राधावल्लभेन प्रणीतानि 'सोमप्रभ 'मेघसन्देशम् ' 'धीवरशाकुन्तलम् ' 'मुक्तिः' 'मशकधानी' 'गणेशपूजनम् ' 'प्रती चेति सप्तप्रेक्षणकानि। साम्प्रतिकसमस्या आश्रित्य ग्रथितोऽयं प्रेक्षणकसङ्ग्र भाषाप्रयोगवस्तुविन्यासादिदृष्ट्या कविभिरनुकरणीयः। समकालिकसाहि समकालिकसमस्यानां समाजे च तासां प्रभावस्योल्लेखोऽवश्यं स्यात् । कविवर्ये त्रिपाठिना प्रेक्षणकानामेतेषां प्रणयनव्याजेन निर्दिष्टः कश्चनाऽभिनवः सर्जनामार्गः

कवेरनुभवसंसारे सङ्कोचो नाऽस्ति । स लघुन्यपि प्रेक्षणके तत्सम्बधिविवि विषयान् निर्दिशति। यथा च सोमप्रभमित्यस्मिन् प्रेक्षणके "पश्यत पश्यत अस्या दौरा दुर्भगायाः"। इति वदता कविरेकतो विमलायाः कन्याजननजन्यां दुर्दशां निरूपयत्यप च सोमप्रभाया मुखात् "अशोकस्य पितामही कियत् स्निह्यति तस्मिन् । मम पिताम

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तु भर्त्सयति ताऽयति माम् "इत्युक्तौ बालहृदयस्य व्यथां समाजे चाद्यापि व्याप्तं पुत्रीपुत्रभेदविषयं चातुर्युेण वक्तीति सर्वथा अभिनन्दनीयेयमभिव्यक्तिः । सेवाकार्येषु गृहे चोभयत्राऽपि विमलाया व्यग्रता आधुनिकमहिलाजीवनस्य किमपि निदर्शनम् ।

मेघसन्देशे पर्यावरणविभीषिकां पुरस्कुर्वन् कविः प्रकृतेः मानवस्य च सम्बन्धं निर्दिशति । नूतनेयं कल्पना कवेः संस्कृतसाहित्ये यत्र दृश्यते मेघाय पत्रप्रेषणे समुद्यतो बालः सौरभः। अकालवृष्ट्यादिरहितेयं वसुन्धरा समेषां भद्राय स्यादिति कामयमानः कविः प्रार्थयते -

काले वर्षतु देवो भातु च सौरभसमन्विता वसुधा।
पल्लविता कोरकिता पुष्पैराढ्या लता विलसेत् ।

भरतवाक्येऽस्मिन् पात्राणां नाम्ना निर्देशोऽपि विहितः। परम्परेयं सर्वत्रानुपालिता कविनेति विशेषोऽत्र प्रेक्षणकानाम् ।

धीवरशाकुन्तले यद्यपि धीवरो नायकायते तथाप्यारक्षिव्यवस्थाया अधिकारिणां च लोलुपतायाः सम्यग् बोधोऽत्र भवति। गृहपतेः गृहकार्यपलायनान्न मुक्तिरिति विषयोऽयमङ्गीकृतः मुक्तिरित्यस्मिन् प्रेक्षणके।

मशकधानी प्रतीकरूपेणोपस्थाप्य लोकतन्त्रस्य दुरवस्थाभ्रातृ-भ्रातृव्यवाद-निरूपणे, गणेशपूजने च सामाजिकदशावर्णने साफल्यं भजते नाट्यकारः। प्रतीक्षायां समाजे व्याप्तं नरपशूनां भयं वर्णितमिति प्रेक्षणसप्तके साम्प्रतिकताबोधो युगबोधश्च पदे पदे लसति।

आधुनिकयन्त्राणां निर्देशार्थं संस्कृते शब्दाभावः । कविना राधावल्लभेन तदपाकरणाय निर्मिता नूतनाः केचन शब्दाः। यथा 'रिसीवर' इत्यस्य कृते राहुः, शिरसः कृते च केतुः। प्रेक्षणसप्तके प्राचीनोऽपि विषयः नवायते। प्रेक्षणकाणामेतेषां हिन्द्यामनु-वादोऽपि सहैव प्रकाशितः कविनेति संस्कृतज्ञानरहितानां कृतेऽपि सुकरोऽयं ग्रन्थः।

अखिलभारतीयनाट्यस्पर्धास्वसकृद् रङ्गमञ्चे प्रयोजितानि 'मेघसन्देशम्' धीवरशाकुन्तलम् , 'मुक्तिः' 'मशकधानी' चत्वारि प्रेक्षणकानि बहुशः पुरस्कारैः सभाजितानि। मशकधानीति प्रेक्षणकस्य हिन्द्यां रङ्गमञ्चे नैके प्रयोगा विहिता मनीषभिर्दर्शकैश्च प्रशंसिताः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाषायाः स्वाभाविकता भावानां च भव्यता प्रेक्षणकानामेतेषां प्राणतत्त्वं कवेर्भाषाप्रयोगः वस्तुविन्यासश्च भासस्य सर्जनाक्षमत्वं स्मारयति पदे पदे। नूतनताऽपि कमपि परम्पराप्रसूतमानन्दं जनयतीति सिद्धलेखनीकस्य कवे राधावल्लभस्य प्राच्यपाचात्त्य-योरुभयोः प्रयोगनिपुणतापरिज्ञानाय भाषाभावादिसौष्ठवपरिज्ञानाय सङ्ग्रहोऽय-मवश्यं सङ्ग्रहणीयः साहित्याध्येतृभिरिति दिक् ।

परशुरामविजयम् , प्रणेता - जगदीशचन्द्रशास्त्री, प्रका.- प्रतिभा प्रकाशनम् , २९/५ शक्तिनगर, दिल्ली, १९९७, मूल्यम् - २०० रूप्यकाणि

नवसर्गेषु निबद्धेऽस्मिन् महाकाव्ये महर्षेः परशुरामस्य जीवनं चरितं च सविस्तरं वर्णितं कविना शास्त्रिणा। सर्गान्ते यद्यपि छन्दः परिवर्तनमिह विहितं तथाप्यनुष्टुप् सर्वत्र प्रयुक्तमिति साम्प्रतिकमपि महाकाव्यमिदं पुराणपद्धतिमेवाविष्करोति। महाकाव्यस्योद्देश्यं तु परशुरामकथायाः सङ्कलनमेव -

यत्र तत्र पुराणेषु सङ्केतेनैव वर्णिताम् ।
कथां परशुरामस्य वर्णयामि यथामति।।१.७।।

नवसर्गेष्विह प्रथमे परशुरामजन्म, द्वितीये शस्त्रशास्त्राभ्यासं, तृतीये तपश्चर्यां, चतुर्थे जमदग्निवधं, पञ्चमे कार्तवीर्यवधप्रतिज्ञां, षष्ठे पाशुपतास्त्रप्राप्तिं, सप्तमे दूतसम्प्रेषणम्, अष्टमे कार्तवीर्यवधं, नवमे च जनकसभायां परशुरामप्राप्तिं वर्णयामास कविः।

महाकाव्येऽस्मिन् तास्ता एव परशुरामविषयिण्यः कथाः शब्दान्तरेण वर्णिताः युगानुरूपताया अत्र सर्वथाऽभावः। यदि नाम साहित्यस्य प्रयोजनं पौराणिकविषयाणां स्वशब्दानुवादस्तर्हि महाकाव्यमिदं साम्प्रतिसंस्कृतसाहित्यस्य महती उपलब्धिः अतथात्वे तु काव्यानामेतादृशां प्रयोजनमेव बुद्धौ नाऽऽयाति।

भाषाया धारावाहिकता कवेरस्य पुराणपाण्डित्यं द्योतयति। रामायणादिषु वर्णिताः परशुरामविषयिण्यः कथाः काव्येऽस्मिन् क्रममवाप्य मुनेरस्य चरित्रदर्शनेऽधिकतरं क्षमाः।-क्वचित् रामचरितमानसस्याऽपि प्रभाव इह दृश्यते । महर्षेः परशुरामस्य चरित्रादिनिदर्शककमपूर्वमिदं महाकाव्यमिति सुधीभिरक्षिलक्ष्यीकरणीयम् एवेति दिक्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आन्वीक्षिकीविमर्शः प्रणेता - गणेशीलालसुथारः, प्रका. - रुक्मिणीप्रकाशनम् , जोधपुरम् , १९९१, मू. - १२० रुप्यकाणि

आन्वीक्षिकीविमर्शो नाम विदुषो गणेशीलालसुथारस्य विद्याव्यसनजन्यः कश्चन प्रबन्धः। विविधविद्वत्सभासु पठितपूर्वा न्यायवैशेषिकजैनन्यायाद्यनेकशास्त्र-सिद्धान्तसमीक्षणपराः षोडशनिबन्धा अत्र सङ्गृहीताः। ग्रन्थकृता पारम्परिकाः शास्त्रार्थ विषयाः पूर्वोत्तरपक्षोपस्थापनपुरस्सरमिह समीक्षिता, उपस्थापिताश्च वादिप्रतिवादिमत-व्याख्यानपूर्वकं तत्तच्छास्त्रीयास्ते ते सिद्धान्ताः। सत्तायुतसिद्ध्ययुत-सिद्ध्यादिपारम्परिक-विवादविषयविवेचनव्याजेन तत्तत्सिद्धान्तविषयकं तत्तच्छास्त्रीयं वैमंत्यं प्रदर्श्य शास्त्राभिमतसिद्धान्तपक्षं निश्चाययन् ग्रन्थकारोऽत्र पुरस्करोत्यभिनवां काममपि परिष्कार-पद्धतिम् । वैशेषिकाणां प्रामाण्यपरतस्त्वविचारणे तेषां ख्यातिवादाविष्करणे च शास्त्रकारपदवीमारूढ इव भाति सुथारमहोदयः।

पूर्वाचार्योक्तिं प्रामाणयात् केशवमिश्र - जगदीशतर्कालङ्कारादिप्रथिताचार्याणां मते दोषमुद्भाव्य शास्त्राभिमतसिद्धान्तसन्दर्शने चरमां कोटिमाटीकते ग्रन्थकर्तुश्चिन्तन-चातुरी। पदे पदे प्रमाणप्रदर्शनम् , अपसिद्धान्तानां निराकरणं, शास्त्रकाराणामन्त-र्विरोधादिप्रदर्शनम् इत्येते नैके विशेषा इह राजन्ते तथापि भासर्वज्ञवचःप्रामाण्यं यदङ्गीकृतं ग्रन्थकारेण तस्यौचित्यानौचित्यनिर्णयस्तु विद्वद्विवेकविषयः।

न्यायनये समवायस्य प्रत्यक्षवेद्यत्वं नित्यत्वं चेति सुप्रसिद्धमेव। वैशेषिकाणां चात्र सिद्धान्तभेदस्तन्यते तस्यातीन्द्रियत्वादित्युभयप्रस्थानपरम्परां पुरस्कृत्य समवायस्य भासर्वज्ञाभिमतयौक्तिकप्रत्यक्षत्वं निरूपयताऽपि ग्रन्थकारेण न तन्मतं निरस्तमिति व्यज्यत एव तस्मिन् तस्य पक्षपातः।

पण्डितमधुसूदनशर्मकृतवैशेषिककर्मप्रक्रियापरिष्कारादयोऽप्रसिद्धाः केचन नूत्ना विषया न्यायवैशेषिकपरम्परायां संयोजिता निरस्ताश्चाधुनिकानां प्रमाणप्रस्था-नस्यादर्शनत्ववादिनां सिद्धान्ता इत्यपूर्वतामस्य प्रशंसयद्भी राधावल्लभत्रिपाठिभिरपि उक्तं भूमिकायामस्योपयोगित्वम् -

> "अभूतपूर्वः कश्चन प्राचीननवीनविचारसम्मर्द एभिरान्वी -
> क्षिकीविमर्शेऽस्मिन् समुपस्थापितः। तेन नूत्लचिन्तनस्यालोके

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परम्परराया रत्नानि क्वचित् समधिकतरं चकासते, क्वचित् तेषां परिधिर्विस्तार्यते क्वचिच्च संशोधनं जायते पूर्वप्राप्तलक्षणनिवहे"।

परम्पराऽत्र प्राच्यपाश्चात्त्योभयविधचिन्तननिकषे परीक्षितेति सुथारमहो-यस्य प्रयासोऽयं न्यायवैशेषिकशास्त्रपिपठिषूणामुपकाराय स्यादेवेति दिक्।

रि-ऑर्गनाइजिंग इंडियन शास्त्रिक ट्रेडिशन्स, सम्पादकौ - राधावल्लभत्रिपाठी अच्युतानन्ददाशश्च, प्रकाशकः - प्रतिभाप्रकाशनम्, दिल्ली, १९९८, मू. ३०० रूप्य.

"रि - ऑर्गनाइजिंग इंडियन शास्त्रिक् ट्रेडिशन्स्" (भारतीयशास्त्रपरम्परा-पुनर्व्यवस्थापनम्) इत्याख्येऽस्मिन् ग्रन्थे तत्तच्छास्त्राणां पुनर्व्यवस्थापनप्रक्रियामवल- निबन्धाः सङ्गृहीताः। न्यायवैशेषिकपदालङ्काराद्यनेकशास्त्रीयसिद्धान्तानां पुनर्व्यवस्- नूनं भारतीयशास्त्रपरम्परायाः काचिदग्रसृतिस्तथात्वे सङ्गणकाद्याधुनिकयन्त्र- हाय्येनाऽपि तदध्ययने सौकर्यं स्यात्। पण्डितबच्चूलालावस्थिसदृशज्ञानवृद्धै- परम्पराया अस्या नवोन्मेषमार्गोऽत्रोपदिष्टः। वैशेषिकाणां पदार्थसिद्धान्तस्य पुनर्व- स्थापनप्रक्रियेह आचार्यचरणैस्तैस्सम्यङ्निरूपिता ग्रन्थादाविति महर्षिप्रवर्तितेयं परम- तादृशाचार्येण प्रवर्तनं प्राप्ता पुनरिति स्यादेवैतत् गौरवायास्याः।

नव्यन्यायप्रसिद्धायाः परिष्कारपद्धतेराविष्कारः कृतोऽच्युतानन्ददाशमहोदये- विविधपारम्परिकग्रन्थेषु तत्तद्रूपेण चर्चिताया अस्या अत्र चर्चितं व्यवस्थापनं विदु- विविदिषूणां चोपकाराय कल्प्यते। क्रमेऽस्मिन् केशवचन्द्रदाशमहोदयेन विहि- नव्यन्यायसिद्धान्तानां समीक्षणमपिभजते वैशिष्ट्यम्। एकतोऽच्युतानन्ददाशमहोदयैर- उद्देश्यलक्षणपरीक्षापरिष्कारविषयोऽपरतश्च केशवचन्द्रदाशसमीक्षिता नव्यन्या- सिद्धान्ता भारतीयशास्त्रपरम्परायाः पुनर्व्यवस्थापनप्रकारस्यास्य सम्भावनां पुरस्कुर्वन्ति

न च पुनर्व्यवस्थापनेनानेन परम्पराविच्छेदभयं कल्प्यम् प्रकारस्या- तत्तत्सिद्धान्तानां सरलोपस्थापन एवोधृतत्वात्। तथा च स्पष्टीकृतं राधावल्लभत्रिपाठि- स्व निबन्धे -

> Re-organisation of a Śāstra should
> basically involve the simple task of

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

> presenting its categories of concepts through models or diagrams as well as simplifying these categories or adding to them where necessory (पृ. १३४)

कपिलकपूर - रामसुन्दरपाठक-सी.राजेन्द्रनप्रभृतिभिः मनीषिभिः प्रदर्शितस्तत्तत्सिद्धान्तानां पुनर्व्यवस्थापनमार्गः सङ्ग्रहस्यान्यतमत्वं प्रतिपादयति। रसध्वन्यलङ्कारादिकाव्यशास्त्रीयसिद्धान्ता नव्यन्यायस्य केचन प्रमुखाः सिद्धान्ता अष्टाध्याय्याश्च कस्यचिदंशस्य सारल्येनोपस्थापनं तत्तद्विषयाणां ज्ञानायालमिति विद्वद्भिर्विद्यार्थिभिश्चावश्यं पठनीयोऽयं सङ्ग्रहः विधेयश्चात्र निर्दिष्टमार्गे प्रयासो भारतीयशास्त्रपरम्परायाः प्रचाराय प्रसाराय चेति दिक् ।

[समीक्षकः -पाण्डेयो रमाकान्तः]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सागरिका

LIBRARY
Gurukul Kangri Vishwavidyalaya
HARDWAR

संस्कृतत्रैमासिकी

चतुस्त्रिंशद्वर्षे द्वितीयोऽङ्कः

३४/२
विक्रमसंवत् २०५५-५६

सागरिकासमितिः

संस्कृत विभागः
डॉ. हरीसिंह गौर विश्वविद्यालय, सागरम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतीय व्याख्यापद्धतिः (अनुमान -विधिना)

रेवाप्रसादो द्विवेदी

व्याख्याया मुख्यो निकषः क इति प्रश्ने सर्वपथीनमुत्तरमेकमेव 'संवाद' इति। संवादो नाम हृदयसंवादः। अनुभूतेःसादृश्यं तत्र स्वरसः। कोऽर्थः ? अयम् यत् यदभिप्रेत्य प्रवर्त्तिता भगवती वाक् वक्त्रात् तस्य वाचि प्रतिच्छन्दनम् , वाचा प्रतिफलितस्य चास्य सहृदये तथैव प्रतिबिम्बनम् । भूयानेव विचारः संवादे तेषां तेषामभियुक्तानाम् । तथा चानन्दवर्धनः -

संवादो ह्यन्यसादृश्यं तत् पुनः प्रतिबिम्बवत्
आलेख्याकारवत् तुल्यदेहिवच्च शरीरिणाम्[१] इति।
तत्र पूर्वमनन्यात्म तुच्छात्म तदनन्तरम् ।।
तृतीयं तु प्रसिद्धात्म स्व काव्यं न त्यजेत् कविः[२]।। इति,
आत्मनोऽन्यस्य सद्भावे पूर्वस्थित्यनुयाय्यपि।
वस्तु भातितरां तन्व्याः शशिच्छविमिवाननम्[३] ।। इति च,

राजशेखरोऽमुमेवार्थं काव्यमीमांसाया द्वादशेऽध्याय एवमुपनिबन्धयति-त्रिपथमर्थमध्यगीष्महि यदुतान्ययोनिर्निह्नुतयोनिरयोनिश्च। तत्रान्ययोनिर्द्विधा प्रतिबिम्बकल्प आलेख्यप्रख्यश्च। निह्नुतयोनिरपिद्विधा तुल्यदेहितुल्यः परपुरप्रवेशसदृशश्च। अयोनिः पुनरेक एव । तत्र -

अर्थः स एव सर्वो वाक्यान्तरविरचनापरं यत्र।
तदपरमार्थविभेदं काव्यं प्रतिबिम्बकल्पं स्यात् ।
कियतापि यत्र संस्कारकर्मणा वस्तु भिन्नवद् भाति।
तत् कथितमर्थचतुरैरालेख्यप्रख्यमिति काव्यम् ।।
विषयवस्तु यत्र भेदेऽप्यभेदबुद्धिर्नितान्तसादृश्यात् ।
तत् तुल्यदेहितुल्यं काव्यं बध्नन्ति सुधियोऽवितथम्।
मूलैक्यं यत्र भवेत् परिकरबन्धस्तु दूरतोऽनेकः।
तत् परपुरप्रवेशप्रतिमं काव्यं सुकविभाव्यम्[४] ।।

एवं हि वक्ता, वचनं, प्रतिपत्ता चेति यत् त्रितयमेतदेव क्रीडास्थलं संवादस्य । अत्र प्रश्नाः - यस्य वचनस्य वक्ता न ज्ञायते तत्र कथंकारमुपपद्येत वक्तृ-वचनयोः संवादः। वेदसंहिता हि अपौरुषेया, न श्रूयते तत्र मन्त्राणां वक्ता। योऽपि श्रूयते तस्यापि तत्राऽनुपस्थितावेव सचेतसां दृष्टपरावराणां च सुमेधसां बहुमानः एवं च सति वेदमन्त्राध्येतृणां हृदयस्य संवादः केन वा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वीक्रियेत। यदि वा मन्त्रशब्दैरेव निष्ठ्यूता येऽर्थास्तेषामेषां सहृदयानां हृदि यथावदवभासनमेवाऽत्र संवादरूपेण गृह्येत, तर्हि कीदृशो नु क्षेमस्तेषां मन्त्राणां येषां नास्ति निश्चितार्थता. यथा, 'सृण्येव जर्फरी तुर्फरी तु' इत्येतस्य मन्त्रस्य। ये च निगममन्त्रा यथा 'चत्वारि शृङ्गा इत्यादयस्तेषामनिश्चितार्थ-कत्वे केन वार्थेन निर्धार्येत संवादः ?

ये च प्रतिपत्तारस्तेषामपि भवति बहुविधत्वम् । उपनिषत्सु नैका उपलभ्यन्ते गाथा यत्रैकस्यैवाक्षरस्य श्रोतृभेदेन भिन्नार्थता दृश्यते । तथाहि 'हृदय-'मिति यत् पदमस्यैकस्यापि ते तेऽर्थाः । तथाहि 'ह' इत्यस्याक्षरस्यैकोऽर्थः, 'द' इत्यस्याक्षरस्य तथैव कश्चिदेक एवार्थो निर्धार्यते, एक एवार्थश्च 'यम् ' इत्येतस्यांशस्य । एवमर्थत्रयात्मकत्वं भवति वर्णसमुदायविशेषस्य। ततश्चापद्यतेतरामनिश्चितार्थत्वमेषां व्याहाराणाम् । उपनिषत्स्वेव 'द' इत्येतस्यैकस्याप्यक्षरस्य दानम् , दया चेति भिन्नभिन्ना अर्थाः । तथापि व्याख्यातुरपि विकल्पकवलितत्वमीक्ष्यते। येनासौ 'यद्वेति पक्षान्तरमप्युपस्थापयति। भगवत्यादे शङ्कराचार्य इव तान्त्रिक शिरोमणावभिनवगुप्ते, सायणादिषु च सोऽयं विकल्पग्रहः स्पष्टतर एव ।

यस्य मूलमनिश्चितं तस्यांशस्य पुनः संपादनमावश्यकं भवति। रघुवंशस्यैव 'अव्याहतः स्वैरगतेः' इत्यस्य पाठस्य स्थाने प्रकाशितमस्ति 'अव्याहतैःस्वैरगतैरिति पाठः। ब्राह्मीलिपावेकारौकारमात्रयोरुकाराकारमात्रयोश्च साम्यमेव लभ्यते, तथैव त्रकारचकारयोरिव शकारवकारयोर्लिपावपिऽततश्च शौर्यं चापदचेष्टितमि' - ति यो भावस्तस्यास्य शौर्यं श्वापदि चेष्टितमि-ति रूपेण जायते परिणामः, जायते च परिणामः त्यजति गुरुनितम्बा निम्नध्यानशा ना' इत्यस्य त्यजति गुरुनितम्बा निम्नमध्यावसाना' इति । वामनस्य काव्यालङ्कारसूत्रे 'ओजःप्रसादयोः संप्लवे' गुणत्वमीक्ष्यते। तत्र सूत्रपाठः - 'गाढबन्धत्वमोजः (३.१.५), शैथिल्यं प्रसादः (३.१.६) गुणः संप्लववान् (३.१.७) इति। इतः परं मुद्रितेषु पुस्तकेषु सूत्रपाठेऽपि भेदः । तथाहि 'अग्रिमं सूत्रं क्वचित् 'न शुद्ध' इति, क्वचित् पुनः सत्त्वनुभवसिद्ध इति (३.१.८)। समाधिसूत्रेऽपि स्थितिरीदृश्येव । तत्र सूत्राणि आरोहावरोहक्रमः समाधिः (३.१.१२), न पृथक् आरोहावरोहयोरोजःप्रसादरूपत्वात् (३.१.१३) न, असंपृक्तत्वात् (३.१.१४), अत्र असंपृक्तत्वादित्यस्य स्थाने विपरीतार्थक एव पाठः - 'संपृक्तत्वादि'-ति। अत्र कामधेनुः संपृक्तत्वादित्येव पाठमाद्रियते। निर्णयसागरीये संस्करणे पुनः 'असंपृक्तत्वादि' -त्येव पाठः। किमत्र प्रतिपत्तव्यम् ?

अथ यत्र प्रतिपाद्यस्यार्थस्य प्रहेलिकाप्रायत्वं तत्र कुतः संवादसंभवः ? बृहत्यारण्यके हि 'अश्वमेधो' आख्यायते। तथाहि 'उषा वा अश्वस्य मेध्यस्य शिरः, सूर्यश्चक्षुः वातप्राणः व्यात्तमग्नि वैंश्वानरः, संवत्सर आत्माश्वस्य मेध्यस्येति द्यौः पृष्ठम् , अन्तरिक्षमुदरम् . पृथिवी पाजस्यम्, दिशः पार्श्वे , अवान्तरदिशः पर्शवः, ऋतवोऽङ्गानि, मासाश्चाऽर्धमासाश्च पर्वाणि.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अहोरात्राणि प्रतिष्ठा, नक्षत्राण्यस्थीनि, नभो मांसानि। ऊवध्यं सिकताः, सिन्धवो गुदा, यकृच्च क्लोमानश्च पर्वताः, औषधयश्च वनस्पतयश्च लोमानि, उद्यनु पूर्वार्धः, निम्नलोचञ्जघनार्धः, यद् विजृम्भते तद् विद्योतते, यद् विधूनुते तत् स्तनयति, यन्मेहति तद्वर्षति, वागेवास्य वाक् ।। इत्येवमत्राश्वो निरूप्यते। अयमश्वः प्रजापतिरूपः। तथाऽत्र दृष्टान्तः 'प्रतिमायां विष्णुत्वमिवे'ति। अस्य व्याख्याने भगवान् शङ्कराचार्यः - व्यात्तम् विवृतं मुखम् । पाजस्यं पादस्यं, पाजस्यमिति आह- वर्णव्यत्ययेन पादासनस्थानमित्यर्थः, पर्शवः पार्श्वास्थीनि, नभो नभस्था मेघाः। ऊवध्यम् उदररथमर्धजीर्णमन्नम् , विजृम्भते गात्राणि विनामयति, मेहति मूत्रति, वर्षति सिञ्चती' -ति नेपुणं व्यापिपर्त्ति । काव्यशास्त्रे वाक्यानामेषां रूपकालङ्कारवाक्यत्वेन क्रियतेतरामादरः। रूपकं च सादृश्यं साधर्म्यवाऽऽरोपाय साधनीकरोति। दर्शयन्त्याचार्या इमे तदुभयमपि - द्यौः पृष्ठमूर्ध्वत्व-सामान्यात् , अन्तरिक्षमुदरं सुषिरत्वसामान्यात् , अङ्गानि अङ्गसाधर्म्यात् । सन्धयः सन्धि-सामान्यात्, अस्थीनि शुक्लत्वसामान्यात् , सिन्धवः स्यन्दनसामान्यात् , पर्वताः काठिन्यादुच्छ्रि-तत्वाच्चे'-ति।

याऽस्माकं वार्त्ता नाम्नी विधा तस्याः कृते क्रियन्तेतरां भूयांसि यजनानि। ब्रह्मवद्भि रेषामेषामापाद्यते निरर्थकत्वमिति समुत्पद्यते शाश्वतिको विरोधो दृष्टेनादृष्टस्य। बृहदारण्यकारम्भे च एष विरोधो विस्तरेणोपस्थापितो भगवत्पादैः - 'ग्रामकामो यजेत पशुकामो यजेत, स्वर्गकामो यजेते-'ति यानि ब्रह्मव्यतिरिक्तफलानि निगमवचनानि तेषां 'ब्रह्म सत्यं जगन्मिथ्ये-'ति जगन्मिथ्या-त्वप्रतिपादकैर्निगमवचनैः सहोपस्थितो विरोधः परिजिहीर्षितो भगवत्पादैर्बंहीयसा भाष्यवितस्तरेण बृहदारण्यक एव ।

विचित्रमेवेदं यद् भगवत्पादा अपि बृहदारण्यकभाष्ये भाष्यान्तराण्युद्धत्य प्रत्यादिशति। तथाहि द्वितीयारण्यकारम्भ एवोच्यत एतैः -' औपनिषदंमन्या अपि केचित् प्रक्रियां रचयन्ति अत्र च तार्किकैः सह सन्धिं कुर्वन्ति, ततस्त्रस्यन्तः सांख्यमाश्रयन्ति, वैशेषिकं च ततः। सर्वमेतत् कल्पनामात्ररमणीयमुपनिषद्विरुद्धं चेति प्रस्तुन्वन्ति च ससंरम्भमेतेषां प्रत्याख्यानम् । तत्रैतेषां तर्काणां निष्कर्षः श्रुत्यर्थकल्पनाकुशला सर्व एवौपनिषदर्थमन्यथा कुर्वन्ति ' इति (पृ. १३५बृहदा.) स्पष्टमेतेन यद् व्याख्याया अप्रामाणिका अपि प्रकारा भारतीयायां मनीषायामस्तित्वं बिभराम्बभूवुः। तेष्वप्यनुदासीना अतिष्ठन् विचारका इत्यप्यत एवोपन्यासात् स्पष्टमेव। अयमत्रापरः संज्ञानविषयो यत् सिद्धान्तत्वेन निर्धार्ये विषये परम्परायाः प्रथमं स्थानमिति। स्वैरत्वं स्वत एव कल्पनाजालविस्तारयितृत्वं चात्र संप्रदायविदुषां सुदूरमेवाविषह्यम् । इह त्वत्र स्पष्टमेव कल्पना-मार्गोऽपि क्षुण्णचर एव व्याख्यातृणाम् । अत एव नैषधादीनां टीकास्वपि विकल्पजातप्राचुर्य-मालक्ष्यते-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सानन्तानात्यतेजःसखं निखिलमरुत्प्रार्थिवान् दिष्टभाज -
श्चित्ते नाशजुषस्तान् सगमसमगुणान् मुञ्चती गूढभावा।
पारेवाग्वर्त्तिरूपं पुरुषमनुचिदम्भोधिमेकं शुभाङ्गी
निश्शेषानन्दमासीदुपनिषदुपमा तत्परीभूय भूयः।।

इत्यादिषु तद्धि विकल्पजातं प्रतीतचरमेव। श्रीभागवतादीनां या वेदस्तुतयस्तासामपि गूढभावत्वमस्त्येव सुतरां प्रसिद्धम् । रासपञ्चाध्याय्यां जगौ कलं वामदृशां मनोहरम् । इत्य क्लीबीजं कल्पयन्ति, कल्पयन्ति च

सैषा स्थली यत्र विचिन्वता त्वां भ्रष्टं मया नूपुरमेकमुर्व्याम् ।
अदृश्यत त्वच्चरणारविन्दविश्लेषदुःखादिव बद्धमौनम् ।।

इति रघुवंशपद्येऽपि तदेव ह्लींबीजम् उदारदृशो यद्धि सुगूढमुपक्षिप्तं श्री श्रीहर्षेणैव -

अवामावामार्धे सकलमुभयाकारघटनाद्
द्विधाभूतं रूपं भगवदभिधेयं भवति यत् ।
तदन्तर्मन्त्रं मे स्मरहरमयं सेन्दुममलं
निराकारं शश्वज्जप नरपते सिध्यतु स ते ।। १४.८८

इत्यस्मिन् तान्त्रिके रहस्यदिग्धे पद्यराजे । एवंविधस्यार्थस्य निश्चये व्याकरणकोषाद्यपेक्षया पारम्पर्यस्यैव भवति प्रधानत्वम् शब्दतः अर्थस्य कल्पनायां क्रियमाणां भवेदत्र सिन्धुलिपिसदृशी कदर्थना। न च भवत्यत्राऽप्रतीत्वं दोषः, कवितुः प्रतिभायास्तत्रैव संरम्भात् । अत एवोपनिषद रहस्यलेखानामभ्यनुमोदनम् , तत्र 'पश्यकस्य कश्यपत्वे परिवर्त्तना प्रतीतचरैव । प्रतीतचरैव च प्रतिज्ञा वैदिकानां परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विष' इति। वक्तृप्रतिपत्रोरत्र दुर्घट एव मतिसंवादः। अथ विधेर्वाच्यत्वे प्रतीयमानस्य निषेधादेः कथं न्वनुभवः। ततश्च कीदृशीनन्वनुभूति 'भ्रम धार्मिकि' - त्यादिषु प्राथमिकस्य पार्यन्तिकस्य च पदार्थसार्थस्य। ध्वनिवादिनस्तत्रातिरिक्तं व्यञ्जनाख्यं शब्दव्यापारमुपयन्ति, अपरे पुनरनुमितिम् । अपरेषु प्रमुखो व्यक्तिविवेकविधाता महामतिर्महिमाचार्यः । स हि प्रतिपद्यते - 'भम धम्मिअ' अत्र हि द्वावर्थौ वाच्यप्रतीयमानौ विधिनिषेधात्मकौ क्रमेण प्रतीतिपथमवतरतः, तयोर्धूमाग्न्योरिव साध्यसाधनभावेनाऽवस्थानात्। तत्राद्यस्तावदविवेकसिद्ध एव भ्रमणविधिलक्षणस्य साध्यस्य तत्परिपन्थि- क्रूर-कुक्कुर-मारणात्मनः साधनस्य चोपादानात् । द्वितीयस्त्वत एव हेतोः पर्यालोचितणिजर्थस्य विवेकिनः प्रतिपत्तुः प्रयोजकस्वरूपनिरूपणेन सामर्थ्यति प्रतीतिपथमवतरति। तच्च सामर्थ्यमृतेऽपि कौलेयकं क्रूरतरस्य सत्त्वान्तरस्य तत्र सद्भाववेदनं नाम नापरम् । तदेव च साधनम् । तयोश्च साध्यसाधनयोरविनाभावनियामकेविरोधमूलः। स चानयोर्लोकप्रमाण सिद्धः। इति, 'बाध्यबाधकभावाऽवसायकृत

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवात्रोत्तरार्थविश्रान्तिनियमः। तत्र भम धम्मिअ वीसद्धो इति वाक्यार्थरूपो भ्रमणविधिर्वाच्यः. तस्य 'सो सुणओ अज्ज मारिदो देण' इत्यादिना कुक्कुरमारणं दृप्तसिंहविहितं वाक्यार्थरूपमेवार्थो हेतुः। तत्प्रतिषेधस्त्वनुमेव एव. न वाच्यः तस्य केवलेनाक्षेपेणैव लाभात् । अत्र 'गोलाणईकच्छकुडुङ्ग- वासिणा' इति गोदावरी कच्छकुहरस्य पक्षत्वनिर्देशकः. 'दरिअसीहेण'-ति दृप्तसिंह-सद्भावस्य हेतुभावः। कुडङ्गवासिणेति तद्विशेषणे तस्य धर्मिणि सद्भावोपादानम् । तस्यतस्य हेतोः साध्यस्य च सहानवस्थानलक्षणो विरोधः प्रसिद्ध एव। एकमेकस्य सद्भाववेदनेनापरस्य स्वभावविरुद्धोपलब्ध्या। प्रतिषेधो विज्ञाप्यमानोऽनुमेय एव न व्यङ्ग्य इत्यवसेयं यथा नात्र शीतस्पर्शो वह्नेरित्यतः शीतस्पर्शः। यदि वा प्रेक्षावतां प्रवृत्तिरनर्थसंशयाभाव-निश्चयेन व्याप्ता. तद्विरुद्धश्चानर्थसंशयोऽस्माद् विधिवाक्याण्णिजर्थपर्यालोचनयाऽवसीयत इति व्यापक विरुद्धोपलब्ध्या. यथा नाऽत्र तुषारस्पर्शो वह्नेरित्यतस्तुषारस्पर्शस्ये-'ति (व्यक्तिविवेकस्य तृतीये विमर्शे पृ. ४६३-४६६) तात्पर्यवादिनां पुनरत्राप्रतिहत एव तात्पर्यशक्तेः प्रसरः।

प्रतीयमानपदे या प्रतीतिस्तस्या अस्या द्विविधेष्वर्थेषु प्रसरः. ज्ञानविषयमात्रेषु समास्वाद्यमानेषु च। उच्यते हि 'प्रतीयते धातुरिवेहितं फलैरिति। अत्र प्रतीतिर्ज्ञप्तिमात्ररूपैव। इत्यादिषु पुनर्भावेषु सैषा स्वादरूपा। अत्र 'रतिःप्रतीयते' इत्युक्तौ स्वाद एव प्रतीतिः। अयमत्र विशेषो यदनयोर्द्वयोरप्येकत्र संप्लवः विभावादिसामग्र्या ज्ञायमानाया रतेरेव पश्चात् साक्षिभास्यता प्रसिद्धैव रसगङ्गाधरादिषु । अत्र रतेरास्वादस्यापि संग्रहः। इयमेव भाट्टनायकानां भुक्तिः। इमं रत्यादिभावानामास्वादं यावदनुभूतेर्या परिव्याप्तिरसौ प्रतीयमानकोटिमेवावगाहते भवति च विषयोऽनुमितेः। अन्येष्वप्युक्तिशतेष्वियमेव स्थितिः प्रतीयमानस्यार्थान्तरस्य । सर्वत्रैवैकरस्यानु-मानस्यैव प्रसरः।

इदमत्रावधानेन प्रतिपत्तव्यं यद् यस्यानुमानस्यात्र चर्चा तद्धि तादृशमेव यादृशं खलु स्वीकृतचरं 'पर्वतो धूमवान् वह्नेः' इयदिषु स्थलेषु। हेत्वाभासस्यैव तत्र साम्राज्यम् । तथापि प्रयोगस्यानुमानविषयत्वमेव। अयमर्थो यत्र भवति प्रमाणरूपमेवैकमनुमानमनुमापदवाच्यम् . यद्धि हेत्वाभासाश्रितं तदप्यनुमानत्वव्याप्यजातिमत्त्वेनाद्रियतेतरां सांप्रदायिकैः। तदेव तु महिमभट्टादीनामनुमानत्वेनार्थान्तर प्रतीत्यर्यमभिप्रेतं साधनत्वेन। ततश्च व्याहतं वचो यद् 'भीरुरपि गुरोः प्रभोर्वा निदेशेन भयकारणाधिकरणे भ्रमिवान् संभवती-'ति। विषयान्तरेऽपीयमेव स्थितिः. इयमेव पदार्थयोजना. इयमेव चानुमितिपरिणतिः। या च प्रतीती रसादीनां स्वादशबलतायां तस्यामनुमानं प्रत्यक्षं चेति प्रमाणद्वयस्य मूलत्वम् । तत्र रतिज्ञानं दवदनुमितिः. ततः परंतु साक्षात्कारभोगाद्यपरपदप्रत्येन आस्वाद एव प्रत्यक्षरूपः। सोऽयं सोपानरूपः प्रतीतिद्वयसंप्लवः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तिष्ठति हि जागरूका कवेः प्रज्ञा तर्केष्वपि। अत एव काव्यलिङ्गादीनामलङ्कारत्वं निर्हेतुत्वादीनां च दोषत्वम् । एवं हि यदुच्यते 'सर्व एव हि शाब्दो व्यवहारः साध्यसाधनभावगर्भतया प्रायेणानुमानरूपोऽभ्युपगन्तव्यः, तस्य परप्रवृत्ति निवृतिनिबन्धनत्वादि-'ति (व्यक्तिविवेकारम्भे २६-२७ पृष्ठयोः) तदक्षरशः परिशुद्धमेव।

विस्तरं विसृज्याऽत्रेदमेव पर्याप्तं वक्तुं यद् भारतीयायां व्याख्यापद्धतौ वक्तृप्रतिपत्तृ-संवादः प्रथमः परमश्च तात्पर्यार्थलाभ इति। अत्रैव वक्तृतद्वचनव्यापारयोरन्वितामिधानम् , वचन-प्रतिपत्रोश्चाभिहितान्वयः लभ्येते।

क्रमेस्मिन् गुणाः, दोषाः, अलङ्काराः रीतिवृत्तिप्रभृतयश्च निपुणं निरूप्यन्ते, निरूप्यन्ते च शय्यापाकादयो बन्धगता विशेषाः। व्याख्यातारो हि दर्शयन्तितरामात्मनो वैविध्यम् । तथा च कथंभूतिनः, अकथंभूतिनः, मितवाचः, उच्छलद्गतिकसरस्वतीका इति। तेष्वेवैके संमर्शि-नोऽलूक्षाश्च । तेषामेषां पारस्परिको भेदः स्फुटतर एव। तत्राऽत्र सर्वत्र यद्यपि न लभामहे कुन्तकतुल्यां विद्यधतां, मल्लिनाथतुल्यां अनपेक्षितार्थपरित्यागसमेधितामपेक्षितार्थोक्तिम् , अभिनव-गुप्त-सदृशीं शेमुषीमसृणतां, शङ्करभगवत्पादतुल्यां च प्रामाणिकतां तथापि नास्ति तत्र न समृद्धिः । बलात्कारा अप्यासु विभाव्यन्ते तेषां समाधयश्चापि। सर्वथा

व्याख्याविधासु भरतावनिलालितासु
लालित्यमस्तिनि बिडं निभृतं च तासाम् ।
को नाम कात्स्न्र्यमुपवर्णयितुं क्षमेत
यो नास्ति भार वहने धरणेः समर्थः।।

संदर्भाः

१. ध्वन्यालोके ४.१२
२. मुद्रितस्तु पाठः नान्यसाम्यं त्यजेत् कवि-रिति। ध्वन्यालोके ४.१३
३. ध्वन्यालोके ४.१४
४. काव्यमीमांसा १२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाट्टसम्प्रदाये प्रस्थानभेदाः

सोमनाथ नेने

वेदानां कर्मण्येव तात्पर्यावधारणाय जैमिनिमहर्षिभिः सङ्कलिते मीमांसाशास्त्रे शब्दनित्यत्ववेदाऽपौरुषेयत्वप्रामाण्यादिषु विषयेषु अन्यवादिसिद्धान्तवैभिन्यं यथा वर्तते तथैव नानावादिप्रभाववशाद् तत्रान्तरिकमपि मतवैभिन्यं सुतरां चकासते।

विविधवादिभिः सह विचारभेदेषु धृताकारेऽस्मिन् दर्शने भट्टप्रभाकरमिश्रवर्येषु येहि सिद्धान्तभेदाः तेषु भृशं पार्थक्यवशादेभिः प्रतिपादितानां सिद्धान्तभेदानां सम्प्रदायभेदेन प्रकाशितं वर्गीकरणं सुधीभिः। भट्टप्रभाकरमिश्रमतैः गुम्फितायां सिद्धान्तमालिकायां यथा विराजन्ते राद्धान्तवैविध्यप्रकाशकानि विविधानि विचारप्रसूनानि तथैव मीमांसायाः प्रथमस्थाने स्थापनीये भाट्टमतेऽपि क्वचिद्विचारबिन्दुषु वैषम्यं दृग्गोचरीभवत्येव।

एकस्मिन्नेव भाट्टप्रघट्टे विद्यमानेषु मीमांसकेषु यथाकथञ्चिदनुभूयमानान् विचारभेदान् दृष्टिभेदान्वाङ्गीकृत्य सिद्धान्तानामेतेषामान्तरिके वैषम्येऽपि सम्प्रदायस्य मूलभावनाया सहाविरोधादेतेषां विचारभेदानां प्रस्थानभेदसंज्ञया विधातुं शक्यते प्रख्यापनम् ।

सम्प्रदायभेदः

मीमांसानये सम्प्रदायभेदेन विद्यमानेषु सिद्धान्तेषु प्राथम्येन विराजन्त इमे विचारबिन्दवः। अध्ययनविधिविध्यर्थनिर्णयकर्मप्रवृत्तिसङ्गतिशाब्दबोधशब्दप्रामाण्यज्ञानप्रामाण्याभावविषयेषु नितरां परस्परं विप्रतिपद्यन्ते मीमांसासम्प्रदायाः।

अध्ययनविधौ सम्प्रदायभेदः

वेदमात्रस्य धर्मज्ञानप्रतिपादकत्वान्निखिलाङ्गोपाङ्गसमन्वितस्य चातुर्विध्यमुपगतस्य च निखिलस्य वेदस्याध्ययनस्याशक्यतया स्ववेदान्तर्गतायाः शाखायाः गुरुमुखोच्चारणानुच्चारणात्मकमध्ययनं प्रतिपाद्यते 'स्वाध्यायोऽध्येतव्य' [१] इत्यनेन विधिना। प्राभाकरभाट्टमतयोरत्र वर्तते विचारभेदः। गुरुमते अध्ययनविधिप्रतिपादितस्याध्ययनस्य अध्ययनविधिसन्निधौ पठितेन 'तमध्यापयीत' [२] इत्यनेनाध्यापनविधिप्रयुक्तत्वं निराकृत्य स्वाध्यायविधिनैव अध्ययनस्य प्रयुक्तत्वं प्रतिपाद्यते भाट्टैः। एवमेव गुरुमते अध्ययनकरणिकाया भावनायाः साध्यत्वेन स्वाध्यायस्य भाव्यत्वेन वा क्रियते प्रतिपादनम् । एतद्विपरीतं भाट्टनयेऽर्थज्ञानमेवाध्ययनविधेः भाव्यत्वेन स्वीक्रियते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विध्यर्थनिर्णये सम्प्रदायभेदः

धर्मविचाराय प्रवृत्तेऽस्मिन् मीमांसा-दर्शने विधिवाक्यानामेव साक्षाद्धर्मप्रतिपादकत्वं सूत्रकारप्रणीतेन चोदनासूत्रेणैव प्रतिपादनाद्यद्यपि नास्त्यत्र काऽपि विप्रतिपत्तिस्तथापि केनार्थेन संयुक्तोऽयं विधिः धर्ममाविष्करोतीत्यत्र विध्यर्थ-निर्णये प्राभाकरभाट्टप्रस्थानयोर्वर्तते भूयः पार्थक्यम् ।

अत्र प्राभाकरैः नियोगापरपर्यायं फलावाप्तिपर्यन्तावस्थितमपूर्वात्मकं तत्तत्क्रियाणां कार्यताज्ञानमेव लिङर्थत्वेन विध्यर्थत्वेन वा प्रतिपाद्यते।[३] लौकिकवाक्येष्वपूर्वस्याशयतः विधायकवाक्यानामगत्या क्रियात्मकत्वमेवानुपमन्यते कार्यताज्ञानमेभिः।[४] भट्टपादैस्तावद् अभिः भावनामाहुरित्यनेन वार्तिकेन पुरुषप्रवृत्त्यनुकूलत्वेन शाब्दीभावनापरपर्यायस्य लिङ्निष्ठस्य शब्दनिष्ठप्रवर्त्तमानात्मकस्य च व्यापारविशेषस्य विध्यर्थत्वं निरूप्यते।[५]

कर्मप्रवृत्तिसङ्गतौ सम्प्रदायभेदः

कार्यत्वेन प्रवर्तनात्मकेन वा व्यापारेण विधिप्रतिपादितेषु नित्याग्निहोत्रात्मकेषु नित्यकर्मसु पथिकृदिष्ट्यादिनैमित्तिकेषुच अनुष्ठिते न फलप्राप्तिरननुष्ठिते च प्रत्यवायापत्तिरिति सर्वत्र वेदप्रतिपाद्यत्वेन कर्त्तव्यबुद्ध्या स्वीक्रियते प्रवृत्तिरुभयत्र किं बहुना दर्शपूर्णमासादिष्वपि येषां कृते प्रवर्तन्ते विधयः तेषां सर्वेषां स्वाधिकारनिरूपितेषु कर्मसु 'मयेदमवश्यं करणीयम्' इति कर्तव्यभावनया एव प्रतिपाद्यते प्रवृत्तिसङ्गतिगुरुमतावलम्बिभिः अस्मात्सर्वथा वैपरीत्यमुद्वहद्भिर्भाट्टै र्यथा काम्यकर्मसु फलभावनया एव प्रतिपाद्यते प्रवृत्तिसङ्गतिः।[६]

शब्दप्रामाण्यशाब्दबोधप्रक्रियासु सम्प्रदायभेदः

यत्र प्राभाकरैः प्रमाणप्रामाण्याज्ञानादीनां पुरुषनिष्ठदोषाणां लौकिकवाक्येषु सम्भावनया प्रामाण्यं निराकृत्य वैदिकवाक्यात्मकानां शब्दानामेव स्वीक्रियते प्रामाण्यं, तत्र भाट्टमते लौकिकवैदिकयोरुभयोरपि शब्दयोः प्रामाण्यमभिमतं दृश्यते। शब्दप्रामाण्यवत् शाब्दबोधप्रक्रियामपि विप्रतिपद्यन्ते परस्परं भाट्टप्राभाकराः।

प्राभाकरैस्तावत्घटमानयेत्यादिषु वाक्येषु घटानयनादिपदार्थेषु पृथक्तया शक्तिं निराकृत्य आनयनादिक्रियासमन्वितस्य घटादीनां परिज्ञानस्याङ्गीकारात्समन्वितानामेव पदार्थानां वाक्यार्थत्वमङ्गीक्रियते। अयमेव प्राभाकराणां प्रथिततरोऽन्विताभिधानवादसंज्ञकः सिद्धान्तः। सिद्धान्तेऽस्मिन् वेदस्थलेषु नियोगापरपर्यायेणापूर्वेण सह समन्वितानां पदार्थानां वाक्यार्थत्वं प्रतिपाद्यते। लौकिकस्थलेषु अपूर्वस्याभावादगत्या क्रियान्वितानामेव पदार्थानामङ्गीक्रियते वाक्यार्थत्वम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भट्टपादैस्तु 'विशेष्यं नाभिधागच्छेत् क्षीणशक्तिर्विशेषणे इत्यस्य वार्तिकस्यानुरोधात् पदानां पदार्थाभिधेयत्वमेवाङ्गीकृत्याभिहितानां पदार्थानाञ्चाकाङ्क्षायोग्यतासन्निधिबलाद्लक्षणया एवाङ्गीक्रियते वाक्यार्थप्रतीतिः।

एवमेव ज्ञानप्रामाण्याभावादिष्वपि भाट्टप्राभाकरयोरुपलभ्यते विचारभेदः। पत्रस्यास्य भाट्टप्रस्थानपरिसीमिततयात्र विस्तरभयादेतेषामुल्लेखमात्रेणैवालं मन्ये।

भाट्टमते प्रस्थानभेदाः

भाट्टमीमांसायां समानेऽपि सम्प्रदाये महत्त्वपूर्णानां वेदार्थसमन्वयकसिद्धान्तानां प्रतिपादनप्रक्रियायां परस्परभेदमुद्वहन्तः प्रकाशन्ते नैके प्रस्थानभेदाः। एतेषु मण्डनमिश्रपार्थ-सारथिमिश्रगागाभट्टप्रभृतीनां मीमांसकानां विविधविचारप्रसङ्गेषु विचारस्वातन्त्र्यमूलकानि विराजन्ते नूतनप्रस्थानानि। अत्र वर्णनीयेषु विषयेषु अध्ययनविधिविध्यर्थप्रामाण्यवादविषयाः नितरां प्रामुख्यं भजन्ते।

अध्ययनविधेरर्थनिर्णये प्रस्थानभेदाः

भाट्टकुलावतंसै विश्वेश्वरभट्टापरनामधेयैर्गागाभट्टैस्तावत्स्वाध्यायोऽध्येतव्य' इति वाक्यबोधिताया भावनाया भाव्यस्य फलस्य निरूपणावसरे स्वाभिमतप्रकाशनात्प्राक् प्रदर्शिताः प्रस्थानभेदविभूषितास्त्रयः पक्षाः।

१ अत्र कैश्चिद् भाट्टप्रघट्टान्तर्भूतैरपि सर्वजनाभिलषणीयतया स्वर्गस्यैव 'स्वाध्यायोऽध्येतव्य' इति वाक्यनिरूपितभावनाभाव्यत्वं प्रतिपाद्यते।

२. अन्यैरेकदेशीयैरत्राक्षरग्रहणस्यैवाध्ययनभावनाभाव्यत्वं निरूप्यते।

३. तृतीयः पक्षस्तावद् गागाभट्टैः स्वपितृचरणानां दिनकरभट्टानां प्रदर्शितः। एतेषां मते 'स्वाध्यायोध्येतव्य' इत्यत्र अध्येतव्य इति पदं तव्यप्रत्ययान्तम्। अत्र कर्मणि तव्यप्रत्ययस्य वर्तते विधानमेतदर्थमनेन कर्मबोधकेन फलबोधकेन वा तव्यप्रत्ययान्तेन अध्येतव्यपदेन सहैव स्वाध्यायस्य विधानादेकवाक्यतया स्वाध्यायस्यैव अध्ययनभावनाभाव्यत्वमेभिः प्रतिपादितम्।

अस्मिन् मतत्रये द्वयोर्मतयोः कण्ठतः निराकरणमुपलभ्यते भाट्टचिन्तामणौ। प्रथमपक्षस्य स्वर्गफलस्यादृष्टत्वादस्यासमीचीनत्वमत्र प्रकाशितम्। "द्वितीयेऽक्षरग्रहणस्य भाव्यत्वाङ्गीकारे पक्षे यद्यप्यदृष्टार्थकत्वं नास्ति तथाप्यक्षरग्रहणस्यापुरुषार्थकत्वादस्य वर्तते वैय्यर्थ्यम्।" स्वाध्यायस्य भाव्यात्मकत्वे तृतीये पक्षेऽर्थज्ञानस्य स्वाध्यायजन्यत्वात्पुरुषार्थकत्वेन सह दृष्टार्थकत्वमप्यत्र सुस्थिरं, तथाप्यस्मिन्पक्षे पुरुषार्थरूपस्यार्थज्ञानस्योपसर्जनतयोपस्थिते-रत्रास्वारस्यम् 'इत्याहुः' पदेन प्रकाश्य विधेरर्थज्ञानमेव भाव्यत्वेन विशदीकृत गागाभट्टवर्यैः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वाध्यायविधिनिरूपितभाव्यत्वे विचारभेदेऽपि स्वाध्यायविधेर्गरीयस्त्वं सर्वेषामभिमतमिति मन्ये सम्प्रदायाभिन्नत्वमेतेषाम् ।

विध्यर्थनिर्णये प्रस्थानयैमिन्यम्

'चोदनालक्षणोऽर्थो धर्म'[१२] इत्यस्माज्जैमिनिसूत्राद्धर्मस्य साक्षाद्रूपेण विधिमात्रगम्यत्वे यद्यपि नास्ति वेमत्यं मीमांसकानां, तथापि विधिरयं केनार्थेन विभूषितः कर्मप्रवृत्तिप्रवर्त्तनात्मकत्वमात्मनः प्रकटीकरोतीत्यत्र विप्रतिपद्यन्ते भाट्टसम्प्रदायानुयायिनो मीमांसकाः।

विध्यर्थे कौमारिलं मतम्

भाट्टसम्प्रदायप्रवर्तकैः कुमारिलैस्तावद् 'अभिधा भावनामाहुरित्यनेन वार्तिकांशेन 'भावना' विध्यर्थत्वेन प्रकाशिता। विवरणमपि स्वयमेवास्य वार्तिकस्य प्रकाशितम् -

'तत्रार्थात्मिकायां भावनायां लिङादिशब्दानां यः पुरुषं प्रति प्रयोजकव्यापारः सा द्वितीया शब्दधर्मोऽभिधात्मिका भावना विधिरित्युच्यते।'[१३] अनेन विवरणेन ज्ञायते यद् पुरुष प्रयोजकव्यापारधर्मात्मिका भावना एव कुमारिलाभिमतो विध्यर्थः।

विध्यर्थे राणकमतम्

तन्त्रवार्तिकव्याख्याकारैः राणक इत्युपाधिना प्रसिद्धिमवाप्नुवद्भिर्भट्टसोमेश्वरैरत्र प्रवर्तनासामान्यमेव विध्यर्थत्वेनाङ्गीक्रियते। 'अपौरुषेये वेदे' शब्दनिष्ठो यः प्रेरणापरपर्यायः शब्दव्यापारः स एव शाब्दीभावनात्मकः प्रवर्तनात्वेन रूपेणैभिः प्रकाश्यते विध्यर्थः। इष्टसाधनत्वस्य विध्यर्थत्वनिराकरणाय इमे वदन्ति यद् इष्टसाधनत्वस्य विध्यर्थत्वे 'इष्टसाधनमिति' शब्दस्य विधिशब्दः पर्यायः स्यात् । न च पर्यायत्वं युज्यते। 'सन्ध्योपासनं ते इष्टसाधनं तस्मात्तत् त्वं कुरु' इति पर्यायाणां सहप्रयोगाशक्यत्वात् समीचीनमप्येतद्वाक्यमसमीचीनतायां कोटौ प्रक्षिप्तं स्यादेतदर्थं प्रेरणापरपर्यायस्य शब्दव्यापारस्यैव विध्यर्थत्वान्नेष्टसाधनत्वं विध्यर्थः।[१४]

पार्थसारथिमिश्रमते विध्यर्थस्यरूपम्

इष्ट साधनत्वविरहितस्य प्रवर्तनात्मकस्यालौकिकशब्दव्यापारस्य विध्यर्थत्वं न रोचते पार्थसारथिमिश्रेभ्यः। यद्यपि प्रवर्तनाया विध्यर्थत्वाङ्गीकारे वर्तते एतेषामपि सम्मतिस्तथापीष्टसाधनताविरहितायाः प्रवर्तनायाः विध्यर्थत्वमेतेषां नाभिमतम् । एभिस्तावदिष्टसाधनत्वस्यैव प्रवर्तनात्वेन रूपेण विध्यर्थत्वमङ्गीक्रियते। सन्ध्योपासनं त इष्टसाधनं तस्मात्त्वं कुरु इत्यत्रोक्तशङ्कायाः समाधानार्थमेभिरुच्यते यत् सामान्यविशेषधर्मावच्छिन्नयोः पदयोः सहप्रयोगे नास्ति काप्यापत्तिः। 'पाञ्चालराजो द्रुपद' इत्यत्र यथा पाञ्चालराज इति सामान्यस्य 'द्रुपद' इति विशेषस्य च सहप्रयोगे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नास्ति कापि विप्रतिपत्तिस्तथैवात्रापि इष्टसाधनत्वस्य विशेषतया प्रवर्तनायाश्च सामान्यतया प्रतिपादनादेतयोः सह प्रयोगे नास्ति कापि विप्रतिपत्तिः। सर्वत्र व्यक्तेः स्वतः प्रवृत्तौ परतः प्रवृत्तौ वा इष्टसाधनत्वस्यैवानुसन्धानात् प्रवर्त्तनात्वेनेष्ट साधनत्वमेव वर्तते विध्यर्थः।[१५]

मण्डनमिश्राभिमतं विध्यर्थस्वरूपम्

मीमांसादर्शनस्य भाट्टमतावलम्बनं कुर्वद्भिरपि मण्डनमिश्रवर्यैः बहुषु स्थलेषु विचारस्वातन्त्रयं प्रकाशितम् । विध्यर्थविचारस्थले इष्टसाधनत्वमेव विध्यर्थत्वेनेभिः प्रस्थापितम्। तार्किकैस्तावदिष्टसाधनत्वकृतिसाध्यत्वबलवदनिष्टाननुबन्धित्वेषु त्रितयेषु लिङ्निरूपितां शक्तिमङ्गीकृत्य त्रयाणामेव लिङर्थत्वं विध्यर्थत्वं वा प्रतिपाद्यते। मण्डनमिश्रैस्तावदत्रेष्ट साधनत्वातिरिक्तयोः कृतिसाध्यत्वबलवदनिष्टाननुबन्धित्वयोः विध्यर्थत्वस्य निराकरणार्थं प्रस्तूयेते द्वाविमौ तर्कौ -

१. यागादेः कृतिसाध्यताज्ञानं लोकव्यवहारेणैव सिद्धम् । कृतिसाध्यतारहितेषु कर्मसु विदुषां प्रवृत्तेरर्शनाद्दर्शनाच्चकृतिसाध्येष्वेव कर्मसु, शब्दार्थस्य चानन्यलभ्यत्वनियमाद्व्यवहारसिद्धस्य कृतिसाध्यताज्ञानस्य न स्याद्विध्यर्थत्वम् ।

२. एवमेव बलवदनिष्टाननुबन्धित्वज्ञानस्य द्वेषापरपर्यायस्यानिष्टस्याभावज्ञानजनकत्वात्प्रवृत्तावन्यथासिद्धत्वाच्च विध्यर्थत्वेनाङ्गीकर्तुमशक्यत्वादिष्टसाधनत्वमेव विध्यर्थः।[१६]

यागदानक्रियासु इष्टाभ्युपायत्वादन्यः प्रवर्तको नास्ति। प्रवृत्तिहेतुभूतो यो धर्मः स एव प्रवर्त्तना इति जना वदन्ति।' इत्यर्थप्रतिपादकेन 'पुंसां नेष्टाभ्युपायादि'[१७] पद्येनेष्टसाधनत्वस्यैव प्रवर्तनात्वमेतेषामभिमतम् ।

पार्थसारथिमिश्रमते प्रवर्तनात्वेनेष्ट साधनत्वमिष्टमित्यत्रोभयोः प्रवर्तनात्वेष्टसाधनत्वयोः पृथक्तया जायते भानम् । मण्डनमिश्रमते इष्टसाधनत्वस्यव प्रवर्तनात्वाङ्गीकारादपृथक्तयोरुभयोरत्र तादात्म्यं प्रतीयते। अयमेव वर्तते मतयोरुभयोरांशिको भेद इति।

विश्वेश्वरभट्टानां समन्वयात्मिका दृष्टिः

तत्त्वचिन्तनप्रसङ्गे भाट्टमतैस्सह तार्किकाणां यादृशो विरोधस्तादृशः प्राभाकरैस्सह नैव प्रतीयते। 'समवायस्य' पृथक्तया पदार्थत्वे, द्रव्याणां नवसंख्यापरिमितत्वे शब्दस्य च गुणत्वे प्राभाकरनैयायिकयोः सदृशी एव प्रकाशते विचारसरणिः, परन्तु भाट्टनैयायिकयोर्नास्त्यत्र विचारसाम्यम् । येष्वपि स्थलेषु 'अयुतसिद्धसम्बन्धत्वेन नैयायिकैः समवायसम्बन्धः प्रदर्शितः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्र भेदसहिष्णुतया तादात्म्यसम्बन्धः प्रतिपाद्यते भाट्टैः।[18] समवायस्य पृथक् पदार्थत्वं नैयायिकैः स्थापितम् । भाट्टैरत्र द्रव्यगुणयोः तादात्म्यसम्बन्धे द्रव्ये द्रव्यरूपेण तादात्म्यस्य सत्त्वात् गुणे गुणरूपेण चान्तर्भावादस्य मन्ये पृथक् पदार्थत्वं तादात्म्यस्य भाट्टैर्नैव प्रतिपादितम् । द्रव्याणामपि नवसंख्या परिमितत्वे भिद्यते नैयायिकेभ्यो भाट्टदृष्टिः। शब्दतमसोरपि द्रव्यत्वाङ्गीकारादेकादशधाऽभिमतं द्रव्यत्वं भाट्टसरण्याम् ।[19] शब्दसन्दर्भेऽपि न्यायप्रभाकरमतानुरूपं शब्दस्य गुणत्वं निरस्य शब्दस्य द्रव्यत्वमेव स्थापितं भाट्टैः।[20]

तत्त्वमीमांसायां विचारितेषु स्थलेषु यादृशो वर्तते भाट्टनैयायिकयोर्विचारभेदः ज्ञानप्रामाण्यस्थलेऽपि तादृश एवोपलभ्यते। भाट्टैस्तावत् सर्वेषामेव ज्ञानानां स्वतः प्रामाण्यमङ्गीक्रियते ।[21] नैयायिकैस्तु परत एव स्वीक्रियते ज्ञानानां प्रामाण्यम् ।[22]

भाट्टचिन्तामणिकाराः विश्वेश्वरभट्टवर्याः यद्यपि भाट्टपरम्पराभिमानिनस्तथापि बहुषु स्थलेषु एतेषां विचारदृष्टिः न्यायदर्शनप्रभावभाविता परिलक्ष्यते। भाट्टमीमांसायामिमे बद्धपरिकरा इति स्पष्टं प्रतीयते। न केवलं प्रतिपाद्यविषयाणां प्रकाशनार्थमेभिः न्यायपरम्पराप्रसिद्धया नव्यन्यायशैलीसमन्वितया भाषयोपनिबद्धं भाट्टचिन्तामणिग्रन्थरत्नमपितु प्रतिपाद्येष्वपि यत्रापि शक्यं तत्रात्मनः प्रकाशिता समन्वयात्मिका दृष्टिः।

१. सन्निकर्षस्थलेषु यथा नैयायिकैः संयुक्तसमवायसंयुक्तसमवेतसमवाययोः प्रतिपादनं कृतं तादृशम् एभिरपि स्वग्रन्थे प्रकाशितम् ।[23]

२. नैयायिकैर्यथा समवायस्य पदार्थान्तरत्वमङ्गीकृतं तथैव एभिरपि पदार्थगणनायां समवायस्योल्लेखात् स्वीकृतं प्रतीयते।[24]

३. अलौकिकसन्निकर्षस्थले भाट्टेषु योगजसन्निकर्षस्य निराकरणात् सामान्यलक्षणाज्ञानलक्षणयोरनुल्लेखाच्चालौकिकसन्निकर्षाणामस्तित्वमेवात्र नाभिमतमिति प्रतीयते। यद्यपि योगजसन्निकर्षस्य गागाभट्टैरपि निराकरणं कृतं वर्तते.[25] तथापि सामान्यलक्षणा[26] ज्ञानलक्षणाङ्गीकारे[27] नैयायिकैः सहैतेषां प्रतीयते विचारसाम्यम् ।

एतेषु स्थलेषु भाट्टचिन्तामणिकारैर्यद्यपि न्यायपक्षपातित्वं प्रकटीकृतं तथाप्यात्मनो भाट्टानुयायित्वमपि रक्षितम् । भाट्टानां विचार्यमाणेषु विषयेषु मौलिभूतं यद्वेदापौरुषेयं. तत्र न्यायमतं निरस्य भाट्टमतमेव स्थापितम् ।

भाट्टपरम्परायां विचारितेष्वन्येष्वपि शब्दनित्यत्वशब्दद्रव्यत्वादिषु स्थलेषु भाट्टसम्प्रदायानुरूपमेव स्वाभिमतं स्थापितम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सन्निकर्षस्थले यद्यपि तादात्म्यस्य स्थाने समवायस्योल्लेखात् तार्किकमतमुररीकृतं तथापि न्यायाभिमतमयुतसिद्धसम्बन्धः समवाय इति लक्षणं निरस्य भाट्टैर्यत्तादात्म्यस्य भेदसहिष्णुसम्बन्धो भेदाऽभेदसम्बन्धो वेति लक्षणमङ्गीक्रियते, तदेवात्र समवायस्य लक्षणत्वेन स्थापितम् ।[२८] शब्दस्तावन्नैयायिकानामर्थस्तु मीमांसकानामेव प्रतिपादनादत्रापि प्रदर्शिता समन्वयात्मिका दृष्टिः।

स्वतः प्रामाण्यवादस्य सिद्धान्तोऽपि भाट्टैर्वेदाऽपौरुषेयत्वस्य रक्षणार्थमेवाङ्गीकृत इत्यनया प्रतिपत्त्या वेदज्ञानस्य स्वतः प्रामाण्यमङ्गीकृत्य परम्परारक्षिताऽन्येषां ज्ञानानां परतः प्रामाण्याङ्गीकारान्न्यायमतमपि सम्मानितम् ।[२९] भाट्टपरम्परायामपि संस्थापितमेभिः न्याय - भाट्टसिद्धान्तसमन्वयप्रस्थानम् ।

यद्यप्युभयत्र न्यायदर्शने भाट्टमीमांसायाञ्च समन्वयस्य महत्तरं कार्यमेभिस्साधितं तथाप्यस्यां दिशायां प्रवृत्तानामेतेषां सिद्धान्तप्रतिपादनेषु क्वचित् स्खलितमपि स्पष्टं प्रतीयते -

१. सन्निकर्षस्थले तादात्म्यस्वरूपेणाङ्गीकृतस्य समवायस्य पदार्थगणनायां पृथक्तया ग्रहणं सर्वथानावश्यकमत एवात्र कल्पनागौरवदूषणं स्पष्टमेव।

२. एवमेव प्रामाण्यवादे वेदानां स्वतः प्रामाण्यमन्येषां ज्ञानानां परतः प्रामाण्यवाद-स्थापनयापि ज्ञानमात्रस्य यत्स्वाभाविकं प्रामाण्यं कुमारिलभट्टपार्थसारथ्यादिभिः स्थापितं तद्विच्छिद्यते। वेदमात्रस्य स्वतःप्रामाण्ययाङ्गीकारेण वेदत्वेनैव ज्ञानस्य प्रामाण्याङ्गीकाराद् ज्ञानप्रामाण्यस्य स्वतस्त्वमेव विलुप्तं प्रतीयते।

३. सामान्यलक्षणाङ्गीकारप्रसङ्गे एकस्मिन् व्यक्तौ गृहीतायामपि शक्तौ तदतिरिक्तेषु शक्तिग्रहार्थमप्यस्याः प्रत्यासत्तेरनिवार्यत्वं प्रतिपादयद्भिरेभिः प्रातिपदिकार्थनिरूपण-प्रसङ्गे स्वप्रतिपादितः जातिशक्तिवादसिद्धान्तो विस्मृत इति प्रतीयते।

सत्स्वप्येतेषु दोषेषु 'न हि सद्वर्त्मना गच्छन् स्खलितेष्वप्यपोद्यते।' इति वार्तिकप्रकाशितायां दिशि विहिते मूल्याङ्कने भट्टवर्याणां विश्वेश्वरभट्टानां समन्वयप्रस्थानं नूनं भाट्टपरम्परायां नूतनमवदानमित्यपि सुवचमेव।

निष्कर्षः

मीमांसादर्शनस्य भाट्टप्राभाकरमिश्रमतभिन्नेषु विविधेषु सम्प्रदायेषु भाट्टसम्प्रदायेऽपि विचारभिन्नेषु प्रकाशितेषु प्रस्थानभेदेषु वा सर्वत्राम्नायस्य क्रियार्थत्वप्रतिपादनघटितमभिन्नत्वं, वेदप्रतिपादितस्य कर्मणः सङ्गतये एव सर्वेषां मुक्तिनैपुण्यप्रकर्षस्य च प्रकाशनात् समेषां मीमांसकानां युक्तिप्रदर्शनभेदेऽपि लक्ष्यस्याभिन्नत्वमेव विराजते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सन्दर्भाः

१. शा.ब्रा. ११.५.७.२. तैत्तरीय आरण्यक २/१५/
२. द्रष्टव्या विशेष टिप्पणी, प्रकरणपञ्चिका पृ. २५ का. हि. वि. वि. १९६१।
३. कार्यमेव हि सर्वत्र प्रवृत्तावेककारणम् ।
प्रवृत्त्यव्यभिचारित्वाल्लिङाद्यर्थोऽवधार्यते। स एव पृ. ३४१।
४. लिङादियुक्तलौकिकवाक्यस्य च लक्षणयाऽऽनयनादिरूपकार्यान्वितबोधकत्वम्
भाट्टचिन्तामणि पृ. ६२. चौखम्बा संस्कृत सीरीज आफिस १९३३।
५. "अभिधा भावनामाहुः' तन्त्रावार्तिकम् अजिता, पृ. १८ द्वितीयोभागः, गङ्गानाथझा
केन्द्रीयसंस्कृतविद्यापीठम् , प्रयाग, १९९० ई.।
६. नित्यनैमित्तिकयोरकरणे प्रत्यवाय एव, कृते फलं नास्तीति केचित् । अन्ये तु दुरित
निवृत्तिः, फलमस्ति, - मीमांसापरिभाषा, पृ. १०३ कृष्णदास अकादमी, वाराणसी
१९८७.
७. 'नागृहीतविशेषणा बुद्धिर्विशिष्टमुपसंक्रामति।
विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे ।।
उद्धृतोऽयमाकृत्याधिकरणन्यायो मीमांसान्यायप्रकाशे पृ. ७९ श्रीलालबहादुर
शास्त्रिकेन्द्रियसंस्कृतविद्यापीठम् दिल्ली, १९८३।
८. स स्वर्गः स्यात् सर्वान्प्रत्यविशिष्टत्वात् जैमिनिसूत्रं ४.३.१५।
९. 'कर्मार्थकर्तव्यप्रत्ययस्तु सम्बन्धमात्रे लाक्षणिकः भाट्टचिन्तामणि पृ. २।
१०. स्वर्गार्थत्वमितिचेन्न अदृष्टार्थत्वापत्तेः' भाट्टचिन्तामणि पृ. २।
११. 'नाप्यक्षरग्रहणम् । पुरुषार्थाननुबन्धित्वात् ' भा.चि. पृ. २ ।
१२. जैमिनिसूत्रम् १.१.२।
१३. अजिता (तन्त्रवार्तिकम्) द्वितीयो भाग पृ. १८. गङ्गानाथ झा के.सं.वि. प्रयाग।
१४. यत्तु इष्टसाधनत्वं विध्यर्थ इति, तन्न । तथा सति इष्टसाधनमिति शब्दस्य विधिशब्द
पर्यायः स्यात् । तच्च पर्यायत्वं युज्यते।
१५. 'न चेष्टसाधनत्वस्य विध्यर्थत्वे सन्ध्योपासनं ते इष्टसाधनं तत् त्वं कुर्विति
सहप्रयोगानुपपत्तिरिति वाच्यम् । इष्टसाधनत्वस्य विशेषरूपेण विधिनानभिधानात्
प्रवर्तनात्वेन रूपेणाभिधानात् । सामान्यशब्दस्य च विशेषशब्देन दृष्टः सहप्रयोगः
पाञ्चालराजो द्रुपद इत्यादौ। तस्मात् समीहितसाधनतैव प्रवर्त्तनात्वेन रूपेण विध्यर्थः
मीमांसान्यायप्रकाशः पृ. २९४।
१६. मण्डनस्तु यागादौ कृतिसाध्यताज्ञानस्य लोकत एव सिद्धेरन्यलभ्यत

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लिङ्शक्तिः। बलवदनिष्टानुबन्धित्वज्ञानं च द्वेषाभावजननेनान्यथासिद्धत्वात्र प्रवृत्तौ हेतुः। भाट्टचिन्तामणिः पृ. ८८ पंक्ति १९ से २१।

१७. पुंसां नेष्टाभ्युपायत्वात्क्रियास्वन्यः प्रवर्तकः ।
प्रवृत्तिहेतुं धर्मं च प्रवदन्ति प्रवर्तनाम् ॥
विधिविवेकः , उद्धृतं मी. न्या. प्रकाशे पृ. २९५।

१८. 'भेदाभेदसहमन्योन्याभावविरोधि तादात्म्यम् । ' विवरणप्रमेयसंग्रह. पृ. ४४, अच्युतग्रन्थमाला कार्यालय, राजघाट, वाराणसी १८९६।
'भेदसहिष्णुरभेदस्तादात्म्यमिति केचिद्वेदान्तिन आहुः न्यायकोशः पृ. ३२८।

१९. 'तच्च द्रव्यं पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनःशब्दतमोरूपेणैकादशविधम्' तन्त्रसिद्धान्तरत्नावली पृ. १७०।

२०. 'तत्रापि कर्मवत्त्वेन द्रव्यत्वानुमानम् । ' भाट्टचिन्तामणि, पृ. १६ पङ्क्ति १९.

२१. 'स्वतः सर्वप्रमाणानां प्रामाण्यमिति गम्यताम् ।
न हि स्वतोऽसती शक्तिः कर्तुमन्येन शक्यते ॥
श्लोकवार्तिकम् अ. । पा.। सू. २. श्लो. सं. ४७।
'विज्ञानस्य प्रमाणत्वं स्वतो निर्णीयते यथा।' न्यायरत्नमाला पृ. ३६ चौखम्बासंस्कृत सीरीज- वाराणसी १९००।

२२. 'अथैवमप्यप्रामाण्यं परतस्तर्हि प्रामाण्यमपि परत एव गृह्यताम् ।' तर्कभाषा पृ.२४४ . चौखम्बा सुरभारती प्रकाशनम् १९९०।

२३. सन्निकर्षश्च संयोगः संयुक्तसमवायः संयुक्तसमवेतसमवायश्चेति।' भाट्टचिन्तामणिः पृ. १६. पङ्क्तिः १०।

२४. 'एवञ्च द्रव्यगुणकर्मसामान्यसमवायशक्त्याभावाः सप्तपदार्थाः।' भाट्टचिन्तामणिः पृ.१७ पं. २८।

२५. तद्योगिषु मानाभावेनासुन्दरम् । न चेतिहासपुराणादिमानम् ।
तस्यान्यतात्पर्यवत्त्वादिति दिक् । भाट्टचिन्तामणि पृः २३ पं. ११-१३।

२६. वस्तुतः सिद्धसुखविषयकप्रवृत्त्यभावादसिद्धसुखज्ञानार्थमरण्यस्थदण्डादौ प्रवृत्तिजनकघटहेतुताग्रहार्थं शक्तिग्रहार्थञ्च सामान्यलक्षणावश्यकीति युक्तम् । भाट्टचिन्तामणिः पृ. २३।

२७. 'एवं ज्ञानलक्षणानङ्गीकारे ज्ञातस्य सुरभिचन्दनखण्डस्य चक्षुषा सुरभिचन्दनमिति ज्ञानं न स्यात् । सौरभांशे सौरभत्वांशे वा प्रत्यासत्तेरभावात् । अतस्तत्र तज्ज्ञानमेव प्रत्यासत्तिः।' भाट्टचिन्तामणिः पृ. २३ पं. ०८।

२८. 'न त्वयुतसिद्धसम्बधः सः । युतसिद्धेर्वक्तुमशक्यत्वात् । '

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाट्टचिन्तामणिः पृ. १८ पं. २०।
अतो भेदाऽभेदः पृ. १८ पं. २१।

२९. 'तेन वेदजन्यज्ञाने संशयाभावात्स्वतः प्रामाण्यं, तद्भिन्नज्ञाने तु परतः प्रामाण्यं ज्ञायते अत एव स्मृतिजन्यज्ञाने सन्मूलकत्वगुणज्ञानादेव प्रामाण्यं सिद्धान्तेप्यङ्गीकृतमिति युक्तमुत्पश्यामः।
भाट्टचिन्तामणिः, पृ. १५ पं. ०२-०८।

३०. श्लोकवार्तिकम् वार्तिक ०७ पृ. ०४ ताराप्रकाशनं, वाराणसी १९७८।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

काव्यरसः

सदाशिवकुमारो द्विवेदी

शब्दार्थस्वरूपे काव्यशरीरे रस एव प्राधान्येन प्रतिष्ठापितः प्रायेण सर्वैरेव काव्यलक्षण-विधायिभिराचार्यैः। अत्र योऽयं रसः या च तस्यास्य निष्पत्तिस्तयोः स्वरूपनिर्धारणे महामुनेर्भरतस्य नाट्यशास्त्रमेवास्ति प्रथमं प्रमाणम् । तत्र षष्ठः सप्तमश्चेति द्वावध्यायौ रसविषये प्रधानभूतौ। अस्त्यत्र रसनिष्पत्तिसूत्रम् -"विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः"[१] इति। यद्यप्यत्र निष्पत्तेः प्राधान्यमस्ति न पुनः रसस्वरूपस्य तथाप्येतद् रससूत्रतयाऽपि प्रसिद्धं विद्वत्सु।

विभावादीनां संयोगात् निष्पन्नस्य रसस्य स्वरूपनिर्धारणप्रसङ्गे द्विविधा धारणा प्राप्यते काव्यशास्त्रिषु -

१. आस्वाद एव रस इत्येका

२. रत्यादय आस्वाद्या भावा एव रस इति चान्या।

अर्थात् रसस्य आस्वादः आस्वाद्या भावाश्चेति द्वितयोऽपि गृह्यन्ते रसपदेन। आस्वादपदेनात्र भुज्यमानो रसस्तस्य भोगश्चेति द्वितयमपि गृह्न्चेत चास्वाद्यपदेन आस्वादरूपस्य भोगस्यास्य विषयीभूता विभावादिसामग्री।

आचार्या अप्यत्र मतभेदेन प्रवर्तमाना दृश्यन्ते। तत्रास्ति बाहुल्यम् । आस्वाद्यपक्षस्यैव समर्थनाम् आचार्याणाम् । आस्वादपक्षस्य समर्थकास्तु विरला एवभिनवगुप्तपादादयः।[२]

काव्यशास्त्रस्याद्य आचार्यो भरतोऽपि नाट्यशास्त्रे रसस्यास्वाद्यतामेव साधयति। स हि स्थायिभावस्यैव रसरूपत्वं स्वीकरोति। अस्ति तस्य रससूत्रम् - "विभावानुभावव्यभिचारि-परिवृतः स्थायी रस-नाम लभते'[३] इति, 'रस, इति कः पदार्थः ? उच्यते - आस्वाद्यत्वात् ' इति च।[४] अत्र विभावादिभिः संवलितस्य स्थायिन एव रसरूपत्वम् । स्पष्टमेवासौ आस्वाद्यपक्षस्यैव समर्थकः।

रुद्रटोऽपि स्वकीये काव्यालङ्कारे विभावादिभिः उत्पाद्यमानानां रत्यादीनामेव रसत्वं प्रतिष्ठापत्येवम् - "सर्व एव रत्यादयो विभावानुभावव्यभिचारि - संयोगादुत्पाद्यमाना भूमानमापन्ना रसीभवन्ति। तथाहि "रसनाद् रसत्वमेतेषाम् " इति।[५]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रससूत्रस्य व्याख्यानप्रसङ्गे उत्पत्तिभुक्तिवादयोः संस्थापकौ लोल्लट-भट्टनायकौ आस्वादपक्षस्यैव समर्थकौ। लोल्लटो विभावैः कारणैः स्थायिभावस्य उत्पत्तिं स्वीकरोति। भुक्तिवादेऽपि भट्टनायकः स्थायिभावानां भोगमामनति। तद्यथा - "विभावादिसाधारणीकरणात्मना भावकत्वव्यापारेण भाव्यमानः स्थायी सत्वोद्रेकप्रकाशानन्दमयसंविद्विश्रान्तिसत्त्वेन भोगेन भुज्यते" इति। अत्र भुजिक्रियायाः कर्म, भावसमुदाय एव। स च आस्वादरूपः।

श्रीमम्मटोऽपि काव्यप्रकाशे रसस्य आस्वाद्यत्वम् आमनति भरतस्यैव रससूत्रस्य समर्थकत्वात्[६] साहित्यदर्पणे विश्वनाथः अमुमेव पक्षमनुमोदते। तद्यथा -

'विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा ।
रसतामेतिरत्यादिः स्थायिभावः सचेतसाम् ।।[७] इति

लोचनेऽभिनवगुप्तः भट्टनायकस्य आस्वाद्यपक्षस्य खण्डनपुरस्सरं रसस्य प्रतीतिरूपत्वम् अपरिहार्यत्वेन स्वीकरोति। प्रतीतिः आस्वादः। रसप्रतीतिर्विलक्षणैव तत्प्रत्यायकानां विभावादीनां लोकोत्तरत्वात् । तन्मते प्रतीयमानस्य रसस्य विशिष्टा प्रतीतिः रसनापदवाच्या। सा च रसप्रतीतिः विलक्षणा लौकिकानुमानजन्यायाः प्रतीतेः, लौकिकी हि प्रतीतिः रसप्रतीतेः उपायभूता। काव्येऽपि शाब्दप्रतीतेर्विलक्षणा सैषा रसप्रतीतिः लौकिकीं तामुपायतयाअपेक्षमाणा। तदुच्यते - 'रसाः प्रतीयन्त इति ओदनं पचतीतिवद् व्यवहारः, प्रतीयमान एव हि रसः। प्रतीतिरेव विशिष्टा रसना। सा च नाट्ये लौकिकीमनुमानप्रतीतिं प्रमुखे उपायतया संदधाति, संदधाति च काव्ये शाब्दीं प्रतीतिं तथैव, किन्तु भवत्यसौ विलक्षणैव ताभ्यामनुमानप्रतीतिशाब्दप्रतीतिभ्याम् ।[८] इति

अभिनवगुप्तः रसनावादी आचार्यः। असौ रसास्वदाय व्यञ्जनातिरिक्तं रसनाख्यं व्यापारं स्वीकरोति यतोहि तन्मते व्यञ्जनाबोधस्य नास्ति आस्वादरूपत्वं रसनाजन्यबोधवत् । अभिनवभारत्यां विषयेऽस्मिन्नसौ कथयति - "सर्वथा रसनात्मकवीतविघ्नप्रतीतिग्राह्यो भाव एव रसः । तत्र विघ्नापसारका विभावप्रभृतयः । तथाहि लोके सकलविघ्नविनिर्मुक्ता संवित्तिरेव चमत्कार - रसना-आस्वादन-भोग-समापत्ति-लय-विश्रान्त्यादिभिःशब्दैरभिधीयते।"[९] इति। फलितमेतेन अभिनवगुप्तो रसस्यास्वाद्यतामनूद्यास्वादतां विधेयतया प्रस्तौतीति।

साहित्यदर्पणे विश्वनाथः रसनायाः व्यञ्जकत्वं प्रतिपिपादयिषति - "रसना - आस्वादनचमत्करणादयो विलक्षणा एव व्यपदेशा" इति अभिधादिविलक्षण - व्यापारमात्रप्रसाधनग्रहिलैरस्माभिः रसादीनां व्यङ्ग्यत्वम् उक्तं भवति।"[१०]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रसनव्यापारश्च प्रसिद्ध एव रसगङ्गाधरस्य रसनिष्पत्तिप्रसङ्गे । तत्र पण्डितराजः आचार्यैः प्रतिपादितान् रससम्बन्धिन एकादशपक्षान् उपस्थाप्य रसनव्यापारं व्यञ्जनायामेव समावेशयति।[११]

स्पष्टमत्र द्वयोरपि पक्षयोर्मध्ये आस्वाद्यपक्षस्यैव समर्थकानामाचार्याणां बाहुल्यं वर्त्तते इति। अथ प्रश्न 'एतयोर्मध्ये कतरस्तु स्वीकार्य ' इति। प्रश्नेऽत्र आस्वादस्यैव रसरूपत्वं सिद्धान्तभूतम् . आस्वाद्यपक्षस्यापि तत्र संग्रहात् । आस्वाद्या विभावादयः वस्तुरूपाः। रसस्य चित्तवृत्तिरूपत्वात् रसत्वापत्तिदशातः पूर्वं रत्यादीनां भावानां भावात्ममेवानुभूयते वस्तुरूपम् । इक्षुप्रभृतीनां द्रवाणां रसत्वेनोल्लापे मूलं तेषां हृदयद्रुतिजनकः आस्वादः। एवमेव प्रकृतेऽपि। आस्वाद एवात्र भोगः। तदत्र भुज्यमानतादशायामेव. भोगविषयाणां रत्यादीनां शृङ्गारादिसतत्त्वता भवतीति ततः प्राक् वस्तुमात्रत्वमेवैषामिति चरमो निष्कर्षः ।

वस्तुतः धारणयोरनयोर्नास्ति विरोधः । द्वयोरप्यनयोः समन्वयः शास्त्रसिद्धः. तर्कसिद्धः व्यवहारसिद्धश्च। द्वितीयाऽऽद्यस्य मतस्य पूरयित्रीति तत्र सहृदयानां विचारः। तथाहि ये तावदास्वाद्या भावास्तेषां नास्ति पृथग्भाव आस्वादात् । आस्वादं विना नास्ति प्रतिष्ठा आस्वाद्यस्येति कृत्वा । आस्वाद्या विभावादयः आस्वादप्रयोजका एव आस्वादस्यैव कृते तेषामुपादानात् ।

विभावानुभावव्यभिचारियोगात् निष्पन्नस्य रसस्य स्थितिः कुत्र इति विचारे पक्षद्वयं प्राप्यते। प्रथमस्तावद्रसस्य प्रमातृनिष्ठामामनति द्वितीयश्च प्रमेयनिष्ठत्वम् । प्रमाता अत्रास्ति सहृदयः प्रमेयञ्च काव्यम् । तत्र रसस्य प्रमातृनिष्ठत्वमेवोचितम् । यतोहि विभावादिभिरभिव्यंजितस्य रत्यादेः स्थायिनः सामाजिकस्य आत्मना यो भोगः तज्जनितः आनन्दः सामाजिकचेतनाया एव धर्मः न तु काव्यस्य। काव्यस्य ज्ञानमयत्वेऽपि जडरूपत्वमेव. भिन्नत्वं च सामाजिकचेतनातः।[१२] ज्ञानचेतनयोः भेदः विषयविषयिभावेन प्रत्युपस्थितः चेतनाया ज्ञानरूपत्वदर्शनेऽपि। भोजदेवेनापि शृङ्गारप्रकाशे उक्तम् - 'रसा हि सुखदुः खावस्थारूपाः ते च शरीरिणामेव चैतन्यवताम् . न काव्यस्य तस्य शब्दार्थरूपतया अचेतनत्वेन।"[१३]

अतएव रसस्य सहृदयाश्रिततत्वमेव न पुनः काव्याश्रिततत्वम् एवं च रसस्य प्रमातृनिष्ठत्वमेव अस्माभिः ग्राह्यं न प्रमेयनिष्ठत्वम् ।

आस्वादरूपोऽसौ रसः प्रमातृगतत्वेन कथं निष्पद्यते इति विचारे काव्यलक्षणाविधायिनः प्रामाणिकास्तथा तथा प्रतिष्ठमाना दृश्यन्ते। तथाहि पूर्वोक्तस्य रसनिष्पत्तिसूत्रस्य व्याख्यानप्रसङ्गे अभिनवगुप्तः अभिनवभारत्यां चत्वारि व्याख्यानानि उपस्थापयति। एतेषु आद्यस्तावत् लोल्लटस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उत्पत्तिवादः, द्वितीयः अभिव्यक्तिवादः। व्याख्याने चैतेपु विभावादिभिः निष्पाद्यमानस्य रसस्य त्रिविधः आश्रयः - रामादिरूपः अनुकार्यः नटरूपः अनुकर्त्ता, प्रमाता सामाजिको वा।

लोल्लटः मुख्यया वृत्या रामादावनुकार्ये, रसस्योत्पत्तिं स्वीकरोति। अत्र स्थाय्यात्मिकायाः चित्तवृत्तेः कारणं विभावः। तज्जनितः स्थायी उत्पद्यते किन्तु न प्रमातरि सहृदये, न वा अनुकर्तरि नटे प्रत्युतानुकार्य एव रामादावविद्यमाने।[१४]

अनुकार्ये उत्पन्नस्यास्य रसस्य अनुमितिं स्वीकरोति शङ्कुकः अनुकर्तरि पक्षे। व्याख्यानेऽस्मिन् अनुकर्तरि असन्नपि स्थायी तद्गतैः कृत्रिमैरनुभावादिभिर्हेतुभिः सहृदयेनानुमीयते। अत्र स्थाय्यनुमाने पक्षभूतो नट एव विभावः। काव्यबलानुसन्धेया भावाः शिक्षातः प्रकाशिता अनुभावाः व्यभिचारिणश्च कृत्रिमा अपि लिङ्गरूपा अनुमापकोऽस्त्यत्र सहृदयः साक्षत्कारात्मिका अनुभूतोः विषयमस्य रसस्य।[१५]

तृतीयं व्याख्यानं रससूत्रस्य भट्टनायकस्य भुक्तिवादरूपेण प्रतिष्ठितम् । अत्र नटः रामादिश्चेति द्वावपि रसविषये उदासीनौ एतयोर्द्वयोरेव रसः नोत्पद्यते विभावादीनां वास्तविकत्वाभावात् नाभिव्यज्यते सिद्धस्यैवाभिव्यञ्जनात्, रसस्य साध्यत्वेनैवानुभूयमानत्वात् स्वगतत्वेनापि रसस्य प्रतीतिरयुक्ता। यतोहि तथा सति करुणे दुःखित्वं स्यात् । एवं च देवतावर्णनानां सीतादीनां सामाजिकं प्रति विभावत्वमुक्तमेव। अतएव भावकत्वव्यापारेण साधारणीक्रियमाणः स्थायी सत्त्वगुणस्योद्रेकेण रजस्तमसी अभिभूय प्रकाशते। सा च संवित् आनन्दात्मिका एषा पुनः भोजकत्वाख्येन व्यापारेण साक्षात्क्रियते सहृदयेन।[१६]

तुरीयस्तावत् आचार्यस्य अभिनवगुप्तस्य सिद्धान्तः अभिव्यक्तिवादः। व्याख्यानेऽस्मिन् सहृदये रसः अभिव्यज्यते। सहृदयस्य मनसि संस्काररूपेण विद्यमानानां स्थायिभावानामभिव्यक्तिर्जायते विभावादिभिः एते पुनः सहृदयस्य मनसि भावकत्वाख्येन व्यापारेण साधारणीकृताः सन्तोऽभिव्यज्यन्ते।

एतेषु सर्वेष्वपि सिद्धान्तेषु नास्ति परस्परं विरोधः। उत्तरवर्त्तिषु पूर्वेषामादरः प्राप्यते सोपानभूता इमे भवन्ति रसस्यास्वादात्मनः प्रमातरि निष्पत्तौ। तदुक्तमाचार्येणाभिनवगुप्तेन-

ऊर्ध्वोर्ध्वमारुह्य यदर्थतत्त्वं
धीः पश्यति श्रान्तिमवेदयन्ती।
फलं तदाद्यैः परिकल्पितानां
विवेकसोपानपरम्पराणाम् ।।[१७]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विवेकश्चात्र विचारक्रमः रसनिष्पत्तिमधिकृत्य। इयमेव हि सोपानपरम्परा यदुत्तरत्र पूर्ववर्तिनोऽविनाभावः।

व्याख्यानानामेतेषां यः क्रमः अभिनवभारत्यां अभिनवगुप्तेन स्वीकृतः न स युक्तियुक्तः। साक्षात्कारात्मनि भोगे प्रथमं तावत् पदार्थनामभिव्यक्तिर्भवति तदनन्तरं च भोगः। अभिव्यक्तौ भुक्तेरभावः भुक्तौ पुनरभिव्यक्तेः अपरिहारः । अतएव भुक्तिवादः परवर्ती, अभिव्यक्तिवादश्च पूर्ववर्ती। एवं चाभिव्यक्तस्य भुक्तिर्भवति, न त्वनभिव्यक्तस्येत्यभिव्यक्तिः प्रथमं सोपानं भुक्तिरूपस्य द्वितीयस्योत्थापने।

ऐतिहासिकोऽपि क्रमः इमामेव स्थितिमनुमोदते। भट्टनायकः अभिनवगुप्तस्य पूर्ववर्ती, पश्चाद्वर्ती च आनन्दवर्द्धनस्य। तथाहि भट्टनायकेन स्वकीये हृदयदर्पणाख्ये लक्षणग्रन्थे आनन्दवर्धनस्य रसनिष्पत्तिविषयकं व्याख्यानम् आलोचितम् ।[१८] तच्च खण्डितमभिनवगुप्तेन ध्वन्यालोकलोचने विस्तरेण। अत्रास्ति प्रमाणं स्वयमभिनवगुप्तस्यैव वचनम् । उल्लिखत्यसौ लोचने द्वितीये उद्योते स्वयमेव भट्टनायकस्य ग्रन्थस्य नाम'[१९] कथयति च तदुत्तरवर्ती महिमभट्टः व्यक्तिविवेके - "सहसा यशोऽभिसर्तुं समुद्यतादृष्टदर्पणा मम धीः"[२०] इति।

एवञ्च भट्टनायकेन रससूत्रस्य व्याख्यानप्रसङ्गे यः अभिव्यक्तिवादः निरस्तः - "न ताटस्थ्येन नात्मगत्वेन रसः प्रतीयते नोत्पद्यते नाभिव्यज्यते"[२१] इति स हि आनन्दवर्धनोपज्ञः । एवं चाभिव्यक्तिरेवाग्रजाऽनुजाया भुक्तेः। किन्तु भुक्तिवादी भट्टनायक एवाग्रजोऽभिव्यक्तिवादिनोऽभिनवात् अनुज इव आनन्दवर्धनात् । अतश्च विकासक्रमे चरमो भुक्तिवादः विचारक्रमे पुनरभिव्यक्तिवाद एव।

एतेषां सर्वेषामेव व्याख्यानानां समन्वयः पण्डितराजस्य रसङ्गाधरे प्राप्यते तत्र हि रत्याद्यवच्छिन्ना भग्नावरणा चिदेव रसपदाभिधेया।[२२] रत्यादयो भावाः सहृदयचेतसि प्रबोधमाप्नुवन्ति। भावानामेतेषां समुदितेन ज्ञानेन निराक्रियतेऽन्तःकरणनिष्ठम् अज्ञानावरणम्। ततश्च प्रकाश्यन्ते रत्यादयो भावाः। अस्मिन् प्राप्यते पूर्वेषां समेषामेव पक्षाणां घटकत्वम् ।

आनन्दभोगस्य निष्पत्तये व्यापारद्वयमिष्यते आचार्यैः - भावकत्वं भोजकत्वञ्च। आद्यं तावत् साधारण्यनिष्पादकम् । साधारण्यं चेदमेव यत् कान्तादीनामसाधारणानां परिहृतविशेषाणां स्त्रीत्वादिमात्रसध्रीचीनानाम् अनुभवः। तदेव उक्तं काव्यप्रकाशे - "न ममैवेते न शत्रोरेवैते न तटस्थस्यैवेत इति सम्बन्धविशेष - स्वीकारपरिहारनियमानध्यवायः"[२३] इति। रत्यादिभिः आत्मन एव सम्बन्धविशेषस्य स्वीकृतौ परिहृतौ वा य एष एवकारनिरूपितोऽपर-व्यवच्छेदकृन्नियमस्तस्याऽनध्वसाय एव हि साधारण्यम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भावकत्वव्यापारेण य इमे परिहृतविशेषास्त एव रत्यादयो भावा भोजकत्वव्यापारेण भुज्यन्ते। भोजकत्वं चेदमेव यद् उद्रिक्तेन सत्वेन रत्यादिकस्य स्थायिनो भावस्य विषयीकरणम्। ततश्च सामाजिकानां निरावरणेनात्मचैतन्येन सन्निहितानां रत्यादीनां साक्षात्कारः क्रियते जन्यते च तेनाऽऽत्मनि सुखस्योल्लेखः । अत एवोच्यते (भट्टनायकेन) - "सत्वोद्रेकप्रकाशानन्दमय-संविद्विश्रान्तिसतत्त्वेन भोगेन भुज्यते"[२४] इति। अभिनवगुप्तोऽपि प्रतिपादयति - "ब्रह्मास्वाद-मिवानुभावयन् अलौकिकचमत्कारकारी रसः"[२५] इति। अत्र ब्रह्मास्वादसविधेन रसास्वादेन अनुभावयन्ति साधारणीकृताः विभावादयः आत्मनि रत्यादीन् । ब्रह्मास्वादे भुक्तिदशायां ब्रह्ममात्रं प्रकाश्यते। रसे पुनः विभावादीनामपि प्रतीतिर्भवत्येव। एष एवास्ति भेदः अनयोर्मध्ये।

रत्यादीनां यः भोगः आस्वादो वा सः पारमार्थिकः अपारमार्थिकैः उपायैरुपजनितोऽपि नेयमास्वाभिविकी स्थितिः। स्वप्नादिषु समालिङ्गितानां कान्तादीनां सुखजनकत्वस्यानुभाविकत्वात्। तत्रापि अपारमार्थिका प्रातिभासिका एव तारुण्यादयः प्रतीतिपथारोहिणः सन्तः प्रीतये कल्पन्ते सुखजनकत्वात् । तदिदं प्रातिभासिकं विश्वं विभावादीनाम् आनन्दभोगाय कल्पते। आनन्दभोगाय च तस्यास्य कारणत्वं सर्वानुभवसिद्धम् । प्रमातृचैतन्यञ्चैतेन प्रातिभासिकेन मायामेलापकेनोप-सन्दानितं सद् रमते। सा इयं लीला न केवलं काव्यजन्या अपितु कलासामान्यजन्या। सर्वास्वपि कलासु आनन्दभोगाय कल्पितायाः सामग्र्याः प्रातिभासिकत्वस्यैव जागरूकत्वात् । चित्रकलायां मूर्तिकलायां सर्वत्रैव कारणरूपायाः चित्रलिखिताया मूर्तिरूपेणोट्टङ्कितायाश्च सामग्र्याः अपारमार्थिकत्वमेव। अपारमार्थिकत्वेऽप्येते पारमार्थिकतयैव स्वीक्रियन्ते। सामाजिकैः तज्जन्यस्य सुखस्य पारमार्थिकत्वान् ।

काव्यजन्यं सर्वमपि विभावादिरूपमपारमार्थिकं विश्वं प्रमातुरेव सृष्टिः। अत एव अविद्यमानानामपि दुष्यन्तादीनामभिनयेन रत्यादीनामनुभवो जायते। एवं हि न केवलं काव्यजन्यमपितु सम्पूर्णमपि कलात्मकं विश्वं प्रातिभासिकमपि वास्तविकमपि प्रतीयते। सेयं सत्यानृते मिथुनीकृत्य सम्ध्यमाना कला-कथा प्रातिभस्य विश्वस्य। अलमस्याः विस्तरेण।

सन्दर्भाः

१. नाट्यशास्त्रम् ६.३१
२. ध्वन्यालोकलोचनम् १.५
३. नाट्यशास्त्रम् ६.३० वृत्तौ
४. तत्रैव
५. काव्यालङ्कारः १२.४
६. काव्यप्रकाशः ४.२८

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

७. साहित्यदर्पणः ३.१
८. ध्वन्यालोकलोचनम् २.४, पृ. १८७
९. नाट्यशास्त्रम् ६.३१. अभिनवभारती पृ. २८०
१०. साहित्यदर्पणः ३.३, वृत्तौ पृ. ८१
११. रसगङ्गाधरः प्रथमानने. पृ. ३३-३५
१२. काव्यलङ्कारकारिका १६४-१७७, प्रो. रेवाप्रसादद्विवेदी।
१३. शृङ्गारप्रकाशः पृष्ठं ३६९. द्वितीयोभागः।
१४ नाट्यशास्त्रम् . ६.३१. अभिनवभारती।
१५. नाट्यशास्त्रम् ६.३१
१६. तत्रैव
१७. नाट्यशास्त्रम् ६.३१, अभिनवभारती
१८. ध्वन्यालोकलोचनम् . कारिका १.५. २.४
१९. तत्रैव २.१
२०. व्यक्तिविवेकः १.४, पृ. ५
२१. काव्यप्रकाशः . ४.२८ वृत्तौ
२२. रसगङ्गाधरः . प्रथमाननारम्भे पृ. २५
२३. काव्यप्रकाशः. ४.२८ वृत्तौ
२४. तत्रैव
२५. तत्रैव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लोके मङ्गलचिह्नानां वैभवम्

कैलाशनाथद्विवेदी

मङ्गति-हितार्थं सर्पति वा, सङ्गति दुरदृष्टम् . अनेन अस्मात् वा, मङ्ग +अल इति नुपंसकलिंगे मङ्गल-शुभानन्दसमृद्धिसौभाग्य कुशल-शुभशकुन-शुभवस्तु-शुभरीतीत्याद मंगलशब्दः सिद्ध्यति।

समृद्धे सांस्कृतिकलोकजीवने[१] मंगलचिह्नानां प्रायः पारम्परिक प्रयोगः पुरातनकालात् परिलक्ष्यते। संस्कारप्रधाने भारतीयजनजीवनेऽमीषां मंगलचिह्नानां महत्ता वैभवञ्चाऽस्माः प्रमुखसंस्कारेषु यज्ञादिधार्मिके महत्त्वपूर्णकार्यारम्भे आनन्दावसरे वा दरीदृश्यते। पुत्रजन्मविवाह राज्याभिषेकादय उल्लेखनीयाः सन्ति मंगलचिह्नानां प्रयोगदृष्ट्या।

जीवनस्य स्वस्तिभावस्य द्योतकं स्वस्तिकचिह्नमस्ति। संसारोऽयं स्वस्तिकस्यैव प्रकाशोऽस्ति । स्वस्तिकस्य विपर्यासेन विश्वस्य विघटनं भवति। वैदिकदर्शनानुसारेण देशकालरूपिणौ महान्तौ यक्षौ विश्वेऽस्मिन् परस्परं सङ्व्य अन्ते च सृष्टिप्रक्रियायै परिणमतः यत्र ते मिलतः स एव स्वस्तिकस्य धारणबिन्दुरस्ति। अस्माकमृग्वैदिकब्रह्मविज्ञानस्य चिह्न मिव स्वस्तिकचिह्नम् । स्वस्तिकस्य बिन्दुरस्ति-आभुतत्त्वं, यत् अमूर्तब्रह्म सत् तत्त्वं वाऽस्ति तस्माद् भवति तत्त्वं नामरूपात्मकम् । अनयोः समष्टिसंज्ञाऽस्ति सदसत् । सदसद्वाद ए वैदिकब्रह्मविज्ञानस्य उत्कृष्टतमं रूपम् आसीत् । अतएव लोकमंगलाय प्रार्थयति वैदिकी स्वस्त्ययने एवम् -

"स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः।
स्वस्ति नस्तार्क्ष्योऽरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु।।"

भगवतः श्रीरामस्य वनयात्रावसरेऽपि रामायणे स्वस्तिकवैभवमवधार्य स्वस्तिवाचनं कृतमादिकविना मंगलार्थम् -

स्वस्ति ते साध्याश्च विश्वे च मरुतश्च महर्षिभिः।
स्वस्ति धाता विधाता च स्वस्ति पूषा भगोऽर्यमा।।
(रामा. अयो. २५/८)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शंखदुन्दुभितूर्यपुष्करादिवाद्ययन्त्राण्यपि मंगलचिह्नत्वेन प्रयुज्यन्ते स्म पुत्रजन्मादि-मांगलिक महोत्सवे । यथा -

जगुः कलं च गन्धर्वाः ननृतुश्चाप्सरसो गणाः।
देवदुन्दुभयो नेदुः पुष्पवृष्टिश्च खात् पतत् ।।
(रामा. बाल. १८/१७)

महाकविकालिदासेन रघुवंशे वर्णितमेवम् -

नदद्भिः स्निग्धगम्भीरं तूर्यैराहतं पुष्करैः।
अन्वमीयत कल्याणं तस्याविच्छिन्नसन्ततिः।।
(रघु.१७/११)

जलापूरितः पलाशाग्रादिः पल्लवयुक्तः पूर्णघटोऽपि मंगलचिह्नरूपेण ऋतसदनं सृष्टेरखण्डसत्यसन्धानं वा कथ्यते। परिपूर्णमांगलिककलशः सृष्टेः समृद्धिव्यक्तेश्च शोभनं प्रतीकमस्ति। यज्ञादिधार्मिककृत्येषु देवपूजने जलपूर्णाम्रपलाशपल्लवाच्छन्नसदीपमंगलकलशस्य सर्वप्रथमं स्थापना तत्पश्चात्तस्य पूजनं भवत्येव मंगलाय। आदिकविना वाल्मीकिना श्रीरामविवाहस्य मांगलिक महोत्सवे साङ्कुरकुम्भस्य चित्रणमेव कृतमस्ति -

अलंचकार तां वेदिं गन्धपुष्पैः समन्ततः।
सुवर्णपालिकाभिश्च चित्रकुम्भैश्च साङ्कुरैः।।
(रामा.बाल.७३/२१)

अमलजलविकसितं कमलं सर्वभूतविधात्र्याः पृथिव्याः मंगलविधायिन्याः उर्वराशक्तेर्जीवनस्य मंगलप्रतीकमस्ति। अनेन त्रिलोकी अवन्ध्या नयनाभिरामा च भवति. जगतीतले जीवनस्य अविच्छिन्नप्रवाहोऽपि चलति। पृथिव्याः जलाशयेषु कमलवनानि विकसन्ति। तेषां श्रीः यावत् आकाशमेघैः प्रतिवर्षं संयुक्ता भवति. तावत् सृष्टिकर्तुः प्रजापतेः चलायमान - मंगलचक्रं सकुशलं वर्तते। अनेन विराड्यज्ञचक्रेण गम्भीरभावमभिव्यञ्जयन्ती मंगलमयी पद्मश्रीः सौन्दर्यप्रियमानवसमाजस्य कलाकृतिषु समुल्लसति। सांचीभारहुतयोः पुरातनस्तूपतोरणेषु कमलानां चारुमंगलचिह्नानि विलसन्ति। उत्तरमेघे यक्षः मेघं परिचाययति स्वभवनद्वाराङ्कितं शंखपद्ममंगलचिह्नमयं स्वकीयं गन्तव्यमेवम् -

एभिः साधो ! हृदयनिहितैर्लक्षणैर्लक्षयेथा,
द्वारोपान्ते लिखितवपुषौ शङ्खपद्मौ च दृष्ट्वा।
क्षामच्छायं भवनमधुना मद्वियोगेन नूनं,
सूर्यापाये न खलु कमलं पुष्यति स्वामभिख्याम् ।।
(उ.मे. २०)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वस्तुत विमलकमलपुष्पपत्रैः समुल्लसितः पूर्णघटोऽयं जीवनजलधारकमानवशरीररस्य प्रतिरूपमेवावास्ति। यावदस्मिन् जीवनं प्राणा वा सम्भृतास्तावदेव शरीरघटः पूज्यो मांगलिको वा मन्यते। जीवनजलमयशरीरघटादधिकं मंगलात्मकमस्मिन् विश्वे किञ्चिदपि नास्ति।

समाजे सामान्यतः पुत्रजन्मविवाहराजाभिषकादिमांगलिकावसरेषु नैकमंगलचिह्नानां दर्शनं भवत्येव। पुत्रजन्मोत्सवे शंखतूर्यदुन्दुभिपुष्करप्रभृतिमंगलवाद्यानां मंगलध्वनिः श्रूयते स्म । यथा -

(i) महाभारते- दुष्यन्तपुत्रजन्मावसरे

तस्मै तदान्तरिक्षाच्च पुष्पवृष्टिः पपात ह।
देवदुन्दुभयो नेदुर्ननृतुश्चाप्सरो गणाः।।

(संभव ७४)

(ii) **सुखश्रवा मंगलसूर्यनिस्वनाः**
प्रमोदनृत्यैः सह वारयोषिताम् ।
न केवलं सद्मनि मागधीपतेः
पथि व्यजम्भृन्त दिवौकसामपि।।

(रघु. ३/३९)

(iii) **प्रसन्नदिक् पांसुविविक्तवातं शंखस्वनानन्तरपुष्पदृष्टिः।.**
शरीरिणां स्थावरजंगमानां सुखायं तज्जन्मदिनं वभूव।।

(कुमार. १/२३)

वैवाहिकमंगलचिह्नेषु नववध्वाः क्षौमालक्तककालांजनहरितालमनः शिलाद्युपकरणानि उल्लेखनीयानि सन्ति। यथा -

(i) क्षौमं केनचिदिन्दुपाण्डुतरुणा मांगल्यमाविष्कृतम् ।
निष्ठ्यूतश्चरणोपभोगसुलभो लाक्षारसः केनचित।

(अभि.शा. ४/५)

(ii) न चक्षुषो कान्तिविशेषबुद्धा कालांजनं मंगलमित्युपात्तम् ।

(कुमार. ७/२०

(iii) अथांगुलिभ्यां हरितालमार्द्रां मांगल्यमादाय मनः शिलां च।

(कुमार. ७/२३)

मांगलिकविवाहोत्सवे सामान्यतः शंखतूर्यदुन्दुभिपुष्करादि मंगलवाद्यानां प्राचुर्येण प्रयोगः परिलक्ष्यते । यथा -

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(i) देवदुन्दुभिनिर्घोषः पुष्पवर्षो महानभूत् ।

(रामा.बाल. ७३/३८)

(ii) प्रध्मातशंखे परितो दिगन्तांस्तूर्यस्वने मूर्च्छति मंगलार्थे ।

(रघु. ६/९)

(iii) ततो गणैः मूलकृतः पुरोगैरुदीरितो मंगलसूर्यघोषः।

(कुमार ७/४०)

मांगलिकराज्याभिषेकमहोत्सवे छत्र चामरव्यजनतीर्थाम्बुपूर्णघटगणध्वजशंख-शुक्लमाल्यलाजादिमंगलचिह्नानामुपयोगोऽनिवार्यतः क्रियते स्म राजपुरोहितैः। यथा - रामायणे वर्णयति आदिकविर्महर्षिर्वाल्मीकिः श्रीरामस्य राज्याभिषेके प्रयुक्तानि मंगलवस्तूनि इमानि-

"शुक्लमाल्यानि लाजांश्च पृथक् च मधुसर्पिषी।
अर्हतानि च वासांसि रथं सर्वायुधान्यपि।।
चतुरंगबलं चैव गणं च शुभलक्षणम् ।
चामरव्यजने चोभे ध्वजं छत्रं च पाण्डुरम् ।।
शतं च शातकुम्मानां कुम्भानामग्निवर्चसाम् ।
हिरण्य श्रृंगमृषभं समग्रं व्याघ्रचर्म च।।

(रामा. अयो. ३/९-११)

नाटककारभासेनाऽपि स्वप्रतिमानाटके संक्षेपे श्रीरामस्य राज्याभिषेकावसरे महर्षिवसिष्ठप्रयुक्तमंगलचिह्नानामुल्लेख एवं कृतः -

छत्रं सव्यजनं सनन्दिपटहं भद्रासनं कल्पितं
न्यस्ता हेममयाः सदर्भकुसुमास्तीर्थाम्बुपूर्णाः घटाः।
मुक्तः पुष्परथश्च मंत्रिसहिताः पौराः समभ्यागताः
सर्वस्यास्य हि मंगलं स भगवान् वेद्यां वसिष्ठः स्थितः।।

(प्रतिमा. १/३)

न केवलं यज्ञपुत्रजन्मविवाहप्रभृतिमांगलिकमहोत्सवेष्वपितु मृत्युसदृशामंगलावसरेऽपि शवयात्रायां श्मशानेऽपि सुपुष्पशंखसार्धं जलपरिपूर्णघटस्य प्रयोगः भारतीयसंस्कृतौ नैकमंगल-चिह्नानां महत्ता वैभवं वा व्यनक्ति। अनेनाऽस्माकं सत्यं शिवं-सुन्दरं समन्वितं व्यापकं जीवनदर्शनं लोकमंगलकारिणी शुभजीवनदृष्टिश्चैव पुष्यति। अतएव अस्माभिः पुरातनकालादेव प्रवर्तितमंगलचिह्नानां महत्तावैभवरक्षणाय एतेषां श्रद्धया सततं दैनिकोपयोगः कर्त्तव्यः तदैवाऽस्माकं संस्कृतिः संसारे समृद्धा संरक्षिता च भविष्यति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संदर्भाः -

१ लोके मंगलात्मकाष्टवस्तूनि परमप्रसिद्धानीमानि गरुडपुराणोक्तानि -

लोकेऽस्मिन् मंगलान्यष्टौ ब्रह्मणो गौर्हुताशनः।
हिरण्यं सार्पिरादित्य आपो राजा तथाष्टमः ।।

(गरुडपुराणे २०५/७४)

अथवा अन्यत्रअष्ट मंगलात्मकवस्तूनि इमान्युल्लिखितानि सन्ति -

मृगराजो वृषो नागः कलशो व्यजनं तथा।
वैजयन्ती तथा भेरी दीप इत्यष्टमंगलम् ।।

(आह्निकसूत्रे छान्दोगपरिशिष्टे)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वतन्त्रस्वतन्त्रो भट्टश्रीनागेशः

बालशास्त्री

सुविदितमेव समेषां प्रेक्षावतां यन्महेश्वरप्रसादादवाप्ताक्षरसमाम्नायो महामुनिर्भगवान् पाणिनिः सर्वविध-लौकिक-वैदिक शब्द-स्वराद्यनुशासनम् अष्टाध्यायीसूत्ररूपं सर्वाङ्गपूर्णम् अनतिसाधारणं व्याकरणशास्त्रं प्रणिनाय। कथेयं संभवतो विक्रमादित्यमहाराजस्य शासनकालात्प्रायशः सप्तमशताब्द्याः ततोऽपि वा प्राक्कालिकी।

तदनु वर्षशतकद्वयानन्तरं व्यवहारसौकर्याय भाषायां प्राप्तस्थानानां नूतनोद्भवानां शब्दानामपि साधुत्वाय परमकारुणिको मुनिश्रेष्ठः श्रीवररुचिरावश्यकानि वार्त्तिकानि निर्माय पाणिनीयव्याकरणस्य पूर्णतां व्यदधात् ।

गच्छता कालेन तेजस्विचूडामणिर्भगवान् पतञ्जलिर्मुनिवरः पाणिनीयसूत्राणां वार्त्तिकानामथ स्ववचसां च व्याख्यानभूतमतिविस्तृतं सारवदपि सकलशास्त्रसिद्धान्तावबोधकं भाष्येष्टिसहितं कोमलकान्तपदावलियुतं महाभाष्याख्यं प्रबन्धं सरल-सरस-प्राञ्जलभाषया निबध्य 'त्रिमुनि व्याकरणम्' इति प्रयोगं साध्वन्वितार्थमकार्षीत् । अस्य महाभाष्यत्वं च इष्ट्यादिकथनेनैव। तथा चोक्तमुद्योते भट्टश्रीनागेशेन 'व्याख्यातृत्वेऽपि अस्येष्ट्यादिकथनेनान्वाख्यातृत्वाद् इतरभाष्यवैलक्षण्येन महत्त्वम् ।' इति

विवेचित-स्वतन्त्र-राद्धान्तस्य समाहित-सर्वन्यायबीजस्य. वार्तितकाराभिप्रेत पदार्थ सूत्राक्षरैरेवोपपादयितुं सततं चेष्टमानस्य महतः भाष्यस्यास्य काठिन्यमतिदुरूहत्वं च नास्वाभाविकमिति विज्ञाय सारल्येन सर्वजनानां महाभाष्यत्वावबोधो यथा भवेद् इत्येतदर्थं सकलशास्त्रमर्मज्ञो महावैयाकरणो जैय्यटात्मजः श्रीकैयटो महाभाष्यमधिकृत्य एकमतिविशदं प्रदीपनामकं विवरणमुपन्यभान्त्सीत् । तथा च महाभाष्य-प्रारम्भे कैयटः -

"महाभाष्यार्णवावारपारीणं विवृतिप्लवम् । यथागमं विधास्येऽहं कैयटो जेय्यटात्मजः। भाष्याब्धिः क्वातिगम्भीरः क्वाहं मन्दमतिस्ततः। छात्राणामुपहास्यत्वं यास्यामि पिशुनात्मनाम् । तथापि हरिबद्धेन सारेण ग्रन्थसेतुना। क्रममाणः शनैः पारं तस्य प्राप्तोऽस्मि पंगुवत् ।" इति

यदि नाभविष्यत्प्रदीपविवरणं तदा महाभाष्यमिदमविघाटितार्थमेवास्थास्यदिति नातिशयोक्तिरपि तु नितान्तं तथ्यं वचः। न्यासकारजिनेन्द्रबुद्धि-पदमञ्जरीकारहरदत्तादयः सर्वेऽपि अर्वाचीना वैयाकरणाः कैयट-क्षुण्णराजमार्गमनुसरन्त एव दरीदृश्यन्ते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैयाकरणसिद्धान्तकौमुदी-प्रौढमनोरमा-शब्दकौस्तुभादि-महाग्रन्थ-र
वैयाकरणकेसरिणः श्रीमन्त-श्री-भट्टोजिदीक्षिता अपि सर्वथा कैयटमतानुसारिण इति त
ग्रन्थानुशीलनशालिनां विदुषां न तिरोहितम्। एतेषां पुत्राः श्रीवीरेश्वरदीक्षिताः, पौत्राश्च श्रीह
अपि स्वरचितबृहच्छेखरादिग्रन्थेषु कैयटमतानुगामित्वमेव स्वस्य प्रदर्शितवन्तः।

स्वगुरुहरिदीक्षितपादपद्मानुग्रहावाप्तविलक्षणवैदुष्यः स्वमतसाध
मतविदारणसमर्थामनिर्वचनीयां कामपि स्पृहणीयां नवनवोन्मेषशालिनीं प्रतिमामादधानः
स्वतन्त्रो वादीभकण्ठीरवोऽयं सर्वशास्त्रपारदृश्वा भट्टनागेशस्तु स्वप्रतिभोद्भासितं कमपि
मार्गमनुसरन् कैयट-भट्टोजिदीक्षित-स्वगुरुहरिदीक्षित-प्रतिपादित-सिद्धान्तविरुद्धमे
सप्रमाणं पदे पदे प्रतिपादयतीति कतिपयैरिहोद्धृतैः प्रघट्टकैः प्रमाणितं स्मात्।

'अथ' इत्ययं शब्दोऽधिकारार्थः प्रयुज्यते" इति महाभाष्यं व्याचक्षाण कै
यन् निपातानां द्योतकत्वस्य वाक्यपदीये निणीतित्वाद् 'अथ' इति निपातः प्रस्ताव
द्योतको न तु वाचकः। तथा हि कैयटग्रन्थः अधिकारार्थ इति। अधिकारः प्रस्तावो द्योत
प्रयोजनमित्यर्थः। निपातानां च द्योतकत्वं वाक्यपदीये निर्णीतम् इति।

शब्दकौस्तुभे श्रीभट्टोजिदीक्षितोऽपि निपातानां वाचकत्वं खण्डयन् द्योत
तेषां निर्धारयति। तथा हि शब्दकौस्तुभो ग्रन्थः - अथ शब्दानुशासनमिति। अथशब्दः प्र
द्योतको न तु वाचकः; निपातत्वादुपसर्गवत्। न च ते वाचका एवेति वाच्यम्। उपास
अनुभूयते सुखम् इत्यादौ धातोः सकर्मकक्रियापरत्वं विना कर्मणि लकारायोगेन
स्थिते उपसर्गाणां द्योतकत्वस्यैव युक्तत्वात्। ननूक्तयुक्त्या अस्तूपसर्गाणां द्योतकता, नि
तु वाचकमेवेति चेन्न। साक्षात्क्रियते, अलंक्रियते, उरीक्रियते इत्यादौ कर्मणि लकारेण क
गुर्वादेरमिधानसिद्धये धात्वर्थम्प्रति कर्मत्वस्य वाच्यत्वात्। इति

स्वतन्त्रमतिर्भाष्यमर्मज्ञो भट्टश्रीनागेशस्तु उपसर्गातिरिक्तनिपातानां वाच
स्वीकुरुते। तथा हि उद्योते भट्टः श्रीनागेशः - निपातानां द्योतकत्वमिति कैयटप्रतीकं
लिखति निपातानां द्योतकत्वं चेत्यर्थः। उपसर्गातिरिक्तनिपातानां द्योतकत्ववाचकत्वोभयस्
अव्ययं विभक्ति २/१/६ इति सूत्रे भाष्ये स्पष्टत्वात्। उपसर्गाणां तु द्योतकत्वमेव
गतिर्गतो ८/१/७० इति सूत्रे भाष्ये। इति

'यत्तर्हि भिन्नेष्वभिन्नं छिन्नेष्वच्छिन्नं सामान्यभूतं स शब्दः' इति महाभाष्य
सामान्यभूतम् इति शब्दं व्याचिख्यासुः श्रीकैयट इत्थं भाष्यकाराशयं प्रकाशयति यद्
चेति द्विविधं सामान्यं, परं सत्ता, अपरं गोत्वादि। अत्र भाष्ये सामान्यशब्दः पराभिन्नसत्तास्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मान्यस्येव बोधको न तु अपराख्यागोत्वादेरपि। अयं देवदत्तो मे पितृभूतः इत्यत्रेव अत्र भाष्येऽपि मूलशब्दः सदृशपरः। सदृशरूपार्थो गोत्वादिश्चाध्याहारलभ्यः। तथा च सामान्यभूतमित्यस्य सामान्यसदृशं गोत्वादि इत्यर्थ इति। तथा हि कैयट-ग्रन्थः 'सामान्यभूतमिति । सत्ताख्यं महासामान्यं, गोत्वादेः सामान्यविशेषस्य उपमानं निर्दिष्टम् । सामान्यमिव = सामान्यभूतम्। भूतशब्द उपमार्थे। यथा पितृभूत इति। इति

अलौकिकशेमुषीको भट्टनागेशस्त्वत्र कैयटविपरीतार्थमेवेत्थं प्रतिपादयति यद्यदि सामान्यभूत इत्यस्य सामान्यसदृशं गोत्वमित्यर्थस्तदा वृक्षभूतः इत्यस्यापि 'वृक्षसदृश आम्रः' इति बोधः स्यात् । परमपरं चेत्युभयविधसत्ताबोधकस्य सामान्यशब्दस्यार्थे संकोचे मानाभावः। प्रकृते उपमानप्रदर्शनस्य न कश्चन दृश्यते प्रसंगः। गौत्वादेरध्याहारे च महद्गौरमतो न कैयटमतं युक्तम् । किन्तु " प्रमाणभूत आचार्यो दर्भपवित्रपाणि"[१] इत्यत्रेव भूतशब्दः स्वरूपवाची। इति। तथा च उद्योते श्रीनागेशः -"भूतशब्दप्रयोगानुपपत्तिं परिहरति सत्ताख्यमिति। एवं हि वृक्षवदाम्रइत्याद्यापत्तेः, सामान्यश्रुतेः। सर्वसामान्यविषयत्वेन प्रवृत्तायाः संकोचे कारणाभावाच्च। उपमानकथनस्य प्रकृतेऽनुपयोगाच्च। अध्याहारे गौरवाच्च नेदं युक्तम् । किन्तु स्वरूपवाची सः । वृद्धिसंज्ञासूत्रस्थभाष्यप्रयोगस्यप्रमाणभूत इत्यस्य स्वयं करिष्यमाणव्याख्यानरीत्या अस्यापि व्याख्यासंभवात् । पितृभूता इत्यत्राप्यन्यत्रान्यशब्दप्रयोगः सादृश्यपर इति सादृश्यप्रतीतिर्न त्वस्य सादृश्यवाचकत्वे मानमस्तीति दिक् । इति।

विलक्षण-कल्पना-प्रसूत-व्याख्यान-चतुरी-चातुरोऽयं नागेशभट्टः श्रीभट्टोजदीक्षित-पौत्रस्य हरिदीक्षिततस्य साक्षाच्छिष्यः। तथा हि उद्योते -

'नागेशभट्टो नागेशभाषितार्थविचक्षणः।
हरिदीक्षितपादाब्जसेवनावाप्तसन्मतिः । इति।

तथापि स्वगुरोहरिदीक्षितस्यापि मतमालोचयन् , तद्विरुद्धं शास्त्रार्थमुद्‌घाटयत्रयं भट्टः श्रीनागेशः पाणिनीयव्याकरणशास्त्रस्यअन्तिमपरिष्कर्तृपदं ससम्मानमधिकुरुते इति नात्र संदेहः। गुरु-शिष्ययोर्मतभेदप्रदर्शनायाग्रे प्रदर्श्यमानमैकमुदाहरणं विदुषां परितोषायालम् स्यात् ।

हलन्त्यम् १/३/३ इति सूत्रव्याख्यावसरे प्रौढमनोरथायां चित्रगवीणाम् इति प्रयोगस्योल्लेखः श्रीभट्टोजिदीक्षितेन विहितः। तत्र प्रयोगोऽयं चित्रगवीणाम् इत्येवं णकारघटित उताहो चित्रगवीनाम् इति दन्त्यनकारघटित इति सन्देहे श्रीहरिरीक्षितः दन्त्यनकारघटितमेव प्रयोगं साधु मनुते न तु णकारघटितम् । कुमति च ८/४/१३ इति सूत्रेण तत्र णत्वासंभवात्। तथा च बृहच्छब्दरत्नग्रन्थे श्रीहरिदीक्षितः -

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"चित्रगवीनाम् इति। प्रत्यासत्या विभक्त्याक्षिप्तप्रकृतेः कवर्गवदुत्तरपदसमासरूपाया एव ग्रहणेन कुमति च ८/४/ णत्वं नेति वक्ष्यामः।" इति।

अयं भावः - प्रत्यासत्तिन्यायाश्रयणेन कुमति चेति सूत्रस्य "कवर्गवदनेकाजुत्तरप समासघटकपूर्वपदस्थनिमित्तोत्तरत्वविशिष्टसमासप्रकृतिविभक्तिस्थनकारस्य णत्वं भ सत्वेन उक्त प्रयोगे णत्वाप्राप्तेः। चित्रगव इति टजन्ते समासत्वस्य चित्रगवी इति आम्विभक्तिप्रकृतित्वस्य सत्वेन व्याश्रयत्वात् । 'वर्षभोग्येण भर्तुः' इति कालिदास वर्षभोग्य इत्यत्र समासत्वस्य टाविभक्तिप्रकृतित्वस्य च सत्वेन णत्वं भवत्येव।

लघुशब्दरत्नस्य कर्त्ता श्रीहरिदीक्षितप्रधानशिष्यो भट्टश्रीनागेशस्तु अत्र प्र णत्वमुद्‌घोषयति। तथा हि लघुशब्दरत्नग्रन्थः - चित्रगवीणाम् इति। कुमति च इति दन्त्यपाठस्तु लेखकप्रमादात् । एवं स्त्रीगवीणाम् इत्येकशेषप्रकरणान्तस्थ बोध्यम् । इति

तदेवं नागेशभट्टोयं नितरां तीक्ष्णबुद्धिः दोष-गुण-विवेचनपटुः भाष्याब्धितल प्राचीनविदुषां परित्यज्य पन्थानं स्वकीयं नवीनमेव मार्गमाविष्चकारेत्यहो अस्य अनन्य मनिर्वचनीयं वैदुष्यम् । एतदनन्तरं पाणिनीयव्याकरणस्य एतादृशो विश्लेषकः परिष्कर्त्ता च नाभूत् साहित्यशास्त्रपरिष्कर्त्तुः पण्डितराज-जगन्नाथ इवेति विदांकुर्वन्तु सहृ धीवराः।

संदर्भाः

१. श्रीकैयटः प्रदीपविवरणे प्रमाणभूतः इत्यस्य व्याख्यानं प्रामाण्यं प्राप्तः इति तु प्रमाणसदृशः इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रूपावतारे पाणिनिसूत्राणां पाठभेदाः

रमाकान्त पाण्डेयः

पाणिनिनिकाये प्रक्रियाक्रमनुसृत्य प्रणीतः प्रथमोऽयं प्रबन्धः रूपावताराख्यः। अस्य ोता शाब्दिकशिरोमणिः धर्मकीर्तिः बालानां सुखबोधाय ग्रन्थममुं प्रणीतवानिति ग्रन्थादौ स क्ते। वस्तुतस्तु रूपावतारस्य रचनायां कारणायन्ते कातन्त्रादिप्रक्रियाक्रमेण प्रणीतान्यपाणिनीयानि ाकरणानि। तत्र सारल्यमवाप्य पाणिनिसूत्राणामध्ययनात् पलायन्ते स्म पिपठिषवः। यतो हि णिनिसूत्राणां क्रमः नाऽऽसीत् सामान्यप्रतिभावतां कृते सुकरः। एतादृशे सङ्क्रमणकाले थरत्नस्यास्य प्रणयनं पाणिनिशास्त्रस्य महत उपकाराय आसीदिति।

धर्मकीर्तिः यद्यपि भाष्यादौ सर्वत्र गतिरस्ति, तथापि वृत्तौ तस्य दृश्यते महान् पक्षपातः। त् कदाचित् तस्य बौद्धबुद्धेरेव फलम् । वृत्तिकर्तुः शास्त्रतत्त्वज्ञाने नास्ति कश्चन प्रश्नस्तथापि शिकायां वार्तिकाणां क्वचित् सूत्रत्वेन पाठः क्वचिच्च लभ्यते वार्तिकांशानां सूत्रेषु प्रक्षेपः। पाठोऽपि बहुत्र भाष्यासम्मत इत्यपि नास्ति परोक्षं सुधियाम् । काशिकाकारेण चान्द्रादि- ाकरणप्रभावात् पाणिनीयेतराण्यपि सूत्राणि पठितानि वर्तन्ते। यद्यपि नेदमत्राऽस्माकं ीक्षाविषयत्वमधिरोहति, तथापि विषयस्य सम्यग् बोधार्थं द्वित्राः अंशाः प्रदर्श्यन्ते -

काशिकायां 'दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः' (४.१.८५) इत्यत्र "यमाच्चेति व्यम्" इति वार्तिकं दृश्यते। भाष्ये नेदं वार्तिकं लभ्यते। कौमुदीकारेण 'यमाच्चेति काशिका' युक्त्वाऽत्र भाष्यासम्मतत्वमेव प्रतिपाद्यते । चान्द्रव्याकरणे" दित्यदित्यादित्ययमाण्ण्यः" .४.२) इति पाठं दृष्ट्वा काशिकाकारेणाऽपि वृत्तौ। 'यमाच्चेति वक्तव्यम्" इति प्रक्षिप्तम् । ावतारेऽपि (पृ.२२२) वार्तिकमिदं लभ्यते।

लाक्षारोचनाशकलकर्दमाट्ठक् (४.२.२) इत्यत्र काशिकाकारः 'कर्दमादणपीष्यते' युक्त्वा 'शाकलम्', 'कार्दमम्' इति प्रयोगद्वयं निर्दिशति। भाष्येऽस्य पाठमनवाप्य दीक्षितः तेकाराणामेतदिति' स्वीकरोति। 'शकलकर्दमादण्' ३.१.३ इति चान्द्रसूत्रप्रभावाद् वृत्तिकारेण र्तिकमिदं रचितमिति प्रतिभाति। रूपावतारकारोऽत्र 'शकलकर्दमाभ्यामणपीष्यते' (पृ. २२९) वार्तिकं काशिकाप्रभावात् पपाठ। अनेन रूपावतारकारेण वृत्तेरन्धानुकरणं कृतमिति द्ध्यम्। काशिकायां लभ्यमानान्युदाहरणादीनि रूपावतारे यथावत् प्राप्यन्ते। रूपावतारे यो सूत्राणां पाठभेदः स सर्वथा काशिकानुसारीति तत्कर्तुः वृत्त्याश्रयणमनेनाऽपि ज्ञायते। वृत्तोवेते भेदाः कालान्तरे समापतिता इति शङ्काया अवसरोऽत्र नाऽस्ति। हरदत्तस्य कालेऽपि पाठभेदा तत्र आसन्नेवेति तस्य वचनात् ज्ञायते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"अन्ये तूत्तरसूत्रे कणिताश्वो रणिताश्व इत्यनन्तरमनेन ग्रन्थेन भवितव्यम् । इह तु दुर्विन्यस्तकाकपदजनितभ्रान्तिभिः कुलेखकैर्लिखितमिति वर्णयन्ति।" (काशि. १.१.५ पदमञ्जर्याम्)

हरदत्तेन काशिकायाः पाठभेदाः सम्यङ्निर्दिष्टाः। रूपावतारकारोऽपि तं सम्यग् जानाति। किन्तु पदमञ्जर्यां निर्दिष्टाः भाष्यानुरिणः पाठभेदास्तेन नाङ्गीकृताः। अतो रूपावतारस्य न भाष्यानुसारित्वं, काशिकानुसारित्वमेव। स वृत्तिवचनं प्रमाणतया स्वीकृत्य प्रवर्तत इत्येव पाठभेदानां कारणमिति रूपावतारे समापतिताः केचन भेदा काराद्यनुक्रमेणेह निर्दिश्यन्ते। एफ. कीलहार्न - श्रीनारायणमिश्र - रमाशङ्करभट्टाचार्यप्रभृतिमनीषिभिः पाणिनिसूत्राणां काशिकादावुप- लभ्यमानपाठभेदानां निर्देशः कृतः। रूपावतारे पुनर्वार्तिकश्लोकवार्तिकादावपि भेदो वर्तते एवेति सूत्राणां पाठभेदोऽत्र यथामति प्रतन्यते -

१. अचिशीर्षः - रूपा. पृ. २४५। काशि. ६.१.६२।

भाष्ये 'ये च तद्धिते' ६.१.६१ इत्यस्मिन् सूत्रे लिखितमिदं वार्तिकम् । सिद्धान्तकौमुद्यां तु "अचि शीर्ष इति वाच्यम् " (२२६६) इति वार्तिकत्वेनाऽस्य पाठः। "अचि शीर्षः इति वार्तिके दर्शनात् सूत्रे कैश्चित् प्रक्षिप्तमिति" वदन् प्रदीपकारः कैयटोऽपि वार्तिकत्वमस्य वदति। काशिकया सूत्रत्वेनाऽस्य पाठं वीक्ष्य रूपावतारेऽपि तथैव स्वीकृतम् ।

२. अडभ्यासव्यवायेऽपि- रूपा. पृ. - १६२। काशि. - ६.१.१३६

भाष्ये नेदं सूत्रं लभ्यते। तत्र 'अड्व्यवाय उपसंख्यानम् 'अभ्यासव्यवाये' चेति वार्तिकद्वयं प्राप्यते। काशिकायामनयोरेकवाक्यतया पाठः । कौमुद्यां तु 'अडभ्यासव्यवायेऽपि (सुट्कात् पूर्व) इति वक्तव्यम् ' इत्येतादृशः वार्तिकपाठः लभ्यते। वृत्तौ सूत्रत्वमस्य वीक्ष्य शिवदत्तोऽस्य निरसनमाह - 'इदं वार्तिकं सूत्रेषु कैश्चित् प्रक्षिप्तम् । वार्तिके किमपि विधेयं नाऽस्ति इत्यतोऽधि- कारसूत्रमनुवर्त्य तदेक वाक्यतयोपन्यस्तम् (सि.कौ.पृ. ४७६)।

३. अध्यायन्यायोद्यावसंहाराधारावायाश्च - धातु. पृ. २९८ । काशि. ३.३.१२२

भाष्ये कौमुद्यां च 'अध्यायन्यायोद्यावसंहाराश्च' (३.३१२२) इति सूत्रपाठः। भाष्ये पुनः 'हलश्च' (३.३.१२१) इत्यस्मिन् सूत्रे 'घञ्विधौ अवहाराधारावायानामुपसंख्यानम् ' इति वार्तिकमपि पठितम् । वृत्तिकारेण वार्तिकस्य 'आधारावाय शब्दौ सूत्रे प्रक्षिप्तौ। सिद्धान्तकौमुद्यां 'अवहाराधारावायानामुपसंख्यानम् ' इति वार्तिकस्य व्याख्यायां तत्त्वबोधिनीकारेण तथ्यमिदमुक्तम्-

"वृत्तिकारस्त्वाधारावायशब्दौ सूत्रे प्रक्षिप्य चकारेणावहारशब्दं सञ्जग्राह, तदसम्बद्धमिति स्पष्टमेव"।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

. अभूततद्भावे कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः - धातुः पृ. १२१। काशि - ५.४.५०

भाष्ये कौमुद्यां च 'अभूततद्भावे' इत्यंशः सूत्रे नाऽस्ति। तत्र 'अभूततद्भाव इति क्तव्यम्' इति वार्तिकम् । 'कृभ्वस्तियोगे सम्पद्य कर्तरि च्विः' इति च सूत्रम् । काशिकाकारेण अभूततद्भाव' इति वार्तिकांशः सूत्रे प्रक्षिप्त इति प्रदीपादौ स्पष्टम् -

अभूततद्भावग्रहणं वार्तिके दृष्ट्वा अन्यैः सूत्रे प्रक्षिप्तम् - (५.४.५०) सूत्रस्य भाष्यव्याख्याने कैयटः) वार्तिककारेण च्विविधावभूततद्भावग्रहणं कर्तव्यमित्युक्तम्) तदवश्यं कर्तव्यमिति मन्यमानः सूत्रे प्रक्षिप्य व्याचष्टे (पदमञ्जर्यां हरदत्तः) वृत्तिकारस्तु 'अभूततद्भावे' इति सूत्रमध्ये प्रचिक्षेप। तत्त्वबोधिनी, सू. २८५६।

. अव्यक्तानुकरणात् द्व्यजवरार्धादनितौ डाच् - धातु. २३२/काशि. ५.४.५७।

भाष्यादौ सर्वत्र एतादृश एव पाठः लभ्यते। किन्तु काशिकासम्पादकः श्रीनारायणमिश्रः वृत्तिकारस्य ' केचित् द्व्यजवराध्यादिति यकारं पठन्ति, स स्वार्थिको विज्ञेयः, इति वचनात् अत्र पाठभेदं स्वीकरोति।

. आत्मनश्च पूरणे - रूपा. - पृ. २०६ । काशि. - ६.३.६।

भाष्ये नैतादृशः कोऽपि पाठः लभ्यते। 'आज्ञायिनि च' (६.३.५) 'आत्मनश्च पूरणे' इत्येतादृशः पाठस्तत्र लभ्यते। विद्वद्भिश्चानयोर्निर्दिष्टं वार्तिकत्वम् । कौमुद्यां तु 'आत्मनश्च' (१३८२) इत्यंशः सूत्रत्वेन ' पूरणे' इत्यंशश्च, वार्तिकत्वेन पठितः। काशिकायां रूपावतारे च 'आत्मनश्च पूरणे' इति सूत्रत्वेनैव पाठः। शिवदत्तस्तर्कप्रदर्शनपुरस्सरमस्य वार्तिकत्वमेव स्थापयति- 'आत्मनश्च पूरणे' इति समुदितस्यैव वार्तिकत्वमिति भाष्याक्षरस्वारस्यम् " (सि.कौ.पृ. २६३)।

७. आसुयुवपिरपिलपित्रपिचमश्च - धातु. पृ.- २६०। काशि. -३.१.१२६।

पतञ्जलिना 'आसुयुवपिरपित्रपिचमश्च' इति 'लपि' रहितः पाठः भाष्ये स्वीकृतः। दीक्षितोऽपि तथैवाऽनुसरति। 'ऋहलोर्ण्यत्' (३.१.१२४) इति सूत्रे 'लपिदा भिभ्यां च' इति वार्तिकं भाष्ये दृश्यते। तत एव वृत्तिकारेण 'लपि' - पदं सूत्रे स्वीकृतमिति प्रतिभाति।

८. इन्द्रे च नित्यम् - रूपा. पृ. १३ । काशि. ६.१.१२४।

भाष्यकारमतेऽत्र 'इन्द्रे च' इत्येव पाठः। कौमुद्यामपि तथैव पाठोलभ्यते। नित्यमित्यंशस्य 'प्लुतप्रगृह्या अचि' (६.१.१२५) इति परसूत्रेणाऽन्वयः। काशिकायामेतादृशं पाठं प्राप्य रूपावतारकारेणाऽपि तथैव (पठितः)। काशिकासम्पादकः श्रीनारायणमिश्रोऽत्र

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्रूते- यद्यपि नव्यवैयाकरणमते 'नित्यम्' इत्यंशः उत्तरसूत्रान्त्यावयवः, पदमञ्जरी चात्रानुकूला तथापि न्यासाद्यनुरोधात् अस्माभिरत्रैव सन्निवेशितः, कथमन्यथा इन्द्रशब्दे नित्य आदेशः स्यात्।

९. इषुगमियां छः धातु., पृ. १४। काशि. - ७.३.७७।

कौमुद्यादौ सर्वत्राऽपि पाठोऽयं स्वीकृतः। किन्तु भाष्ये 'इषु' इत्यस्य स्थाने 'इष' इति पाठो लभ्यते। 'तीषसहलभरुषरिषः' ७.२.४८ इति सूत्रस्य भाष्यं व्याकुर्वता प्रदीपकारेणाऽत्र निरनुबन्ध 'इष' धातुरेव स्वीकृतः। 'इषु' इति सानुबन्धपाठस्याऽनार्षत्वमुक्तं तेन। शिवदत्तेनाऽप्यत्र तथैव निर्णीतम् -

'इषु' इत्युकारानुबन्धान्तः पाठोऽनार्षः। (सि.कौ.पृ.४५०)

१०. एतदोऽश - रूपा. पृ. २८९। काशि - ५.३.५

भाष्यादौ शकारस्य स्थाने नकारस्य पाठात् 'एतदोऽन्' इति पाठः प्राप्यते। काशिकायां रूपावतारे च नकारस्य स्थाने शकारस्य पाठः। प्रदीपे, उद्योते, तत्त्वबोधिन्यां च भेदस्याऽस्य निर्देशो विद्यते - इह केचिदशं पठन्ति, केचिदनम् -- (प्रदीपः) केचिदिति - वृत्तिकृतः। अत्र द्वितीयपाठ एव सूत्रकृत्कृतः, भाष्यसम्मतेः। (उद्योतः) वृत्तिकारस्तु 'एतदोऽश्' इति पठित्वा शकारः सर्वादेशार्थः इति आह। (तत्त्वबोधिनी)।

११. कृत्याः प्राङ्ण्वुलः - धातु. पृ. २४७। काशि. ३.१.९५।

कौमुद्यां भाष्ये च 'कृत्याः' इति पाठः। सूत्रेऽस्मिन् 'प्राङ्ण्वुलः' इत्यंशः प्रक्षिप्त इति तत्त्वबोधिन्यां स्पष्टम् -

वृत्तिकारस्तु सूत्रे 'प्राङ्ण्वुलः' इति प्रचिक्षेप।

१२. ग्रामजनबन्धुसहायेभ्यस्तल् - रूपा. - पृ. २३४। काशि. ४.२.४३

'ग्रामजनबन्धुभ्यस्तल्' इत्येव सूत्रम्। अत्र वृत्तिकारेण 'गजसहायाभ्यां चेति' वार्तिकस्य सहायशब्दः सूत्रे प्रक्षिप्तः। 'गजाच्चेति' वार्तिक पाठश्च स्वीकृतः तथा चोक्तं तत्त्वबोधिन्याम् -

'वृत्तिकृता तु वार्तिकस्थसहायशब्दोऽपि सूत्रे प्रक्षिप्तः'। (पृ. २९७)

१३. टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरप्ख्युनाम् रूपा. - पृ. १३५ काशि. ४.१.१५

भाष्यादौ तु 'कञ्क्वरपः' इत्येतावान् पाठः। ख्युनाम्' इति पाठस्त्वनार्षः काशिकायाः श्रीनारायणसम्पादिते संस्करणे क्वरबन्तः सूत्रपाठः लभ्यते। आर्येन्द्रशर्मणः संस्करणे तु 'ख्युनामित्यन्श्च पाठः। पदमञ्जर्यां हरदत्तः पाठस्यास्या नार्षत्वं जगाद - "भाष्ये तु 'कञ्क्वरपः' इत्येतावत् सूत्रम्। ख्युनः पाठोऽनार्ष इति तस्याप्युपसंख्यानमेव कृतम्।"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१४. दण्डादिभ्यो यः - रूपा. पृ. - २६९। काशि. ५.१.६६

सूत्रस्याऽस्य पाठनिर्धारणे टीकाकृतां मतवैविध्यं दृश्यते शास्त्रे। कौमुद्यां तु 'दण्डादिभ्यः' (२३५२) इत्येतावत् सूत्रं स्वीकृतम्। पदमञ्जर्यामपि एतदेव सूत्रस्वरूपं स्वीकृतम्। न्यासकारः किन्तु 'दण्डादिभ्यो यः' इत्येव सूत्रमङ्गीकरोति। अत्रत्याः सर्वे विचारास्तु बोधिन्यां कृताः -

केचित् तु 'दण्डादिभ्यो यः' इति पठन्ति स चापपाठ एव, भाष्यादिविरोधादित्याहुः। तथा हि - 'अचो यत्' इति सूत्रे भाष्ये उक्तं 'हनो वा यत् वधादेशश्च' ३७९० वध्यः घात्यः "तद्धितो वा" वधमर्हति वध्य इति यदि चेह यद्विधीयेत तदैवैतदुपपद्यते, पक्षद्वयेऽपि 'यतोऽनावः ५५७६' इत्याद्युदात्तत्वात्। यदि त्वत्र यो विधीयेत तदा स्वरो भिद्येत। मनोरमायां तु 'क्यब्विधौ हनो वा वधस्तद्धितो वा' इति भाष्यम्। यदि चेह यद्विधीयेत तदैव तदुपपद्यते। क्यप्याद्युदात्तत्वं यत्यपि तद्धिते 'यतोऽनावः ५५७६' इत्याद्युदात्तत्वमित्यादि स्थितम्। (सि.कौ., पृ. ३४०)

१५. नित्यमाम्रेडिते डाचि - धातु.- पृ. - २३२। काशि. ६.१.१००

भाष्ये कौमुद्यां च वार्तिकत्वेनाऽस्य पाठः। काशिकायां च सूत्रत्वेनेति रूपावतारकारोऽपि तथैव पठितवान्। पदमञ्जरीकारेणाऽस्य वार्तिकत्वमेव स्वीकृतम् -

"वार्तिकमेवेदम्। वृत्तिकृता सूत्ररूपेण पठितम्"।

१६. प्रकृत्यान्तःपादमव्यपरे - रूपा.- पृ. १३। काशि. ६.१.११५

भाष्ये 'नान्तः पादमव्यपरे' ६.१.११५ इति सूत्रस्वरूपं लभ्यते। कौमुद्यां तु काशिकानुसारी पाठ एव दत्तः। काशिकासम्पादकः श्रीनारायणमिश्रः सप्रपञ्चमत्र पाठभेदं निरूपयति भूमिकायाम्। तद् द्रष्टव्यम्।

१७. प्रत्यपिभ्यां ग्रहेश्छन्दसि - धातु. पृ. - २५२। काशि. ३.१.११

'प्रत्यपिभ्यां ग्रहेः' इति भाष्यसम्मतः पाठः। 'छन्दसि' इति पदं तु सूत्रेऽस्मिन् लिखितस्य वार्तिकस्यांशः। कौमुदीकारोऽप्यत्र 'छन्दसीति वक्तव्यम्' इति वार्तिकं पठति। काशिकायां छन्दसिपदसंयुक्तपाठस्य प्रक्षिप्तत्वं निर्धारितं तत्त्वबोधिन्याम् - "वृत्तिकृता तु सूत्रे प्रक्षिप्तम्"। (सि.कौ., पृ. ५५९)

१८. प्लुतप्रगृह्या अचि - रूपा. - पृ. १३। काशि. ६.१.१२५

भाष्यादौ तु 'प्लुतप्रगृह्या अचि नित्यम्' इति पाठो लभ्यते। काशिकायां नित्यमिति पदं पूर्वसूत्रस्यावयवत्वेन पठितम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१९. लाक्षारोचनाशकलकर्दमाट्ठक् - रूपा. - पृ.२२९। काशि. ४.२.२

भाष्ये 'लाक्षारोचनाट्ठक्' ४.२.२ । इति पाठ कौमुद्यामपि तथैव। काशिकाकारः भाष्यस्थं 'शकलकर्दमाभ्यामुपसंख्यानम्' इति वार्तिकमपि सूत्रे सञ्जग्राह। तथा च प्रदीपादौ स्पष्टम् - शकलकर्दमयोः सूत्रे पाठोऽनार्षः। (प्रदीपकारः - ४.२.२), शकलकर्दमयोर्वार्तिके दर्शनात् सूत्रे प्रक्षेपः । (पदमञ्जरी) वृत्तिकृता तु वार्तिकस्थौ शकलकर्दमौ सूत्रे प्रक्षिप्तौ। (तत्त्वबोधनी)

२०. विष्वग्देवयोश्च टेरद्यञ्चतौ य प्रत्यये - रूपा. - पृ. - १०४। काशि. ६.३.९२

अस्मिन् सूत्रे भाष्यप्रदीपोद्योतकौमुद्यादौ यो हि प्रपञ्चः लभ्यते स सर्वोऽपि काशिकाया भूमिकाभागे प्रदत्तः श्रीनारायणमिश्रेण। स्थानाऽभावान्नेह चर्च्यते। तत्त्वबोधिनीकरोऽप्यत्र पाठभेदं निर्दिशति - 'अञ्चतौ वप्रत्यये' इति पाठे तु 'व प्रत्ययान्तेऽञ्चतौ इति व्याख्येयम् (सि.कौ.,पृ.११६) ।

२१. शक्तौ हस्तिकयाटयोः - धातु. - पृ. २६८। काशिका. ३.२.५४

भाष्यादौ काशिकायां रूपावतारे च सदृश एव पाठो दत्तः, किन्तु काशिकायां आर्येन्द्रशर्मसम्पादिते संस्करणे 'कवाटयोः' इत्यस्य स्थाने 'कपाटयोः' इति पाठो न्यस्तः।

२२. ष्ठिवुक्लम्याचमां शिति - धातु. - पृ. - १३। काशि. - ७.३.७५

भाष्यादौ "ष्ठिवुक्लमुचमां शिति" ७.३.७५ इति पाठः। तत्रैव 'आङिचम इति वक्तव्यम्' इति वार्तिकमपि। वृत्तिकारः कदाचित् वार्तिकस्य 'आङि' इति पदात् 'आ' इति स्वीकृत्य सूत्रे प्रक्षिप्तवान् । आर्येन्द्रशर्मणः काशिकासंस्करणेऽत्र "ष्ठिवुक्लम्याचमां शिति' इति पाठो लभ्यते। तत् कदाचित् मुद्रणस्खलनात् जातम् । तत्त्वबोधिनीकारस्तु वृत्तावुपलब्धपाठस्य निरसनमाऽऽह- "ष्ठिवुक्लमुआचमाम् इति वृत्तिकारोक्तपाठोऽयुक्तः। (सि.कौ.पृ.४२९)

२३. समो गम्यृच्छिप्रच्छिस्वरत्यर्तिश्रुविदिभ्यः - धातु. - पृ. ३५। काशि. - १.३.२९

भाष्यै कौमुद्यां च 'समो गम्यृच्छिभ्याम्' १.३.२९ इति पाठः। अनन्तरं 'विदिप्रच्छिस्वरतीनामुसंख्यानम्' 'अर्तिश्रुदृशिभ्यश्चेति वक्तव्यम्' इति लभ्येते द्वे वार्तिके। वृत्तिकारस्तु वार्तिके सूत्रे एव प्रचिक्षेपेति स्पष्टम् ।

२४. सम्पर्युपेभ्यः करोतौ भूषणे - धातु. - पृ. ६९। काशि. ६.१.१३७

भाष्ये 'सम्परिभ्यां भूषणसमवाययोः करोतौ (?) कौमुद्यां च "सम्परिभ्यां करोतौ भूषणे" इति पाठः। काशिकाया उपर्युक्तं पाठं धर्मकीर्तिः स्वीचकार रूपावतारे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२५. सास्मिन् पौर्णमासीति संज्ञायाम् - रूपा.- पृ. - २३१। काशि. ४.२.२२

भाष्यकारेणाऽत्र 'संज्ञायाम्' इति पदं न पठितं सूत्रे। दीक्षितेनाऽपि तथैवाऽचरितम्। 'संज्ञायाम्' इति पदं सूत्रे प्रक्षिप्तं वृत्तिकृतेति तत्त्वबोधिन्यां स्पष्टम् - "वृत्तिकृता तु सूत्रे एव 'संज्ञायाम्' इति प्रक्षिप्तम्"।

२६. स्वाङ्गाच्चेतोऽमानिनि - रूपा. - पृ. - १८४। काशि. ६.३.४०

अमानिनीति तु वार्तिकांशः वृत्तिकारेण सूत्रे प्रक्षिप्तम्। तथा चाह पदमञ्जरीकारः-

"अमानिनीति वार्तिके दर्शनात् सूत्रे प्रक्षिप्तम्"।

भाष्यादौ 'स्वाङ्गाच्चतः' इत्येतावदेव सूत्रम्।

रूपावतारे धातुप्रत्ययपञ्चिकायां (रूपावतारस्य द्वितीय भागे) चोपलभ्यमानाः केचन पाठभेदा एते तस्य काशिकानुसारित्वं निगदन्ति। वार्तिकश्लोकवार्तिकोदाहरणानां च पाठभेदा अत्रोपलभ्यन्ते। तत्सर्वं समीक्षणीयं मनीषिभिरिति दिक्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाज्झलाविरत्यस्मिन् सूत्रे आकारप्रश्लेषस्य समीक्षा

पाटसकर भाग्यलता

प्रथमाध्यायस्य प्रथमपादस्य दशमे "नाज्झलौ" इत्यस्मिन् सूत्रे श्रीमता भट्टोजिदीक्षित-महोदयेन आकारप्रश्लेषः स्वीकृतः। आकारसहितः अच् आच् , स च हल् च इत्येतौ मिथः सवर्णौ न स्तः" इत्युक्तत्वात् । तत्र केनाभिप्रायेण श्रीमतायं प्रश्लेषः स्वीकृतः किं वा तस्य फलमिति संक्षेपेण दृष्ट्वा तद्विषये यथामति आलोचनां चिकीर्षे।

१.४.९ तुल्यास्यप्रयत्नं सवर्णमित्यनेन प्राप्तम् अकारहकारयोः, इकारशकारयोः, ऋकारषकायोः लृकारसकारयोश्च मिथः सावर्ण निवारयितुं निषेधसूत्रं विदधात्याचार्यः "नाज्झलौ" इति। नाज्झलाविति सूत्राभावात् तयोः सावर्ण्योपपत्तेश्च ग्रहणकशास्त्रबलात् ऊष्मणामपि अच्त्वं स्यात् ।

सत्येवं प्रश्नोऽयं समुत्पद्यते यन्निषेधोऽयं वार्णसमाम्नायिकानामेव अथवा तत्सवर्णभेदानामपि ?

भट्टोजिमतानुसारेण सावर्ण्यनिषेधोऽयं वार्णसमाम्नायिकानामेव न तु तत्सवर्णभेदानाम्। तदेतत्स्वयमेव वक्ति अणुदित्सवर्णेत्यस्य वृत्तौ - "नाज्झलौ इति सावर्ण्यनिषेधो यद्यप्यक्षरसमाम्नायिकानामेवे" त्यादि। एवमेव 'अकःसवर्णे दीर्घ' इत्यत्र अचीत्येवमनुवृत्तं पदं विवृण्वन् प्रतिपादयति श्रीमान यत् "अचीति किम् । कुमारी शेते। नाज्झलाविति सावर्ण्य - निषेधस्तु न दीर्घशकारयोरिति।"

अतः आकारहकारयोः तुल्यास्यप्रयत्नेत्यनेन प्राप्तं सावर्ण्यं निवारयितुं भट्टोजिनाकार-प्रश्लेष आदृतः। तत्फलं च तेन विश्वपाभिरित्यस्मिन् रूपे प्रदर्शितम् । विश्वपा इत्यस्मात्तृतीया-बहुवचनस्य भिस्प्रत्यये कृते आकारेण हकारस्य सवर्णत्वात् ग्रहणकशास्त्रबलेन ग्रहणं स्यात्। ततः होटः इति हकारकार्यापत्त्या दुष्टं किमपि रूपमापद्येत। आकारप्रश्लेषेण आ-हलौ मिथः सवर्णौ न स्याताम् इति वृत्त्या आकारहकारयोः सावर्ण्यं प्रतिषिध्यते तेन च विश्वपाभिः इत्यत्र अनिष्टरूपापत्तिरपि।

एवं च आकारप्रश्लेषेण आकारहकारयोः सावर्ण्यं प्रतिषिद्धं तथापि ईकारशकारयोः, ऋकारषकारयोः (ऋलृवर्णयोः मिथः सावर्ण्यं वाच्यमित्युक्तत्वात्) ॠकारसकारयोः तु सावर्ण्यस्य अप्रतिषेधः अभिमतो दृश्यते श्रीमतः इति सारम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किमत्र कारणमिति चेत् साम्प्रदायिकानां मतानुसारेण सूत्राणां प्रवृत्तिक्रमस्तु सुनिश्चितो वर्तते। तत्र प्रथमं प्रत्याहारसूत्राणि तदनन्तरमित्संज्ञाग्रहणम् ततः प्रत्याहारः इत्यलं विस्तरेण सर्वैः सुज्ञातत्वात् । अत्र अणुदित्सवर्णस्य चाप्रत्ययः इति ग्रहणकशास्त्रं सवर्णसंज्ञाश्रयिः तच्च सवर्णसंज्ञाविधानान्तरमेव लब्धावकाशं भवेत् । एवं सवर्णसंज्ञां विदधत् एकाधरितमिव सूत्रद्वयं सवर्णसंज्ञां विनैव प्रवर्तते अन्यथा वाक्यापरिसमाप्तिदोषो दुर्वारः इति स्पष्टीकृतं सर्वैर्वैयाकरणैः। अत्र किञ्चित् विशदीक्रियते विषयेऽस्मिन् वार्तिककारेण एवं पूर्वपक्षः समुत्थापितो यत् नाज्झलावित्यस्मिन् सूत्रे, सवर्णग्रहणे स्वीकृते सवर्णसहिता अचः ससवर्णाश्च हलः मिथः सवर्णत्वं न निर्वहन्ति इत्यर्थ आपतेत् । तेन तुल्यास्यप्रयत्नत्वात् अच्प्रत्याहारस्था अकार-इकार-ऋकारा यथाक्रमं हकार-सकार-षकाराणां ग्रहणं कुर्युः। हलि तु एतेऊष्माणः साक्षाद्वर्तन्ते एव। ततः हकारो हकारेण शकारः शकारेण न सवर्णः इत्येतादृशोऽर्थदोषो दुर्वारः। तन्निराकरणाय ग्रहणकशास्त्रस्य अप्राप्तिः सूत्राणां सुनिश्चितक्रम द्वारा अभिमता सांप्रदायिकाणाम् इत्यलं विस्तरेण।

अत्र मम मतिरेवं प्रवर्तते। वाक्यापरिसमाप्तिवादिन एते साम्प्रायिकाः तुल्यास्य-प्रयत्नत्वात् हकारषकारसकारादीनां अच्त्वमाशङ्कन्ते। तद्व्यत्यासेन च अचां हल्त्वम्। तथापि एतादृशं हलामच्त्वम् अचां च हल्त्वं सूत्रकारस्य नाभिमतं कुत्रापि प्रत्युत स्थानिवदा-देशोऽनलविधाविति सूत्रं विरचयता तेन एतादृशमल्विधिविषयकं मिथोग्रहणं प्रतिषिद्धम् । यद्यपि प्रस्तुतेऽस्मिन् विषये स्थान्यादेशभावो दूरेणापि नास्ति तथापि हलां हल्त्वम् अचां चाच्त्वमेव मूलतः अस्तु इति तत्र संसूचितं तत्त्वमत्रापि वृत्तिं भजतु इत्यत्र न दृश्यते कोऽपि व्याघातः।

अन्यच्च अवृद्धाभ्यो नदीमानुषीभ्यस्तन्नामिकाभ्य इत्यस्मिन् सूत्रे सूत्रकारेण स्वयमेव 'अवृद्धाभ्यः, तन्नामिकाभ्यः' इति सूत्रद्वयं प्रयुक्तम् । तत्र च आकारस्य हकारेण सावर्ण्यम् अमत्वा "हो ढः" इत्यप्रयुक्तम् । एवं वचनसामर्थ्यात् आकारहकारयोः सावर्ण्य नास्ति।

एवमेव "युवा ढालतिपलितवलिनजरतीभिः इत्यत्र जरतीभि इति प्रयोगः कृतः सूत्रकारेण। अत्र ईकारस्य शकारेण भट्टोजिमतानुसारेण परिगृहीते सावर्ण्ये ग्रहणकशास्त्रबलात् शान्तत्वम् व्रश्च भ्रस्जेत्यादिना षत्वादेशः आपद्येत ततश्च जशभावेन डत्वादेशे कृते दुष्टं रूपमापद्येत। एवं तर्हि दृश्यते यत् ईकारशकारयोः सावर्ण्यं नानुमतं सूत्रकारस्य।

तथा च लुप सद चर जप जभ दह दश गृभ्यो भावमर्हायाम् इत्यत्र ऋकार वकारयोः सावर्ण्ये अप्रतिषिद्धे ऋकारस्य षत्वाद् डत्वमापद्येत। अतः "जरतीभिः "गृभ्यः" इति निर्देशसामर्थ्यात् ईकारशकारयोः अपि च ऋकारषकारयोः सावर्ण्यं सर्वथैव अनभिमतं सूत्रकारस्येति वक्तुं सुशकम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्रैव युक्त्यन्तरं प्रस्तूयते। सूत्रकारः अज्झलाविति द्वन्द्वं प्रयुनक्ति। अष्टाध्याय्यां द्वन्द्वोऽयं सूत्रकारेण साभिप्रायं प्रयुक्तः। द्वन्द्वसमासगतं प्रत्येकं पदं विधेयांशेन स्वतन्त्रतया अन्वेति। पूर्वस्मिन् सूत्रे तुल्यास्यप्रयत्नं सवर्णम् इत्यत्र संज्ञिन्यंशे विशेष्यं किम् ? इति पिपृच्छायाम् विचार्यते यत् संस्कृतभाषायां ये ये वर्णाः विनियुक्ताः शतोत्तरषष्टितोऽप्यधिकाः ते सर्वे सवर्णसंज्ञाविधायिना सूत्रेण विषयीकृताः। तत्र च अच् हल् इत्येतादृशमेव प्रत्याहारद्वयं सूत्रकारेण प्रयुक्तम् न तु अक् - शत् इत्येतादृशम् । अच् - हल इत्येव प्रत्याहारद्वयमुच्चारयता सूत्रकारेण अच् हल् इति परस्परव्यावर्तकः पूरकश्च विभागः निश्चितः। तेन सर्वेषां स्वराणां सर्वैस्तदिरैः पूर्वसूत्रप्राप्तं सावर्ण्यं तेन प्रकृतेन सूत्रेण निषिद्धमिति भाति। अथ च दीर्घादीनामूष्मभिः सावर्ण्यं निषिद्धम्।

दीर्घादीनामूष्मभिः सावर्ण्यमित्येतस्मिन् विषये प्रा. माधव देशपाण्डेमहोदयैः युक्त्यन्तरं प्रदर्शितम् तदुपस्थाप्यते विदुषां पुरस्तात् - तन्मतानुसारेण नाज्झलावित्यस्यानुवृत्तिः कार्या यथा श्रीमता भट्टोजिना हलन्त्यमित्यस्य कृता।

प्रथमं तुल्यास्यप्रयत्नं सवर्णमित्यनेन प्राप्यमाणा सवर्णसंज्ञा प्रत्याहारस्थान् अचः उष्मणश्च विषयीकरोति। तस्यैव निराकरणं नाज्झलावित्यनेन विधीयते। तदनन्तरं ग्रहणकशास्त्रं प्रवर्तते येनाविधीयमानोऽण् उदिच्च तत्सवर्णानां ग्रहणं करोति इत्यर्थो ज्ञायते। तद्रनन्तरं पुनः नाज्झलावित्यावर्तनीयम् । यत्र अच् सवर्णानां ग्रहणं कृत्वा दीर्घादीनाम् उष्मभिः सावर्ण्यं स्वयं निवारयेत् ।

तंदिदं सारत उच्यते - दीर्घादीनाम् उष्मभिः सावर्ण्यं नास्ति। भट्टोजिमहादयैः स्वीकृतेन आकारप्रश्लेषेण केवलमाकारहकारयोः सावर्ण्यं प्रतिषिद्धम् अन्येषां तु स्वीकृतम् स्वीकृते सावर्ण्ये प्राप्यमाणं दोषं निवारयितुम् "इको यणचि" इत्यस्मात्सूत्रात् अचि इति पदं मण्डूकप्लुत्या अकः सवर्णेदीर्घ इत्यस्मिन् सूत्रे अनुवृत्तम् । तन्माऽस्तु। दीर्घादीनामुष्मभिः साकं सावर्ण्यं वचनसामर्थ्यात् ज्ञातुं शक्यते अपि च तच्छास्त्रसंगतमपि भवति तेन चाकारप्रश्लेषस्यापि आवश्यकता नास्तीति शम् ।

अत्रोदघृतानि सूत्राणि -

१.४.९ तुल्यास्यप्रयत्नं सवर्णम् ।

१.४.१० नाज्झलौ।

६.१.७७ इको यणचि।

६.१.१०१ अकः सवर्णे दीर्घः।

१.१.६९ अणुदित्सवर्णस्य चाप्रत्ययः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शाकुन्तले विचिकित्सा

धर्मेन्द्रकुमारसिंहदेवः

रम्यं शाकुन्तलम् । तत्र च निपुणाः संस्कृतरसिकाः। विलसन्ति चास्य नैके व्याख्यान-ग्रन्था अनेकासु भाषासु। अतो नैव स्पृहणीयमत्र तस्य विशेषेण व्याख्यानम् । तथाप्यध्येतृदृशा समुत्पन्ना शङ्का एवात्र विषयत्वमलङ्करोति। तथा चास्याः समाधानप्रयास एव निर्यासः। तदेव पुनस्क्रियते-

नाटकीयं वस्तु खलु सुविदितमेव। शान्तं तपोवनम् । रमणीयश्च परिवेशः मनोहरमुद्यानम् । तत्र च नवयौवनवती रम्या शकुन्तला। लोभनीयाञ्च तां शकुन्तलां वीक्ष्य कामपीडितो राजा दुष्यन्तः शकुन्तलापि भजति तामेव दशाम् । एवञ्च सम्पन्नो मदनसन्तापोपचारः। यथा सूचयति चतुर्थाङ्कस्यारम्भेऽनसूया -

'हला प्रियंवदे ! यद्यपि गान्धर्वेण विवाहविधिना
विवृतकल्याणा प्रियसखी शकुन्तला अनुरूप -
भर्तृभागिनी संवृता .... ' इत्यादि। [१]

ततश्च स्वराज्यं प्रत्यागतो राजा दुष्यन्तः। तद्विरहकातरा शकुन्तला आलिखितेव जाता शून्यहृदया। तस्मिन्नेव कालै सुलभकोपशीलस्य महर्षेर्दुवाससः प्रसज्यते शापप्रसङ्गः -

'विचिन्तयन्ती यमनन्यमनसा .....' [२] **इत्यादि।**

तेन च विसस्मार राजा परिणीतामप्येनां प्रकृतिकोमलां शकुन्तलाम् । ततः शकुन्तलायाः प्रस्थानवृत्तान्तः। राज्ञश्च प्रत्याख्यानम् । ततश्चाङ्गुलीयकदर्शनेन निर्वृतः शापप्रभावः। अनन्तरं पुनर्मिलनमिति तावद् विषयवस्तु ।

अत्र खलु सम्पूर्णे कथानके मुनीनां त्रिकालदर्शित्वं प्रतीयते। तपःप्रभावेन तेषां सर्वमपि प्रत्यक्षीभवति । यथा चात्र प्रमाणम् -

सप्तमोऽङ्के यदा शकुन्तलादुष्यन्तयोर्मिलनं जायते। तदा मारीचं निवेदयत्यदितिः संवादमेनं कण्वस्य समीपं प्रेषणाय । यथा -

' भगवन् ! अनया दुहितृमनोरथसम्पत्त्या
कण्वोऽपि तावच्छ्रुतविस्तरः क्रियताम् । [३]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदा मारीचस्तामाश्वासयति -

'तपःप्रभावेन प्रत्यक्षं सर्वमेव तत्रभवतः'।[४] इति

अपि च प्रमाणयति वैखानसस्योक्तिः प्रथमेऽङ्के यदा दुष्यन्तो वैखानसं पृच्छति -

'अपि सन्निहितोऽत्र कुलपतिरिति'[५]

तदा वैखानसः प्राह -

'इदानीमेव दुहितरं शकुन्तलामतिथिसत्काराय नियुज्य दैवमस्याः प्रतिकूलं शमयितुं सोमतीर्थं गतः'।[६]

अनेनापि तेषां मुनिवराणां सर्वप्रत्यक्षत्वं सिद्ध्यति।

चतुर्थोऽङ्के अनसूया दुष्यन्तपरिणीताया आसन्नसत्त्वायाः शकुन्तलाया विषः शङ्काकुला चिन्ताकुला च वर्तते। तथा तातकाश्यपायैतन् निवेदयितुञ्चापि न शक्नोति, तदा शकुन्तलाया भर्तुः सकाशं प्रस्थानमाकर्ण्य साश्चर्यं पृच्छति प्रियंवदाम् -

'अथ केन सूचितः तातकाश्यपस्यायं वृत्तान्तः।[७]

प्रियंवदा चोत्तरयति - 'अग्निशरणं प्रविष्टस्य शरीरं विना छन्दोमय्या अनया वाण्या -

दुष्यन्तेनाहितं तेजो दधानां भूतये भुवः।
अवेहि तनयां ब्रह्मन्नग्निगर्भां शमीमिव'।।[८] इति

अत्रापि मुनीनां सर्वप्रत्यक्षधर्मित्वं स्पष्टम् । अपि च, -

सप्तमेऽङ्के महर्षेमारीचस्य समक्षं राजा दुष्यन्त आत्मानं कण्वस्यापराधित्वं तर्कयति। तदा तदपि महर्षेरुक्तिरयं प्रमाणयति -

'वत्स ! अलमात्मापराधशङ्कया .... ।
यदैवाप्सरस्तीर्थावतरणात् प्रत्यक्षवैक्लव्यां
शकुन्तलामादाय मेनका दाक्षायणीमुपगता
तदैव ध्यानादवगतोऽस्मि दुर्वाससः शापादियं
तपस्विनी सहधर्मचारिणी त्वया प्रत्यादिष्टा
नान्यथेति ....।[९]

तेन च महर्षयः सर्वप्रत्यक्षधर्मिणः। अत्रास्ति न कस्यापि वैमत्यमिति निश्चप्रचम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ननु मुनीनां त्रिकालदर्शित्वेऽपि कथं प्रसज्यते शकुन्तलायाः परित्यागप्रसङ्गः। किं जानन्नपि महर्षिः कण्वस्तां शकुन्तलां प्रेषयति भर्तुः सकाशम् उत वाऽजानन् । अथवा ज्ञातसारोऽपि कथं नैव विहितप्रतिकारः।.

यदि तपःप्रभावेण शकुन्तलाया गर्भाधानवृत्तान्तो महर्षिकाश्यपेन छन्दोमय्या वाण्या ज्ञातुं शक्यते, तर्हि कथं दुर्वाससः शापप्रसङ्गो न ज्ञायते ?

अत्रेदं समाधानम् -

तत्र दुर्वाससः शापप्रकरणं परोक्षत्वेन कन्यापित्रा महर्षिकाश्यपेन ज्ञातमिति केचित्।[१०] यद्यपि कण्वस्य शापप्रत्यक्षीकरणमनुक्तं नाट्यकारेण कालिदासेन., तथापि कण्वस्याशीर्वचनेषु तत्प्रतीयत इति प्राचां टीकायां सूचितम् । यथोक्तम् -

'ययातेरिव शर्मिष्ठा भर्तुर्बहुमता भव।
सुतं त्वमपि सम्राजं सेव पूरुमवाप्नुहि'।।[११]

अत्रेदं तात्पर्यम् । तत्र च प्रथमतः शर्मिष्ठाया भर्तुर्ययातेः दासता सूच्यते, ततो बहुमतत्वम् अर्थात् प्रियतमत्वम् । अत्रापि शकुन्तलाया भर्तुर्दुष्यन्तस्य प्रियतमायाः प्रागेव दासत्वमवश्यमेव भवितव्यमित्येतद् गुह्यमपि मुनेराशीर्वचनेषु परिलक्ष्यते।

अनेन तातकण्वस्य हृदयं शकुन्तलाया दुष्यन्तपरित्यागजननरूपो भावी शोकः, उत वा दुर्वाससः शापप्रभावप्रभावितायाः शकुन्तलाया भावी शोकः परिदहति। सोऽयं शोक एवात्र शर्मिष्ठाया सहोपमीयत इति। अपि च -

तातकाश्यपेन शकुन्तलायाः प्रतिकूलं भाग्यं सुज्ञातमिति प्रथमेऽङ्के वैखानसस्य मुखेन नाट्यकारेपा दर्शितम् । यथा -

'इदानीमेव दुहितरं शकुन्तलामतिथिसत्काराय नियुज्य दैवमस्या
प्रतिकूलं शमयितुं सोमतीर्थं गतः ।[१२],

अनेन च तातकण्वः शकुन्तलायाः सकलमपि भाविप्रसङ्गं जानातीति स्पष्टम् ।

ननु कथं शकुन्तलायाः शापप्रभावप्रभावितस्य शोकस्य परिज्ञानेऽपि नैव समाचरितस्तस्य प्रतीकारः तातकाश्यपेन। आहुस्तत्र डा. जगदीशशर्मणः।[१३]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कर्मानुसारं फलम् । कर्मणः फलवत्त्वनियमात् । यथा श्रुतौ -
'यथाकारी यथाचारी तथा भवति ......।[१४] इत्यादि

कर्मणां भोगात् क्षय इति भारतीय-सिद्धान्तः । अतिथिसत्कारविधानरूपिणि स्वकर्मणि केन प्रकारेण वात्रअपराद्धा शकुन्तला। तेनातिथि परिभावनरूपस्य कर्मणः फलमवश्यं शकुन्तलया भोगनीयमिति भारतीयचिन्तनपरिमार्जितो नियम इति।

सोऽयं नियमो भारतीयकाव्येषु आत्मस्थानीयः। अतो नाट्यनिपुणेन महाकविः कालिदासेन कथमपि तल्लङ्घयितुं नैवाशक्यत। तथा च, -

यदि शकुन्तला दण्डनीया नैव स्यात् । तर्हि महर्षेर्दुवाससः तपःफलं वृथा स्यात् परन्तु तपःफलं कथमप्यन्यथा भवितुं नार्हतीति सिद्धान्तः। अतो भारतीयसंस्कृतिविधिं परिपालन् कविश्रेष्ठः कालिदासः कथमपि तातकाश्यपेन स्वेन वा शकुन्तलां नैव विमोचयति स्वकृतकर्म फलभोगात् ।

अन्ततः पुरस्कृतसमाधानस्वीकुर्वतामप्ययमस्माकं पक्षः। दुर्वाससः शापाभिधानं नाट्यकारस्य नाट्यनैपुण्यं नाट्ययोजनं वेति वक्तव्यम् । अन्यथा नाटकीयवस्तु ता तथाचमत्कारितां न भजेत।

अनेन च नायकदुष्यन्तस्य नाट्यशास्त्रानुरूपं धीरोदत्तनायकत्वं सिद्ध्यति। अन्य शापप्रसङ्गाऽभावेन नायको दोषयुक्तः स्यात् ।

अतः शापाभिधानं, तद्गोपनं, तत्प्रतीकारराहित्यं वा सर्वमपि नाट्यशास्त्रीयभारतीय चिन्तनसिद्धान्ताधारत्वेन सामाजिकदृशा दृश्यकाव्यत्वेन च नाट्यकारस्य मौलिकं चिन्तनमेव सर्वथा सर्वोत्कर्षेण वरीवर्तीति संक्षेपः।

सन्दर्भाः

१. अ.शा. चतुर्थाङ्कारम्भे
२. अ.शा. ४-१
३. अ.शा. (७-३३)- गद्यांशः
४. तत्रैव
५. अ.शा. (१.१३) गद्यांशः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

६. तत्रैव
७. अ.शा. (४-३) गद्यांशः
८. तत्रैव
९. अ.शा. (७-३१) गद्यांशः
१०. अ.शा. ४-७
११. अ.शा. (१-१३) गद्यांशः
१२. उप-निदेशकः, संस्कृते, कालिदास-अकादेमी, उज्जयिनी, मध्यप्रदेश
१३. बृहदारण्यकम् ४-४-५
१४. अधिष्ठाता, आचार्यकुल, कालिदास -अकादेमी, उज्जयिनी, मध्यप्रदेशः

अ.शा - अभिज्ञानशाकुन्तलम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सागरे संस्कृतरङ्गमञ्चः

पूर्णचन्द्र उपाध्यायः

नाट्यं नाम न केवलं नानाविधप्रपंचाभिभूतस्य सामाजिकस्य मनोरंजनसाधकं यन्त्र नाम अभिनेतुः प्रयोगचातुर्यम्, रामादिवत् प्रवर्तितव्यं न रावणादिवदित्यादिकृत्य कृत्योपदेशद्वारेणैवास्य शास्त्रियमाप्ताभिमानत्वं वरीवर्तीतिनिश्चप्रचम् । अपि च -

"सर्वशास्त्रार्थसंपन्नं सर्वशिल्पप्रवर्तकम् ।
नाट्याख्यं पंचमं वेदं सेतिहासं करोम्यहम्" ।।[१]

इति भरतमुनिप्रोक्तमपि व्यपदिशति तत्त्वमिदम् । नाट्यस्य महत्त्वं प्रयोजनंच प्रतिपादय मुनिनाऽन्यच्चाप्युक्तं यत् -

दुःखार्त्तानां श्रमार्त्तानां शोकार्त्तानां तपस्विनाम् ।
विश्रान्तिजननं काले नाट्यमेतन्मया कृतम् ।।
धर्म्यं यशस्यमायुष्यं हितं बुद्धिविवर्धनम् ।
लोकोपदेशजननं नाट्यमेतद् भविष्यति" ।।[२]

तदस्य नाट्यस्य किं तावत्स्वरूपमिति विचिकित्सायां लोकवृत्तानुकरणं नाट्यमि भरतः[३], अवस्थानुकृतिर्नाट्यमिति धनंजयः[४], "तौर्यत्रिकं नृत्यगीतवाद्यं नाट्यमिदं त्रयं त्यमरसिंहप्रस्तुत्या नृत्यगीतवाद्यानां समुच्चय एव नाट्यम्[५] ।। इति।। इत्येवं नैकानि निर्वचना कृतानि शास्त्रकारैः।

सेयं नाट्यपरम्पराऽतीवप्राचीनेति निर्विवादं शक्यते वक्तुं वेदेष्वप्यस्याः बहुत्रोपलब्धे तथाहि ऋग्वेदीयसूक्तेषु सोमविक्रियावसरे मनोरंजनात्मकाभिनयस्य संकेतो प्राप्यते। पुरुरवोर्व यम-यमी, इन्द्र-इन्द्राणी, वृषाकपीत्यादिषु संवादसूक्तेष्वपि अभिनयात्मकं वचः प्रमाणयं नाट्याभिनयस्य प्राचीनत्वं वाचिकस्याप्यभिनयभेदत्वात् ।[६] यजुर्वेदे तु "शैलूष" इति शब्द स्पष्टमुल्लिखितः। यः खलु नटस्याभिनेतुर्वा समानार्थकः। रामायणमहाभारतप्रभृति नाट्यकलायाः प्रयोगो बहुत्र चर्चितः। हरिवंशपुराणे रामचरितनाटकस्य प्रदर्शनमुपवर्णितम् पतंजलिकृते महाभाष्ये, वात्स्यायनस्य कामसूत्रे, कौटिल्यस्यार्थशास्त्रे च नाट्याभिनयस्य समु प्रमाणमुपलभ्यते। अतो निस्सन्दिग्धमिदं यन्नाट्यस्य परम्परा प्राचीनेति। देशकालावच्छि नाट्यपरम्परा तत्तद्देशं तत्तत्कालखण्डं चावलम्ब्यैव स्वातन्त्र्यं वैशिष्ट्यमादधतीति कृत्वा सागरन विंशशतकान्तर्गतं संस्कृतनाट्यप्रयोगान् परामृशामः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विंशशतकस्योत्तरार्थ एव सागरनगरे संस्कृतरङ्गपरम्परायाः स्वतन्त्रमभियानं प्रारब्धम् । १९६० ई. तः १९७० ईसवी यावत्कालावधौ सागरविश्वविद्यालये संस्कृतविभागास्य पूर्वतनप्राध्यापिकायाः डॉ. श्रीमत्याः वनमालाभवालकरमहोदयायाः निर्देशनेन युवाकल्याणसंस्कृति-मण्डलयोः सहयोगेन संस्कृतपरिषत्-पक्षतः पार्वतीपरमेश्वरीयम्, रामवनगमनम्, दीपदानम्, पाददण्डः, अभिज्ञानशाकुन्तलमित्यादयः नृत्यनाटिकाः मध्यप्रदेशस्य प्रमुखेषु नगरेषु अभिनीताः। डॉ. भवालकरमहोदयायाः मौलिककृतिः "पार्वतीपरमेश्वरीयमि" त्याख्या संस्कृतनाटिकेयं महाकविकालिदासविरचितस्य कुमारसम्भवमहाकाव्यस्य कथानकमुपजीव्यैव प्रस्तुता। दशसंख्यकैः पात्रैरभिनेया नाटिकेयमङ्कत्रयात्मिका होरात्रयाभिनेयसापेक्षा च। नाटिकैषा १९६९ तमे ईसवीये भोपाले, इन्दौरे, सागरे, उज्जयिन्या एकादशकालिदाससमारोहे चाभिनीता। तदानीमभिनीतासु सर्वास्वपि नाट्यप्रस्तुतिष्वस्याः मनोरमत्वं वरीवर्त्तीति प्रामाण्यमुपलभ्यते तदानीन्तनसमाचारपत्रेषु प्रकाशितेभ्यः संवादेभ्यः। भोपालस्य रवीन्द्रभवने स्वकीयभाषणावसरे अस्याः नाट्यप्रस्तुतेः प्रशंसां कुर्वता तदानीन्तनमध्यप्रदेशीयराज्यपालेन श्रीमता के.सी. रेड्डीमहोदयेनाऽभिव्यक्तं यद्, यथेयं संस्कृतनाटिका सरलभाषानुप्राणिता तथैव स्वाभाविकी चेति अभिनयस्य सार्थकत्वं हृद्यत्वंचेति।

१९७५ तमे ईसवीये सागरविश्वविद्यालयस्य संस्कृतविभागे नाट्यपरिषदः स्थायि-संगठनं जातम् । परिषदाऽनया संस्कृतनाटकानामपि तु हिन्दीरूपकाणां मौलिकानामनूदितानां च प्रस्तुतिः कृता । संस्कृतनाट्यप्रस्तुतीनां विवरणं तदित्थन्त्या प्रतिपादयामः। प्रथमं तावद् विभागस्यास्य परिषत्पक्षतः डॉ.राधावल्लभ-त्रिपाठिवर्याणां निर्देशनेन भासकृतो मध्यमव्यायोगः १९७५ तमे ईसवीये सफलतमभिनीतः दशसंख्यकैः पात्रैः। ततः परं १९८० तमे ईसवीये भट्टनारायणविरचितस्य वेणीसंहारनाटकस्य तृतीयाङ्कोऽभिनीतोऽष्टसंख्यकैः पात्रैः। तदिदं रूपकम् आकाशवाणीतोऽपि वर्षेऽस्मिन् प्रसारितम्। १९८१ तमे ईसवीये बोधायनकृतं भगवज्जुकीयं डॉ. त्रिपाठिवर्याणां निर्देशनेनैव त्रयोदशसंख्यकैः पात्रैः सुष्ठु प्रस्तुतम् । रूपकमिदं १९८२ ईसवीये रेडियोरूपकत्वेनापि आकाशवाणीतः प्रसारितम् । १९८३ ईसवीये मध्यमव्यायोगः रेडियोरूपकत्वेन आकाशवाणी, छतरपुरतः प्रसारितः। १९८५ तमे ईसवीये शकुन्तलाप्रस्थानम् इत्याख्यं रेडियोरूपकं तस्मादेव आकाशवाणीकेन्द्रात्प्रसारितम् । संवत्सरेऽस्मिन् मध्यप्रदेशसंस्कृत-अकादम्याः निमन्त्रणेनैव नाट्य-परिषदाऽनया प्रबुद्धरौहिणेयाख्यं रूपकं रामगढेऽम्बिकापुरे चा वारद्वयं प्रस्तुतम् । १९८७ तमे ईसवीये वैदिकसूक्तान्यवलम्ब्य प्रस्तुता "त्रैकालिकी" नृत्यनाटिका रंगमंचेऽभिनीता। १९८९ तमे ईसवीये डॉ. त्रिपाठिवर्याणां निर्देशनेनैव सोमप्रभम् इत्याख्यं प्रेक्षणकं कु. शर्मिला चटर्जीमहाभागया सागरेऽभिनीतम् । यत्खलु म.प्र. संस्कृत-अकादम्या प्रथमत्वेन पुरस्कृतम् । १९९० तमे ईसवीये डॉ. राधावल्लभत्रिपाठिनो मौलिकं नाटकं धीवरशाकुन्तलं तन्निर्देशनेनैव पंचसंख्यकैः पात्रैः म.प्र. संस्कृत-अकादम्या

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आयोजिते नवोदितप्रतिभासमागमे सागरे प्रस्तुतीकृतं पुरस्कृतं च। १९९१ ईसवीये भासकृत दूतघटोत्कचमित्याख्यं रूपकं डॉ. अच्युतानन्ददाशनिर्देशनेन पंचसंख्यकैः पात्रैः नवोदितप्रतिभासमामे सागरेऽभिनीतं पुरस्कृतं चाकदम्या। १९९२ तमे ईसवीये राधावल्लभस्य मेघसंदेशमित्याख्यं मौलिकं प्रेक्षणकं श्रीमता रमाकान्तपाण्डेयेन निर्देशितं सच्चतुस्संख्यकैः पात्रैरभिनीतं सागरे आयोजितस्य नवोदितप्रतिभासमागस्य नाट्यस्पर्धायाम् । प्रथमं पुरस्कृतं च प्रेक्षणकमिदम् । १९९३ ईसवीये पुनः मध्यमव्यायोगः रमाकान्तपाण्डेयस्य निर्देशनेन नवोदितप्रतिभासगागमे सागरे प्रस्तुतः बहुप्रशंसिश्च प्रेक्षकैः सुधियैः।

१९९४ तमे ईसवीये राजशेखरकृतस्य बालभारतस्य प्रथमोऽङ्कः प्रो. राधावल्लभत्रिपाठिमहोदयानां निर्देशनेन राजशेखरसमारोहे जाबालिपुरे सफलं प्रस्तुतः। नाटकस्यास्य प्रयोगः षोडशसंख्यकैः पात्रैः जाबालिपुरस्थस्य पशुचिकित्सामहामविद्यालयस्य स्थायिरङ्गमंचे कृतः । नाट्यप्रस्तुतिरियं प्रदेशान्तरेभ्यो समागतैः प्रेक्षकैर्विद्वद्भिः भृशं प्रशंसिता अपूर्णमिदं रूपकमिति कृत्वा प्रयोगानर्हमिति निश्चित्य पूर्व न कयाऽपि संस्थया क्वचिदपि प्रस्तुतम् , परं डॉ. त्रिपाठिनो निर्देशनेन प्रथममिदं प्रयोगयोग्यमकारीति अस्यापूर्वप्रयोगविधानमिति। यद्यप्यत्र रङ्गमंचे कुरुपाण्डवयोर्युद्धाभिनयप्रदर्शनं नाट्यशास्त्रविरुद्धमाचरति. तथापि साम्प्रतिकसमाजापेक्षत्वेन नैतद् दोषाय कल्पत इत्यस्य निराकरणम् । १९९५ तमे ईसवीये मशकधानीत्याख्यं राधावल्लभत्रिपाठिनो मौलिकं. प्रहसनं पूर्णचन्द्रोउपाध्यायस्य निर्देशनेनैव नवोदितप्रतिभासमागमे सागरे. राजशेखरसमारोहे जाबालिपुरे च वारद्वयमभिनीतम् । रूपकेऽस्मिन् षट्संख्यकानां पात्राणां संयोजनमेवावेदयति लेखकस्यात्याधुनिकत्वम् । मशकधानीदण्डानां भूमिकायां चतुर्णामभिनेतृणां दण्डवदभिनयप्रदर्शनमेवाङ्गिकाभिनयस्य प्रकृष्टं निदर्शनम् । रूपकस्यास्य माध्यमेनैव दर्शकानां समक्षं पुरस्कृताः साम्प्रतिक्यः सामाजिकविसङ्गतयः। प्रहसनस्यास्य प्रयोगे नावीन्यमिदं यत्नाट्यशास्त्रियनियमानुसारं प्रस्तावनाविधानार्थमुपस्थितस्य सूत्रधारस्य नाट्यप्रस्तुतिनिमित्तं प्रयासात्मकं संलापमात्रमेव परामृशति लेखकस्य नाट्यशास्त्रियमभिज्ञत्वम् । मर्मज्ञाः विद्वांसः प्रेक्षका एवात्र प्रमाणभूता आसन् । संवत्सरेऽस्मिन् राजशेखरकृतमसंपूर्णं बालरामायणमपि प्रथमतृतीयाङ्कयोः संविधानकमादाय त्रिपाठिवर्याणां निर्देशनेन राजशेखरसमारोहे जाबालिपुरे प्रदर्शितम् । रूपकस्यास्यापि प्रयोगचातुर्यं बहुप्रशंसितं सहृदयैः सूरिभिः। प्रत्यग्रमेव १९९६ तमे ईसवीये प्रो. राधावल्लभत्रिपाठिनो मुक्तिरित्याख्यं मौलिकं प्रहसनं पंचसंख्यकैः पात्रैरभिनीतं नवोदितप्रतिभासमागमे सागरे। रूपकस्यास्य प्रयोगे नावीन्यमिदं यन्नाट्यप्रस्तुतेरारम्भात् प्रागेव आधुनिकचलच्चित्राणामिव छायाप्रदर्शनस्य संविधानम् । मशकधान्या इव अत्रापि सूत्रधारस्यावस्थितिः रूपकस्य समाप्तिं यावत्प्रदर्श्यते। सूत्रधारस्य वेशभूषापि रूपंकस्यास्याधुनिकप्रयोगसंविधानं प्रकटयति। प्रहसनस्यास्य भाव एव प्रधानत्वं भजते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवमेव विंशशतकस्य संस्कृतरङ्गमंचनं प्रति सागरनगरस्यावदानमतीवमहत्त्वपूर्णं सुप्रशस्यं चेति दिक् ।

संदर्भाः

१. भरतकृत ना.शा. १/१५
२. ना.शा. १/११४-११५
३. भरतकृत ना.शा. १/११२
४. धनंजयकृतं द.रू. १/७
५. अमरसिंहकृतः अ.को. १/७१/१०
६. आङ्गिको वाचिकश्चैव ह्याहार्यः सात्त्विकस्था।
ज्ञेयस्त्वभिनयो विप्राश्चतुर्धा परिकल्पिताः ।।इति।।
(ना.शा. ८/९)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाणिनीयशिक्षा, त्रिनयनाख्येन संस्कृतभाष्येण विभूषिता, भाष्यकृत् - पं. बच्चूलालावस्थी, प्रकाशकः - श्रीनिवासरथः, कालिदास अकादेमी, उज्जयिनी, २०५० वि.

पदवाक्यप्रमाणादिनिखिलप्राचीनार्वाचीनशास्त्रीयतत्त्वदृश्वानां महर्षिकल्पाचार्यबच्चूलालावस्थिचरणानां स्वाध्यायफलं लेभे परिणतिं पाणिनीयशिक्षायास्त्रिनयाख्यभाष्यरूपेणेति महानयमुपकारः परम्परायाः। शिक्षाग्रन्था इमे वैदिकभाषोच्चारणविधिव्याख्यानमात्रे प्रभवन्ति, नाऽन्यासां साम्प्रतिकभाषाणामिति भ्रान्तिरियं भस्मीकृताऽऽचार्यचरणैस्त्रिनयनस्याऽस्य प्रणयनेन। ग्रन्थस्य भूमिकाभागे वर्णानामुच्चारणविधेरन्येषाँ चाऽप्रसिद्धतत्त्वानां प्रदर्शनेन विद्यार्थिनः ग्रन्थग्रन्थिस्फोरणमिषेण शिक्षाप्रातिशाख्यव्याकरणनाट्यशास्त्राद्यनेक प्रस्थानोद्धृतोच्चारणसिद्धान्तोपस्थापनेन चोपकृता विद्वांस इति विशेषोऽयं ग्रन्थस्याऽस्य।

इह चर्चितानां सिद्धान्तानां शिक्षान्तरसिद्धान्तैः सह समीक्षणं ग्रन्थकृज्ज्ञानगाम्भीर्यमभिव्यनक्ति। ग्रन्थेऽनुद्धृततत्त्वान्यपीहोपस्थाप्योहन्तेऽवस्थिपादा निर्दिशन्ति च व्याजेनाऽनेन कमपि पारम्परिक मार्गम् ।

ननु दीर्घमपि लृकारं नाट्यशास्त्रीयाः पठन्ति, तत् पञ्चषष्ट्या वर्णैर्भवितव्यमिति चेद्- वेदे संस्कृते च नैव तदुपयोग इति। (पृ.-१३)

विद्यार्थिनामुपयोगाय क्वचिद् विस्तरोयेक्षित आसीद् भांष्ये। किन्तु पारम्परिकीं शैलीमनुसृत्य न तथात्वं प्रतिपादितम् । हिन्दीव्याख्याकारेणाऽपि भाष्यमेवाऽनूदितं, न तत्तदपेक्षितं तत्त्वं संयोजितम् ।

ग्रन्थान्ते परिशिष्टद्वयं संयोज्य ग्रन्थमहत्त्वं वर्धितमाचार्यचरणैरतथात्वे तत्तद्विषयाणां ज्ञानानुत्पत्तेः। पाणिनीयशिक्षाभाष्यप्रणयनव्याजेनेहोद्धृता निखिलाऽपि शिक्षापरम्परा न केवलमध्यापकानामध्येतॄणां च, अनुसन्धित्सूनामपि महत उपकारायेति दिक् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीमद्वाल्मीकिरामायणम् (बालायोध्याकाण्डद्वयात्मकम्) सरल गद्यात्मकः गद्यकारः - कालूरिहनुमन्तरावः प्रकाशः - के. हनुमन्तरावः, २० आउटकालोनी, सैनिकपुरी, सिकन्दराबादम्। ५०००९४, १९९७। मूल्यम् ६० रूप्यकाणि।

श्रीमद्वाल्मीकिरामायणस्य बालायोध्याकाण्डयोः सरलसंस्कृतगद्यानुवादः प्रस्तुतः कालूरिहनुमन्तरावेण ग्रन्थेऽस्मिन्निति पद्यकाव्यानां गद्यानुवादस्य काचिन्नूतनेयं परम्परा संस्कृतसाहित्ये। मौलिकतथ्यानां संरक्षणे दत्तावधानोऽनुवादकः स्वीयं न किञ्चिदपि संयुनक्ति ग्रन्थे किन्तु सम्बोधनानां विशेषणानां च प्रयोगबहुल्यमत्र स्वल्पीकृतम्। तदपि ग्रन्थलाघवाय विहितः प्रयास एव ग्रन्थकारस्येति न तथाविधपाठाङ्गीकारे काव्यास्वादविच्छेदः। विविधरामायण-संस्करणेषु प्रदत्तपाठभेदप्रदर्शनपूर्वकं मूले स्वीकृतपाठस्यापीहौचित्यानौचित्यसमीक्षणं व्यधायि श्रीमता रावममहोदयेनेति प्रशंसार्होऽयं प्रयासोऽनुवादकस्य।

विशेषणबाहुल्यादर्थबोधेऽन्वयादिबोधे च काठिन्यं संस्कृतकाव्यानामित्ययमाक्षेपः पाठकानां सरलसंस्कृतज्ञानां ग्रन्थस्याऽस्य रचनाव्याजेन निराकृतः। वस्तुतो रामायणसदृश-बृहत्काव्यस्याऽन्वययोजनैव विशेषणादिरहिताऽत्र गद्यानुवादत्वेन कल्पिता। यथा च मा निषाद! प्रतिष्ठां त्वमगम इत्यादिश्लोकस्याऽनुवादः -"हे निषाद ! क्रौञ्चमिथुनात् काममोहितमेकं त्वमवधीः। तस्मात् त्वं चिरं न भविष्यसि" (पृ.-६)। तथा चाऽन्यत्र चित्रकूटवर्णने-

"चित्रकूटप्रवेशानन्तरं रामस्तत्र बहून् दिवसान् न्यवसत्। गिरिवनप्रियो रामो वैदेह्याः प्रियमाकाङ्क्षन् स्वं चित्तं च विलोभयन् रम्यं विस्मयकरं तं गिरिं पुरन्दरः शचीमिवैकदा भार्यामदर्शयत्।" (पृ.० - २३६)

संक्षेपान्वितेयं भाषा वाल्मीकिभाषास्वारस्यं न जहाति। किन्तु क्रियापदादिसंयोजने तुमुनन्तादिपदप्रयोगे च क्वचित् स्खलनमपि दृष्टिपथमायाति। मुद्रणस्खलनमपि क्वचित् सिकतायते गद्यगभीरताया आस्वादे। पूर्वसंस्करणेषु स्वीकृतपाठानां यत्समीक्षणं तदपि वाल्मीकिभाषाप्रयोग-स्यालोके कृतमिति न प्रतिभाति।

सर्गाणां निर्देशः सङ्ख्यया यद्यपि कृतस्तथापि विषयनिर्देशस्तत्रापेक्ष्यत एव। तत्र तत्र स्थलेषु समाधानमुक्त्वा ग्रन्थग्रन्थिभङ्गाय निर्दिष्टो मार्गः कश्चन रामायणाध्ययनस्य ग्रन्थकृता (द्र - पृ. ११५)। अवशिष्टसर्गाणामपि गद्यानुवादा संख्यामस्यां प्रस्तोष्यते श्रीमता हनुमन्तरावेणेति अनूदितोऽप्ययं मौलिकसंस्करणापेक्षिततत्त्वपूरितो विदुषोऽस्य प्रयासः मनीषिभिः सामाद्रियत एवेति विश्वसिति -

पाण्डेयो रमाकान्तः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाणिनीयव्याकरणे स्त्रीप्रत्ययानामध्ययनम्।

लेखक - डॉ. शिवकान्त झा

प्रकाशकः - हंसा प्रकाशन, किशनपोल बाजार, जयपुर ३०२ ००१

मूल्यम - ४४ रूप्यकाणि

पाणिनीयव्याकरणे स्त्रीप्रत्ययानामध्ययनमितीदं पुस्तकं मूलतः 'पीएच्डी' इत्युपाधये प्रस्तुतः प्रबन्धः। स्त्र्यधिकारस्थानि सूत्राणि सवार्त्तिकानि अतीव सूक्ष्मेक्षिकया समीक्षितानि डॉ. शिवकान्तझामहोदयैः। नेदमेतेषां सूत्राणां यथाक्रमं परीक्षणमपि तु प्रत्ययस्थान् आ.ई.ऊ. इत्येतान् वर्णान् आहत्य तत्क्रमानुसारेण सूत्राणि उपस्थाप्य परीक्षितानि।

प्रथमेऽध्याये सविस्तरं लिङ्गविचारः कृतः । तदर्थं परामृष्टाः विविधा ग्रन्था ग्रन्थकारस्य व्युत्पत्तिं प्रकाशयन्ति। लौकिकलिङ्गं शास्त्रीयलिङ्गमिति विषयविभागं कृत्वा शास्त्रीय लिङ्गस्यार्थो लौकिकलिङ्गमिति तयोः संबन्धः सारतः प्रतिपादितस्तेन। पुंस्त्वं लिङ्गमर्थो यस्यासौ पुंल्लिङ्गः शब्दः स्त्रीत्वं लिङ्गमर्थो यस्यासौ स्त्रीलिङ्गः अपि च नपुंसकत्वं लिङ्गमर्थो यस्यासौ नपुंसकलिङ्ग इति व्युत्पत्तिं प्रदर्श्य स्त्रीप्रत्यया स्त्रीत्वस्य द्योतका एवेति निश्चिनोति श्रीमान् शिवकान्तझा महोदयः।

प्रत्ययभेदविषये श्रीमता ग्रन्थकारेण नैयायिकवरेण्यस्य जगदीशतर्कालङ्कारस्य मतमादृतम् । तदनुसृत्य विभक्ति-धात्वंश-तद्धित-कृत् टाबिति पञ्चधा प्रत्ययभेदाः प्रतिपादिताः।

तदनन्तरम् 'आ'रूपा-ई-रूपा-ऊ रूपाश्च (अत्र अरूपः एक एव प्रत्ययः) प्रत्ययाः सविभागं सोदाहरणं विहिताः। तत्रापि तत्तत्प्रत्ययविधायकानि वार्त्तिकानि अपि च तत्संबद्धानि वार्त्तिकानि निःशेषतया परीक्षितानि। भाष्यवृत्तिव्याख्यातः उदाहरणानि उद्धृत्य तेषां व्युत्पत्तिरपि दर्शिता।

स्त्रीप्रत्ययानां ये येऽनुबन्धा वर्तन्ते, तेषां ससूत्रं प्रयोजनं प्रकटीकृतम् । तत्रापि ष्यङ् इति प्रत्ययादेः अतद्धितस्य षकारस्य इत्त्वं केनोपायेन साधनीयमिति न दर्शितम् । अन्ततः तद्धिताधिकारे (तद्धिताः ४.१.७६ इत्यत्र) विहिताः स्त्रीप्रत्यया अपि व्याख्याताः। तस्मिन्नेव प्रकरणे प्राचां ष्फ तद्धितः (४.१.१७) इत्यादीनि त्रीणि सूत्राणि व्याख्यातानि। वस्तुतः स्त्र्यधिकारस्थोऽयं प्रत्ययः प्राचीनानां मतानुसारेण तद्धितः । तथापि कं विचारमधिकृत्य भगवता पाणिनिनायं तद्धिताधिकारात्प्राक् स्त्र्याधिकारे गृहीत इत्येतत्र विशदीकृतं ग्रन्थकारेण। कृत्प्रत्ययेऽपि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्त्रियां क्तिन् (३.३.९४) इत्येतेन स्त्रीप्रत्ययानां विधानं कृतं सूत्रकारेण। तथापि सांप्रदायिकानां मतानुसारेण नायं स्त्र्यधिकारः। विषयेऽस्मिन् किमपि नोक्तं ग्रन्थकारेण।

एतादृशं व्युत्पत्तिपूर्णमध्ययनं दुर्दैववशात् प्रतिपरिच्छेदं मुद्रणदोषैरुपहतम्। आगामिनि प्रकाशने एतान् दोषान् निष्कास्य शुद्धा प्रतिरपेक्ष्यतेऽस्माभिः।

व्याकरणभाषाविज्ञानदृशा वाक्यसमीक्षा

(Syntactical Criticism in the light of Sanskrit Grammar and Linguistics)

लेखक - डॉ. यशःपाल खजूरिया

प्रकाशकः - वेकटेश प्रकाशनम्, दिल्ली, १९९४

मूल्यम - रु ९३/-

व्याकरणभाषाविज्ञानदृशा वाक्यसमीक्षा (Syntactical Criticism in the light of Sanskrit Grammar and Linguistics) इत्यस्मिन् ग्रन्थे डॉ. यशःपालखजूरिया महोदयैः चतुर्षु अध्यायेषु वाक्यस्य बहुशास्त्रस्पर्शि परीक्षणं कृतम्। वाक्यस्य अखण्डत्वे अष्टौ पक्षान् समुद्भाव्य तेषां स्वरूपं सविस्तरं प्रतिपादितम्। पाणिनेरारभ्य विश्वेश्वरसूरिं यावत् वैयाकरणश्रेष्ठानां वाक्यस्वरूपविषयकाणि मतानि एकस्मिन्नेव स्थानेऽस्माभिर्लभ्यन्त इति महदिदं संग्रहमूल्यं प्रकरणस्य।

न केवलं भारतीयानां विद्वद्वरेण्यानाम् अपि तु श्लाईखरप्रभृतीनां पाश्चात्त्यविदुषामपि मतानि ग्रन्थकारेणात्र उद्धृतानि। एतेषु बहुषु मतान्तरेष्वखण्डवाक्यपक्षः ग्रन्थकारस्याभिमतः।

द्वितीयेऽध्याये भर्तृहरिप्रभृतिभिः वैयाकरणैः प्रतिपादिताः वाक्यधर्माः यथाशास्त्रकारं निरूपिताः। वस्तुतः विषयोऽयं काव्यशास्त्रीयः शैलीशास्त्रीयः (Stylistics) तथापि वाक्यार्थ-विशेषस्य प्रतिपत्तौ सहायका इति कृत्वा तेऽत्र व्याख्याताः। एवं च ग्रन्थकारमतानुसारेण एते वाक्यधर्माः प्रत्यक्षपरोक्षतया वाक्यलक्षणान्येव। भाषाविज्ञानदृशा तथा च व्याकरणदृशा मतमिदं चिन्त्यमिति मे मतिः।

वाक्यधर्मान् पर्यालोच्य वाक्यदोषोद्भावनं वाक्यार्थदोषाद्भावनं च सोदाहरणं निदर्शितम्। व्याकरणे असमाख्यातस्य अस्य विषयस्य काव्यनिर्माणविषयत्वं जानन्नपि ग्रन्थकारः एतेषां वाक्यस्य प्रयोगानर्हताकारणत्वं दृष्ट्वोपस्थापयति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाक्यार्थनिरूपणात्मके तृतीयेऽध्याये प्रतिभा-क्रिया-निराकाङ्क्षपदार्थसंस्कृष्ट-प्रयोजन-स्थितलक्षणानां च निरूपणं सविस्तरं सोदाहरणं च प्रपञ्चितम् । जयन्तभट्टेन न्यायमञ्जर्यां नवमतानि खण्डयित्वा स्वस्य फलं वाक्यार्थः इति मतं प्रस्थापितम् तदपि परामृष्टम्। अत्र च नवीनानपि वादान् परामृश्य अन्तन्तः एकोऽनवयवः शब्दः वाक्यं प्रतिभा च वाक्यार्थः इति वैयाकरणानां संमतः पक्षः विस्तरशः प्रपञ्चितः।

चरमः प्रतिभानिरूपकश्चतुर्थोऽध्यायो विषयसंग्रहदृशा बहुमूल्यः। एकस्मिन्नेव प्रकरणे प्रतिभाया लक्षणानि शास्त्रान्तरेभ्यः संकलय्य लिखितानि। प्रतिभाविषयकमिदं निरूपणं भर्तृहरेः प्रतिभाविचारं विशेषतः समीक्ष्य स विचारः शैवागमोक्तसिद्धयोगेन प्रभावित इति स्वीयं मतं तत्रोपस्थापितम् । प्रतिभाविषये आचार्याणां महति मतभेदे सत्यपि प्रतिभावश्यं स्वीकरणीया इति ग्रन्थकारस्य मतम् ।

ग्रन्थावसाने परिशिष्टत्रयं संयोजितम्। तत्र वाक्तत्त्वं प्राचीनग्रन्थतो निरूपितम् । नामूलं लिख्यते किञ्चिदिति न्यायेन प्रकरणानन्तरं पादटिप्पण्यः प्रदत्ताः।

शोधप्रबन्धमिमं प्रकाश्य प्राचीनानां वाक्यसमीक्षामशेषतः उपस्थाप्य ग्रन्थकारेणानेन ऋणीकृता अभ्यासका इति विशेष तथा धन्यवादार्हः सः।

पाटसकरभाग्यलता

भारतीयनाट्यशास्त्र की परम्परा एवं विश्वरंगमंच,
प्रणेता - राधावल्लभत्रिपाठी,
प्रका.- प्रतिभाप्रकाशनम् , दिल्ली, १९९८
मूल्य - ३५० रुप्यकाः।

"भारतीय नाट्यशास्त्र की परम्परा एवं विश्वरंगमंच" इत्याख्योऽयं राधावल्लभ-त्रिपाठिनामेकादशाऽध्यायेषु विभक्तो ग्रन्थः समग्रामपि भारतीयनाट्यपरम्परां निश्वनाट्ये च व्याप्तिमस्याः पुरस्करोति। नाट्यशास्त्रीयान् प्राचीनर्वाचीनांश्च ग्रन्थान् सूक्ष्मेक्षिकया निभाल्य ग्रन्थकारो राधावल्लभत्रिपाठी तासां तासां समस्यानां निराकरणे भजते वैशिष्ट्यं ग्रन्थेऽस्मिन्निति महानयमुपक्रमः परम्पराया अस्याः समीक्षणस्य। शास्त्रस्याऽस्य कर्तृकालाद्यनेकविषय-विवेचनपुरस्सरं विविधशास्त्रैस्तत्सम्बन्धं निरूप्य नूनं समीक्षकप्रवरस्त्रिपाठिमहोदयः "न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला, नाऽसौ योगो न तत्कर्म नाट्येऽस्मिन् यन्न दृश्यते" इति भरतोक्तिं दृढीकर्तुं स्रष्टुकाम इव लक्ष्यते काममप्यभिनवां विचारसरणिम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राच्यपाश्चात्ययोर्नाट्यपरम्परयोरान्तरिकसम्बन्धः ग्रन्थस्याऽस्य प्रणयनमिषेण सविवेकं परीक्षितः भरतेन प्रवर्तितायाः परम्पराया अस्याः कश्चन सम्बन्धः पाश्चात्त्यनाट्यविद्यया वर्तत एवोभयोः समानविषयत्वादिति ग्रन्थकारोऽत्र अरस्तू-होरेस-बेनजानसनप्रभृतिपाश्चात्त्यनाट्यविदां मतमालोच्य नाट्यशास्त्रस्योपयोगित्वमाधुनिकरङ्मञ्चदृष्ट्या प्रतिपादितवान्। तद्विषयकानुसन्धान-ग्रन्थानां समीक्षणेऽप्यस्य चातुरी चमत्कारमभिधत्ते।

एकादशाध्यायेष्वत्र प्रथमे-नाट्यशास्त्र-परिचय, द्वितीये नाट्यशास्त्र तथा संस्कृत-साहित्य, चतुर्थे संस्कृत नाटक की परम्परा, पञ्चमे नाट्यशास्त्र की आचार्यपरम्परा, षष्ठे नाट्यशास्त्र की परम्परा के परवर्ती ग्रन्थ, सप्तमे पश्चिमी नाट्यचिन्तन तथा नाट्यपरम्परा, अष्टमे नाट्यशास्त्र तथा आधुनिक रङ्गकर्म, नवमे संस्कृतनाटक तथा लोकनाट्य, दशमे संस्कृनाटक तथा विश्वनाट्य, एकादशे च संस्कृत नाटकों में उपकरण इत्येते विषयाः प्रतिपादिताः।

नाट्यशास्त्रविश्वकोशस्य भूमिकारूपेण रचितोऽयं ग्रन्थः नूनं भारतीयनाट्यपरम्पराया व्याख्यानदिशि अनितरसाधारणः प्रयास इति तत्तत्त्वविद्भिर्विविदिषुभिश्चावश्यं सङ्ग्रहणीय इति दिक्।

मध्यमरामचरितम्, प्रणेता - कृपारामत्रिपाठी,
प्रका. - अभिराप्रकाशनम्, बलरामपुरम्, १९९४,
मूल्य - ४० रूप्यकाः।

कुटजकुसुमाञ्जलिप्रभृत्यनेककाव्यप्रणयनलब्धप्रथिम्ना कविना कृपारामेण रामकथामुपजीव्य प्रणीतमिदं मध्यमरामचरितं नाम नाटकं भवभूतेरुत्तररामचरितमनुकरोति। भास-भवभूति-दिङ्नागप्रभृतिकविभिर्विरचितेषु रामकथोपजीव्येषु सत्स्वपि नानानाटकेषु कवेरस्याऽभिनवकृतौ मध्यमरामचरिते कथं स्याद् बहुमानो विदुषामिति सन्दिहानः कविर्नाटकादावेव सूत्रधारमुखात् योजनावैशिष्ट्यमिह प्रतिपादयति-

बहुधाऽऽस्वादितं रामकथावस्तु सनातनम्।
योजनाया विशिष्टत्वान्नवताऽऽस्वाद्यते मुहुः॥

तदेतद् योजनावैशिष्ट्यन्तु विदुषां विचारविषयः, किन्तु कारुण्यसंयोजने कवेरभिरामस्य पदप्रयोगपटुता नूनं भवभूतिभावभावितत्वमस्य भणति -

मा याहि राम विपिनं बत मा प्रयाहि,
कः कोऽत्र भो ननु निवारय राममाशु।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उल्लङ्घयाद्य वचनं मम मूढबुद्धेः,
स्त्रैणस्य वत्स कृपणस्य च हा हतोऽस्मि।।

सप्ताङ्के नाटकेस्मिन् रामराज्याभिषेकादिपरम्पराप्राप्ता घटनाश्चित्रिताः। शब्दार्थोभयालङ्काराणां प्रयोगे, सरलया भाषया भावानां सम्प्रेषणे च यद्यपि कवेरभिरामस्य वैशिष्ट्यमिह निर्धार्यते, किन्तु केचन असाधुशब्दप्रयोगा अपीह सिकतायन्ते। यथा "विकृष्टा वल्गाभिर्युगमपि भिनन्तुं व्यवसिताः" (पृ.-१७) इति। भिद् धातोस्तुमुनन्तोऽयं भिनन्तुमिति शब्दः कथमपि साधुत्वं न भजते। मुद्रणस्खलनमपि पदे पदेऽवरुणद्धि काव्याऽऽस्वादम्। आगामिनि संस्करणे तत्सर्वमिदमपाकरिष्यत इति विश्वासः।

मध्यमरामचरिते रामायण-रामचरितमानसादिविविधरामकथोपजीव्यग्रन्थानां प्रभावो विलोक्यते। यथा मन्थरोक्तौ गोस्वामिनस्तुलसीदासस्य -

दास्याः पदं किमपहाय भवामि राज्ञी।
यः कोऽपि वाऽस्तु नृपतिर्मयि को विशेषः।।

भरतस्य चरित्रचित्रणे कवेः प्रातिभवैशिष्ट्यं मनोहारि। मध्यमरामचरितमिदं साम्प्रतिकसंस्कृतसाहित्याब्धेः रत्नविशेष इत्यवश्यं सेवनीयमिदं सहृदयैर्मुहुर्मुहुरिति दिक्।

पाण्डेयो रमाकान्तः

साङ्केतिकतर्कशास्त्रम् (SYMBOLIC LOGIC) डॉ. धर्मानन्दशर्मा, कल्कि प्रकाशनम, चण्डीगृहम्। संवत् २०५५, पृ. ९२। मूल्यम् - अनिरूपितम्

साङ्केतिकतर्कशास्त्रं (साङ्केतिकतर्कशास्त्रप्रवेशिका - The Primer of Symbolic Logic - इत्यपराभिधानं) नामाभिनवशास्त्रं श्रीमता धर्मानन्दशर्मणा विरचितं गीर्वाणवाण्यामिदं प्रथमतया पाश्चात्त्यप्रस्थानमिदं विराजतेतराम्। ग्रन्थेऽस्मिन् चत्वारः पादाः सन्ति। ९२ पृष्ठात्मकोऽयं स्वल्पकायोऽपिग्रन्थः तत्तत्प्रस्थानभेदे समादरं दधतां विदुषां महते उपकाराय स्यादिति प्रथमावलाकने प्रतिभाति। तत्रायं विषयसंक्षेपः - प्रथमे पादे तर्कशास्त्रस्य परिचयः, द्वितीये पादे 'विधानं तार्किका अव्ययाश्च' निरूपिताः सन्ति। तृतीये निगमनविधिः चतुर्थे पुनः पादे संख्यापनविधिरिति चतुर्भिः पादैः ग्रन्थोऽयं पूर्णतामेति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अयं ग्रन्थः पाश्चात्त्यदर्शनविधासु प्रथिततमायाः गाणितिकतर्कविद्यायाः साङ्केतिकतर्कविद्यापराभिधानायाः संस्कृतरूपान्तरं प्रस्तौति येन पाश्चात्त्यभाषास्वनभिज्ञाः तत्तद्दर्शनभेदे सुपरिचिताः भवेयुरिति। भारतदेशे तर्कशास्त्रस्य सुमहती परम्पराऽऽप्राचीनकालात् विद्यत एव। सैषा तर्कविद्या आन्वीक्षिकी, प्रमाणशास्त्रं, न्यायशास्त्रम् , वादविधिः फक्किकाशास्त्रमिति अनेकधा आत्मानं प्रकाशमाना प्रकर्षातिशयशिखरारूढा तथापि पाश्चात्त्यतर्कशास्त्रमेवानन्यतर्कशास्त्रमिति पाश्चात्त्यतर्कविद्यायां कृतभूरिपरिश्रमाः विद्वांसः मन्यन्ते स्म। प्रायशः दशकद्वयात्पूर्वमेव भारतीय-तत्त्वमीमांसां प्रति पाश्चात्यदर्शनधुरीणानां कश्चनापूर्वः समादरः समजायत येन तेषामेव प्रोत्साहनेन भारतीय-तत्त्वज्ञानपरिषद आनुकूल्येन ग्रीष्म / शीतकालिक-चर्चासत्राणामनेकत्रायोजनं कृतम् । तत्र प्राच्य- पाश्चात्त्य तर्कविद्यासु बद्धादराः विद्वांसः विद्यार्थिनश्च संगताः परस्पर-शास्त्राभ्यासं समारब्धवन्तः । तस्मादेव जातोत्साहाः लब्धप्रेरणाश्च श्रीमन्तः धर्मानन्दशर्माणः ग्रन्थममुं व्यररचन् । ग्रन्थकर्तृणामयमुपक्रमो वस्तुतः साधुवादमर्हति येन पाश्चात्त्यभाषानभिज्ञानां तदीयतर्कप्रस्थानविधौ प्रवेशः सुकरो भविष्यति। पाश्चात्त्यतर्कप्रस्थानस्यान्वेषणे कृते भारतीयतर्कविद्यावश्यं समुन्मेषं यास्यति। उक्तं च भर्तृहरिणा - "कियद्वा शक्यमुन्नेतुं स्वतर्कमनुधावता"। अतएव विभिन्नागम-प्रस्थान-दर्शनं नूनमनुसन्धेयम् , तत्र च कृतप्रयत्नः फलवान् भवति अपूर्वां कीर्त्तिमनन्यप्रतिष्ठां च विन्दति।

तदिदं तर्कशास्त्रं संस्कृतभाषया समाकलयितुं द्विविधं काठिन्यमनुभूतं ग्रन्थकर्त्रेति अनुक्तमपि ज्ञायत एव। प्रथमतः साङ्केतिक-तर्कशास्त्रस्य प्रणयनार्थं तासां तासां संज्ञानां पारिभाषिकशब्दसम्पदां च संकल्पनं परिष्करणं संज्ञा-संज्ञि-सम्बन्ध-व्यवस्थापनं च। तत्र 'पारिभाषिकशब्दानामनुक्रमणिका' इति शीर्षकमुपकल्प्य ग्रन्थकारोऽऽङ्ग्लपारिभाषिकपदानां संस्कृतसमानान्तरशब्दान् निर्दिशति। परन्तु ग्रन्थकारेणात्र न तावत् पारदर्शिता दर्शिता। तत्र केचनशब्दाः भारतीयतर्कशास्त्रे इतरत्र वा पारिभाषिकपदरूपेण प्रयुक्ता अर्थान्तरेषु प्रसिद्धाश्च अन्यथा प्रयुक्ता दृश्यन्ते। नायं दोषावहः, पाणिनिप्रमुखैस्तथा विधानात् । किन्तु ते ते शब्दाः तेषु तेष्वर्थेषु न तावदबहुलं प्रयुक्ता इति प्रतिज्ञातव्यं भवति। पारिभाषिकास्ते शब्दाः परिभाषामन्तरेण नार्थान् प्रकाशयितुं समर्थाः भवेयुः। उदाहरणतः अनुयोगीति शब्दः 'Contrary'इत्यर्थे, 'व्याघाती, प्रतियोगी वेति शब्दः Contradictory इत्यर्थे, अव्यय इतिशब्दः Constant इत्यर्थे, 'निर्देशः' इति शब्दः denoting इत्यर्थे प्रयुक्ताः सन्ति। इमे शब्दाः तत्तच्छास्त्रेऽर्थान्तरेषु प्रयुक्ताः प्रसिद्धाः तेषां पुनः परिभाषां विना अर्थान्तरे प्रयोगमात्रेण तत्तच्छास्त्रनिष्णातस्य विदुषः भ्रान्तिरेवापादयेन्मनसि न पुनरवबोधः।

अपरञ्च केचन शब्दा अन्यथा अनूदिता अन्यथा च ग्रन्थेऽस्मिन् व्यवहृता इति न मृष्यामहे। यथा Variable शब्दस्य 'व्ययः' इत्यनुवादः पारिभाषिकशब्दसूच्यां प्रदत्तोऽस्ति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(पृ.९२), किन्तु प्रयोगकाले Variables इत्यस्य "चराणां" (पृ.२०) इति प्रयुक्तमस्ति। Form इत्यस्य आकारः, Formal इत्यस्य अकारिकम् इति अनुवादः (पृ.९०) तयोश्च 'रूपं' 'रूपात्मकं' च प्रयोगः कृतः। Constructive इत्यस्य 'विधायकः' Constructive delemna इत्यस्य 'स्थायिक भयापत्तिः' इत्येवं रूपेण प्रयोगः न श्लाधनीयः।

पाश्चात्त्यग्रन्थकर्तृणां पुनः नामधेयानि संस्कृते रूपान्तरितानीति न श्रद्धेयम्। भाषान्तरनिबद्धानि नामानि डित्थ-डवित्थवदव्युत्पन्नप्रातिपदिकमिति संज्ञारूपमति वा तथैव स्वीकरणीयानि। अतो मा भूत् Whitehead 'धवलमुण्डिन्' (पृ.२०) मा वा भूत् De Morgan दिङ्मार्गणः इति वा।

संकेता हि सांकेतिकतर्कशास्त्रस्य प्राणाः। तेषां प्रयोगेण साकं परिचयो मूल्यञ्चात्र निरूपितं ग्रन्थकारेण सोदाहरणमिति स्पृहणीयमिदम्। किन्तु संकेतानां प्रयोगे केचन प्रमादाः परिलक्ष्यन्ते येषां साकल्येनात्र निरूपणं कर्तुं नोत्सहे। अपरं च 'V', '~' इत्यत्र संकेत इति प्रयोक्तव्ये 'अव्यय' इति (पृ.४३) प्रयुङ्क्ते ग्रन्थकारः। मन्ये संकेतः अव्ययः (Constant) इत्यनयोर्मध्ये यो भेदः साङ्केतिकतर्कशास्त्रे अभीप्सितः स सम्यङ्नावधृतः।

पाश्चात्यतर्कशास्त्रस्य विचार्यविषयाः सरणी च भिन्ना प्राच्यतर्कशास्त्रात्। अस्मिन् ग्रन्थे प्रथमे पादे ग्रन्थकृता येन क्रमेण तर्कशास्त्रस्य परिचयः प्रदत्तः तेनेदं भाति यद् उभयोः लक्ष्यं प्रतिपाद्यं मार्गं चैकमेवास्तीति। तन्न सम्यक्। ग्रन्थकारः यथा किल वाग् -विचार- अनुमान - तर्कादिशब्दानां प्रयोगेण यान् सिद्धान्तान् व्यवस्थापयति तत्र युक्तिश्चिन्त्या। कानिचिद् वाक्यानीह उदाहरामः।

"विचारानुजं ह्यनुमानम्" (पृ.८), xxx "भाषाप्रयोगमन्तरा न विचारनिष्पत्तिः' (पृ.८), 'अन्योन्याश्रितौ हि भाषाविचारौ।' 'तर्कशास्त्रस्य लक्ष्यं हि संस्कारो भाषायाः न विचारस्य' (पृ.८)। xxx 'अनुमानं भाषायामभिव्यक्ता मानसिकी प्रक्रिया' (पृ.९) xxx 'अनुमानं च वाक्यरूपम्" (पृ.१४)। एतादृशवाक्यानां सन्दर्भे (ग्रन्थोक्तदिशा) विचार्यमाणेऽपि नैके दार्शनिकप्रश्नाः प्रादुर्भवेयुः येषां समाधानं दुष्करं भवेत्। भारतीयतत्त्वचिन्तनस्य व्यवस्थाविरुद्धा वा भवेयुस्ते ते सिद्धान्ता इति संस्कृतभाषया ग्रन्थरचनाकाले जागरूकताऽवधारयितव्येति मे मतिः।

तथापि साङ्केतिकतर्कशास्त्रस्यायमारम्भः तत्तच्छास्त्ररसिकानां तत्त्वान्यत्वविवेकशालिनां विदुषां चेतांसि अवश्यमावर्जयिष्यतीति ध्रुवं विश्वसिमि। तदस्य ग्रन्थकारस्येमामुक्तिं हार्दं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समर्थयामि- "आधुनिकमिदं तर्कशास्त्रं विशिष्टसङ्केतमाध्यमेन युक्तीनां तत्तर्काकारमधिकमवगमयति यल्लोकभाषायामसम्बद्धमिव भवति। समर्थानां सङ्केतानां सन्धारणमेव साङ्केतिकतर्कशास्त्रस्य जीवनम् । सङ्केतसंव्यक्ते हि विचारे संदिग्धार्थस्य श्लिष्टार्थस्य विरुद्धार्थस्य सूक्त्यर्थस्य चावकाश एव नावशिष्यते। विशिष्टाः प्रतीकाः (Special Symbols)न केवलं युक्तिबोधसौविध्यमेव जनयन्ति, अपि तु निगमनात्मकस्यानुमानस्य स्वरूपमपि स्पष्टयन्ति।" (पृ.२०)। इति

अच्युतानन्दः

नवीन प्रकाशनानि

१. **नाट्यशास्त्रविश्वकोशः** हिन्दीभाषायां चतुर्षु खण्डेषु
प्रणेता - राधावल्लभः

२. **प्रख्या - तृतीयो भागः**
शुकसारिका -निरङ्कुशतानियकृति-
शास्त्रार्थ विचारपद्धति - ग्रन्थत्रयात्मकः
सम्पादकौ - राधावल्लभः, रमाकान्तपाण्डेयः

३. **उपाख्यानमालिका** - नवीनान्युपाख्यानानि
प्रणेता - राधावल्लभः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रपञ्चपदी- श्रीनारायणरेड्डिविरचितानां तेलगुमुक्तकानामनुवादः। अनुवादकः रव्वाश्रीहरिः। हैदराबाद।१९९७।मूल्यम्-४०रूप्यकाणि।

ज्ञानपीठपुरस्कारसम्मानितः पद्मभूषणविरुदोपेतः श्रीनारायणरेड्डिः तेलगुभाषाया आधुनिकमहाकविषु मूर्धन्यतां भजते। तेलगुभाषायां तद्विरचितानि पञ्चपदुलु-इत्याख्यातानि मुक्तकानि साहित्यजगति अभिनवां कामपि विशिष्टां सरणिमुन्मीलयन्ति। निखिलजगत्प्रपञ्चसमीक्षणादेतेषामेव प्रपञ्चपदुलु इति प्रपञ्चपदीत्यपि वा संज्ञा प्रणेत्रा विहिता। आसु पञ्चपदीसु जीवनदर्शनस्याभिव्यक्तिः, उदात्तभावानां मर्मावगाहिनिरूपणं नवीनबिम्बयोजना लयस्यानुप्रासस्य च चमत्कार अर्थगौरवं चेति विशेषा विलसन्ति। उर्दूभाषायां प्रचलितेन रुबाई-इति संज्ञप्तेन छन्दसा प्रभावितोऽपि कविर्नारायणरेड्डिः चतुष्पदात्मके तस्मिन् छन्दसि पञ्चमं पदं विनिवेश्य नवयोगमस्य व्यदधात्। प्रपञ्चपदुलु इति शीर्षकेणास्य १०८ पञ्चपदीनां सङ्ग्रहः १९९२ई० वर्षे प्रकाश्यतामगच्छत्। तस्यैव ललितप्रसन्नया संस्कृतभाषयाऽनुवादः श्रीहरिमहाभागेनात्र प्रस्तुतः। अन्त्यानुप्रासनिर्वाहदृशा मूलकविना पञ्चपदीषु मिश्रगतिस्तिस्रगतिश्चतुरस्रगतिरिति गतित्रयं प्रायोजि। अनुवादेऽपि तत् श्रीहरिणा सम्यङ् निर्व्यूढम्। पञ्चपदीष्वासु गम्भीरभावानां विचाराणां च ऊर्मयः समुन्मिषन्ति। दिङ्मात्रमुदाह्रियते-

दिदृक्षसि चेन्नभोऽगाधं वारिबिन्दुं परीक्षस्व
दिदृक्षसि चेद्रत्नतत्त्वं शिलाशकलं परीक्षस्व।
अणुं पृच्छसि चेदवश्यं ज्ञायते ब्रह्माण्डतत्त्वं
दिदृक्षसि चेन्मौनशिल्पं तुहिनखण्डं समीक्षस्व
दिदृक्षसि चेन्मनुजरूपं मृदः शकलं समीक्षस्व।।(१)

क्वचिद् व्यङ्ग्यम्, क्वचिद् विडम्बना क्वचित् कदर्थना क्वचिच्च सत्प्रेरणा मुक्तकेषु प्रकटिताः। तथापि सर्वात्मकसत्ताया अनुभवः गुणानां च प्रकर्षः रेड्डिकाव्यस्य महिमानं वर्धयन्ति। नितान्तं सरलसरलया गिरायं कविर्जीवनमर्म उद्घाटयति, अनुवादेऽपि तत् तथैवानुभूयते। तथाहि-

तिक्त सत्यं गीयते तज्जीवितं वैद्यालयः
मनोऽगाधं पठ्यते चेदनुभवो विद्यालयः।
शिक्षयेदथ कश्चनेति भ्रान्तिरेव वृथा वृथा
क्रमपदैर्ननु नृत्यते चेन्मेदिनी नाट्यालयः
ऋजुभिरक्षिभिरीक्ष्यते चेदणुरणुस्तत्त्वालयः।(१२)

अनुवादोऽयं तेलगुकाव्यस्य भव्यं रूपं निदर्शयति अनुभावयति चेति सर्वथा अनुवादकस्य श्रमः श्लाघ्यः। भारतीयसाहित्यस्य समन्वितं रूपं संस्कृतभाषा एतादृशैरनुवादैः पुरस्करोतीति न संशीतिः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शरत्सप्तकम् : शरच्चन्द्रचट्टोपाध्यायस्य सप्तोपन्यासानामनुवादसङ्ग्रहः, अनु० बिहारिलालमिश्रः, पुस्तकसदनम्, गया, १९९६ ।मूल्यम्-१००रू०।

बंगभाषाया महान् साहित्यकारः श्रीशरच्चन्द्रो विश्वकथाकारेषूल्लेखनीयतां भजते। जीवनस्य जटिलं रूपं, नारीजीवनस्य विडम्बना कोमलता च, भारतीयजनतायाः स्वप्नाः सङ्घर्षा मनोभावानामन्तर्घातश्चास्य कथासु उपन्यासेषु च अप्रतिमतया चित्रितानि। सङ्ग्रहेऽस्मिन् श्री बिहारिलालमिश्रेण ज्येष्ठान्तिका, मध्यामान्तिका, बिन्दोर्बालः, रामस्य सुमतिः, परेशः, चित्रम्, अनुराधा चेति सप्त उपन्यासाः सङ्कलय्य सरलसरसया संस्कृतभाषयाऽनूदिताः। अनुवादं पाठं पाठं शरच्चन्द्रस्य कथासंसारः साक्षात्कर्तुं शक्यते, ज्ञातुं च शक्यते तदीयकथाशैल्या अद्वितीयता प्रभविष्णता च । अनुवादकेन मूलकथाया रसः सर्वथाऽक्षुण्णतया अनुवादेषु संस्थापितः। क्वचिन्नवीना शब्दा विनिर्मिता इतरभाषाभ्यो वा गृहीताः। तथाहि- वैतनिकी (service, पृ०७), अश्मपट्टिका (slate, पृ०९) कुड्यमञ्चूषा (आलमारी, पृ० १०३), चुरुटम् (पृ २३४) इत्यादयः। सर्वथा परिष्कृतरूपेण शरच्चन्द्रस्य कथाजगदिह विलसतीति निश्चप्रचम्।

नाट्यसप्तपदम् (एकाङ्किकसङ्कलनम्) - अभिराजराजेन्द्रमिश्रः, ईस्टर्नबुकलिंकर्स, दिल्ली, १९९६, मूल्यम्- १५० रू०।

समकालिकसंस्कृतसाहित्यकारेषु अभिराजराजेन्द्रमिश्रस्यावदानं न न विदितं साहित्यरसिकानाम्। अद्यावधि अस्य द्वे महाकाव्ये, त्रयः कथासङ्ग्रहाः, अनेकानि काव्यसङ्कलनानि च प्रकाशितानि। नाट्यरचनायामयं विशिष्यते। अनेन सप्ततिप्रायाण्येकाङ्करूपकाणि रचितानि, येषु नैकानि असकृत् प्रयोजितानि रङ्गे तौर्यत्रिकसूत्रधारैः। नाट्यपञ्चगव्यम्, नाट्यपञ्चामृतम्, चतुष्पथीयम्, रूपरुद्रीयम् नाट्यनवग्रहमिति एकाङ्किकसङ्कलनानि अस्य प्रकाश्यतां गतानि प्रथितानि। विद्योत्तमा नाटिका अकिञ्चनकाञ्चनं च रूपकमपि विज्ञायेते।

नाट्यसप्तपदेऽस्मिन् *पञ्च सी न मी, वाणीघटकमेलकम्, बधिरप्रहसनम्, साक्षात्कारः, रूपमती, देहलीपरिदेवनम्, द्विसन्धान*मिति सप्त रूपकाणि सन्ति। सर्वेषु रूपकेषु संविधानं नितरां रोचकम् । वस्तुनिर्वाहः आकर्षकः। वस्तुनि कापि समस्या तत्त्वदृशा मीमांसिता। तथाहि- राजपण्डितमांसभक्षणलोलुपया पत्न्या प्रचोदितो मित्रभूतस्य सर्वविद्याविशारदस्य राजपण्डितस्यैव प्राणान् हर्तुकामश्छद्मवेषधरो ब्रह्मराक्षसो भोजनृपतिसभां समेत्य प्राणहरणसमयेन शास्त्रार्थं कुर्वाणः "पञ्च सी, पञ्च मी , पञ्च सी न मी"ति सूत्रार्थं पृच्छति। राजपुरोहितः प्रथमं तु किङ्कर्तव्यविमूढः पश्चाद् ब्रह्मराक्षसस्य स्वपत्न्या वार्तालापं गूढं श्रुत्वा मीकारान्ता पञ्चतिथयः,सीकारान्ताः अपराः पञ्च अवशिष्टा न मीकारान्ता न सीकारान्ता इति कूटोक्तेराशयमवगच्छति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यद्यपि सर्वत्र प्रसन्नप्रवाहा नर्मगर्मसंवादवारिवाहा नितान्तं सुखावहा प्रवहति वाणीझरी रूपकेषु, परन्तु पद्येषु क्वचित् क्वचित् नाट्यकारेणानितरसाधारणीं वचोवितानवैपुणीमाविष्कुर्वता विचित्रा काव्यबन्धा विनिवेशिताः। तद्यथा प्रथमरूपके एव नान्दीभूतः यमकादिविन्यासविशिष्टोऽयं पद्यगुम्फः-

धत्ते यो वारिधारां तमिह सविननयं मन्महे भोजमेघं
धत्ते यो वाऽरिधारां तमिह सविनयं मन्महे भोजभूपम्।
धत्तेऽयोवारिधारां तमिह सविनयं मन्महे भोजखड्गं
धत्ते यो वा रिधारां तमिह सविनयं मन्महे भोजदेशम्।।(पृ० २७)

तथैव अस्यैव नाटकस्य पद्यमिदं शब्दसौष्ठवस्य किमपि निदर्शनं प्रस्तौति-

वातश्शैलं दुधूषुः फणिपतिरवनीं भूरियत्नैर्जुगुप्सुः
अग्निः काष्ठं दिधक्षुः पिफलिषुरगमं सिन्धुमर्कस्तितप्सुः।
धर्मः पुण्यं सुषूषुर्दुरितचयमपि प्रत्नपुण्यं निनंक्षु-
द्वन्द्वैस्तावत्किमेभिः स खलु भुवि कृती यो हि भोजं बुभूषुः।।

वाणीघटकमेलकं नाम रूपकं संस्कृतव्याकरणवैभवस्य कमनीयं निदर्शनम्। यङन्त-यङ्लुगाभ्यां गीयमानं दीक्षितपुष्पाया यङ्लुग्विन्यासवैचित्र्यमयं कवेः स्वरचितं चान्यद् गीतमिह कामपि चमत्कृति तनुतः। अत्र संस्कृतपाठशालाया आचार्यस्तदीयाश्छात्राः भविष्यत्काल-यङ्न्त-यङ्लुक्-कर्मवाच्यैकवचन-कृदन्ताः पाठशालानिरीक्षणार्थमायातं हतप्रभं नाम निरीक्षकं सत्यमेव स्वप्रखरप्रत्युक्तिभिर्हतप्रभं विदधति। बधिरप्रहसने वृद्धः पितामहः अन्यदुक्तमन्यथैव शृणोति वाधिर्यात्। *साक्षात्कार*नाम्नि रूपके शिक्षाजगति व्याप्तो भ्रष्टाचारः सनर्म समर्मविदारणमुद्घाटितः। *रूपमती* प्रणयनिर्भरं कथानकं प्रस्तौति। देहलीपरिदेवनम् करुणरूपकं वर्तते। *द्विसन्धान*नाम्नि रूपके अधुनातनमनुजानां जीवनस्य द्वैधता द्विजिह्वता मनस्यनयद् वचस्यन्यदिति अन्यथावृत्तिश्च समुद्घाटिताः।

संवादेषु वचोविन्यासवैचित्र्यं वैदग्धभङ्गीभणितिरिह सर्वत्र विलसति। पदे पदे रमणीयानि प्रेरणास्पदं सुभाषितान्यपि मनो हरन्ति। तेषु लोकभाषाच्छटा लोकोक्तिच्छाया च विशेषं कमनीया। दिङ्मात्रमुदाह्रियन्ते-

अवलेहं विना व्यञ्जनं न रोचते।
खुदातोऽपि महत्तरो नग्नः।
चणकमेकं न भ्राष्ट्रं विदारयति।
जरठचन्द्रोऽप्यमृतमेवोद्गिरति न पुनः कालकूटम्।
भित्तिरपि कर्णिनी भवति।
यस्य यष्टिस्तस्यैव महिषी।

विभुविजयः : लघुरूपकसङ्ग्रहः, कृष्णलालः, विभुवैभवम्, देहली, १९९५, मूल्यम्- १०० रूप्यकाणि।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विभुविजयोऽपि नाट्यसप्तपदमिव समकालिकसंस्कृतनाट्यसाहित्यस्य नवोन्मेषप्रत्यायको रूपकसङ्ग्रहः। इतः पूर्वं दशवर्षाणि प्राक् कृष्णलालश्मत्कारसंज्ञकं स्वोपज्ञं रूपकसङ्ग्रहं प्रकाश्य कमपि चमत्कारमतनोद्। अभिनेयता नामास्य रूपकरचनाया विशेषो गुण इति चमत्कारस्थानि सर्वाण्यपि रूपकाणि छात्रैस्तासु तासु संस्थासु प्रयोजितानि। विभुविजयस्तान्यि सर्वामि रूपकाणि प्रयोगयोग्यानि। राजेन्द्रमिश्रस्य नाट्यसङ्ग्रह इव अत्रापि सप्तैव रूपकाणि लसन्ति। तेषु *कस्य विजय* इति रूपकं केनोपनिषदमाश्रित्य *मैत्रेयी*ति च रूपकं बृहदारण्यकोपनिषत्कथां विषयीकृत्य प्रवर्तितम्। *आहुति*रिति रूपकं स्वातन्त्र्यसङ्ग्रामाग्रगण्यसैनिकस्य चन्द्रशेखराजादस्य नितरां प्रेरकं चरितं प्रस्तौति। स च आजादः संस्कृतपाठशालायामेव अधीत्य संस्कारविशेषं राष्ट्रभक्तिमयमगृह्णादित्युचितमेवात्र संस्कृतपाठशालायाः दृश्यानि संयोजितानि। अवशिष्टानि रूपकाणि अद्यतनं समाजं विषयीकुर्वन्ति। तेषु *सैनिकसूनुविवाह* इति रूपकं हास्यपाटवं नाट्यकर्तुः प्रकटयति। *वयं सेवका* इति नाट्यरचना भृतिं कुर्वाणयोर्दम्पत्योः *प्राचीवैक्लव्य*मिति च रूपकं रूपिकाक्रर्म कुर्वत्या युवत्या विडम्बनामुद्घाटयति। *अहो रूपमहो ध्वनि*रिति रूपकं बालाना कृते रुचिकरं शिशुभिरभिनेयम्, यत्र उष्ट्ररासभादय एव सन्ति पात्राणि।

प्रायः सर्वेषु रूपकेषु वेदविदा श्रीमता कृष्णलालेन वेदमन्त्राणां प्रत्यक्षं वा नेपथ्याद्वा पाठः कारितः। नितरां भारतीयतासंस्कारविशिष्टं विशिष्टं साहित्यस्वरूपमिह समुन्मीलति। नाट्यशिल्पं न **नाट्यशास्त्रमपित्वाधु**निकरूपकरचनासरणिमनुहरति। एकाङ्करूपकाणामेतेषां विविधेषु दृश्येषु विभाजनं विहितम्। क्वचिन्नवीनाः शब्दा निर्मिताः इतरभाषाभ्यो वोपात्ताः। तथाहि- फिरङ्गिः (पृ०५७), गुलिका (पृ०६८, भुशुण्डिनिर्गता, नालास्त्रम् (पृ० ७३), स्वच्छताकर्मकरी, गृहकर्मकरी (पृ० ८४)पुरोडाशः (bread इत्यर्थे, पृ ०८८), गुटिका (पृ०८८), बसयानम् (पृ० ८९) इत्यादयः। भाषायां आधुनिकभाषासु प्रचलिता वाक्यरचना प्रतिफलिता।प्रायशोऽत्यन्तं सरस- सरलानि वाक्यानि संवादेषु प्रयोजितानि।

अमरुशतकम् : सी०कुन्हन्-राज-कृताङ्ग्लभाषानुवादसहितम्, सम्पादकः- पी०सी०मुरलीमाधवन्,कुन्हनराजशताब्दोत्सवसमितिः,त्रिशूर,१९९७, मूल्यम्-७५रू०।

आधुनिकसंस्कृतविद्वत्सु श्रीमान् कुन्हनराजमहोदयः सुप्रथितः। तेन आङ्ग्लभाषापाठकानां कृतेऽमरकृतेरमरुशतकस्य सुबोधोऽनुवादो विहितः। स च तदीयजीवनकालेऽप्रकाशितः विदुषा मुरलीमाधवेन सटिप्पणं विशदभूमिकासंवलितं सम्पाद्य प्रकाश्यतां नीत इति ससर्वथा साधुवादमर्हति।

A Survey of Love in Sanskrit: सम्पादकः पी० सी० मुरलीमाधवन्,प्र० स एव। १९९७, मूल्यम्-१५०रू०

अयमपि लघुग्रन्थः विदुषः कुन्हन् राजस्य कृतिर्वर्तते। अत्र आवेदेभ्यः अमरुशतकं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यावत् संस्कृतसाहित्ये प्रणयचित्रणं परामृशति विद्वान् ग्रन्थकारः। कामशास्त्र-धर्मशास्त्रयोर्दृष्ट्या दाम्पत्यस्य प्रेमसम्बन्धानां च विधेयतामपि स सम्यगिह विवेचितवान्।

भक्तिमीमांसामू०१५०रू०
स्पर्शास्पर्शविवेकः, मू० १००रू०
शिवलिङ्गरहस्यम्,मू०१००रू०
उपदेशबल्ली,मू०१५०रू०

सर्वेषां प्रणेता- रसिकविहारीजोशी। प्र०- रामप्रतापचेरिटेबलट्रस्ट, जयपुरम्। १९९७।

विद्वत्कवेः रसिकविहारीजोशीमहाभागस्य चतस्रो रचनाः युगपत् प्रकाशितास्तस्य वाग्वैभवं नवनिर्माणनैपुणीं च प्रख्यापयन्ति। भक्तिमीमांसायां भक्तित्त्वं, स्पर्शास्पर्शविवेके अस्पृश्यतातत्त्वम्, शिवलिङ्गरहस्ये शिवस्वरूपम् उपदेशवल्ल्यां च स्वपितू रामप्रतापशास्त्रिणो मुखात् श्रुतानि सुभाषितानि कविना स्वोपज्ञतां नीतानि।

रामशास्त्रिणां लघुकृतयः। सं०- गर्गेश्वरीवेङ्कटसुब्बय्याः। बैगलोर। १९९७

सीतारावणसंवादझरीति प्रख्यातस्य चित्रकाव्यस्य कर्तारः रामशास्त्रिणः (१८४३-१९११) दक्षिणेषु महापण्डिताः बभूवुः। तेषां खण्डत्रये विविधा रचना अत्र सङ्कलिताः। प्रथमे खण्डे अष्टादशस्तोत्रकाव्यानि विविधदेवता- विषयकाणि लसन्ति। द्वितीये रागतालसंयोजिताः गीतगोविन्दपरम्पराश्रिता गीतयः सन्ति। महान्तर्लापपञ्चकं प्रश्नोत्तरमयं कवेः स्वोपज्ञटीकोपेतं काव्यं सङ्गृहीतम्। रामशास्त्रिणां कर्तृत्वस्यापि भूमिकायां विशदः परिचयः सम्पादकेन प्रस्तुत इति विशिष्य उपादेयोऽयं सङ्ग्रहः।

गङ्गावतरणचम्पूः। श्रीबालकृष्णसूनुशङ्करदीक्षितविरचिता। सम्पादकः गयाचरणत्रिपाठी। गङ्गानाथझा-केन्द्रियसंस्कृतविद्यापीठम्। इलाहाबादम्। १९९६।

गङ्गावतरणचम्पूकाव्यमिदं अष्टादशशताब्द्यां महाराष्ट्रियेन महाकविना शङ्करेण विरचितम्। सोऽयं शङ्करः काशिनरेशस्य श्रीमच्चेतःसिंहस्य सभामलञ्चकार। अद्यावधि अप्रकाशितस्य काव्यस्यास्य सम्पादनं काशी- प्रयाग-लण्डन-नगरस्थग्रन्थागारेषु विद्यमानां षण्णां मातृकाणां साहाय्येन विद्वत्तल्लजो गयाचरणस्त्रिपाठी निपुणं विहितवान्। महाकवेः शङ्करस्य शङ्करचेतोविलासचम्पूः अन्यान्यपि च काव्यानि ज्ञायन्ते। तेषां च गवेषणा भूमिकायां विदुषा सम्पादकेन कृता।

चम्पूरियं न केवलं हृद्यनिरवद्यगद्यपद्यबन्धैरपितु लोकोत्तरवर्णनाभिः वाराणस्याः यथादृष्टस्थितीनां चित्रणैश्च चित्तमाकर्षति। शङ्करस्य पद्यानि माघकवेश्चातुरीं स्मारयन्ति, गद्यं चास्य बाणच्छायामाविष्करोति। तथाहि वनसमूहवर्णनमिदं तुलनामर्हति कादम्बरीगतविन्ध्याटवीवर्णनेन-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विराट्सदनमिव काचकशतावृतं सबृहन्नलं च, धृतराष्ट्रसदनमिव धात्रीशतसङ्कुलं दुर्योधनसभापत्यमिव शकुनिकलिताक्षं, लङ्कापुरमिवविविधपलाशसेवितं समेघनादं च सुग्रीवसैन्यमिव शरभालङ्कृतं केसरिशोभितं च-- इत्यादि (पृ० १८)।

क्वचिदयं गङ्गावरणकारः यमकादिविन्यासेऽपि प्रगल्भते। तथाहि-

सभाजनाय व्यासस्य, सभाजनकराः परे।
सभाजनमुपासेदुः सभाजनकथोत्सुकाः।।(पृ० ११०)

संस्कृतभाषाया विगतशतके परिवर्तमानं रूपपमपि काव्यादमुष्माद् ज्ञातुं शक्यते।लोकेषुप्रचलिता नवीनाः शब्दाः कविना इड निर्भयमुपात्ताः। दरमात्रमुदाह्रियते-

लड्डुकांश्च-दलिया-घसोटिया-चोटिका-प्रभृतीन् विरचय्य।
तापयन्ति पुरतः सुरताभाः वाचकस्य किल गुर्जरवध्वः।।(पृ० १११)

विगतशतकगता भारतदेशस्य विशेषतो वाराणस्याः सामाजिकी स्थितिरिह ज्ञातुं शक्यते। अद्यावधि अप्रकाशितं दुर्लभं रमणीयमिदं काव्यं सुलभतां नयन् सम्पादकः साधुवादार्हः।

सङ्गमेनाभिरामा-(काव्यसङ्ग्रहः)-वनमाली विश्वालः, प्र०- श्रीमती पद्मावती विश्वालः, इलाहाबादम्, १९९७। मूल्यम्- ४० रूप्यकाणि।

व्यथा : (काव्यसङ्ग्रहः) - कविः- स एव। प्र०- तदेव। मूल्यम्- ६० रूप्यकाणि।

नवोदितस्य कवेर्वनमालीविश्वालस्य काव्यसङ्कलनद्वयी संस्कृतरचनायाः प्रत्यग्रतां प्रत्यायति। प्रथमसङ्ग्रहे स्तबकत्रये पञ्चत्रिंशत्काव्यानि समावेशितानि। काव्येषु क्वचित् सामाजिकी चेतना, क्वचिद् वैयक्तिकी व्यथा क्वचित् भक्तिभावना चाभिव्यक्तिमुपगताः। "आखुर्गजाननमहो कवलीकरोती"ति काव्यमद्यतनं भ्रष्टाचारं निर्मर्यादतां निर्वाचनप्रपञ्चं विषयीकरोति। अनेकेषु काव्येषु अन्तिमः पादः ध्रुवकमिव समस्यापूर्तिरिव वा पुनरावर्तनं याति, तद्यथा- आखुर्गजाननमहो कवलीकरोति, कथमपि हि पुण्येन भवति,सङ्गमेनाभिरामा, वर्णमात्रेण कृष्णः, भ्रमन्ति तृष्णा तटिनी तटान्ते" नष्टस्य कान्या गति'रित्येमादीनि। विषयाणामिह वैविध्यं विद्यते।

व्यथेति काव्यसङ्ग्रहे ७३ लघुकाव्यानि लसन्ति।अत्र विविधानां व्यथानां प्रताननं कविनाऽकारि। न केवलं सामाजिकी व्यथा वैयक्तिकी व्यथा वाऽपितु पशूनां तिर्यञ्चामपि व्यथाकथाऽनेनेह कथिता। "चिलिके"ति काव्यमुत्कलप्रदेशस्थचिलिकाख्यविशालसरसि परिव्याप्तं प्रदूषणं विषयीकरोति। अत्रोत्कलभाषाया शब्दा अपि कविना प्रयुक्ताः। चिल्लः, वीथीकुक्कुरः,विज्ञापनम्, पल्ली इत्यादिभिः शीर्षकैरिह विन्यस्तानि काव्यानि विषयनावीन्यं प्रस्तुन्वन्ति। युवा कविरयं काव्यसङ्गहद्वये गोविन्दचन्द्रपाण्डेय-गयाचरणत्रिपाठि-किशोरनाथझा-सदृशैर्विपश्चिदपश्चिमैः शंसित इत्यहोभाग्यमेवास्य।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतीमङ्गलायतनम्- (काव्यसङ्ग्रहः) - रामनारायणमिश्रः-
प्र०- रङ्गेशप्रकाशनम्, देवरिया। मूल्यम्- ७० रूप्यकाणि।

प्रथितविदुषां रामनारायणमिश्राणां ऋतुविलासादिपूर्वप्रकाशितकाव्यैर्विश्रुतानां नूतनकाव्यसङ्ग्रहेऽस्मिन् पञ्चदश काव्यानि सन्ति। तत्र गङ्गास्तवकाव्ये ११० पद्यानि लसन्ति। विमर्शप्रधाने मनोभावप्रस्तुतिकाव्ये विविधैः २९१ छन्दोभिर्गुम्फितानि पद्यानि वर्तन्ते। एवमेव आत्मनिरीक्षणमिति काव्यमपि प्रेरणास्पदं १३० छन्दोभिर्ग्रथितम्। तथैव 'श्रीधरीटीकानुस्मृतिः' 'आत्मनिवेदनम्', 'मङ्गलम्' इत्यादिकाव्यान्यपि चिन्तनपरायणानि सन्ति, 'श्रीतीर्थराजप्रयागस्तवः', 'श्रीराधास्तवः' इत्यादीनि च स्तुतिपरकाणि।'सिद्धान्तरहस्यम्' इति काव्ये शास्त्रीयो निबन्ध एव पद्यैर्गुम्फितः, न तत्र किमपि कवित्वम्। काव्येष्वेतेषु विषयाणां न तथा वैविध्यं, परं विमर्शप्रकाशपरामर्शा अवश्यं दृश्यन्ते।

भावविलसितम्-सीतानाथ आचार्यशास्त्री। रॉयल इण्डियन प्रकाशनम्, कलिकाता। १९९८। मूल्यम्- ५० रूप्यकाणि।

भावविलसिते २५ कविताः मौलिक्यः, द्वे अनुवादरुपे षट् च बङ्गभाषात्मिका रचनाः सन्ति। प्रथितविदुषां रमारञ्जनमुकोपाध्यायानामिह भूमिका विलसति। युक्तमुक्तं तैस्तत्र कवेरवदानमुद्घाटयद्भिः- "काव्येष्वेषु कानिचित् प्राचीनशैलीमवलम्ब्य प्रसिद्धसंस्कृतच्छन्दसा ग्रथितानि, कानिचित् पुनर्नवीनशैलीमवलम्ब्य मुक्तच्छन्दसा विरचितानि। केषाञ्चन खलु विषयाः पूर्वसूरिभिः समुपस्थापिताः प्राचीनभूताः केषुचित् पुनः साम्प्रतिके काले उद्भूता सामाजिकी स्थितिर्विषयीकृता। एषु काव्येषु शब्दचारुत्वार्थचारुत्वयोः सामञ्जस्यपूर्णा स्थितिर्नितरां चित्ताकर्षका। अपिच एतेषु क्वचिद् ध्वनेर्विलसनम्, क्वचिद् रसस्याभिव्यञ्जनं, क्वचिद् वक्रोक्तेः प्रयोगः, कुत्रापि कौतुकमयता, कुत्रापि कल्पनायाः समुदारता, कुत्रापि च वर्णनाया महनीयता मानसमानन्दयन्ति।" इति। पञ्चविंशतिकाव्येषु कानिचित् स्तुतिपराणि, कानिचिन्निसर्गनिरूपणपराण्यपराणि च मनोभावाभिव्यञ्जकानि सन्ति। सर्वत्र वैदर्भी रीतिरिह लसति। आङ्ग्लकवेः "स्काइलार्क" इत्याख्यां माइकेलमधुसूदनदत्तविरचिता 'आत्मालाप' इति च कवितां सरससंस्कृतपद्यैरनूद्य कविनाऽनुवादपाटवमपि प्रकटीकृतम्।

कालिदास और उनका युग- सम्पादकः गोविन्दचन्द्रपाण्डेयः। राका प्रकाशनम्। इलाहाबादम्। १९९८। मूल्यम्- २८० रूप्यकाणि।

प्रथितविद्वद्भिर्गोविन्दचन्द्रपाण्डेयमहोदयैः सम्पादितं ग्रन्थमिदं कालिदाससाहित्यानुशीलने नवीनाः काश्चन दिश उन्मीलयति। अत्र कालिदासविषयकमैतिहासिकं, साहित्यिकं सांस्कृतिकं चेति पक्षत्रयमधिकृत्य सप्तदशनिबन्धा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तेषां तेषां सुपण्डितानां सङ्कलिताः। निबन्धत्रयं कालिदासस्य कालनिर्धारणं विषयीकुरुते। तत्र पण्डितो रेवाप्रसादो द्विवेदी तैस्तैः प्रमाणैः कालिदासकालं खिस्तात् प्राक्प्रथमशतकादारभ्य द्वितीयखिस्तशतकं यावन्निर्धारयति। हरिनारायणदूबे इत्याख्येन पुरातात्त्विकप्रामाणानि पुनर्गवेषितानि कालिदासकालनिर्धारणाय। सोऽपि द्विवेदिवर्यमेव समर्थयति। ईश्वरचरणविश्वकर्मा तु गुप्तकाल एव स्थापयति कालिदासम्। उदयनारायणसिंहस्य लेखे रूसदेशीयं कालिदालानुशीलनम् विषयीकृतम्।

कालिदाससमीक्षाविषयकं कलानाथशास्त्रिणां निबन्धद्वयमिह समीक्षनैपुणीं निबद्धुर्निदर्शति। तथापि कालिदासीयपात्राणां पतिगृहे तव दस्यमपि क्षमम्', पर्तिपत्रा हि दारेषु प्रभुता सर्वतोमुकी'त्यादिवक्तव्यं तत्र कवेर्मन्तव्यतया यदूरीकृतं, तत्र समञ्जसम्। नाट्ये तु कविनिबद्धवक्तृसंवादात्मकं वस्तु न सर्वदा कवेरभिप्रायतया ग्राह्यं भवति। तथात्वे शाकुन्तल एव 'भर्तर्यपेततमसि प्रभुता तवैवेटति कश्यपकथनेन वदतो व्याघातः प्रसज्येत।

कामं विप्रतिपत्तिस्थानानि कानिचित् यत्र तत्र लेखेषु प्रतीयेरन्,परं ग्रन्थोऽयं कालिदासानुसीलनसरणौ नवीन आरोहक्रम इति निश्चप्रचम्।

(समीक्षकः - राधावल्लभः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतरवीन्द्रम् - रवीन्द्रनाथस्य बङ्गभाषागीतानामनुवादः
अनु.-दीपकघोषः। प्र. साहित्याकादेमी, नयदेहली। १९९५। मू. ५० रू.

संस्कृतभाषाया अन्याभ्यो भारतीयभाषाभ्यो दृढीयान् वर्तते सम्बन्ध इति न संशीतिः। अतश्च इतरभारतीयभाषाणां साहित्यस्य रसमाधुर्यं सौन्दर्यं च यथा हृद्यनिरवद्यतयाऽवतारयितुं शक्यते संस्कृते न तथाऽन्यस्यां कस्याञ्चन भाषायाम् । एवं स्थितेऽन्यासु भारतीयभाषासु यत् किमपि विद्यते श्रेष्ठं साहित्यं तत् संस्कृतानुवादपुरस्सरमुपस्थाप्यमानं भारतीयसाहित्यस्य प्रकर्षं प्रकटीकुर्यादेव। क्रियन्ते चानुवादा अपि संस्कृते रसज्ञैः संस्कृतरचनाकारैरितरभाषा-काव्यानाम्। तत्र रवीन्द्रनाथस्य कवितल्लजस्य गीतानि काव्यानि नाटकानि निबन्धाश्च भूयसा संस्कृतानुवादेषु प्रचारमापुः। सुकवेर्दीपकघोषस्य तदीयबङ्गभाषागीतानां प्रस्तुतोऽयमनुवादः सर्वथा अकृष्टमेव क्षेत्रमुद्घाटयति। रवीन्द्रनाथस्य गीतिमाधुरीं भावसौन्दर्यं चावगाहमवगाहं घोषेण रवीन्द्रसङ्गीतसम्मतमेव गीतस्वरूपं सर्वथा रक्षितं संस्कृतानुवाद इत्यत्र विशेषः। यो लयो यो रागो या च स्वरलिपिर्मूलबङ्गगीतस्य स एव लयो रागो वा सा च स्वलिपिरिहोरीकृता। स्वयमपि रवीन्द्रसङ्गीतपटोर्दीपकघोषस्येमेऽनुवादाः सङ्गीतदृशा विश्वभारतीविश्वविद्यालयस्य सङ्गीतपरिषदाऽनुमोदिताः, तेषु दशसंस्कृतगीतानां ध्वनिमुद्रिका (Cassette)अपि आपणे लभ्यते। अत एव संस्कृतभाषायां सर्वथाऽभिनवोऽयमुपक्रमः सर्वथा स्वागतयोग्यः। युक्तमेव पुस्तकस्यास्य भूमिकायां विपश्चिदपश्चिमः श्रीमान् रमारञ्जनमुखोपाध्यायोऽभिनवं संस्कृतसाहित्यमित्थं शंसति- "रवीन्द्रकाव्यस्य अनुवादकर्तृभिः प्रायशः रवीन्द्रनाथपरिवेशितानां भावानां प्रकाशने एवं गुरुत्वं प्रदत्तम् । प्रचलितानां छन्दसाञ्च उपयोगं कृत्वा अनुवादो विहितः। कलिकाताविश्वविद्यालयस्य संस्कृतविभागे रीडारपदम् अलंकुर्वाणैः विद्वद्वरेण्यैः अलंकारच्छन्दःशास्त्रेषु प्रविष्टैः डॉक्टरदीपकघोषैः पञ्चविंशतिसंख्यकानां रवीन्द्रसङ्गीतानाम् वङ्गभाषया विरचितानां गीतानाम् , यथा स्वरसंयोजनं स्वयमेव कविसार्वभौमैः कृतं, तां पद्धतिं संरक्ष्य एंव देवभाषायाम् अनुवादो विहितः। नवीना रमणीया चासौ प्रचेष्टा। पूर्वसूरिभिः भावखण्डे एव तात्पर्यं निहितम्, घोषैस्तु भावांशे आकृत्यंशे च द्वयोरेव गुरुत्वं प्रदत्तम् । स्वीकृतञ्च इदं मतम् यत् सङ्गीते रूपं भावश्च द्वे एव समप्राधान्ययुते। न खलु रूपं भावात् पृथक्कर्तुं शक्यते, न वा भावो रूपात्। भावरूपे मिलित्वा एवं सङ्गीते रसनिषेकं प्रकुरुतः। एवं घोषकृतानाम् अनुवादानाम् इदमेव वैशिष्ट्यं यत् मूलसङ्गीतेषु यां शैलीमवलम्ब्य स्वरसंयोजनं कृतम् तामेव शैलीम् अनुसृत्य एवष्वपि स्वराणां विन्यासो विहितः। संस्कृतभाषायां घोषाणां महानधिकारो समर्थाः।"

"रससमाहितचेतसः कवेः मनोराज्यात् भावाः रसाः अलंकाराः छन्दांसि च अहंपूर्विकया परापतन्ति इति काव्यकर्त्तुः सकाशे रसस्य एव प्राधान्यम् । रसाक्षिप्तास्तावत् अलंकाराः काव्यस्य सामग्रिकं रूपञ्च। अनुवादकर्तृभिस्तु शब्दान्वेषणे महान् प्रयत्नो क्रियते इति तेषां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समीपे न केवलं रसस्य प्राधान्यम्। अपि तु शब्दान्वेषणसक्षमायाः बुद्धिवृत्तेः। अतएव अनुवादकार्यं मूलकाव्यग्रन्थनकार्यात् दुरूहतरमेव। अस्मिन् दुष्करे कार्ये महत् साफल्यं दीपकघोषैः लब्धम् इति तेषां प्रयत्नो नितराम् अभिनन्दनयोग्य एव।"

"घोषैः रवीन्द्रसङ्गीतानां भावगाम्भीर्यम् अर्थगौरवं जनप्रियताञ्च विचार्य पञ्चविंशतिसंख्यकानां गीतानां निर्वाचनं कृतम्। बहुषु अखिलभारतसम्मेलनेषु पठितप्रशंसासाधन्यपत्रैः सङ्गीताचार्यैः सङ्गीतशास्त्रेषु सुप्रविष्टैः देवभाषाप्रयोगे निष्णातैः घोषैः अनन्यसाधारणीं शैलीमवलम्ब्य रवीन्द्रसङ्गीतानाम् अनुवादं विधाय संस्कृतरसिकानां महान् उपकारः कृतः, संस्कृतवाङ्मयस्य परिपुष्टिरपि विहिता इति नितराम् अभिनन्दनयोग्या इमे।"

रवीन्द्रनाथकाव्यस्य दीपकघोषकृताअनुवादाः बङ्गभाषायाश्चसंस्कृतानुभावित्वं प्रकटीकुर्वन्तः रसावेशवैशद्येन चमत्कुर्वन्ति चेतः। दिङ्मात्रमुदाह्रियते।

अग्नेः स्पर्शमणिं लगय प्राणैः।
जीवनं पावय दहन-दानैः।।
ममेमं देहं समुत्तोलय त्वम्,
तवैतद्-देवालये कुरु दीपम् -
ज्वलतु दीपशिखाऽनिशं गानैः।।
तमसः तनौ तनौ तव स्पर्शात्
स्फुटतु निशां तारा नवा नवा।
नयन - दृष्टिरेतु तमोमुक्तिम्,
यत्र पतति च पश्यतु प्रभाम्-
ज्वलिता व्यथा मम ऊर्ध्वतानम्।।

क्वचित्तु मूलगीतस्य बङ्गभाषागतस्यसौन्दर्यं प्रकृष्टमुत तदीयसंस्कृतानुवादस्येति संशयदोलामारोहतिमनः। तथाहि -

त्वं हि कथङ्कारं गायसि हे गुणिन्,
मोहितोऽहं सदा शृण्वे सदा शृण्वे।।
रागालोको भुवने तनुते,
रागवायुर्गगने वहते,
भग्नपाषाणा व्याकुलवेगा
प्रवहति रागसुरधुनी।।
मन्ये तेन रागेण गेयम्,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कण्ठे मम न लभे रागम् ।
किं विवक्षे, वचनं रोधितम् -
पराजिता रुदन्ति प्राणा मे,
कीदृग्जाले पातयसि मा त्वम्
रागजालं रचयन् परितो माम् ।।

वस्तुतो रवीन्द्रनाथस्य भाषा संस्कृतसंस्कारपरा वरीवर्ति। अतएव क्वचिदत्यन्त सहजं पालि-प्राकृत-भाषादि-गाथा- काव्यानामिव तदीयगीतानां छाया संस्कृते विधातुं शक्यते। तथाहि-

मम मनो मेघसहगम् ,
उच्चलति दिग्दिगन्तमभितः
निःसीमशून्ये श्रावणवर्षणसङ्गीते
'रिमिझिम्' 'रिमिझिम्' 'रिमिझिम्' ।।
मम मनो हंसवलाकापक्षैः प्रयाति
कुत्रचिदपि च चकिततडित आलोके।
'झञ्झन' मञ्जीरशिञ्जा झञ्झा रुद्रमुदैव।
'कलकल' कलमन्द्रं निर्झरिणी
दत्ते प्रलयाह्वानम् ।।

अस्य मूल बङ्गरूपमिदम् -

मन मोर मेघेर सङ्गी,
उड़े चले दिग्दिगन्तेर पाने
निःसीम शून्ये श्रावणवर्षणसङ्गीते
रिमिझिम रिमिझिम रिमिझिम।।
मन मोर हंसवलाकार पाखाय याय उड़े
क्वचित क्वचित चकित तड़ित-आलोके।
झञ्झनमञ्जीर वाजाय झञ्झा रुद्र आनन्दे।
कलो-कलो कलमन्द्रे निर्झरिणी
डाक देय प्रलय-आह्वाने।।

दीपकघोषस्यानुवादरचना दीपयति संस्कृतसाहित्यनिधिं, घोषयति तदीयां जययात्रां चेति दिक् ।

राधावल्लभः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"संस्कृत साहित्यपरिचय" - रचयिता, डॉ. राधावल्लभत्रिपाठी, आचार्योऽध्यक्षश्च, संस्कृतविभागे, डॉ. हरिसिंह गौर विश्वविद्यालये सागरस्थे - प्रकाशकः - प्रतिभा प्रकाशनम्, नव दिल्ली - प्रथमसंस्करणम् १९९८

८३ पृष्ठैर्युक्तं त्रिष्वध्योयेषु विभक्तमिदं पुस्तकं वेदकालादारभ्याधुनिकसाहित्यकालं यावत् साहित्यिकपरम्परापरिदृश्यादीनां संक्षिप्तं परिचयं सरलहिन्दीभाषाया प्रस्तौति। पुस्तकस्यास्य कलेवरं स्वल्पं, परन्तु साहित्यिकान्तर्धाराणां परस्परं सापेक्षसम्बन्धज्ञानाय आधुनिकदृष्ट्या समीक्षितो बीजविन्दूनामुद्भास इतः प्राप्तुं शक्यते। किञ्च, अगणितसाहित्यग्रन्थ-तच्छास्त्रग्रन्थानां कालक्रमेणाविर्भूतानां वास्तविकोऽनुग्राह्यानुग्राहकतासम्बन्धोऽस्माद् ज्ञातुं शक्यते। अत्र प्रथमाध्याये वैदिकसाहित्यं (संहिता-ब्राह्मण-आरण्यक-उपनिषद्) लौकिककाव्यपरम्परायाः पृष्ठभूमिरूपेण साहित्यचक्षुषा ग्रन्थकारेण विवेचितम् । अत्रैव षोडशतमे पृष्ठाङ्के इदमुदृतं यत् वैदिकसाहित्येन सहैव अपरा काऽपि "गाथा - आख्यान-कथादीनां लौकिकी परम्परा प्रचलन्ती आसीत् । परन्तु रामायणं प्रथमतया लौकिककाव्यरूपेण सङ्ग्रथितमिति तत् प्रथमलौकिकसाहित्यमिति ज्ञातम् । अतः लौकिकसाहित्योदयः वेदात् वेदे चेत्येवं प्रकारकः ग्रन्थकाराशयः नवीनः रमणीयश्च। द्वितीयेऽध्याये लौकिकसंस्कृतसाहित्यपरम्परा प्रदर्शिता। तृतीयाध्याये साहित्यशास्त्रसाहित्योरन्तःसम्बन्धः पालि-प्राकृतापभ्रंशदिकाव्यानां संस्कृतकाव्येन सहान्तःसंवादः संस्कृतकाव्यानां लोकधर्मिता-राष्ट्रियतादयो विषयः वर्णिताः सन्ति। पुस्तकेऽस्मिन् ग्रन्थकारस्य चर्चितेभ्यो विन्दुभ्य इदं प्रतीयते यत् प्रचलन्त्याः साहित्यपरम्परायाः परस्परं सामीप्य-रहस्यमुद्घाटयितुं प्रयतते ग्रन्थकारः। यद्यपि कविं पण्डितराजं यावदत्र अनेनालोकपातः कृतः तथापि अर्वाचीनानां संस्कृतकाव्य-कवीनां लेशमात्रोऽप्युल्लेखो न दृश्यते। तथा सति इतिहासक्रमेण साररूपेण संस्कृतसाहित्यजगदेकत्रैव प्रकाशितं स्यात् ।

तथापि पुस्तकमिदं साहित्यसागरसन्तरणाय सोपानरूपं जिज्ञासुसहृदयानां यास्तीत्यस्माकं विश्वासः।

टर्निगं प्वाएंटस इन इण्डियन शास्त्रिक ट्रैडीशन - सम्पादकौ डॉ. राधावल्लभत्रिपाठी, डॉ. नीलकण्ठदाशश्च , प्रतिमाप्रकाशनम् - प्रथमसंस्करणम् १९९९

१५८ पृष्ठाङ्कपरिमितमाङ्गलभाषया भारतीयपारम्परिक शास्त्रनिष्णातैस्त-तच्छास्त्रविद्भिः शास्त्राणां कालक्रमेण परिवर्तनपरम्परामाधारीकृत्य प्रस्तुतानां शोधपत्राणां डॉ. राधावल्लभत्रिपाठि - डॉ. नीलकण्ठदाशकृतं सम्पादनकलेवरं पुस्तकमिदम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्रैकादशविदुषामेकादशशोधपत्राणि विविधशास्त्रदर्शनान्यधिकृत्य वर्तन्ते। यथा जी. मिश्रमहोदयस्य (राधाकृष्णन् प्रगतदर्शनसंस्थासम्बद्धस्य) वेदान्तदर्शने, व्ही.एन. झावर्यस्य (पूनाविश्वविद्यालस्थप्रगतसंस्कृतशिक्षाकेन्द्रनिदेशकस्य) न्यायवैशिषिकदर्शनयोः, उज्जवलपानसे महाभागाया मीमांसादर्शने, अच्युतानन्ददाशस्य व्याकरणे, करुणेशशुक्लस्य बौद्धदर्शने, ए.सी षडङ्गिमहोदयस्य पाणिनीयव्याकरणे, राधावल्लभत्रिपाठिवर्यस्य साहित्ये च कालक्रमेण परवर्तिशास्त्राचार्यकृतानां शास्त्रमार्गपरिवर्तनपरम्पराणां गवेषणापूर्वकं प्रस्तुतयः पुस्तकेऽस्मिन् निबद्धाः सन्ति। अपि च, नीलकण्ठदाश - रमाकान्तपाण्डेय वनमालिविश्वालानां व्याकरणे कतिपयसिद्धान्तामाधरेण शोधपत्राणि अस्मिन् वर्तन्ते।

निश्चप्रचं भारतीयपुरातनशास्त्राणां सिद्धान्तगतं तत्तदाचार्याणां विचारभिन्नत्वम्, (ईषद्वाऽधिकं वा) दृश्यत एव। एतत् निरन्तरविचारमन्थनबाहुल्यं शास्त्राणां गुणाय, न तु दोषाय । किन्तु, अर्वाचीनानां गवेषकानां कृते एतेषां परिवर्तनाविष्कारे महत् कष्टमापद्यते। अस्मिन् ग्रन्थे तेषु तेषु शास्त्रेषु प्रवर्तितानि परिवर्तनानि प्रतिपादितानि लेखेषु सन्ति। इदं शास्त्रेतिहासविज्ञानज्ञानाय अनुन्धित्सूनां महत्तरसहायकं भविष्यतीत्यस्मन्मतिः।

भारतीयशास्त्रपरम्परायां रूपद्वयं प्राप्यते। तत्र (१) बादरायणस्य ब्रह्मसूत्रम्, जैमिनेः मीमांसासूत्रम्, कपिलस्य साङ्ख्यसूत्रम्, गौतमस्य न्यायसूत्रम्, कणादस्य वैशेषिकसूत्रम्, पतञ्जलेः योगसूत्रम्, यास्कस्य निरुक्तम्, पाराशरस्य भिक्षुसूत्रम्, शिलालेः नटसूत्रम्, पाणिनेरष्टाध्यायी कौटिल्यस्मार्थशास्त्रम्, वात्स्यायनस्य कामसूत्रम्, भरतमुनेः नाट्यशास्त्रम्, अनेकानि च धर्मसूत्र - गृह्यसूत्र - शूल्वसूत्राणि आकरग्रन्थरूपेण मूलग्रन्थरूपेण वा वर्तन्ते। (२) अपरं तु एतेषां मूलग्रन्थानामाधारेण लिखितं भाष्यग्रन्थरूपम् । भाष्यकाराणां स्वतन्त्रप्रज्ञावच्चिन्तनक्रमात्, तेषां वैविध्याच्च परस्परं भाष्यकाराणां, आकर - भाष्यकाराणाञ्च प्रदर्शितशास्त्रसिद्धान्ताः तत्र तत्र मिथो भिद्यन्ते । अतः शास्त्राणां तत्तत्सिद्धान्तभेदान्, पुस्तकरूपेण विदुषां पुरतः प्रकाशयितुं सम्पादकयोः सफलोऽयं प्रयासोऽत्यन्तं प्रशस्यतां यास्यतीति।

भागीरथिर्नन्दः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राधावल्लभत्रिपाठिनः संस्कृतग्रन्थाः / संस्कृतविषयका ग्रन्थाः

१. प्रेमपीयूषम् (1971), नाटकम्
२. महाकविः कण्टकः (1971), आख्यायिका
३. वाल्मीकिविमर्शः (1979), समीक्षा उ. प्र. संस्कृत अकादेमी द्वारा पुरस्कृतः
४. नाट्यमण्डपम् (1980)
५. भारतीयरङ्गसमुन्मेषः (1981)
६. सन्धानम् (1987), मौलिक काव्य संग्रह, साहित्य अकादेमी पुरस्कार, 1995.
७. लहरीदशकम् (1992), मौलिककाव्यसंग्रहः, कालिदास पुरस्कार, उ.प्र. संस्कृत अकादेमी
८. गीतधीवरम् (1996)
९. प्रेक्षणकसप्तकम् (1997), प्रतिभा प्रकाशन, दिल्ली।
१०. संक्षिप्तनाट्यशास्त्रम् (1989), प्र. अक्षयवट प्रकाशन, इलाहाबाद।
११. आयतिः – संस्कृत काव्य संग्रह (1989), प्र. संस्कृत परिषद्, सागर।
१२. प्रख्या भाग 1, (1989), प्र. वही।
१३. षोडशी संस्कृत काव्य संकलन (1992), प्र. साहित्य अकादेमी, दिल्ली।
१४. Indian Traditions in Linguistics (Jt. Ed. 1992). प्र. प्रतिभा प्रकाशन 29/5 शक्तिनगर दिल्ली।
१५. प्रख्या – भाग –2 (1995), प्र. वही।
१६. Kautilya's Arthas'astra and Modern World, 1997 प्रतिभा प्रकाशन, दिल्ली।
१७. Re- Organising Indian S'astric Traditions -1998), प्र. स एव।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१८. A New Bibliography of Sanskrit Drama. (Jt-Ed.). 1998

१९. आखर अरथ अलंकृति नाना (तुलसी काव्य पर परिसंवाद, सहसम्पादन) डॉ. हरीसिंह गौर विश्वविद्यालय, सागर

२०. Vanmayi K.K. Chaturvedi fel. Vol. 1998

२१. संस्कृत वाङ्मय का बृहत् इतिहास (काव्यखंड) संपादित प्र. उ.प्र. संस्कृत संस्थान, लखनऊ 1997।

२२. संस्कृत साहित्य परिचय, प्रतिभा प्रकाशन दिल्ली, 1998

२३. A Bibliography of Alankaras'āstra , (प्रकाश्य)।

२४. Turning Points in Indian S'astric Traditions.

२५. Vedic Foundations of Indian S'astric Traditions, (प्रकाश्य)।

२६. महासूक्तिसंग्रह (काव्यखंड) – संस्कृत अकादेमी दिल्ली द्वा' प्रकाश्य।

२७. आधुनिक संस्कृत साहित्य (प्रकाशय)

२८. उपाख्यानमालिका (मौलिक संस्कृत रचना)

२९. प्रख्या भाग – 3

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सागरिका

संस्कृतत्रैमासिकी

LIBRARY
Gurukul Kangri Vishwavidyalaya
HARDWAR

चतुस्त्रिंशद्वर्षे तृतीयोऽङ्कः

३४/३
विक्रमसंवत् २०५६

सागरिकासमितिः
संस्कृत विभागः
डॉ.हरीसिंहगौरविश्वविद्यालयः, सागरम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ीमदादिशङ्कर-भगवत्पादानामवतारकालस्य
ुवतार-तिरोभाव-स्थानयोश्च पुनरीक्षणम्

अच्युतानन्दः

श्रुतिस्मृतिपुराणानामालयं करुणालयम् ।
नमामि भगवत्पादं शङ्करं लोकशङ्करम् ।।

ीमत्परमहंस-परिव्राजकचार्याः जगद्गुरु-श्रीमच्छङ्करभगवत्पादाः लोकानुजिघृक्षया ः सनातनधर्मद्वेषिभिश्च विनाशोन्मुखं नीयमानस्य वैदिकसनातनधर्मस्य संरक्षणाय ः। यदुक्तं कविकुलतिलकेन महाकविकालिदासेन "भवो हि लोकाभ्युदयाय " (रघु. ३.८४) तद् याथार्थ्येन सङ्गच्छते भगवत्पादानामाविर्भावविषये। वद्गीतायाञ्चोक्तं हि भगवता वासुदेवेन -

"यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ।।
परित्राणायसाधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ।।इति (गीता. ४.७-८)

ीमद्भगवद्गीताभाष्योपक्रमणिकायां भगवत्पादैश्चोच्यते "दीर्घेण कालेन अनुष्ठातृणां ावाद् हीयमान-विवेक-विज्ञानहेतुकेन अधर्मेणाभिभूयमाने धर्मे, प्रवर्द्धमाने चाधर्मे, जगतः परिपिपालयिषुः स आदिकर्त्ता नारायणाख्यो विष्णुर्भौमस्य ब्रह्मणो ब्राह्मणत्वस्य रक्षणार्थं ासुदेवांशेन किल सम्बभूव, ब्राह्मणत्वस्य हि रक्षणेन रक्षितः स्याद्वैदिको धर्मः, ावाद् वर्णाश्रमभेदानाम्" इति च भगवतः विष्णोः तदंशजन्मनां महापुरुषाणां वा स्य यानि यानि कारणानि प्रतिपादितानि, तान्येव भगवत्पादानां श्रीमच्छङ्कराचार्याणाम् वस्य कारणानीति वक्तुं शक्यते। अत्यन्तं विपर्यस्तासीत्तदानीन्तनभारतवर्षस्य धार्मिकी ृकी च स्थितिः । नास्तिकानां चार्वाक-जैन-बौद्धानां म्लेच्छानां (यवनानां) च त्रे सस्पर्द्धाभियानेन भारतीयासंस्कृतिः सनातन-वैदिकधर्मश्च नितरामुद्वेलितावस्थ । दिने दिने परिवर्धिष्णूनां म्लेच्छाचाराणां कुज्झटिकया समं भारतीयधर्माकाशे चिन्तनपरम्परा दर्शनधारा च क्षीणालोका वर्तिकेव मन्दप्रकाशा समपद्यत। तस्मिन् काले ध्वंसिनः सूर्यस्येव श्रीमच्छङ्करभगवत्पादानामाविर्भावः समजनि। दर्शनजगति तेषां ृत्वेन पुनः प्रतिष्ठिताभूद् औपनिषदद्वैतचिन्तनपरम्परा। आसन् तावद्भगवत्पादाः सूक्ष्मद्रष्टारः आध्यात्मिकचैतन्योन्मीलकाः धर्मस्य संस्कृतेश्च पुनरुन्मीलने कारिणश्चेति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

औपनिषद्दर्शने लब्धप्रतिष्ठेष्वाचार्येषु श्रीमच्छङ्करभगवत्पादाः कनिष्ठिकाधिष्ठिता इत्यत्र नास्ति संशयलेशोऽपि। किन्तु खेदस्य स्थानमिदं यत्संस्कृतसाहित्यजगति प्रथितयशसां वाल्मीकि-व्यास-भास-कालिदास-प्रभृतीनामिव श्रीमच्छङ्कर-भगवत्पादानामपि जीवनकालः अद्यापि पण्डितेषु ऐतिहासिकेषु च विवादस्य विषयः वरीवर्ति। भगवत्पादानां जीवनकाले प्राच्यपाश्चात्त्यपण्डितानामितिहासविदां च मध्ये मतभेदाः दरीदृश्यन्ते। ऐतिहासिकानां सर्वेषु मतेषु परिशीलितेषु श्रीमतां शङ्कराचार्याणां कालः क्रैस्तोः प्राक् षष्ठशतकस्य (६०० ई.पू.) क्रिस्तोपरं दशमशतकस्य च मध्ये महदन्तरे विवदमानत्वेन वर्तते। तस्मान्निश्चितधिया न किञ्चिदपि वक्तुं शक्यते विषयेऽस्मिन्। यद्वदति डङ्कन्-ग्रीन्लेस्-महोदयः "Let us leave it at that. then; to be honest, we must, as with so many other Indian dates, say frankly we do not know when Śaṅkara lived; but we may make bold to add that it seems to have been somewhere between A.D. 350 and 800."

संक्षेपतः श्रीमच्छङ्करभगवत्पादानां कालविषये विदुषामितिहासविदां च विविधानि मतानि अधस्तात् संगृह्यन्ते।

(१) मेकनजीमहोदयानां मते - ५०० ई.
(२) राजेन्द्रनाथघोषमहोदयानां मते - ६८६ ई.
(३) श्रीतेलङ्ग-तिलक-बलदेवउपाध्याय-महोदयानां च मते - ६८८ ई.
(४) मैक्समूलर-श्रीकृष्णस्वामी-के. वी. पाठक महोदयानां च मते - ७८८ ई.
(५) रामावतारशर्मणां मते - ७७९ ई. तः ८१३ पर्यन्तम्.
(६) हागसन् महोदयानां मते - ८०० ई.
(७). कोलब्रुक महेदयानां मते - ८००-९०० ई.
(८). टेलर्-महोदयानां मते - ९०० ई.।

एतानि तथाच पुराणादिषु प्रतिपादितान्यन्यानि च कानिचिन्मतान्यवलम्ब्य श्रीमच्छङ्कर-भगवत्पादानां जीवनकालम्, अवतारतिरोभावयोः स्थानं चाधिकृत्यात्र किञ्चिन्निरूप्यते। श्रीमच्छङ्करभगवत्पादानां कालविषये विवदमानानि मतानि द्विधा वर्गीकर्तुं शक्यन्ते - (१) क्रिस्तोः पूर्ववर्तित्ववादः, (२) क्रिस्तोः परवर्त्तित्ववादश्च। तत्राद्यवादे पुराणेषु प्रतिपादितानि मतानि साम्प्रदायिकैरङ्गीकृतानि मतानि चोपस्थाप्यन्ते। द्वितीयवादे पुनः सामान्यतया आधुनिक-प्राच्यपाश्चात्त्येतिहास- विदां मतानि उपन्यस्यन्ते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्तोः पूर्ववर्त्तित्ववादाः

१. श्रीमच्छङ्करभगवत्पादानाम् उत्पत्तिकालमधिकृत्य विचारे प्रवर्त्तमाने प्रथमतः ...ानि दृष्टिपथमवतरन्ति। यथा कलेः द्विसहस्रवर्षेषु व्यतीतेषु श्रीमदाचार्याणाम् ...ारोऽभूदिति *शिवरहस्ये* उच्यते :

कल्यादिमे महादेवि सहस्रद्वितयात्परम्।
सारस्वतास्तथा गौडा मिश्राः कर्णाजिनाः द्विजाः।।
आममीनाशना देवि ह्यार्यावर्त्तनिवासिनः।
औत्तराविन्ध्यनिलया भविष्यन्ति महीतले ।।
शब्दार्थज्ञानकुशलास्तर्ककर्कशबुद्धयः।
जैना बौद्धा बुद्धियुक्ता मीमांसानिरताः कलौ।।
वेदचोदितवाक्यानामन्यथैव प्ररोचिकाः।
प्रत्यक्षवादकुशलाः शल्यभूता कलौ शिवे ।।
मिश्राः शस्त्र-महाशस्त्रैरद्वैतच्छेदिनोऽम्बिके।
कर्मैव परमं श्रेयो नैवेशः फलदायकः।
इति युक्तिपरामृष्टैर्वाक्यैरुद्बोधयन्ति च।।
तेन घोरकुलाचाराः कर्मसारा भवन्ति च।
तेषामुत्पाटनार्थाय सृजामीशे मदंशतः।
केरले शशलग्रामे विप्रपत्न्यां मदंशतः।।
भविष्यति महादेवि शङ्कराख्यो द्विजोत्तमः।। इति ।

...श्रीमद्भगवत्पादानां जन्मकालः क्रि.पू. ११०२ वत्सर इति सिद्ध्यति ।

२. काशीस्थकैवल्यधामनिवासिनां श्रीकृष्णानन्द-सरस्वती-स्वामिमहाभागानां मतानुसार ...द्भगवत्पादानां कालः ततोऽपि प्राचीन इति प्रतीयते। तथाहि श्रीमच्छङ्करभगवत्पाद-...चितस्य नास्तिकादिमतनिरसनपरस्य शारीरकभाष्यस्य जगति प्रसारद्वारा ...च्छङ्कराचार्याणां दिग्विजये च सुधन्वराजः साहाय्यमकरोदिति केचिदभिप्रयन्ति। ...न्तं क्षत्रियं कुलम्" इत्युक्तेर्नन्दैरेव क्षत्रियकुलस्य समाप्तेः ततः परं क्षत्रियाणामभावात् ...नः क्षत्रियत्वं न स्यात्। किन्तु. क्षत्रियाणामेव धनुर्धारित्वेन प्रसिद्धेः सुधन्वेति ...ऽन्वर्थत्वसमर्थनाय सुष्ठुधनुर्धारित्वे उक्ते, तस्मिन् क्षत्रियत्वमप्यर्थात् सिद्ध्यति। एवं ...दैभ्यः प्राक् तस्य सुधन्वनः स्थितिरिति कल्प्यते। श्रीमच्छङ्करभगवत्पादाः ...ानमवलम्ब्य दिग्विजयं कृतवन्तः इति तु प्रतिपादितपूर्वम् । तदुक्तमभियुक्तैः -

अवलम्ब्य सुधन्वानमाचार्यैर्दिग्जयः कृतः ।
तमेव तु समालम्ब्य होरा ज्ञेया मनीषिभिः ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दुर्धन्वापि यदा नास्ति का कथा स्यात्सुधन्वनः।
नन्दात्प्रागेव विज्ञेयो सुधन्वा शङ्कर-गुरुः ।। इति।

नन्दोत्पत्तिकालस्तावत् -

यदा मघाभ्यो यास्यन्ति पूर्वाषाढां महर्षयः ।
तदा क्षत्रान्तकारी तु नन्दो राजा भविष्यति ।।

इति परीक्षितं प्रति भविष्यार्थस्य शुकेनोक्तेरिदानीं मघासु ये सप्तर्षयस्ते यद पूर्वाषाढां प्राप्नुवन्तीत्युक्त्वा प्रतिनक्षत्रं सप्तर्षीणां शतवर्षप्रकारेण स्थितिरि मघामारभ्य पूर्वाषाढा-नक्षत्रस्यैकादशसंख्यावत्त्वेन तत आरभ्य सहस्रवर्षेषु य किञ्चिदधिकसहस्रवर्षेषु नन्दानाम् उत्पत्तिरित्युक्तेः (कलेः१६९०तम-वर्षा प्राक्तनः कालः सुधन्वन इति सिद्ध्यति। अतः श्रीमच्छङ्करभगवत्पादानामपि त एव काल इति (१३१२ ई.पू.) सुतरां सिद्ध्यति ।

१.१.३: *जिनविजय*-ग्रन्थोक्तदिशा युधिष्ठिरशकस्य सप्तपञ्चाशदुत्तरैकशताधिक द्विसहस्रतमे (२१५७) रक्ताक्षिवर्षे माघे कुम्भमासे कृष्णपक्षे चतुर्दश्यां निशी (सूर्यचन्द्रमसोः कुम्भे स्थितयोः) सोमवारे (९८२ ई.पू.) श्रीमच्छङ्करभगवत्पाद विश्वजिन्नाम्नः पितुरम्बिकानाम्न्यां मातरि चिदम्बरे प्रादुरभूवन्। तथा स्ववय द्वात्रिंशे युधिष्ठिरशकस्य २१८९ तमे दुर्मुखवर्षे मार्गशीर्षे शुक्लपक्षे त्रयोदश्य सोमवासरे सायाह्ने श्रीमद्भगवत्पादाः कैलासमगच्छन् । तदुक्तं जनविजये -

ऋषिर्बाणस्तथाभूमिर्मर्त्याक्षो वाममेलनात् (२१५७)।
एकत्वेन लभेताङ्कस्ताम्राक्षस्तद्धि वत्सरः।।
विश्वजिच्च पिता यस्य विख्यातश्च चिदम्बरे।
तस्य भार्याम्बिकादेवी शङ्करं लोकशङ्करम्।।
प्रसूता सर्वलोकस्य तारणाय जगद्गुरुम्।
शङ्करेण निशीथे हि स्वकीयेन च तेजसा।।
ब्रध्नवत्काशितं सर्वं सूत्यगारं स्वलीलया।
वामाशयने ब्रध्नस्य माघे कृष्णे शुभे दिने।।
चतुर्दश्यां निशीथे तु पुष्पवन्तौ तदा घटे।
ग्लौवासरे प्रादुरासीद्वादकृच्छङ्करो महान्।।
पश्चात्पञ्चदशवर्षे शङ्करस्य गते सति।
भट्टाचार्यकुमारस्य दर्शनं कृतवान् शिवः।
द्वात्रिंशे वर्षके ज्ञेया स्थितिरासीद्धिमालये।
शङ्करस्य शरीरस्यावसानमभवत्तदा।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नन्दोवसुर्भूमिनेत्रे मेलने शक उत्तमः।
ज्ञातव्यः पाण्डुपुत्रस्य जातो वामेन वै तदा।।
दुर्मुखे मार्गशीर्षे च शुक्लपक्षे त्रयोदशे।
सोमप्रदोषे सायाह्ने कैलासं शङ्करो गतः।। इति ।

१.१.४. जनार्द्दनपण्डिताः स्वकृते *ग्रन्थमहोदधौ* द्वापरान्ते स्थितस्योत्पन्नस्य वा ब्रह्मसूत्रकृतो व्यासस्यान्तरेभ्यः २५०० वर्षेभ्यः परं (प्रायः ६०२ ई.पू) श्रीमच्छङ्कर-भगवत्पादानामवतार आसीदिति प्रतिपादितवन्तः।

१.१.५: सूर्यवंशे अष्यदशरुद्रवर्मणः पुत्रे विहारस्य (नास्तिकानां मठस्य) निर्मातरि बौद्धमूर्त्तिसंस्थापके वृषदेवे कलेरष्टचत्वारिंशदुत्तरपञ्चशताधिक-द्विसहस्त्रतमवर्षे (२५४८ = ५५४ ई.पू.) नेपालाधिपत्यं कुर्वति श्रीशंङ्कराचार्यो नेपालमगच्छदिति, तत्र च (कलेः २५४८) बौद्धधर्मस्य समूलमुन्मूलनमकरोदिति पण्डित-भगवान्-लाला-इन्द्रजीनामानः स्वकृते *नेपालदेशीयेतिहासे* आहुः। अनेन श्रीमच्छशङ्कर-भगवत्पादानां कालः क्री. पू. षष्ठशतकस्य मध्यभाग इति सुतरां सिद्ध्यति ।

सम्प्रदायानुरोधेन श्रीमद्भगवत्पादानां कालः

१.२.०. भगवत्पादाः श्रीमच्छङ्करचार्यवर्याः देवतात्मनः हिमालयादा-कन्याकुमारीं यावत् तथा च लीलाविग्रहभगवत्कृष्णपदरेणुरञ्जितायाः द्वारकापूर्य्याः पुरुषोत्तमक्षेत्रं श्रीजगन्नाथधामं यावत् समग्रममुं भारतवर्षं धर्म-दर्शन-संस्कृतिमय्या त्रिगुणात्मिकया रज्ज्वा संघटय्य चतसृषु दिक्षु चतुरो मठान्, भारतनाभितुल्ये काञ्चिपुरे चैकं मठं संस्थाप्य तद्द्वारा दर्शनपरम्परायाः निरवच्छिन्नस्त्रोतस्विनीं प्रवाहंयामासुः। परन्तु मठानां चैतेषां परम्परानुरोधेन भगवत्पादानां जीवनकालमधिकृत्य विवाद एव दरीदृश्यते । तथाहि :--

१.२.१: काञ्ची-कामकोटीपीठानुसारेण आचार्याणां श्रीमद्भगवत्पादाना-मार्विर्भावः २५९३ कलियुगाब्दे (५०९ ई.पू.) समजनि । तथा च तेषां तिरोभावः २६२५ कलियुगाब्दे (४७७ ई.पू.) द्वात्रिंशद्वयोऽवस्थायामभूत्। कामकोटिमठा-म्नायानुसारेण तस्य पीठस्य पीठाधिपतिषु आचार्येषु पञ्च आचार्याः शङ्कर-नामधेया आसन्। तेषां तिरोधानं भिन्नभिन्नकालेष्वभवत्। आद्यशङ्कर-भगवत्पादानां तावत् २६२५ कलियुगाब्दे, कृपाशङ्करनाम्नां पीठाधिपतीनां क्रि.प. ६९ तमेऽब्दे, उज्ज्वल-शङ्करनाम्नां क्रि.प. ३६७ तमेऽब्दे, मूकशङ्करनाम्नां तिरोभावः क्रि.प. ४३७ तमेऽब्दे, तथा च अभिनवशङ्कराचार्यनाम्नां तिरोभावः क्रि.प. ८४० तमेऽब्दे समपद्यत।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ृतेष्वन्तिमाः चत्वारः कामकोटिपीठधिपतयः सर्वज्ञात्ममुनेः क्रमशः सप्तम-चतुर्दश-ष्टादश-षट्त्रिंश-क्रमसंख्यकाः बभूबुः। अद्यतना ऐतिहासिकाः श्रीमच्छङ्करभगवत्पादानां ालः क्रि.७८८ इति यदभ्युपगच्छन्ति, तद्वस्तुतः पूर्वोक्तेषु पञ्चस्वाचार्येषु न्तिमस्याभिनवशङ्कराचार्यस्याविर्भावकालोऽस्ति। अस्याविर्भावः चिदम्बरे अभूत्। अयं ाश्मीरनरेश-जयापीडविजयादित्यस्य समकालिकः आसीत्। तस्य राज्ञः सभापण्डितेन ाक्पतिभट्टेन शङ्करेन्दुविलाससंज्ञको आचार्यस्यास्य जीवनचरितात्मको ग्रन्थो ेरचितः। एतज्जीवनचरितम् आद्यशङ्करभगवत्पादानां चरितेन समं तथा साम्यं बहति ाथा अद्यतना विद्वांसः ऐतिहासिकाश्च भ्रान्ताः सन्तः आद्यशंकरभगवत्पादानां स ावाविर्भावकालः (७८८ ई.) इति प्रत्यवतिष्ठन्त इति ।

.२.२. द्वारकामठपरम्परानुरोधेन श्रीमच्छङ्करभगवत्पादानामवतारः कल्यब्द २६३१ मेऽभूदिति ज्ञायते। एवञ्च काञ्ची-द्वारका-मठयोः परम्परानुरोधेन आचार्याणां कालः क्रि.पू. पञ्चमशतकम् (५०० ई.पू.) इति निर्दिष्टमस्ति । किन्तु उभयोः मतयोरिदमन्तरं यत् ाञ्चीमठरीत्या यस्मिन् वर्षे (४७७ ई.पू.) आचार्याणां तिरोभावोऽभूत् ततः षड्वर्षेभ्यः प्राक् ारकामठरीत्या (४७१-ई.पू.) आचार्याणामाविर्भाव समजनि इति ।

.२.३. कलेः एकविंशत्युत्तरसप्तशताधिकद्विसहस्रतमे वर्षे (२७२१) सर्वविश्वजिन्नाम्नि ंवत्सरे पुष्यमासे पञ्चम्यां पञ्चग्रहेषूच्चस्थितेषु शुभे लग्ने श्रीमच्छङ्कराचार्याणा-वतारः। तद्वदन्ति सदानन्दस्वामिपादाः स्वकीये *शङ्करदिग्विजये* (श्लो. ३३,३४)

यमे द्वाविंशति शके सप्तशद्-द्वि(=शतीद्वि)सहस्रके।
अब्दे सर्वजिते जातः सह वै पञ्चमी दिने।।
सुमुहूर्ते शुभे लग्ने ह्युच्चस्थग्रहपञ्चके।
सा सती सुषुवे बालं शङ्कराख्यं जगद्गुरुम् ।। इति ।

.२.४. माधवाचार्यैः स्वकृते *शङ्करदिग्विजये*

"लग्ने शुभे शुभयुते सुषुवे कुमारं
श्रीपार्वतीव सुखनी शुभवीक्षिते च।
जाया सती शिवगुरोर्निजतुङ्गसंस्थे
सूर्ये कुजे रविसुते च गुरौ च चन्द्रे।। इति (४.२०)

अनेन श्लोकेन श्रीमच्छङ्करभगवत्पादानां य आविर्भावकालः प्रतिपादितोऽस्ति स्य ज्योतिष-शास्त्रदृष्ट्या पर्यालोचनया श्रीमद्वेङ्कटाचलशर्माणः सोऽयं कालः कलेः ञ्चाधिकषट्शततमो(६०५) वत्सरः अथवा कलेः पञ्चदशोत्तराष्टशताधिक- द्विसहस्रतमो २८१५) वत्सर इति प्रतिपादयन्ति। यथा - "मेषे रविः, कर्के चन्द्र इत्याभ्यां शाखशुक्लपञ्चमीति सिद्धम्। एवं ग्रहाणां स्थितिर्गणने कलौ कालद्वयं दृश्यते, तत्राद्यः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कलौ पञ्चाधिकषट्शततमे (६०५) वर्षे कर्कलग्नं तत्र चन्द्रः, मेषे सूर्यबुधगुरुशुक्रराहवः, मकरे मङ्गलः, तुलायां शनिकेतू इति। द्वितीयस्तु कलौ पञ्चदशोत्तराष्टशताधिकद्विसहस्रतमे वर्षे (२८१५) कर्कटलग्नं, तत्र गुरुः, मेषे रविः, तुलायां शनिः, मकरे चन्द्रमङ्गलाविति चेति"। अनेन श्रीमद्भगवत्पादानामाविर्भावः क्रि.पू. २४९७ तमेऽब्दे अथवा क्रि.पू. २८७ तमेऽब्दे समजनीति ज्ञायते।

१.२.५. विक्रमाब्दस्य पञ्चदशवर्षे (४२ ई.पू.) श्रीमच्छङ्करभगवत्पादानामाविर्भावः तथा च द्वाविंशे विक्रमाब्दे पार्थिववर्षे वैशाखे शुक्लतृतीयायां श्रीमदाचार्यैः सन्न्यासः स्वीकृत इति श्रीपण्डितकृष्णलालगोविन्दरामदेवाश्रमिविरचिते *शृङ्गेरी-गुरुपरम्परा* ग्रन्थे, '*श्रीशङ्कराचार्यनो समय*' नामके गुर्जरभाषामये ग्रन्थे च निर्दिश्यते।

एतावता श्रीमच्छङ्करभगवत्पादानां जन्म कालविषये प्रतिपादितानि दश मतानि आधुनिकेभ्य ऐतिहासिकभ्यो न रोचन्ते। एतेषां मतानामनङ्गीकारे ते बह्वीः युक्तीः प्रदर्शयन्ति। केचित्तु "पुराणमित्येव न साधु सर्वम्" इति कालिदासोक्तिं पुरस्कृत्य सर्वमप्येतदुपहसन्ति।

क्रिस्तोः परवर्त्तित्ववादाः

२.१.१. बहुभिरैतिहासिकैः प्रमाणैः क्रिस्तोः परमेव श्रीमच्छङ्करभगवत्पादाः सम्बभूवुरिति। वादोऽयं यद्यपि सिद्ध्यति साधुतरम्, तथापि वादेऽस्मिन् तत्र तत्र बह्व्यः विप्रतिपत्तयः दरीदृश्यन्ते। तथाहि दक्षिणदेशस्य स्कन्दपुरनृपतेः हस्तलिखित-*कोङ्गदेशेतिहास*-ग्रन्थात् क्रिस्तस्य १७८ ईसवीये वर्षे स्थितस्य विक्रमदेवचक्रवर्त्तिनः समये श्रीमच्छङ्कराचार्या अभूवन्निति प्रतिपादयति श्रीमद्वेङ्कटाचलशर्मा इति । (द्र. शा.मी.भा. भू.पृ.५४)

२.१.२. "*केरलोत्पत्ति*" संज्ञके ग्रन्थे श्रीमच्छङ्करभगवत्पादानां समयः ३५०१ कलियुगाब्दः (४०० ई.) इति निश्चितं वर्त्तते। मतेऽस्मिन् वैशिष्ट्यान्तरं विद्यते यत् श्रीमद्भगवत्पादानां तिरोधानं ३८ वर्षानन्तरमभूदिति। किन्तु भगवत्पादानां जीवनकालः ३२ वर्षात्मक इति सम्प्रदायसम्मतः इतिहासप्रसिद्धश्च वर्त्तते।

२.१.३. भगवत्पादाः श्रीमच्छङ्कराचार्याः स्वीये *शारीरके भाष्ये* (२.१.१८) तथा च *छान्दोग्योपनिषद्भाष्ये* (३.१९.१) पूर्णवर्मणः नाम निरदिशन्। तदनुरोधेन तेषां समये भारते पूर्णवर्मनामको राजा वस्तुत आसीदित्यनुमिनुमः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किन्तु इतिहासे बभूबुः पूर्णवर्माणो बहवः। बहुषु तेष्वेकः पूर्णवर्मा त्रयोदशोत्तर-षट्शतकाब्दादारभ्य (६१३ ई.) पञ्चत्रिंशदुत्तरषट्शतक्रिस्ताब्दपर्यन्तं (६३५ ई.) मगधराज्याधिपो बभूवेति केचित्। अयं क्रैस्तषष्ठशतकान्तावधि (६०० ई.) मगधभूवं शशासेति चान्ये। अयमशोकवंशेऽन्तिमो राजेति हुयेन्सिंगनाम्ना चीनदेशीयेन पान्थेन स्व-प्रवाससामयिकविषयचरित्रे उक्तः। अयं च पान्थः भारतवर्षे ६२९तमक्रिस्तवर्षादारभ्य ६४५तमक्रिस्तवर्षपर्यन्तमासीत्। सः बहून् देशान् भ्रमन् मगधे ६३७-६३८तमे वर्षे न्यवसत्। किन्तु तदानीमनेन पूर्णवर्मणस्तद्वंश्यानां वा दर्शनाय प्रयत्नः न कृतः। तेन पूर्णवर्मा तदा न बभूवेति ज्ञायते। एवं च पूर्णवर्मा क्रिस्त-६३७-तमवर्षात्प्रागेव मृत इति षष्ठशतकान्ते सप्तमादौ वा सोऽभूदिति प्रतीयते। अतएव तत्समकालिकत्वेन श्रीमदाचार्याणां स एव समय इति केचिद्।

२.१.४. श्रीयुक्तराजेन्द्रनाथघोषमहाशयाः बहुभिः प्रमाणैः श्रीमच्छङ्कर-भगवत्पादानां काल ६०८ शकाब्दः (६८६ ई.) इति प्रतिपादयितुं श्लाघनीयं विचारं प्रस्तुतवन्तः स्वीये *'आचार्य शङ्कर ओ रामानुज'* नामधेयग्रन्थे[1]। तैः भगवत्पादानां जन्मकुण्डल्यादिकं निरणायि। तदनुसारं भगवत्पादानां स्थितिकालः ग्रहादीनां गणनं कृत्वा ३४ वर्षपरिमितं तेषामायुरिति प्रतिपादितम्। तेन श्रीमद्भगवत्पादाः चतुस्त्रिंशद्वत्सरे स्वपाञ्चभौतिकं लीलाकलेवरं क्रि. ७२० तमेऽब्दे तत्यजुरिति ज्ञायते। दर्शयन्ति च प्रमाणम् अस्य मतस्य पुष्ट्यै *शंकर-पद्धतेः* वाक्यम् --

'युग्मपयोधिरसामित (६४२) शाके
रौद्रकवत्सर ऊर्जकमासे ।
वासर ईज्य उताचलमाने
कृष्णतिथौ दिवसे शुभयोगे ।।
शङ्करलोकमगान्निजदेहं
हिमगिरौ प्रविहाय हठेन ।। इति

अत्र 'रसा' इति पदेन एकत्वसंख्या (पृथ्वीत्वेन एकत्वस्य सिद्धत्वात्) अथवा षड्रसानामाधारेण षट्त्वसंख्या स्वीकर्त्तुं शक्यते। घोषमहाशयानां मते रसा इत्यस्य षट् (६) इति संख्यायाः स्वीकरणं युक्तियुक्तम्। तदितरसंख्यास्वीकारे असम्भवत्वदोषः आपतति। तदनुरोधेन ६४२ शकाब्द = ७२० क्रि.अब्दे श्रीमदाचार्याणां तिरोभावः समजनीति सुस्पष्टम् ।

२.१.५. वर्नेमहोदयाः *'South Indian Palaeography'* नामके ग्रन्थे (पृ. ३७-१११), तथा सिवेल महेदयाः *'List of Antiquities in Madras'* नामके

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्रन्थे (पृ. १७७) श्रीमच्छङ्करभगवत्पादानामाविर्भाव कालः क्रि. प. सप्तम-शतकम् इत्युक्तवन्तः।

२.१.६. तिलक-तेलङ्ग-बलदेवउपाध्याय-महोदयानां मते श्रीमच्छङ्कर-भगवत्पादानां कालः क्रि.६८८ शतकादारभ्य क्रि. ७२० शतकं यावदिति। अस्य मतस्य प्रामाण्यं यौक्तिकतां च उपरिष्टात्प्रदर्श्यते '**मतानां समीक्षा**' इति प्रकरणे।

२.१.७. क्रैस्तवीयाष्टमे शतके श्रीमच्छङ्कराचार्या आसान्निति वदति अध्यापक-वेबर-महाशयः[१८]।

२.१.८. जेविस् राईस् महोदयः शृङ्गेरीमठस्य गुरुपरम्परायां तत्तदाचार्याणां कालं संयोज्य शङ्कराचार्याः क्रि.प. ७४०-७३७ कालाभ्यन्तरे अभूवन्निति चिन्तयति[१९]।

प्रसिद्धं प्रचलितं च मतम्

२.२.१. श्रीमच्छङ्करभगवत्पादाः क्रि.प. ७८८तमेऽब्दे आविर्भूय द्वात्रिंशद्वर्षानन्तरं क्रि.प. ८२०तमेऽब्दे तिरोहिता अभूवन् इति मतमिदं बहुभिः प्राच्य-पाश्चात्त्यपण्डितैः इतिहासविद्भिश्चाङ्गीकृतं प्रसिद्धं प्रचलितं च वर्त्ततेऽद्यत्वे। तेष्वैतिहासिकेषु मैक्समूलर-कृष्णस्वामी-डा.के.बी.पाठक-महोदयाः मुख्यभूताः। परन्तु मतस्यास्योद्भावने संसिद्धौ च डॉ.के.बी.पाठक-महोदयाः कृतभूरिपरिश्रमा इति ज्ञायते। अध्यापकैः टीले-महोदयैरपि स्वीये '*Out-line of the History of Ancient Religion*' (पृ. १४१) नामके ग्रन्थे इदमेव मतं स्वीकृतम्। कृष्णब्रह्मानन्दविरचिते '*शङ्करविजये*' भगवत्पादानां जन्मकालविषये तथा तिरोभावविषये चेमौ श्लोकौ दृश्येते -

> निधिनागेश(भ?)वह्न्यब्दे विभवे शङ्करोदयः ।
> कलौ तु शालिवाहस्य सखेन्दुशतसप्तके ।।
> कल्यब्देऽभूदृगङ्काग्निसम्मिते शङ्करो गुरुः ।
> शालिवाहशके त्वक्षिसिन्धुसप्तमिते ह्यगात् ।। इति

इमावेव श्लोकाववलम्ब्य श्रीमद्भगवत्पादानामाविर्भावः ३८८९ कलियुगाब्दे (क्रि.प. ७८८) तथा च तेषां तिरोभावः ३९२१ कलियुगाब्दे (क्रि.८२०) अभूदिति च ज्ञायते। डॉ.पाठकमहोदयैः वेणुग्रामे (बेलगाँव) पृष्ठत्रयात्मकमेकं देवनागराक्षरैः लिखितं क्षुद्रपुस्तकं लब्धमासीत्। तत्र आचार्याणां भगवत्पादानामाविर्भाव-तिरोभावविषये एवं लिखितं दृश्यते -

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दुष्टाचारविनाशाय प्रादुर्भूतो महीतले।
स एव शङ्कराचार्यः साक्षात्कैवल्यदायकः।।
अष्टवर्षे चतुर्वेदान् द्वादशे सर्वशास्त्रकृत्।
षोडशे कृतवान् भाष्यं द्वात्रिंशे मुनिरभ्यगात्।।
कल्यब्दे चन्द्रनेत्राङ्कवह्न्यब्दे गुहाप्रवेशः।
वैशाखे पूर्णिमायां तु शङ्करः शिवतामियात्।। इति

अत्रापि चन्द्रनेत्राङ्कवह्न्यब्दे (३९२१) कल्यब्दे (क्रि.प.८२०) वैशाखपौर्णमास्यां द्वात्रिंशद्वर्षे गुहाप्रवेशं (तिरोधानं) कृतवन्तः भगवत्पादाः श्रीमच्छङ्कराचार्या इति स्पष्टं प्रतिपादितम् ।

अस्यमतस्य दार्ढ्याय अन्येषु ग्रन्थेष्वपि प्रमाणानि लभ्यन्ते। नीलकण्ठभट्टपादाः स्वीये '*शङ्करमन्दारसौरभे*'ऽपि मतमिदं स्थापयन्तः लिखन्ति --

प्रासूत तिष्यशारदामतियातवत्या-
मेकादशाधिकशतोनचतुःसहस्र्याम् ।
संवत्सरे विभवनाम्नि शुभे मुहूर्ते
राधे सिते शिवगुरोर्गृहिणी दशम्याम् ।। इति ।

अस्यार्थः - शिवगुरोः पत्नी एकादशाधिकशतोनचतुःसहस्र्याम् (४००० - १११ = ३८८९) कलियुगाब्दे विभवनाम्नि संवत्सरे वैशाखशुक्लदशम्यां शङ्करमजीजनत्। बालकृष्ण-ब्रहमानन्दकृत-'*शङ्करविजये*', '*शङ्कराभ्युदये*' तथा शङ्करगिरेः '*आचार्यस्तोत्रे*' (जगद्गुरुपरम्परास्तोत्रे) च शङ्कर-भगवत्पादाना-माविर्भावविषये एतन्मतमङ्गीकृतमस्ति। '*हिन्दु-चीन*' (काम्बोडिया) देशस्यैकस्मिन् शिलालेखेऽपि मतमिदं पुष्टिं याति।।

२.२.२. चम्पादेशस्याधिपतेः इन्द्रवर्मणः (राज्यकालः क्रि.प.८७७ - ८८९) गुरुवर्य्याणां शिवसोममहाभागानामुक्तिरियम् :-

येनाधीतानि शास्त्राणि भगवच्छङ्कराह्वयात् ।
निःशेषसूरिमूर्धालिमालालीढाङ्घ्रिपङ्कजात् ।।
सर्वविद्यैकनिलयो वेदविद्विप्रसम्भवः ।
शासको यस्य भगवान् रुद्रो रुद्र इवापरः ।।[14] (३९-४०) इति ।

अत्र स्पष्टं प्रतीयते यच्छ्रीमच्छङ्कराचार्येभ्यो श्रीशिवसोममहोदयेन सर्वा विद्या अभ्यस्ताः। एते शिवसोममहाभागाः कम्बोजाधिपतेः जयवर्मणः द्वितीयस्य (क्रि.प.८०२-८६९) मातुलपुत्रा आसन्। अत एतेषां कालः क्रि.प. नवमशतक

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति सिद्ध्यति। रवीयोक्तौ शङ्करपदेन सह भगवत्पादशब्दस्य प्रयोगाद् आद्यशङ्कर-भगवत्पादं सः सूचयतीति ज्ञायते। यद्येतत्सत्यं स्यात्तर्हि भगवत्पादानां जीवनकाल एव तेषां महिमान्वितः कीर्त्तिराशिः देशाद्देशान्तरं द्वीपाद्द्वीपान्तरं च व्याप्नोदिति निश्चप्रचम्। यतो हि महाकाशवक्षो विदीर्योड्डीयमानेन विमानेन विना, तथा चोच्चावचमुच्चलदुत्तुङ्ग-तरङ्गभङ्गभङ्गिलजलराशिं द्विधाकृत्य भीमकान्ते महासागरे गच्छता यन्त्रचालितमहानौयानेन वा विना भारतमहासागरस्य परे पारेऽवस्थितस्य कम्बोजदेशस्यैकः विद्वान् भगवत्पादानां शिष्येष्वेकतम आसीदिति कल्पनयैव कस्य सचेतनस्य लोमाञ्चितः स्यान्न शरीरम् ? श्रीशिवसोमस्य साक्षाद्गुरवः आसन् श्रीमच्छङ्करभगवत्पादा इत्यस्माद्धेतोः तेषां कालः क्रैस्तनवम-शतकस्यादिमो भागः स्यादिति कल्प्यते।

एवं च श्रीमद्भगवत्पादानां कालविषये क्रिस्तपरवर्त्तित्ववादेऽपि बह्व्यः विप्रत्तिपत्तयः दरीदृश्यन्ते इति एतावता प्रतिपादितम्। एतदतिरिक्तमपि श्रीमदाचार्याणां कालः क्रि.प.दशमशतक इति ततोऽप्यर्वाचीन इति केचन प्रत्यवतिष्ठन्ते। किन्तु वस्तुतः तादृशानां मतानां प्रामाण्यं न कथञ्चित्स्वीकर्त्तुं शक्यते इति तान्यत्र तिरस्कृतानि।

मतानां समीक्षा

३.१.०. पूर्वोक्तानां मतकदम्बकानां समीक्षया तथाचाचार्यप्रणीतग्रन्थानाम् अन्तरङ्ग-परीक्षया च भगवत्पादानां समयः क्रिस्तोः परमेवेति युक्तियुक्तं प्रतीयते। तथाचास्यां समीक्षायां तेषां जीवनकालस्य पूर्वोत्तरावधी निर्णीय तयोरन्तर्गतानां मतानां विमर्शः क्रियते।

३.१.१. श्रीमद्भगवत्पादानां कालस्यान्तिमावधिः क्रैस्तनवमशतकस्य पूर्वार्द्धमिति विमर्शनेन सिद्ध्यति। तथा हि अद्वैतमतप्रतिष्ठापकानामाचार्याणां श्रीमच्छङ्कर-भगवत्पादानां शारीरकमीमांसाभाष्यस्य प्राचीनटीकाकर्तृषु वाचस्पतिमिश्रपादाः मुख्याः। एतैः ब्रह्मसूत्रशाङ्करभाष्यस्योपरि विद्वदभिनन्दनीया पाण्डित्यपूर्णा '*भामती*'-नाम्नी टीका विरचिता। न केवलं शारीरकमीमांसाभाष्य एव एतेषां टीका राराजते, अपितु अन्येषु दर्शनग्रन्थेष्वपि एतेषां प्रामाणिकानि व्याख्यानानि विद्यन्ते। तेषां '*न्यायसूचीनिबन्ध*' संज्ञकस्य ग्रन्थस्य रचनाकालः तैः स्वयमेवैवं प्रतिपादितं यत् :-

न्यायसूचीनिबन्धोऽयमकारि विदुषां मुदे ।
श्रीवाचस्पतिमिश्रेण वस्वङ्कवसुवत्सरे ।। इति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यद्यप्यत्र विशेषतया कस्यापि संवत्सरस्य सूचना तैः न दत्ता तथापि, वस्वङ्कवसुवत्सरे (८९८) इति पदेन ८९८ विक्रमसंवदिति निश्चेतुं शक्यते ऐतिहासिकया दृष्ट्या। तदानीं तस्यैव संवत्सरस्य प्रामुख्येन भारतवर्षे सर्वत्र विशिष्य मगधदेशे प्रचलनात्। तथा हि - श्रीवाचस्पतिमिश्र-पादेभ्योऽनन्तरं मिथिलायाम् उदयानाचार्यैः तत्कृतस्य न्यायवार्त्तिकतात्पर्यटीकोपरि *परिशुद्धि*-नाम्नी टीका रचिता। सोऽयमुदयनाचार्यः *लक्षणावली* नामधेये ग्रन्थरत्ने वदति -

तर्काम्बराङ्कप्रमितेष्वतीतेषु शकान्ततः।
वर्षेषूदयनश्चक्रे सुबोधां लक्षणावलीम्।। इति

पद्यस्यास्याधारेण तर्काम्बराङ्कप्रमितेषु (९०६ शकाब्द = क्रि.प.९८४) शकसंवत्सरेषु *लक्षणावलीं* विरचितवानिति ज्ञायते। यदि नाम न्यायसूचीनिबन्धे सूचितो वर्षः विक्रमाब्दो न स्यात्तर्हि अनयोः न्यायसूचीनिबन्ध-लक्षणंावलीग्रन्थयोः रचनाकालयोः पार्थक्यं .८ वर्षमात्रं स्यात्। तावता ऐतिहासिकया दृष्ट्या उभयोः ग्रन्थकर्त्रोः समकालिकता सिद्ध्यति। तन्न युक्तम्। अतः वाचस्पतिमिश्रैः नूनं न्यायसूचीनिबन्धे विक्रमसंवत्सर एव सूचितः, स च क्रैस्तवीयनवमशतकस्य मध्यंभाग इति (८४१ ई.) सिद्ध्यति। श्रीमद्भगवत्पादाः ततः प्राक्तना इति निश्चप्रचम्।

३.१.२. श्रीमच्छङ्करभगवत्पादानामवतारकालस्य पूर्वावधिः तेषां ग्रन्थानाम् अन्तरङ्गपरीक्षया क्रिस्तोः परं पञ्चमशतकमिति निर्णीयते विद्वद्भिः। तथा हि-

३.१.२(१). श्रीमद्भगवत्पादैः स्वीये शारीरकमीमांसाभाष्ये (२.२.२८) बौद्धानां विज्ञानवादस्य खण्डनसन्दर्भे उक्तम् "नहि कश्चदुपलब्धिमेव स्तम्भः, कुड्यं चेत्युपलभते, उपलब्धिविषयत्वेनैव तु स्तम्भकुड्यादीन् सर्वे लौकिका उपलभन्ते। अतश्चैवमेव सर्वलौकिका उपलभन्ते यत् प्रत्याचक्षाणा अपि बाह्यमर्थमेवमाचक्षते 'यदन्तर्ज्ञेयरूपमपि बहिर्वदवभासत' इति"। अत्र 'यदन्तर्ज्ञेयरूपम्' इति पद्यांशः बौद्धनैयायिकस्य दिङ्नागस्य '*आलम्बपरीक्षा*' नाम्नः ग्रन्थाद् भगवत्पादैः स्वीकृतः। दिङ्नागस्य संपूर्णेयं कारिका -

'यदन्तर्ज्ञेयरूपं तद् बहिर्वदवभासते ।
सोऽर्थो विज्ञानरूपत्वात् तत्प्रत्ययतयापि च'।। इति (आलम्बपरीक्षा-६)

आचार्यदिङ्नागः वसुबन्धोः प्रधानशिष्येष्वन्यतम आसीत् । अतः तस्य कालः क्रैस्तपञ्चमशतक इति निश्चयः। तस्माच्छङ्करभगवत्पादाः न कथमपि ततः प्राक्तनाः सम्भवेयुः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३.१.२(२). श्रीमच्छङ्करभगवत्पादाः प्रमाणवार्तिकादिग्रन्थप्रणेतारं बौद्धदर्शनस्य पण्डितधौरेयं धर्मकीर्त्तिं जानन्तीति प्रतिभाति। भगवत्पादानां चतुर्षु शिष्योत्तमेषु अन्यतमाः सुरेश्वराचार्याः धर्मकीर्तेः सिद्धान्तेषु सुष्ठु परिचिता आसन् । तस्य नामधेयमपि स्वीयविद्वद्विभूतिप्राचुर्ये विशालकाये *बृहदारण्यकभाष्यवार्तिके*ऽपि स्मरन्ति सुरेश्वराचार्यपादाः :-

'त्रिष्वेव त्वविनाभावादिति यद्धर्मकीर्तिना।
प्रत्यज्ञायि प्रतिज्ञेयं हीयेतासौ न संशयः'।। इति (बृ.भा.वा. ४.३)

प्रसिद्धामिमां -

'अभिन्नोऽपि हि बुद्ध्यात्मा विपर्यासितदर्शनैः।
ग्राह्य-ग्राहक-संवित्ति-भेदवानिव लक्ष्यते'।।

इति-कारिकाम् आनन्दगिरिरपि धर्मकीर्त्तिकृतामेव प्रतिपादयति। श्रीमच्छङ्कर-भगवत्पादानां '*उपदेशसाहस्त्री*' नाम्नि ग्रन्थेऽपीयं कारिका उपलभ्यते। तस्मादिदं स्पष्टं प्रतिभाति यच्छ्रीमच्छङ्करभगवत्पादाः धर्मकीर्तेः ग्रन्थे तथा च तस्य सिद्धान्तेऽपि अबाह्या आसन्निति ।

३.१.२(३). तथा च श्रीमच्छङ्करभगवत्पादानां *ब्रह्मसूत्रभाष्ये*ऽपि (२.२.२८) धर्मकीर्तेः प्रसिद्धस्य पद्यस्य सूचना लभ्यते। वदन्ति हि भगवत्पादाः विज्ञानवादस्य खण्डनप्रसङ्गे - "इह तु यथास्वं सर्वैरेव प्रमाणैर्बाह्योऽर्थ उपलभ्यमानः कथं व्यतिरेका-व्यतिरेकादिविकल्पैर्न सम्भवतीत्युच्येत उपलब्धेरेव। न च ज्ञानस्य विषयसारूप्याद् विषयनाशो भवति, असति विषये विषयसारूप्यानुपपत्तेः बहिरुपलब्धेश्च विषयस्य। अतएव सहोपलम्भनियमोऽपि प्रत्ययविषययोरुपायोपेयभावहेतुकः नाभेद-हेतुकः इत्यभ्युपगन्तव्यम्" इति। अत्र यः 'सहोपलम्भनियम' इत्यस्य निर्देशः दृश्यते स धर्मकीर्त्तेः इमां कारिकां परामृशतीति तत्तच्छास्त्रतत्त्ववेत्तार आहुः। यथा -

'सहोपलम्भनियमादभेदो नील-तद्धियोः।
भेदश्च भ्रान्तविज्ञानैर्दृश्येतेन्दाविवाद्वये'।। इति

अस्याः कारिकायाः पूर्वार्द्धं धर्मकीर्त्तेः *प्रमाणविनिश्चये* तथोत्तरार्द्धं *प्रमाणवार्तिके* चोपलभ्यते। धर्मकीर्त्तेः कालः प्रायशः क्रै. ६३५-६५० इति स्वीकर्त्तुं शक्यते। अयं नालन्दाविहाराध्यक्षानाम् आचार्यधर्मपालानां शिष्यः, तथा तत्परवर्त्तिन अध्यक्षस्याचार्यशीलभद्रस्य सतीर्थ्य आसीत्। तस्माच्छङ्करभगवत्पादाः ततः (क्रि.प. ६५०तः) प्राक्तना आसन्नित्युक्तिर्न युक्ता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३.१.२(४). श्रीमच्छङ्करभगवत्पादाः ब्रह्मसूत्रभाष्ये (२.२.२२, तथा च २.२.२८) द्वयोः बौद्धाचार्ययोः वचनान्युद्धरन्ति। तेषु प्रथमवचनं गुणमति-विरचितमिति *अभिधर्मकोश*-व्याख्यायामुपलभ्यते। अस्य कालः सप्तमशतकस्य मध्यभागः (क्रि.प.६३०- ६४०) इति ज्ञायते। तस्माद् भगवत्पादानां श्रीमच्छङ्कराचार्याणां कालः ततोऽर्वाचीन इति सिद्ध्यति। तस्माच्छ्रीमच्छङ्करभगवत्पादानामाविर्भावः क्रैस्तसप्तमशतकस्य मध्यभागात् प्रागिति यानि मतान्युपस्थापितानि, न तान्यैतिहासिकया दृष्ट्या आस्थाभाजानीति प्रतिभाति।

३.२.१. अथ तेषां कालविषये यत्प्रसिद्धं प्रचलितं च मतं (७८८-८२० ई.) उपस्थापितमधस्ताद्, ऐतिहासिकया रीत्या तस्य प्रामाण्यमपि न युज्यते इति भाति, विप्रतिपत्तीनां बाहुल्यात् । तथा हि -

३.२.१(१). वाचस्पतिमिश्रपादानां कालः क्रि.प.८४१ इत्यधस्तान्निरूपितम्। शारीरक-मीमांसा-शाङ्करभाष्यस्योपरि तैः रचितं सुमहत्पाण्डत्यपूर्णं व्याख्यानं *भामती* नामधेयं नितरां राराजते। भगवत्पादानां जीवनकाल एव पद्मपादाचार्यैः *पञ्चपादिका*-नाम्नी व्याख्या ब्र.सू.शां.भाष्यस्योपरि रचिता, याऽधुना चतुःसूत्री-पर्यन्तमुपलभ्यते। भामत्याः *कल्पतरु*-टीकानुसारं (अमलानन्दकृता क्रि.प. १२शतके) *पञ्चपादिका*-व्याख्यायाः दोषाः भामतीकृता दर्शिताः। यथा - "शब्दादिभ्योऽन्तः प्रतिष्ठानाच्च" (ब्र.सू. १.२.२६) इति सूत्रस्य कल्पतरुकृतः अमलानन्दस्य विवृतिः "पञ्चपादीकृतस्तु वाजसनेयि-वाक्यस्याप्य आत्मोपक्रमत्वलाभे किं शाखान्तरालोचनयेति पश्यन्तः पुरुषमनूद्य वैश्वानरत्वं विधेयमिति व्याचक्षते, तद्दूषयति अतएवेति"। अन्यत्रापि ("प्रसिद्धेश्च" इति सूत्र १.३.१७. ब्र.सू.) अमलानन्दः "पञ्चपाद्यां तु रूढिरुक्ता तां दूषयति ये त्विति"। अनेन निष्कर्षेण स्पष्टतरमिदं भवति यत् भामतीकाराः वाचस्पतिमिश्रपादाः पञ्चपादिकाकर्त्तॄणां पद्मपादाचार्याणां अनन्तरकालोत्पन्नाः। किन्तु प्रचलित-मतानुसारेण उभयोः (पद्मपादाचार्य-वाचस्पतिमिश्रयोः) कालयोरन्तरं केवलं विंशतिवर्षपरिमितमिति सिद्ध्यति। किन्तु विचार्यमाणे विंशतिवर्षाणामन्तरेण शास्त्रतत्त्वानां खण्डनमण्डनार्थम् अतीव अपर्याप्तम् भाति। अपरं च तथासति उभयोः समकालिकत्वं सिद्ध्येत्। परन्तु अद्वैतसम्प्रदायानुसारं वाचस्पतिमिश्राः पद्मपादाचार्याणामवतारभूता इति परम्परागता कथा वर्त्तते । कदाचिदैतिहासिका अस्याः प्रामाण्यं नाङ्गीकुर्य्युः। किन्तु वाचस्पतिमिश्राः तदनन्तरकालभुवा इति तु निर्विवादसिद्धं मतम्।

३.२.१(२) कारणान्तरेष्वपि प्रचलितमतस्य याथार्थ्यं शङ्कनीयतां भजते। तथा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हि जैनदर्शनसाहित्यस्य पर्यालोचनया ज्ञायते यत् ७०५ शकसंमवत्सरे (क्र.प. ७८३ तमेऽब्दे) जिनसेननामधेयः जैनदार्शनिकः *'हरिवंश'* नामकं ग्रन्थं विरचितवान्। सः स्वकीये ग्रन्थे विद्यानन्दं स्मरति। विद्यानन्दोऽपि स्व-*'अष्टसाहस्री'*-नाम्नि ग्रन्थे सुरेश्वराचार्याणां बृहदारण्यक-भाष्य-वार्तिक-वचननानि उद्धरति। तेन जिनसेनात् प्राक्कालिकाः सुरेश्वराचार्या इति स्वतः सिद्ध्यति। निष्कर्षेणानेन सुरेश्वराचार्याणां कालः क्रैस्त-अष्टमशतकस्य पूर्वार्द्धमिति शक्यतेऽनुमातुम्। तेषां गुरुवर्याणां श्रीमच्छङ्कर-भगवत्पादानां समय स एव इति परिशेषात् ज्ञायते। तस्माद् भगवत्पादाना-मवतारकालः क्रि.प.७८८ तमोऽब्द इति सिद्धान्तः इतिहासविरुद्ध इवाभाति।

श्रीमच्छङ्करभगवत्पादाः तथा कुमारिलभट्टपादाः

३.२.१(३) सम्प्रदायविदां मतेन इतिहासदृष्ट्यापि श्रीमच्छङ्करभगवत्पादाः मीमांसक-धौरेयाणां कुमारिलभट्टपादानां समकालिका इति प्रतीयते। तथा हि :-

कलिन्दपुत्र्याः सजलाभ्रकान्त्याः
क्षीराभया जह्नुतनूजया च।
यत्राभवत्सङ्गतिरल्पपुण्यैः
सुदुर्लभा मुक्तिपदं जनानाम्।। इति

त्रिलोकविदितमहिमवत्योः पुण्यतोययोः स्रोतस्वत्योः गङ्गायमुनयोः सङ्गमस्थले (प्रयागे) गुरोरुन्मथनप्रसक्तं महत्तरं दोषमपाकरिष्णुः, *'यस्य प्रसादात् त्रिदिवौकसोऽपि प्रपेदिरे प्राक्तनयज्ञभागान्'* सोऽयं कुमारिलभट्टपादः प्रविशति तुषानले :-

श्रुत्वेति तां सत्वरमेव गच्छन्
व्यलोकयत्तं तुषराशिसंस्थम्।
प्रभाकराद्यैः प्रथितप्रभावैः
उपस्थितं साश्रुमुखैर्विनेयैः।।
धूमायमानेन तुषानलेन
सन्दह्यमानेऽपि वपुष्यशेषे।
सन्दृश्यमानेन मुखेन वाष्प-
परीतपद्मश्रियमादधानम्।।

****

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्यूचिवांसमथ भट्टकुमारिलं तं
ईषद्विकस्वरमुखाम्बुजमाह मौनी।
हे भट्ट कर्मविमुखान् सुगतान्निहन्तुं
जातं गुहं भुवि भवन्तमहं तु जाने ।।
सम्भावनापि भवतो नहि पातकस्य
सत्यं व्रतं चरसि सज्जनशिक्षणाय ।
उज्जीवयामि करकाम्बुकणक्षणेन
भाष्येऽपि मे कलय वार्तिकमङ्ग भव्यम् ।। इति
(श्रीशङ्करविजयमकरन्द - १५ आस्वादः)

इत्येवंरूपैः तत्र तत्रोपलभ्यमानैः प्रमाणैः भट्टपादानां समकालिकाः श्रीमद्भगवत्पादा इति निश्चप्रचं ज्ञायते। तथा च 'अष्टादशे चतुर्वेदी...' इति पद्यानुसारेण तदानीं (उभयोः साक्षात्कारकाले) भगवत्पादाः अष्टादशवर्षदेशीयाः आसन् भट्टपादास्तु वृद्धा इति ज्ञायते।

३.२.१(४). बहुभिः प्रमाणैः भट्टपादानां कालः क्रैस्तवीयसप्तमशतकस्योत्तरार्द्धमिति सिद्ध्यति। तिब्वती ऐतिहासिकः तारानाथः कुमारिलभट्टाः स्राङ्ग-सान-गाम्पो-राज्ञः (क्रि.प. ६२८-६५०) समकालभवा आसन्निति वदति। तिब्वती जनश्रुत्यनुसारं कुमारिलभट्टाः धर्मकीर्त्तेः (क्रि.६३५-५०) समकालीना आसन्। संस्कृतसाहित्यजगति प्रसिद्धनाटककर्त्ता भवभूतिः कुमारिलभट्टानामन्तेवासी आसीदितीतिहासविदः अभिप्रयन्ति। तस्य कालः क्रि.प.सप्तमशतकस्यान्तिमो भाग आसीदिति उच्यते[११]। आचार्यश्रीमच्छङ्करभगवत्पादानां कुमारिलभट्टपादानां च साक्षात्कारस्य प्रमाणसिद्धत्वात् श्रीमद्भगवत्पादानां कालः क्रि.प.सप्तमशतकस्यान्तिमः तथाष्टमशतकस्यादिमो भागः आसीदित्यभ्युपगन्तव्यम्।

३.२.१(५) भगवत्पादानां कालः क्रि.प. सप्तमशतकस्यान्तिमः तथाष्टमशतकस्यादिमो भागः इति मतमपि केषांचन प्राचीनग्रन्थानामाधारेण सिद्ध्यति। तथाच *शङ्करपद्धतेः* 'युग्मपयोधिरसामितशके' इति पद्यस्याधारेण भगवत्पादानां तिरोभावकालः ६४२ शकाब्द (क्रि.प. ८२०) इति सुस्पष्टम्। (अत्र 'रसा'पदस्य षट्त्व संख्या स्वीकारे युक्तिः पूर्वप्रदर्शिता एव)। तस्माद् यदि नाम भगवत्पादानां तिरोभावः क्रि.प. ७२० इति निर्णीयेत तर्हि तेषामाविर्भावकालः ७२० - ३२ = ६८८ क्रि.प. इति स्पष्टतरं भवति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३.२.१(६). शृङ्गेरीमठाम्नायगुरुपरम्परानिर्णीते भगवत्पादानामवतारकाले विभज्य पर्यालोच्यमाने सति मतमिदं पुष्टिं याति। तथा हीदमैतिहासिकं तथ्यं सर्वैरितिहास- विद्भिरङ्गीक्रियते यद् विक्रमाब्दस्य प्राचीना प्रचलिता संज्ञा मालवसंवद् इत्यासीत् । अस्याब्दस्य प्रचलनं उत्तरे भारते एवासीत् । प्रायशः क्रि.प. अष्टमे नवमे वा शतकेऽस्य विक्रमसंवदिति संज्ञापरिवर्तनमभूत् । किन्तु शृङ्गेरीमठस्य स्थितिः दक्षिणे भारते । यत्र तावति प्राचीने काले विक्रमाब्दस्य प्रचलनं न सम्भवेत्। तस्मात् शृङ्गेरीमठाम्नायप्रतिपादितः विक्रमाब्दः परामृशति चालुक्यवंशोत्पन्नं विक्रमसंज्ञकं नृपतिमिति वक्तुं युक्तम्। यतो हि चालुक्यराज्यान्तर्गतेषु प्रदेशेषु राजते शृङ्गेरीमठः। चालुक्यवंशीय-नृपेषु प्रथमविक्रमादित्यस्य राज्याधिरोहणकालः क्रि.प. ६७० इति स्वीक्रियते। अतः प्रतीयतेऽत्र तत्रभवतः लोकमान्यतिलकमहाभागस्यानुमानं सध्रीचीनं यत् पूर्वोक्तायां शृङ्गेरीमठपरम्परायां भगवत्पादानां कालस्य सम्बन्धः अनेनैव विक्रमादित्येन सार्द्धं बिभर्ति । तस्मात् एतदनुरोधेन भगवत्पादानामाविर्भावकालः ६७० + १४ = ६८४ क्रि.प. संवत्सरस्तथा च तेषां तिरोभावकालः क्रि.प. ७१६ तमाब्दः इति ।

३.२.१(७). कुमारिलभट्टपादानां कालानुरोधेन पूर्वं प्रतिपादितस्य भगवत्पादानां कालस्य समर्थनेनेदमपि वक्तव्यं भवति यन्महावैयाकरणः भर्तृहरिः *वाक्यपदीयम्* विरच्य वैयाकरणेषु अनवद्यकीर्त्तिभाग्बभूव। इत्सिङ्गनामधेयस्य चीनीपरिव्राजकस्य मतानुसारेण सः क्रि.प.६५१-५२ शताब्द्यां स्वर्गमलञ्चकारेति ज्ञायते। तस्य सिद्धान्तेषु 'स्फोटतत्त्वम् एकमात्रं वास्तवतत्त्वम्' इत्यादिविषयेषु न केवलं कुमारिलभट्टपादाः परिचिता आसन् अपि च स्वीय-*श्लोकवार्तिके* स्फोटवादस्य खण्डनमपि सम्यगुपस्थापितम्। तस्मात्कुमारिलभट्टपादाः भर्तृहरेः अर्वाचीनकालोत्पन्नाः इति सिद्ध्यति। तेषां कालस्तु यथार्थतः (एतदनुसारमपि) सप्तमशतकस्य मध्यभाग इति सिद्धे सति श्रीमद्भगवत्पादानामाविर्भाव कालः सप्तमशतकस्यान्तिमो भाग इति सिद्ध्यति[८]। अस्य मतस्य समर्थनं बहुषु ग्रन्थेषु दृश्यते। *भारतीय दर्शन*'-नामके पुस्तके वाचस्पतिगैरोलामहोदयैरप्यस्यैव मतस्योपस्थापनं कृतम्[९]।

३.२.१(८). प्रायशः इमामेव विचारसरणीमवलम्ब्य यद्यपि डा. टि. आर्. चिन्तामाणि-महोदयेन भगवत्पादानां कालः क्रि.प. ६५५ -६८७ इति स्वीये *The Date of Śaṅkarācārya*' नाम्नि प्रबन्धे निर्णीतम्, तथापि तत्रापरितुष्यन्तः केचन तन्मतस्य प्रामाण्यविनिश्चये परिशङ्कन्ते। यथा तस्य (टी. आर्.-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चिन्तामणि-महाभागस्य) प्रबन्धविषये स्वमतमुपस्थापयन् लिखति एस्. के. शास्त्रीमहोदयः -

"The additional date set forth in this article compel a careful consideration of the whole question. While the evidence adduced by T.R.Chintamani in favour of his view that Śaṅkara should be assigned to the latter half of the seventh century A.D. is very weighty, it can not yet be regarded as conclusive. If, as Madhusūdana Sarasvatī and Agnicit-Purusottama say in their commentary on 1- 8 of the Saṅkṣēpaśārīraka, Sarvajñātmamuni was a direct disciple of Surēśvara, if, as professor M.Hiriyanna suggested in a note in the *Indian Antiquary vol. LV*, 1926, the king referred to in the penultimate verse of the Saṅkṣēpaśārīraka could be identified with the founder of the Kollam era (824-25 A.D.) and if, as already pointed by me, the author of the *Istasiddhi* who presupposes Śaṅkara, Maṇḍana and Surēśvara should be the guru of Anadabodha, who wrote a commentary on Prakāśātman's *Śabdanirṇaya* - there still remains a tangle to be unravelled in the question of Śaṅkara's age"[२३].

३.२.१.(९). वस्तुतस्तु आधुनिकेतिहासविदः पुरातत्त्वविदश्च यया रीत्या भगवत्पादानां श्रीमच्छङ्कराचार्याणां तथान्येषां च भारतीयविदुषां कवीनां वाऽवतारकालादिविषये सिद्धान्तान् समुपस्थापयन्ति नूनं सा रीतिः श्लाघनीया विद्वद्भिः। किन्तु विषयेऽस्मिन् न किमपि निश्चितधिया वक्तुं शक्यते इति सर्वेषां निर्विवादोऽभिप्रायः। यदि नु नाम कुत्रापि स्वग्रन्थेषु तैस्तैराचार्यैस्तीर्थंकरैश्च स्वकालादिविषये किमप्युक्तं स्यात्तर्हि कृतं पर्य्यालोचनया। तदभावादधुनातनविद्वत्सु तत्तदाचार्याणां कालादिविषये विप्रत्तिपत्तयः दृश्यन्ते। तस्माच्छ्रीमच्छङ्करभगवत्पादानां कालविषये न किमपि निश्चियधिया वक्तुं शक्यते इति यदुक्तमुपक्रमे तेनैव मतेनोपसंहरणीयं भवतीति विषादस्थानमिदम्। कारणत्वेनेदं वक्तुं शक्यते यत् *The Age of Śaṅkara* नाम्नि पुस्तके टी. एस्. नारायण-शास्त्री-महोदयेन बहुभिः प्रमाणैः (शङ्करविजयादिभ्यो गृहितैः) श्रीमद्भगवत्पादानां कालः काञ्चिमठपरम्परा-स्वीकृतं (५०९-४७७ ई.पू.) समीचीनमिति प्रतिपादितम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्र तेन दर्शितेषु प्रमाणेषु सुधन्वनः *ताम्रपत्रानुशासनम्* बलवत्तर प्रमाणमिति प्रतिपादितम्। तस्य ताम्रपत्रस्यान्ते "स्वस्ति अस्तु लोकेभ्यः। युधिष्ठिरशके २६६३ आश्विन-शुक्ल १५-श्रीसुधन्वसार्वभौमः" इति ताम्रपत्रस्य कालः २६६३ यौधिष्ठिराब्दः (४७७ - ४७६ क्रि.पू.) इति स्पष्टमुक्तमेव। तेन कामकोटि-मठाम्नायस्वीकृतस्य भगवत्पादानां कालस्य अयं समयः तेषां जीवनकालस्यान्तिमवर्ष इति ज्ञायते। यद्वा भवतु समेषामेतेषां मतानां पर्यवेक्षणेन श्रीमद्भगवत्पादानां कालनिर्णये वयं किङ्कर्त्तव्यताविमूढाः स्मः। न वयं साम्प्रदायिकानां मतानि तिरस्कर्त्तुं (निरवच्छिन्न-गुरुपरम्परायाः अनुवर्त्तमानत्वात्), न वा ऐतिहासिकानां मतानि अप्रामाण्यमिति वक्तुं प्रभवामः। किन्तूपसंहारे इदं वक्तव्यमस्ति यन्निष्कर्षेण यः कालः युक्तिसम्मतः यश्चेतिहास-सम्मत इति (क्रि.प. ६८८) प्रतिपादितं तत्रास्माकं मनसि प्रत्ययो भवति तस्मात्तद्भगवत्पादानां जगद्गुरुश्रीमच्छङ्कराचार्याणां अवतारकालः स्यादिति ममाभिप्रायः। इति ।

श्रीमच्छङ्करभगवत्पादानामवतारस्थानम् ।।

४.१.१. श्रीमच्छङ्करभगवत्पादानामवतारस्थानाविषये केवलं मतद्वयं दृश्यते। एकं तावत् श्रीमद्भगवत्पादैः स्वजन्मना पवित्रीकृतः प्रदेशः केरलेषु *कालटी* संज्ञको ग्राम इति, इतरत्तु तामिलप्रदेशस्य सुप्रसिद्धं *चिदम्बरक्षेत्र*मिति। किन्तु बहुभिः प्रमाणैरद्य भगवत्पादानां अवतारस्थानं केरलेप्रदेशस्य कालटीति (कालरीति नामान्तरम्) ऐतिहासिकाः अङ्गीकुर्वन्ति। ग्रामस्यास्य नामान्तरं शशलग्राममिति केचिद्वदन्ति। केचित्तु पूर्व तावत् भगवत्पादानां वंशोद्भवाः शशलग्रामे (पन्निपुरापराभिधेऽग्रहारे) आसन् किन्तु अनन्तरं तत आगत्य ते कालटीम् अध्यवात्सु इत्याहुः। अधुनातनकाले भगवत्पादानां कालटीग्राम एव भगवत्पादानां जन्मस्थानमित्यत्र सर्वेषामितिहासविदां दृश्यते ऐक्यमत्यम्। वदत्यत्र डा. टि. एम्. पि. महादेवन् महोदयः -

"It was as if Śiva (literally meaning 'bliss') himself chose the place. Kaladi is a quiet village on the bank of the river Churna (also called Purna or Alwaye or Periyaru) in Kerala, about six miles from Alwaye town."

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४.१.२. एवमेव तत्र तत्र अस्य मतस्य समर्थकत्वेन बहूनि प्रमाणान्युपलभ्यन्ते विस्तरभयाद् विरम्यते सर्वेषां मतानां सङ्कलनात्।

४.२.१. तामिलप्रान्ते चिदम्बरक्षेत्रे भगवत्पादानामाद्यशङ्कराचार्याणामाविर्भाव इति यन्मतान्तरं दृशते तत्र वदति टी. एस्. नारायणशास्त्रि-महोदयः यच्चिदम्बरे उत्पन्नाः शङ्कराचार्याः न तावदाद्यशङ्करभगवत्पादाः, किन्तु श्रीकाञ्चकामकोटिपीठस्य अष्टत्रिंशत्तमा पीठाधिपतयः अभिनवशङ्कराचार्याः (एतेषां तिरोभावकालः ८२० ई.. एवमेतेषां जीवनचरित्रस्य बहव अंशाः आद्यशङ्करभगवत्पादानां जीवनचरित्रैः साम्यमावहन्ति। तत एव एतेषां कालादिकं आद्यशङ्करभगवत्पादानां जीवनचरित्रे आरोप्यते कैश्चित्।) तथा श्रीमद्भगवत्पादानां जन्मस्थानं कालटीग्रामः इत्यत्र नास्ति कापि विप्रतिपत्तिः इति ।

श्रीमच्छङ्करभगवत्पादनां तिरोभावस्थानम्

५.१.१. श्रीमच्छङ्करभगवत्पादानां तिरोभावस्थानमपि विद्वत्सु सम्प्रदायवित्सु ऐतिहासिकेषु च विवादास्पदमस्त्यद्यापि। मुख्यतया श्रीमद्भगवत्पादानां तिरोभावस्थानविषये तिस्रो विप्रतिपत्तयो दृश्यन्ते - (१) केरलीयपरम्परानुसारं त्रिचूरनगरं भगवत्पादानां तिरोभावस्थानमिति, (२) देवतात्मनः हिमालयस्य कैलासपर्वतः भगवत्पादानां तिरोभावस्थानमिति, (३) काञ्चीपुर्यां भगवत्याः कामाक्ष्याः अभ्यर्चनायाम् अन्तिमदिनानि व्यतीत्य तत्रैव (काञ्चीपुर्यां) भगवत्पादास्तिरोबभूवुरिति।

५.१.२. सत्स्वपि विवादेष्वेवं लोके प्रसिद्धतया सर्वैरङ्गीकृतं मतमिदं यत् स्वलीलाकलेवरस्य विलयात्प्राक् सर्वज्ञपीठं समारुरुहुर्भगवत्पादा इति। किन्तु कुत्र कं वा सर्वज्ञपीठं समारुरुहुर्भगवत्पादा इत्यपि विवादविषयो विदुषाम्। केचिद् वदन्ति प्रकृतिसुषमामण्डिताखण्डलभुवनतुल्ये भूस्वर्गे काश्मीरप्रदेशे भगवत्याः शारदायाः मन्दिरस्थं सर्वज्ञपीठं समारुरुहुस्ते इति। अपरे तावत् काञ्चीपुरे भगवत्याः कामाक्ष्या अभ्यर्चनेन स्वजीवितकालस्यान्तिमदिनानि व्यतीत्य तत्रैव सर्वज्ञपीठमारुह्य तत्रैव ब्रह्मीभावमापान्नाः भगवत्पादाः इति कथयन्ति।

५.१.३. पूर्वोक्तेषु विवादेषु सम्यक् परिशीलितेषु इत्थमालोचनीयं भवति यत् प्रथममतानुसारं त्रिचूरनगरे भगवत्पादानां तिरोभावस्य कारणमिदं स्यात्, यद् भगवत्पादानां जन्मभूमित्वेन केरलप्रदेशस्य महिमा...

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उच्यते च "जननी जन्मभूमिश्च स्वर्गादपि गरीयसी" इति। अतः ते स्वीयायाः मातृभूमिनिष्ठायाः प्रतिपिपादयिषया आत्मन अन्तिमदिनानि तत्रैव (केरले) अयापयन्, अन्ते च तत्रैव ब्रह्मीभावं ययुः भगवत्पादाः इति। गोविन्दनाथयतिप्रणीते *श्रीशङ्कराचार्यचरितम्* इति ग्रन्थेऽपि अस्य मतस्योपस्थापनं दृश्यते। तेषां मते काञ्चीसर्वज्ञपीठमधिरुह्य भगवत्पादाः कतिचन दिनानि तत्रैवोषित्वा जग्मुस्ते वृषाचलम्। वृषाचलः स्वप्राकृतिकसौन्दर्येण बिभर्ति लीलाविचित्रं रूपमिति दाक्षिणात्येषु प्रथितोऽयं पर्वतः दक्षिणकैलास इति। अतः विधिवच्छिवलिङ्ग संपूज्य स्वप्रयाणकालः समुपस्थित इति ज्ञात्वा श्रीमूलनाम्नि स्थाने भगवन्तं श्रीकृष्णं भगवन्तं भार्गवं च समभ्यर्च्य स्वलीलाकलेवरं तत्रैव तत्यजुः भगवत्पादा इति। अद्यापि तेषां पवित्रतमं समाधिमन्दिरं त्रिचूरमन्दिरादाराद्राराजते। केरलेषु अद्याप्यस्य मन्दिरस्य महती प्रतिष्ठा ख्यातिश्च वर्त्तते इति मतमेतदुपोद्बल्यते। किन्तु अस्य मतस्य पोषकानि प्रमाणानि न लभ्यन्ते प्रचुराणीति नात्र आस्थाभाजः इतिहासविदः इति।

५.२.१. द्वितीयमिदं मतं यद्धिमालयस्य देवतात्मनः कैलासपर्वतः भगवत्पादानां तिरोभावस्थानमिति। मतस्यास्य प्रसिद्धिरनन्यसाधारणी। तथाचेदं मतं बहूनामाचार्याणां सन्न्यासिनां चाभिप्रायमिति। एतन्मतानुसारं भगवत्पादाः प्रकृतिसुषमाविमण्डिते काश्मीरप्रदेशे भगवत्याः शारदायाः मन्दिरे सर्वज्ञपीठमधिरुह्य महर्षेः दत्तात्रेयस्य दर्शनार्थं तदाश्रमं प्राप्य तैः साकमुषित्वा कतिचिद् दिनानि कैलासं जग्मुः। तत्रैव च पाञ्चभैतिकं स्वलीलाकलेवरं तत्यजुरिति। मतञ्चेदं समर्थयति *गुरुवंशकाव्ये* तत्रभवान् लक्ष्मणशास्त्री महाभागः -

दत्तात्रेयं भुवनविनुतं वीक्ष्य नत्वा न्वगादीत्
वृत्तं स्वीयं सकलमपि तान् प्रेषितान् दिक्षु शिष्यान् ।
सोऽपि श्रुत्वा मुनिपतिरदादाशिषो विश्वरूपा-
चार्यादिभ्यः सुखमवसतां तत्र तौ भाषमाणौ ।। इति (३.७०)

चिद्विलासयतिविरचितात् *शङ्करविजयविलासा*दपि मतमिदं पुष्टिमेति। तथा हि

इत्युक्त्वा शङ्कराचार्यकरपल्लवमादरात्।
अवलम्ब्य कराग्रेण दत्तात्रेयः स तापसः ।।
प्रविवेश गुहाद्वारं दत्त्वाज्ञां जनसन्ततेः।
क्रमाज्जगाम कैलासं प्रमथैः परिवेष्टतम्।। इति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

५.२.२ परन्तु भगवत्पादानां सर्वज्ञपीठाधिरोहणेऽस्य मतं यत्ते श्रीकाञ्चीकामकोटीपीठे आरूढवन्तः सर्वज्ञपीठमिति। माधवाचार्यः याभ्यां श्लोकाभ्यां (१६.५१-५२) भगवत्पादानां सर्वज्ञपीठा-धिरोहणं काश्मीरे इति वर्णयति, तौ श्लोकौ राजचूडामणि-दीक्षितकृत-*शङ्कराभ्युदयस्यैव* (८.३८-३९), यत्र भगवत्पादानां सर्वज्ञपीठाधिरोहणं काञ्चीपुरे समजनीति प्रतिपाद्यते।

५.३.१. श्रीमच्छङ्करभगवत्पादानां तिरोभावस्थानविषये अन्तिममितिहाससम्मतं च मतमिदं यच्छ्रीमद्भगवत्पादाः प्रमुखान् चतुरः शिष्यान् चतसृषु दिक्षु प्रतिष्ठापितेषु चतुर्ष्वाश्रमेषु अभिषिच्य अन्ते कामकोटिपीठम् आत्मनः अन्तिमस्थानत्वेन पर्यकल्पयन्। तत्रैव कम्पातीरवासिन्याः भगवत्याः कामाक्ष्याः अभ्यर्चनेन अन्तिमं कालमयापयन्। तथा हि दृश्यते -

कम्पातीरनिवासिनीमनुदिनं कामेश्वरीमर्चयन् ।
ब्रह्मानन्दमविन्दत त्रिजगतां क्षेमङ्करः शङ्करः।। इति ।

श्रीमद्भगवत्पादाः पीठेऽस्मिन् सर्वज्ञपीठमारुह्य कैलासशिखरादानीतेषु पञ्चसु स्फटिकलिङ्गेषु श्रेष्ठं पञ्चमञ्च योगलिङ्गं काञ्चीपीठे प्रतिष्ठाप्य तस्यैव अर्चनया दिनान्ययापयन्। स्वशरीरत्यागसमये च काञ्चीपीठस्य तत्रस्थशारदापीठस्य च निर्वहणाधिकारं सुरेश्वराचार्येभ्यः समर्प्य शिवतां ययुः भगवत्पादा इति।

५.३.२. अस्यमतस्य प्रामाण्ये बहूनि प्रमाणान्युपलभ्यन्ते। सदाशिवब्रह्मेन्द्रकृतायां *गुरुरत्नमालिका*-टीकायां तथाच *गुरुपरम्परास्त्रोत्रे* भगवत्पादाः जीवनस्यान्तिमे काले काञ्च्यामवसन्निति निर्दिश्यते। यथा -

तत्र संस्थाप्य कामाक्षीं जगाम परमं पदम्।
विश्वरूपं यतिं स्थाप्य स्वाश्रमस्य प्रचारणे।। इति

५.३.३. आनन्दगिरिः *स्वशङ्करविजये*ऽपि -

"काञ्चीनगरे कदाचिदुपविश्य स्थूलशरीरं सूक्ष्मेऽन्तर्धाय सद्रूपो भूत्वा सूक्ष्मं कारणे विलीनं कृत्वा चिन्मात्रो भूत्वा अङ्गुष्ठमात्रपुरुषः तदुपरि पूर्णमखण्डमण्डलाकारमानन्दं प्राप्य सर्वजगद्व्यापकं चैतन्यमभवत्। सर्वव्यापकचैतन्यरूपेणाद्यापि तिष्ठति। स एव शङ्कराचार्यो गुरुर्मुक्तिप्रदः सताम् इति ।

५.३.४. *शिवरहस्ये*ऽपि इदमेवमतमुपस्थापितम् -

तद्योगभोगवरमुक्तिसुमोक्षयोग-
लिङ्गार्चनाप्राप्तजयस्वकाश्रमे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तान् वै विजित्य तरसाक्षतशास्त्रवादै-
मिश्रान् स काञ्च्यामथ सिद्धिमाप।। इति ।

५.३.५. *मार्कण्डेयसंहिता*यामपि कामकोटिपीठे योगलिङ्ग प्रतिष्ठाप्य तत्पूजनार्थं सुरेश्वराचार्यान् युयुजिरे भगवत्पादा इति निर्दिश्यते -

काञ्च्यां श्रीकामकोटौ तु योगलिङ्गमनुत्तमम्।
प्रतिष्ठाप्य सुरेशार्यं पूजार्थं युयुजे गुरुः।। इति
(काण्ड. ७२ परिस्पन्द ७)

५.३.६. रामभद्र-दीक्षितकृत *पतञ्जलिचरिते*ऽपि भगवत्पादाना देहावसानं काञ्चीपुरेऽभवदिति उपलभ्यते। तथा हि -

गोविन्ददेशिकमुपास्य चिराय भक्त्या
तस्मिंस्थिते निजमहिम्नि विदेहमुक्त्या ।
अद्वैतमाल्यमुपकल्प्य दिशो विजित्य
काञ्चीपुरे स्थितिमाप स शङ्करार्यः।। इति (सर्ग ८.७१)

५.३.७. न केवलं सम्प्रदायविदां मतेन भगवत्पादानां तिरोभावस्थानं काञ्चीपुरमिति प्रतिपाद्यते, किन्तु इतिहासविदोऽपि मतमिदं समर्थयन्ति। तथाहि लिखति पो. वेङ्कटेशन्-महाभागः :-

"From such varied and reliable evidence, it seems to be clear that Śrī Śaṅkarācārya mounted the throne of Omnicience at Conjeevaram, that he spent the last days of his life at Conjeevaram, left the Saradamutt, Kamakoti Pitha and Yōgēśvara Sphaṭikaliṅga in the charge of his first and foremost and favourite disciple Śrī Surēśvarācārya - the spiritual lineal descendant of the Sarvajñapīṭha hailing to this day and disappeared from human view, at the age of thirty two, having triumphantly established his advaitic doctrines over the whole of India, the glorious land of Gods and Ṛṣis".[19]

५.३.८. श्रीमच्छङ्करभगवत्पादाः काञ्चीपुरे श्रीचक्रं प्रतिष्ठापितवन्तः। न केवलं तत्र श्रीचक्रस्य प्रतिष्ठापनं तैः कृतं, परन्तु नगरस्य निर्माणेऽपि स्वीयया बुद्ध्या चातुर्यं प्रदर्शितम्, यत्राधुनापि सर्वे देवालयाः नगरस्य केन्द्रस्थलस्थितं श्रीकामाक्षीमन्दिराभिमुखं राराजन्ते[20]। तस्माद् भगवत्पादानां तिरोभावस्थानं मुक्तिक्षेत्रं काञ्चीपुरमिति निश्चप्रचम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

५.३.९. एवं बहुभिः विद्वद्भिरैतिहासिकैश्च अस्यैव मतस्योपस्थापनाद् विश्वसिमो वयं यच्छ्रीमच्छङ्करभगवत्पादाः काञ्चीपुरे स्वलीलाकलेवरं विहाय ब्राह्मीभावमापुः इति ।

उपसंहारः

६.१.१. एवं च विद्वद्वरेण्यवन्द्यमानचरणानां श्रीमच्छङ्करभगवत्पादानां चरित्रे, तथा साधनचतुष्टयसम्पन्नैः ब्रह्मात्मैक्यतत्त्वावबोधविनाशिताशेषसंसारबीजभूताविद्यैः जीवन्मुक्तैः प्रपन्ने श्रुतिस्मृतिसिद्धे प्रसिद्धेऽद्वैतसिद्धान्ते च परिशील्यमाने सति भक्त्या स्वयं नमितोत्तमाङ्गा भवन्ति विद्वांसः, प्रत्ययो भवति चान्तेऽस्मत्स्वान्ते -

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्याः सर्वमानवाः।। इति ।

अन्ते च कविवरहेमचन्द्रस्य वचनमिदं पुरस्कृत्यावेद्यते -

प्रमाणसिद्धान्तविरुद्धमत्र
यत्किञ्चिदुक्तं मतिमान्द्यदोषात्।
मात्सर्यमुत्सार्य तदार्यचित्ताः
प्रसादमाधाय विशोधयन्तु। इति शम्।

पादटिप्पणी

१. 'The Gospel of Advaita', Preface. xxx.

२. शिवरहस्ये नवमांशे षोडशेऽध्याये।

३. कलियुगारम्भः प्रायः क्रिस्तोः प्राक् ३१०२तमे वत्सरे इति परिगण्यते। ततः ३७ वत्सरेभ्यः प्राक् युधिष्ठिरस्य पट्टाभिषेकः। तस्य विजयमभिलक्ष्य शकारम्भः इति क्रिस्तोः ३१३९ वत्सरेभ्यः प्राक् यौधिष्ठिरशकारम्भः। जैनानान्तु यौधिष्ठिरशकाब्दः पूर्वमुक्तात्साम्प्रदायिकात् यौधिष्ठिराब्दात् ५०५ वर्षैरर्वाचीनः, क्रिस्तोः प्राक् २६३४ वत्सरतो गण्यते। जिनविजयोक्तेन २१५७ वत्सरमानेन ५०५ वर्षाणां संयोगे २६६२ तमे यौधिष्ठिरसंवत्सरे निर्याणमित्यापतति। (द्रष्टव्यम् - *श्रीशङ्करविजयमकरन्दः* टिप्पणी, पृ. ३९-४०)।

४. Indian Antiquary, Vol. 15, p. 41.

५. शा.मी.भा.भू., "श्रीशङ्कराचार्यचरित्रम्", पृ. ५७।

६. The Date of Sri Shankaracharya, by T.R.Cginnamani, JOR (M), Vol. III. p.48.

७. Indian Antiquary, Vol. VII. p. 282.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

८. शा.मी.भा.भू., "श्रीशङ्कराचार्यचरित्रम्", पृ. ५२-५३.

९. आचार्य शङ्कर ओ रामानुज (बाँग्ला), पृ.७८७-८०७.

१०. History of Indian Literature, p. 51. (Note).

११. Proceeding of Third Oriental Conference, p.225.

१२. The Date of Shankaracharya, by K.B.Pathak, *Indian Antiquary*, 1882, pp. 173-175.

१३. A Note on the Date of Shankara, by Nilakantha Shastri, JOR. Vol. XI. p.285. 1937.

१४. Inscription du Combodge, Ed. by G. Coedes, Vol. I, pp. 36-46.

१५. *उपदेशसाहस्री*-नाम्नः ग्रन्थस्य प्रणेतारः श्रीमद्भगवद्पादा न वेति संशयो न कार्यः, यतः तेषां साक्षाच्छिष्येण सुरेश्वराचार्येण स्व-*नैष्कर्म्यसिद्धि*-ग्रन्थे ततः बहूनि पद्यानि संकलितानि।

१६. Indian Logic, p. 303.

१७. " शाकेष्वब्दशतेषु सप्तसु दिशं पञ्चोत्तरेषूत्तरां
पातीन्द्रायुधनाम्नि कृष्णनृपजे श्रीवल्लभे दक्षिणाम्।
पूर्वं श्रीमदवन्ति-भूभृति नृपे वत्साधिराजेऽपरां
सौर्यानामधिमण्डलं जययुते वीरे वराहेऽवति।।

****

शान्तेः शान्तिगृहोचितो वंशो हरीणामयम् ।।

(बृहद्धरिवंशपुराणम्)

१८. विद्यानन्दः अकलङ्कस्य शिष्यः। पट्टाबल्यनुसारम् अयं क्रि.प. ७५१ वर्षादारभ्य चतुर्दिवसोत्तोरं द्वात्रिंशद्वर्षं (व.३२। ०४ दिनानि) यावत् आचार्यपदवीमध्यतिष्ठत्। अतोऽस्य समयः क्रैस्त-अष्टमशतकस्योत्तरार्द्धमिति वक्तुं युक्तम्।

१९. अधिकं तु द्रष्टव्यम् कुमारीलभट्टपादानां कालविषये - "श्रीकुमारिलभट्ट-पादाः श्रीप्रभाकरमिश्राश्च" by Pt. A. Chinna Swami, JOR(M), Vol. I, p. 205.

२०. वर्णातिरिक्तप्रतिविध्यमान-पदेषु मन्दं फलमादधाति।
कार्याणि वाक्यावयवाश्रयाणि सत्यानि कर्तुं कृत एष यत्नः ।।

(श्लोकवा. १३७)

२१. अधिकन्तु द्रष्टव्यम् *श्रीशङ्कराचार्य* बलदेव उपाध्याय।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२२. JOR(M), Jan-March, 1929, Vol. III, p. 43.

२३. JOR (M), Vol. III. pp. 55-56.

२४. सुधन्वनः ताम्रपत्रानुशासनं *The Age of Shankara* नाम्नि पुस्तके प्रकाशितम् (पृ. २२०)।

२५. आत्मनात्मविवेक आत्मबोधश्च, भूमिका, डा. जगदीशचन्द्र मिश्र, पृ. ८।

२६. Shankaracharya, p. 2.

२७. आचार्याणां सर्वज्ञपीठाधिरोहणमधिकृत्य द्वेधा कथाक्रमो दृश्यत इति पूर्वमेव सूचितम्। शिवरहस्ये बृहच्छङ्करविजये, प्राचीनशङ्करविजये, आनन्दगिरीये, जगद्गुरुरत्नमालास्तवे च काञ्च्यां सर्वज्ञपीठाधिरोहणं माधवीये, सदानन्दीये, गुरुवंशकाव्ये च काश्मीरे। काश्मीरमिति काञ्चीपुरी प्रसिद्धेति केचित्। तत्र प्रमाणं तु - "भूयः काञ्चीपुरं गतः। जम्बुद्वीपस्य कुर्वाणे शोभां भारतमण्डले। शस्तं काश्मीरनामानं देशं विद्योतयद् भृशम्।। कामाक्ष्या नाम वाग्देव्याः स्थानं तत्पुरमाप्तवान्"। इति गोविन्दनाथीये। व्यासाचलीयेऽपि - "जम्बुद्वीपे शस्यतेस्यां पृथिव्यां तत्राप्येतन्मण्डलं भारताख्यम्। काश्मीराख्यं मण्डलं तत्र शस्तं यत्रास्ते सा शारदा वागधीशा।।" इति। सर्वज्ञपीठाधिरोहणकथामुपक्रम्य -- "एवं निरुत्तरपदां स विधाय देवीं सर्वज्ञपीठमधिरुह्य मठे स्व-क्लृप्ते। मात्रागिरामपि तथोपगतैश्च मिश्रैः संभावितः कमपि कालमुवास काञ्च्याम्।।" इत्युपसंहारः कृत इति काश्मीराख्या काञ्चीपुरी आसीदिति केचन मन्यन्ते। (द्र. *श्रीशङ्करविजयमकरन्दः*, पृ. ३००-३०१)

२८. *शङ्करविजय*- आनन्दगिरिः, ७४ प्रकरणम्

२९. The Last Days of Sri Shankaracharya, JOR(M), Vol. I, p. 335.

३०. The Last Days of Sri Shankaracharya, JOR(M). Vol. I.

सन्दर्भाः

१. श्रीमद्भगवद्गीता।

२. रघुवंशमहाकाव्यम्।

३. शिवरहस्यम्।

४. मार्कण्डेयसंहिता।

५. बृहद्धरिवंशपुराणम्।

६. शङ्करविजय - सदानन्दस्वामी

७. शङ्करविजय - चिद्विलासयतिः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

८. शङ्करविजय - आनन्दगिरिः

९. श्रीशङ्करविजयमकरन्दः - सङ्कलयिता -शि.वि. राधाकृष्णशास्त्री । १९७८

१०. शारीरकमीमांसाभाष्यम्, (भूमिकायाम् - श्रीशङ्कराचार्यचरित्रम्- श्रीमद्वेङ्कटाचलशर्मा मुम्बय्यां क्षेमराजश्रीकृष्णदासश्रेष्ठिना प्रकाशितम् (संवत् १९६०, शके १८३५)

११. आत्मनात्मविवेक आत्मबोधश्च, (भूमिका) डॉ. जगदीशचन्द्रमिश्र, (वाराणसी १९६३)

१२. श्रीशङ्कराचार्य - बलदेव उपाध्याय ।

१३. आचार्य शङ्कर ओ रमानुज (बॉंग्ला)

१४. भारतीय दर्शन - वाचस्पति गैरोला ।

15. Sankaracharya - T.M.P. Mahadevan.

16.The Gospel of Advaita - Duncan Greenlees.

17. History of Indian Litreature.

18. Proceeding of Third Oriental Conference.

शोधलेखाः

19. The date of Śaṅkara - Journal of Oriental Research (Madras) (J.O.R.(M)) Vol - 111.

20. A note on the date of Śaṅkara, by -Nilakantha Sastry J.O.R. (M) vol - XI (1937)

२१. श्रीकुमारिलभट्टपादाः श्रीप्रभाकरमिश्राश्च, by -Pandit A. Chinna Swami Sastry J.O.R. (M) Vol - 1.

22. The last days of Śaṅkarācārya, by - Prof . Venkateshan. J.O.R. (M) Vol - 1.

23. The date of Śaṅkarācārya, by K. B. Pathak. Indian Anliquary (1882)

=======================

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वमीमांसादर्शनानुसारेण ईश्वरस्वरूपविचारः

चिर्रावूरि श्रीरामशर्मा

विदितचरमेवैतत् समेषां सङ्ख्यावतां वेदेषु पूर्व भागे कर्म, उत्तरभागे उपनिषदपरपर्याये ब्रह्म चेति। तत्प्रतिपाद्यवस्तुनः सुस्पष्टं स्वरूपं विचारमन्तरा नहि सिद्ध्यतीति तद्विचाराय अथवा तदर्थनिर्णयाय प्रवृत्ते शास्त्रे मीमांसा शब्देन व्यवह्रियेते। तत्र च कर्मविषयक सिद्धान्त- ज्ञानोपयोगि शास्त्रं पूर्वमीमांसेति ब्रह्मविषयकतत्त्वज्ञानोपयोगि शास्त्रम् उत्तरमीमांसेति च।

एवं च मीमांसा नाम विचार इत्यर्थः। यद्यपि 'मान' धातोः पूजार्थकत्वम्, तथापि 'मानेर्जिज्ञासायाम् (३.१.६ सूत्रस्थले कौमुद्यामुदाहृतम्) इति वार्तिकबलात् जिज्ञासारूपोऽप्यर्थः स्वीकार्यः। ''मान्वधदान्शान्भ्यो दीर्घश्चाभ्यासस्य'' (३.१.६) इति सूत्रेण 'मान' धातोः स्वार्थे सन्प्रत्ययः। अस्य च धातोः सन्यङनेः (६.१.६) इति द्वित्वे 'मान् मान् स' इत्यवस्थायां 'हलादिः शेषः' (७.४.६०) इति अभ्यासस्य आदिहल्शेषे 'ह्रस्वः' (७.४.५९) इत्यभ्यासह्रस्वे 'म-मान् स' इति जाते 'सन्यतः' इतीकारस्य दीर्घे 'मी मान् स' इति स्थिते नश्चापदान्तस्य झलि ' (८.३.२४) इति नस्य अनुस्वारे 'सनाद्यन्ता धातवः' (३.१.३२) इति धातुसंज्ञायाम् भावार्थे 'अ प्रत्ययात्' (३.३.१०२) इति अप्रत्यये मीमांस अ इति जाते अतो लोपः' (६.४.४८) इत्यलोपे अप्रत्ययस्य स्त्रियां विधानेन अजाद्यतष्टाप् (४.१.४) इति टापि सवर्णदीर्घे मीमांसा इति रूपं सिद्ध्यति अयं शब्दः निर्णायाविष्कारकवेदवाक्यार्थविचारे लोके व्यवह्रियते।

यद्यपि तत्रभवान् भगवान् जैमिनिः आहोस्वित् परमकारुणिको भगवान् व्यासः स्वीयं सूत्रजातं मीमांसाशब्देन न व्यवहृतवन्तौ तथापि एवंविधविचारस्य वेदे एव मीमांसाशब्दव्यवहारः श्रूयते उत्सृज्यां नोत्सृज्यां इति मीमांसन्ते इत्यादिषु।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्र भगवतो जैमिनेः सूत्रजातं वेदपूर्वभागवाक्यार्थनिर्णयाय विचारणरूपेण प्रवृत्तं सत् पूर्वमीमांसाशब्दाभिधेयत्वेन व्यवहियते।

एतेन बुध्यते यत् अस्य शास्त्रस्य वेदो विषयः। तत्रापि पूर्वोभागः। येन कर्म प्रतिपाद्यते। तदर्थनिर्णयश्च प्रयोजनम्। सत्येवं एतत्सूत्रजातस्य दुर्बोध्यतापरिहाराय तत्रभवता सम्प्रदायपरिरक्षणकुशलेन शबरस्वामिना भाष्यमुद्भावि। तत्रापि दुर्बोध्यता परिहाराय अपि च उक्तानुक्त दुरुक्तविवेचनाय च कुमारावतारत्वेन प्रसिद्धैः कुमाररिलभट्टपादैः वार्तिकं च व्यरचि। एतत्त्रितयस्य पूर्वमीमांसाशब्देन व्यवहारः लोके दृश्यते। सत्येवम् अत्र भाष्ये प्रसङ्गानुप्रसङ्गेन केचन विषयाः असौत्रा अपि विचारिताः। केचन वार्तिककारैः अनुमोदिताः सूत्रकारसूचिताः केचन अननुमोदिताः सूत्रश्रुतिस्मृत्यादिविरुद्धाः। एषा स्थितिः मीमांसादर्शनस्य सत्येवं पूर्वमीमांसादर्शनानुसारेण ईश्वरस्वरूपं कीदृशमिति प्रश्नपेक्षया वेदानुसारेण ईश्वरस्वरूपं कीदृशमिति प्रश्नः युक्ततरः इति मम तावदभिप्रायः। यतः इदं सर्वं शास्त्रं वेदवाक्यविचारकं नहि स्वातन्त्र्येण किञ्चिद् वस्तु प्रतिपादयति।

पूर्वमीमांसासूत्रेषु कर्मणि या देवता वर्तते तस्याः प्राधान्यम् उत कर्मण एव प्राधान्यम् इति विचारः नवमाध्याये प्रथमचरणे चतुर्थेऽधिकरणे दृश्यते। तत्र अधिकरणे पञ्च सूत्राणि - देवता वा प्रयोजयेत् अतिथिवत् भोजनस्य तदर्थत्वात् (८.१.४-६) आर्थपत्याच्च (९.१.६) ततश्च तेन सम्बन्धः (९.१.८) अपि वा शब्दपूर्वत्वात् यज्ञकर्म प्रधानं स्यात् गुणत्वे देवतास्तुतिः (९.१.९) अतिथौ तत्प्रधानत्वमभावः कर्मणि स्यात् तस्य प्रीतिप्रधानत्वात् (९.१.१०) इति। अत्र त्रीणि सूत्राणि पूर्वपक्षसूत्राणि, द्वे सिद्धान्तस्य। तत्राऽयमर्थः यथा अतिथ्यर्थं भोजनादि तथा हविः देवतार्थम्। अतः देवतैव फलस्य प्रयोजिका स्यात्। अपि च आर्थपत्यं वर्तते - अर्थस्य यजमानकामनाविषयस्य द्रव्यादेः, पतित्वं प्रभुत्वं देवतायाः दृश्यते। तस्माच्च देवता प्रयोजिका भवेत्। ततश्च देवताया एव। तेन फलेन, सम्बन्धः, यजमानस्येति शेषः। एवञ्च देवताया एवकर्मकर्तुर्यजमानस्य फलप्राप्तिरिति पूर्वपक्षः। अपि चेति पक्षान्तरमारभ्यते -

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यज्ञकर्म प्रधानं स्यात्। शब्दपूर्वत्वात् यजेत इत्यादौ समानपदोपात्तत्वात् यागस्यैव फलभावना- कारणत्वं श्रुतम्। तस्मात् यज्ञकर्मणः एव फलं न देवतायाः। अथवा यज्ञकर्मैव प्रयोजकं न देवता। देवताश्रुतिस्तु गुणभूता यागस्य रूपद्वये यथा दध्यादिकं हविः गुणभूतमेव देवताऽपि गुणभूता न प्राधान्यमश्नुते। यो ह्यतिथिदृष्टान्तः तत्र पञ्चमेन सूत्रेण समाधीयते - अतिथौ तत्प्रधानत्वं पूजां प्रत्यतिथेः प्राधान्यम् । तस्य पूजाकर्मणः, प्रीति-निधानत्वात् नान्तरीयकतया अतिथिप्रीतिकरत्वात्। अथवा यथा अतिथिः प्रीतो भवति तथाकर्तव्यम् आतिथ्यमिति विधानात्। कर्मणि = यज्ञादौ, अभावस्स्यात् =आतिथ्ये अतिथेरिव, देवतायाः प्राधान्याभावात् इति दृष्टान्त-दार्ष्टान्तिभेदप्रदर्शनेन कर्मण एव फलप्रयोजकत्वं सम्पादितम्। एवं च अत्र सूत्रेषु देवता विग्रहवती उत न इति सन्देहः तदन्यतरसिद्धान्तः न प्रादर्शि। अतश्च देवता यद्रूपा श्रुतौ श्रूयते तथाविधैव स्वीकार्येति फलति।

सत्येवं भाष्ये शास्त्रदीपिकायां भाट्टदीपिकायां च देवतायाः विग्रहादिपञ्चकाभावपराणि वाक्यानि दृश्यन्ते। तथाहि - यद्यपि देवता विग्रहवती परिगृह्य भुक्त्वा तृप्यति प्रसीदति च, तथापि यागादेव फलम्। विग्रहवती चानित्या स्यात्। तथा च नित्यवेदविषयत्वं न स्यात्। सत्यपि विग्रहे प्रवृत्तस्य हविषो देवतया भोगः प्रत्यक्षविरुद्धोऽशक्योऽभ्युपगन्तुम्। न चाभुञ्जाना प्रसीदतीति युक्तम्'' शास्त्रदीपिकायाम् ९.१.४) इति विग्रहसत्त्वे दोषान् प्रख्याप्य कर्मण एव फलं गम्यते। ईङ्कारशकृत्करणादीनां देवतात्वेन श्रूयमाणानां को नाम फलदायित्वं श्रद्दधीति। अप्येवमादिषु कर्मण एव अपूर्वद्वारं फलं तथा सर्वत्राऽस्तु।'' इत्युक्तम्। यद्यपि तस्मिन् ग्रन्थे देवतायाः विग्रहो नास्ति इति कण्ठरवेण न प्रोक्तम्। तथापि तात्पर्यं तदेव। अत एव तद्व्याख्याने सोमनायीये- ''तस्माद्देवतायाः विग्रहकृतिस्वीकार- तद्भोजन- तृप्ति-प्रसादलक्षणविग्रहादिपञ्चकाभावात् देवतां प्रयुक्तत्वाभावादपूर्वप्रयुक्तत्व-नित्युपसंहरति तस्मादिति'' इति ग्रन्थकर्तृमनोगतं साक्षाद्वचनैः प्रतिपादितं दृश्यते।

एवं भाट्टदीपिकायां ''न देवतादिविग्रहस्वीकारः --- अतः कथमपि न विग्रहादिर्स्वीकारः किन्तु शब्दमात्रं देवता। अर्थस्तु प्रातिपदिकानुरोधात्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(प्रातिपातकानुरोधात् इति ग्रन्थे मुद्रितः) चेतनोऽचेतनो वा कश्चित् स्वीक्रियते न तु विग्रहादिमान्। उपासनादौ परं ध्यानमात्रमाहार्यं तस्येति जैमिनिमतनिष्कर्षः। मम त्वेवं वदतोऽपि वाणी दुष्यतीति हरिस्मरणमेव शरणम्।'' इति वदतिस्म खण्डदेवाचार्यः। अत्रेदं प्रतिभाति यत्- स्वानभिमतं वस्तु जैमिनीयमतं, तद्ग्रन्थकर्तृत्वेन तन्मतं प्रोक्तं, तत्कथनमात्रेणाऽपि स्वस्य जिह्वा दुष्यतीति स्वाशयः। तेन श्रीमता खण्डदेवाचार्येण हरिस्मरणं शरणं कृतम्। भगवतो जैमिनेर्मते विषयोऽयं पूर्वमेव प्रदर्शितः इति शब्ददेवतावादे आहोस्वित् देवतायाः विग्रहाद्यभावे न च न जैमिनेर्वचनं मूलम्। किन्तु भाष्यकारस्य। वार्तिककाराश्च न तु शब्ददेवतावादिनः। न तु विग्रहाद्यभावं प्रकटयन्ति। विषयेऽस्मिन् एतानि वचनानि द्रष्टव्यानि च। ''तस्मात् कर्मणः अपूर्वान्तरव्यापारस्य वा देवताप्रसादाः विग्रहादिमत्याः प्राधान्यमिति, न धर्ममीमांसायाः, सूत्रम्, ''अपि वा शब्दपूर्वत्वात् यज्ञकर्म- प्रधानं गुणत्वे देवतास्तुतिः इति विरुध्यते'' (१. ३.६.३३) (शाङ्करभाष्यतस्य भामतीव्याख्या) इति वदन्ती भामतीव्याख्या पूर्वोत्तरमीमांसयोः देवताधिकरणवैरुध्याभावं प्रकटयति। सूत्रेषु कर्मण एव प्राधान्यं इत्येव प्रतिपादितम्। विग्रहादिविषये न किञ्चित् तत्र परिदृश्यते। वार्तिककाराश्च विग्रहादिसत्त्वपक्षे एव सहमताश्च। अपि चाऽस्मिन् विषये एतानि वचनानि द्रष्टव्यानि-

''वस्तुतस्तु पूर्वोत्तरमीमांसयोः देवताधिकरणयोः परस्परं विरोधे उत्तरमीमांसास्थमेव देवताधिकरणं बलीयः। देवतानिरासस्य पूर्वतन्त्रे सूत्रकारैरनुक्तत्वात्। देवतासद्भावस्य च उत्तरतन्त्रसूत्रकारैरेव साधितत्वात्। देवतासत्त्वस्य दृढप्रमाणकत्वाच्च। प्रकृतग्रन्थकारोक्तिस्तु पूर्वतन्त्रभाष्य-जनितबुद्धिमात्रप्रभवा आहङ्कारिकी इति। श्रीकुमाररिलभट्टैरेव स्थलान्तरे मन्त्रार्थवादेतिहासपुराणप्रामाण्यमङ्गीकृत्य सृष्टिप्रलयादेरिव देवतासद्भावस्याऽपि स्वीकृतत्वाच्चेति केवलः'' इति वदन् मीमांसाकोशकारः पूर्वोक्तमर्थं दृढयति। असौत्रविषयाणां कथनं भाष्यकारस्य अभ्यासे वर्तते इत्यत्र यद्यपि आत्मस्वरूपं शबरस्वामिना निरूपितं तथापि न तत्सूत्रारूढम्। इह 'तदारूढम्' इति (३.३.५५) श्रीमच्छङ्करभगवत्पादानां वचनमेव प्रमाणम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवं अर्थवादाधिकरणे "एतस्मिंस्तु प्रक्रमे सत्यं सालम्बनता कि स्तुतित्वमेव हीयते। अतः स्तुतित्वात् हीयते। अतः स्तुतित्वात् योगि स्वार्थसत्यतां वर्णयामः। मन्त्रार्थवादेतिहासप्रामाण्यात् सृष्टिप्रलयाविषे तत्र सृष्ट्यादौ प्रजापतिरेव योगी तस्मिन् काले पुण्यकर्मोद्भवाभ्युपग पशूनामभावात् स्वमाहात्म्येन आत्मन एव पशुरूपमपि निर्माय वपोत्खनन कृतवान्। ततः असमाप्त एव कर्मणि त्वपरः एव पशुः उत्थित इति ईदृश कर्मप्रत्यासन्नफलम्। एवं च महता यत्नेन प्रजापतिना चरितमिति सत्यमेव प्रतिसृष्टि चतुर्लिङ्गन्यायेन तुल्यनामप्रभाववस्तूत्पत्तेः नानित्यताप्रसङ्ग "इति" इति वार्तिकवचनानि (१.२.१.१०) सूत्राणि, पृ. २६)

वार्तिकेच अर्थवादाधिकरणे अर्थवादानां स्वार्थेऽपि तात्पर्य अङ्गीकृतमेव श्रीमद्भिः भट्टपादैः। अपि च तिर्यगधिकरणे " न देवता देवान्तराभावात्" "न ऋषीणां आर्षेयान्तराभावात्" इति भाष्यपङ्क्तिद्वितयस्थे न देवानां देवान्तराभावात् इति प्रतीकमुद्धृत्य येषां शब्द एव देव तेषामप्यसङ्गतोऽयं ग्रन्थः' इति कण्ठरवेण शब्ददेवतावादः निरसितः भट्टपादै अतो ह्येवं वक्तुं शक्यते-शब्ददेवतावादः अथवा देवताविग्रहादिपञ्चकाभाव न सौत्रः न भाट्टः। किन्तु भाष्ये स्थितं प्रौढिवादमाश्रित्य प्रवृत्तः। यदाश्रि शास्त्रदीपिका-भाट्टदीपिकाकर्तारौ स्वाननुष्ठितं स्वानभिमतं शब्ददेवतावा अथवा विग्रहादिपञ्चकाभावं प्रकटीचक्रतुः तद् वचनजातं प्रदर्शितमेव। परन्तु तदननुष्ठितत्वं तयोः ग्रन्थादौ ध्यानश्लोकैः मङ्गलाचरणरूपैः ज्ञायत एव-

लक्ष्मीकौस्तुभवक्षसं मुररिपुं शङ्खासिकौमोदकी,
हस्तं पद्मपलाशताम्रनयनं पीताम्बरं शार्ङ्गिणम्।
मेघश्याममुदारपीवरचतुर्बाहुं प्राधानात्परं,
श्रीवत्साङ्कमनाथनाथममृतं वन्दे मुकुन्दं सदा।।
इति शास्त्रदीपिकारम्भे।

आनन्दममृतं ज्ञानमजं साक्षिणमीश्वरम्।
ब्रह्मसर्वमसर्वं च वन्दे देवं हरिं प्रभुम्।।
इति न्यायरत्नमालारम्भे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्र न ईश्वरशब्देन आर्थपत्यं प्रतिपादितम्।
एवम् विश्वेश्वरं नमस्कृत्य खण्डदेवः सतां मुदे।
तनुते तत्प्रसादेन सङ्क्षिप्तां भाट्टदीपिकाम्।।
इति भाट्टदीपिकारम्भे।

स्मृत्वा स्मृत्वा मुरारातिं तत्प्रसादावलम्बनात्।
रहस्यं भाट्टतन्त्रस्य विशदीकर्तुमीश्महे।।
इति भाट्टरहस्यारम्भे।

श्रीमन्तः कुमारिलभट्टपादा अपि श्लोकवार्तिकारम्भे -

विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे। श्रेयः प्राप्तिनिमित्ताय नमः सोमार्धधारिणे। इति श्लेषविधया सोमखण्डधारिणं शङ्करं नमस्करोत्येव। श्लोकोऽयं यद्यपि दृश्यते दुर्गासप्तशतीकीलकस्तोत्रे आरम्भश्लोकत्वेन, तथापि कुमारिलभट्टकृतस्तुतित्वेनैव वदन्ति मीमांसकाः। एवं च मीमांसकैः वेदे अर्थवादादिषु प्रोक्तः ईश्वरः यथातथम् अङ्गीक्रियते इति निरूपितम्। यानि तु भाष्यवचनानि सन्ति- यच्चोक्तं स्मृत्युपचारान्यार्थदर्शनैः। विग्रहवती भुङ्क्ते चेति, तन्न। यत्तु अन्यार्थदर्शनमुक्तम् - जगृभ्णाते दक्षिणमिन्द्रहस्तमिति नैतदेवं परम्। अथैवमुच्येत - तस्यैतद्वचनं यो गृहीतवान् तस्य हस्तमिति- उच्यते नैतदध्यवसेयम्। आदिमत्ता दोषो वेदस्य प्रसज्येत। यदपि स्मृत्युपचारान्यार्थदर्शनैः भुङ्क्त इति तदतिग्रहवत्त्वेन प्रयुक्तम्। (शाबरभाष्ये ८.१.४-६) इत्यादीनि। एतानि केवलप्रौढिवादमात्रम्, न युक्तिसहानीति न श्रुतिस्मृत्यादिसहमतानि इति च सुनिरूपितमस्मदीयशास्त्रदीपिकाभाट्टदीपिकातौ- ल्यविचारे।

इयांस्तु विषयः अस्माभिः स्वयं प्रतिपाद्यते। तत्र पण्डिताः विचारयन्तु- यत् अत्र विग्रहादिपञ्चकं विग्रह-हविस्स्वीकरण- तद्भोजन-तृप्ति- प्रसादारूपमिति उच्यते। तत्र सूत्रोक्तस्य आर्थपत्यस्य परित्यागो न युक्त इति विग्रह- हविस्स्वीकरणतद्भोजन - तृप्ति- आर्थपत्य-प्रसादरूपषट्कमिति कथनीयम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्योक्तेः अयुक्तिसहत्वं तथा खण्डदेवोक्तेः अजैमिनीयत्वं असङ्ग च। अस्मिन् विषये यद्यपि बहु वक्तव्यम् अस्ति। परन्तु विस्तर परिसमाप्यते। यद्यवकाशः खण्डदेवोक्तौ असङ्गतानि अपि च को विग्रहः, देवमानवविग्रहयोः को वा भेदः इत्यादि प्रपञ्च्यते च।

एवं च सारमेतत् - वेदे अर्थवादादिब्राह्मणवाक्येषु स्थितो विषयः ईश्वरसृष्ट्यादिविषये स सर्वः मीमांसकैरपि अङ्गीक्रियते। ये तद्विरुद्धतया भावयन्ति, ते न सूत्रानुयायिनः न भाट्टाः इति।

ईश्वरविषये तत्सृष्टिविषये च वेदे परिदृश्यमानो विषयः यथा वेदान्तिभिरिव पूर्वमीमांसकैरपि स्वीकर्तव्यः। न तु पूर्वमीमांसा वि जायते। यदि जायत इति कैश्चिद् उद्भाव्यते तर्हि पूर्वमीमांसासूत्राणि प्रमाण प्रदर्शनीयानि भवन्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाट्यप्रयोगदृशा बालरामायणे वस्तुविन्यासः

राधिकाप्रसादो मिश्रः

राजेशखरस्य नाटकद्वयमुपलभ्यते बालरामायणं, बालभारतं च। बालरामायणास्योपजीव्यं वाल्मीकिरामायणं, बालभारतस्य च महाभारतम्। बालरामायणस्य प्रारम्भे नाटककारेण वाल्मीकिः स्मृतः। रामसाहित्यपरम्परायां वाल्मीकेः कालिदासस्य, भवभूतेश्च नामानि विशेषेण स्मरणीयानि सन्ति। राजशेखरेण परम्परेयमुत्तराधिकाररूपेणावाप्ता। बालरामायणस्य रचनां विदधतो राजशेखरस्य समक्षं वाल्मीकिरामायणेन सहैव भवभूतेर्महावीरचरितमपि विचारसरणौ बभूव। अस्य प्रभूतः प्रभावोऽस्यां नाट्यरचनायां परिलक्षितो भवति। शास्त्रदृष्ट्या नाटकभेदेषु रूपकभेदे बालरामायणमायाति। नाटकमिदं दशसु अङ्केषु विभक्तमस्ति। अस्मिन् सीतास्वयंवरतो रामराज्याभिषेपर्यन्तं कथावस्तु वर्णितम्। रामायणोपाख्यानातिरिक्तमपि काश्चन नूतनाः कल्पना नाट्यकृता कृता या राजशेखरस्य मौलिकीं प्रतिभां परिचाययन्ति।

राशेखरस्य बालरामायणे वाल्मीकेश्च रामायणे यो भेदोऽस्ति तस्मिन् जानकीस्वयंवरवृत्तं तत्र च रावणस्योपस्थापनं धनुषश्चापमानं, रावणपरशुरामयोः परशुविषये विवादः रावणेन सीतावरमारणाय प्रतिज्ञा, कैकेयिदशरथयोरनुपस्थितौ मायामयशूर्पणखाभ्यां दशरथकैकेयिवेशं विधाय रामस्य चतुर्दशवर्षाणि निर्वासनं, नैतौ कैकेयिदशरथाविति जानतोऽपि रामस्य वनाय गमनं च, भरतस्यास्मिन्नवसरेऽयोध्यायामुपस्थितिर्नतु मातुलगृहे, वनं गतवति रामे कैकेयिदशरथयोरागमनं, सुमन्त्रस्य आनर्मदं रामानुयानं, जटायोर्दूतेन चित्रशिखण्डेन सीताया हरणं, जटायुना युद्धसंसूचनं, शूर्पणखाया अयाध्यायां घ्राणोच्छेदनं, सेतुबन्धने रावणबाधा, यन्त्रजानक्याः कल्पनं, रावणस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सीतासम्बन्धिनी वियोगव्यथा, यमपुरुषेण पञ्चदिवसेषु युद्धसमाप्तिकथनं, तुलाद्यूतप्रकरणं, सिंहनादविवादो युद्धश्च, रावणयोधनं, रामस्य प्रतिनिवर्त्तनावसरे विभिन्नानां स्थलानां वर्णनं चेत्यादयः प्रसङ्गाः सन्ति।

एतेषु सर्वेषु भेदेषु राजशेखरस्य प्रमुखा कल्पना स्वयंवरे रावणमुपस्थाय तस्य सीतां प्रति रागः तस्या हरणाय सविचारं सङ्कल्पश्च वर्तते। एतेन कैकेयिदशरथौ रामवनवासदोषविनिर्मुक्तौ भवतः।

कविः सीताहरणं शूर्पणखाया नासाच्छेदनेनैव न केवलं संयुनक्ति किन्तु सीतास्वयंवरादेव सञ्जातां रावणस्य सीताप्राप्तिनिमित्तमभिलाषमपि दर्शयति। संपूर्णं लङ्कायुद्धं पञ्चस्वेव दिवसेषु समाप्य कविः स्वीयां निरुपमामुद्भावनां दर्शयति। यतो हि वाल्मीकिरामायणे तु लक्ष्मणघननादयोरेव युद्धदर्शने लक्ष्मणः त्रीण्यहोरात्राणि अनवरतं प्रयत्य कथंकथमपि मेघनादं हतवान्।[1]

राजशेखरस्य बालरामायणे पूर्ववर्त्तिनां कवीनां विशेषतश्च कालिदास-भवभूत्योः प्रभावः स्पष्टतया परिलक्षितो भवति। श्लोकेषु पर्याप्तानि निदर्शनानि भावसाम्यस्य भवभूतेर्महावीरचरिते उत्तररामचरिते च तथैव राजशेखरस्य बालरामायणे च द्रष्टुं शक्यानि।[2]

किन्तु सत्स्वपि भावसाम्येष्वेतेषु राजशेखरस्य मौलिकता नैजं विशिष्ट्यं महत्त्वं चाक्षुण्ण एव।

राजशेखरस्य बालरामायणं परवर्त्तिनि नाट्यसाहित्येऽत्यन्तं प्रसिद्धं लोकप्रियं च नाटकमभूत्। नाटकेऽस्मिन् राजशेखरो विश्वामित्रप्रसङ्गाद्रामराज्याभिषेकपर्यन्तं समस्तं कथावस्तु नाटकीयस्वरूपे प्रस्तोतुं प्रायतत। नानाविधैः षट्षष्टिपात्रैर्घटनाक्रमं वर्णयन् स नाट्यवस्तु विस्तारयति। विस्तारप्रपञ्चस्तु राजशेखरस्य वैशिष्ट्यम्। अतोहि सं बालरामायणारम्भे प्रोक्तवान् यदत्र भणितिर्गुणः।[3] इदं वर्णनकौशलं राजशेखरे महद् वैशिष्ट्यमावहति। राजशेखरः संलापप्रस्तुतौ वाग्वैदग्ध्यदर्शने च विशेषेण प्रवीणोऽस्ति। संवादेषु रोचकतां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नेतुं कूटोक्तीश्च रचयितुं राजशेखरः प्रचुरं प्रगल्भते। प्रारम्भ एव शुनः-शेप-राक्षसयोः संलापेऽगस्त्यस्य विश्वामित्रस्य च यः परिचयः प्राप्यतेऽसौ कथोपकथनवैदग्ध्यं दर्शयति। रावण-परशुरामयोः राम-परशुरामयोश्च संलापश्चास्य वैदग्ध्यस्य चूडान्तनिदर्शने। रूपकविधौ वस्त्वितिवृत्तं वा द्विविधम् आधिकारिकं, प्रासङ्गिकं च। आधिकारिस्यायमभिप्रायो यत्फलस्वामिना भाव्यम्। यस्य फलप्राप्तिर्भवति सोऽधिकारी। अनेनाधिकारिणा संबद्धं यत्कथावस्तु तत्खल्वाधिकारिकम्। आधिकारिकस्येतिवृत्तस्य सहायकं यद्भवति तत्तु प्रासङ्गिकमित्युच्यते।[४] प्रासङ्गिमितिवृत्तमपि द्विविधं भवतिः, पताका प्रकरी चेति। यत्प्रासांगिकं कथानकं मुख्येन वृत्तेन सह सुदूरं याति तत् पताकेति कथ्यते।[५] यत्तु प्रासंगिकं वृत्तमल्पं भवति तत्खलु प्रकरीति भण्यते।[६] अनेन सहैव मुख्यस्य वृत्तस्य विस्ताराय पञ्चार्थप्रकृतयः, पञ्चावस्थाश्च भवन्ति। अनयोर्योगेन च नाटकीयमितिवृत्तं पञ्चधा विभज्यते। एष विभागश्च पञ्च-सन्धय इत्युच्यन्ते।[७] एतस्य विशदं विवेचनं साहित्यदर्पणे दशरूपके चान्यत्र च कृतमस्ति।[८] नाट्यप्रयोगदृशा शुद्धस्य मिश्रस्य च विष्कम्भकयोर्बालरामायणे सुसन्निवेशो विद्यते। स्वगतस्याकाशभाषितस्य नेपथ्यस्य च सम्यगुपयोगः कृतः, रसपरिपाकेन सममेव छन्दसामलङ्काराणां चौचित्येन प्रयोगो विद्यते।

राजशेखरस्य नाटके पात्राणां बाहुल्यमिव छन्दोबाहुल्यमपि दृश्यते। बालरामायणे कविना द्वाविंशतिश्छन्दांसि प्रयुक्तानि। एषु सर्वाधिकः प्रयोगश्शार्दूलविक्रीडित एव। एत एव 'सुवृत्ततिलके' स्वग्रन्थे क्षेमेन्द्रो भणति, 'शार्दूलविक्रीडितैरेव प्रख्यातो राजशेखर' इति। छन्दांसीव नवरसानामभिव्यक्ति-रपि राजशेखरकृतिषु कृता विद्यते। बालरामायणप्रस्तावनायामसौ' वीराद्भुत-प्रायरसप्रबन्धे'[९] इति निरूपयन् प्रबन्धेऽस्मिन् यद्यपि वीराद्भुतयोरेव प्राधान्येन वर्णनं सूचयति सर्वेषामेव रसानां सम्यक् परिपाकमत्रानेन कृतमवलोक्यते। रसप्रयोगवदलङ्कारप्रयोगोऽपि साधु विलोकयितुं शक्यः, काव्येऽलंकारप्रयोगमसौ नितान्तमावश्यकं मन्यते। काव्यमीमांसामयामसौ भणति गुणवदलंकृतं वाक्यमेव काव्यमिति। निसर्गचित्रणेऽपि तद्वद्राजशेखरः सिद्धः एवं नाट्यप्रयोगदृष्ट्या कथावस्तुसंबद्धं सर्वमावश्यकं तत्त्वं बालरामायणे पूर्णतया विद्यमानमस्ति। राजशेखरः संभवतो विस्तरतो दशसु अंकेषु बालरामायणं नाटकं निबध्य, प्रत्येकांकस्य पृथगभिधानं विधाय प्रतिदिनं नाटकस्यैकस्यैवां-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कस्याभिनयाय प्रेरयति। अनेन विधिना दशसु दिवसेषु नाटकस्याभिनयः पूर्णतामेष्यति। एवं नाटकस्तु सविस्तरवर्णनं दशसु चाङ्केषु तत्प्रविभागः कवेरभीष्टः।

बालरामायणे आधिकारिकमितिवृत्तं रावणवधेन संबद्धं विद्यते। प्रासंगिकरूपेण, तिस्रः कथा बृहत्योऽल्पा वा सहायकोपकथारूपेणात्र निबद्धाः सन्ति, आसु शुनःशेपराक्षस संलापरूपा, गृध्रमिथुनकथा, गुरुशिष्यसंवादरूपा, सीतास्वयंवरवर्णनरूपा च प्रकरीरूपेण वर्णिताः। एताः कथा आधिकारिक-कथावस्तुविस्तारे सहायिका जाताः अत एव च यस्मिन्नङ्के इमाः प्राप्यन्ते तदङ्कसमाप्तावेव ताः सर्वथा तिरोहिता भवन्ति। सुग्रीव-विभीषणयोः कथाप्रसंगः पताकास्थानकः, यतो हि प्रधानवृत्तेन सह। (सेतुबन्धात् रामराज्याभिषेकं यावत्) सुदूरपर्यन्तमेष संबद्धो विलोक्यते। प्रासंगिकवृत्तेषु शुनःशेप-तापससंवादश्चेत् कथातोऽपाक्रियते तर्हि रावणस्य तीव्रामुत्कण्ठां सीतास्वयंवरे गमनायाभिलाषं वा दर्शकाः कथमवगच्छेयुः ? कथैषा खलनायकस्य स्वरूपमवगन्तुं सहाय्यं विदधाति। द्वितीयेऽङ्के भृंगिरिटिनारदवार्त्तालापः रामरावणयोर्भावियुद्धं सकारणं प्रकाशयति। नान्यथोभययुद्धस्य कारणं ज्ञातुं शक्यम्। गृध्रमिथुनस्य, सुवेगायाश्चित्रशिखण्डस्य च वृत्तानि गौणान्यपि महत्त्वाधायीनि, यतो हि तेषु खलनायकस्यमनसि विद्यमानस्य द्वन्द्वस्य कारणं ज्ञातं भवति। इत्थमस्य नाटकस्य समस्तासु प्रासङ्गिककथासु सम्यक् समाहितं निर्दोषरूपेणाधिकारिकं कथावस्तु। नाटकस्यास्याद्येऽङ्के श्लोक एकषष्टिसंख्याके जनकभवने तिरस्कृतो रावणः प्रतिज्ञां करोति ससंरम्भं-श्रृणुत भोः श्रृणुत। निशाचरपतेः प्रतिज्ञाम्

कुर्वन् मौर्वीनिवेशक्रमनमदवनि स्पष्टङ्कारटङ्कं
शम्भोः कोदण्डदण्डं बधिरितभुवनं भूर्भुवःस्वस्त्रयेऽपि।
यस्तामेनां वरीता रसयति तदसृक् चन्द्रहासो ममासिः
कण्ठास्थिग्रन्थिशकलीकरणभवरणत्कारवाचालधारः।

राक्षसराजस्यास्यां प्रतिज्ञायां नाटकस्य बीजमुपन्यस्तम् यस्तामेतां वरीता रसयति तदसृक् चन्द्रहासो ममासिः ' एतस्यामुक्तौ भाविनो युद्धस्य विपज्जालस्य च संकेतो वर्त्तते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीये ऽङ्के रावण-परशुरामयोर्वाग्युद्धं मूलकथाप्रवाहं मा रुन्ध्यादिति मनसिकृत्य सीतास्वयंवरनामको गर्भाकः समायोजितः तत्र च रावणस्य सक्रोधस्य गर्वोक्तिरभिधायिता। एतेन दृश्यप्रधानायाः कथाया उच्छेदो नैव भवति, कथायां च प्रवाहनैरन्तर्यं विद्यते। नाटकीयभाषायामेष विन्दुरित्युच्यते। नाटकस्य मुख्यं प्रयोजनं खलनायकवधेन सुस्थिरशान्तिसम्पादनं वर्त्तते। सीताहरणात् नायकखलनायकयोर्मानसिकंसंघर्षो वर्द्धते। अस्यैव संघर्षस्य परिणती रामरावणयुद्धरूपेण भवति। रावणवधो रामाराज्याभिषेकश्च तत्फलरूपेण समक्षमायातः एषैव प्रयोजनसिद्धिः।

नाटकस्यास्य सप्तमे ऽङ्के वैतालिका रामस्य यशोगानं कुर्वन्ति। तदैवागत्य प्रतीहारस्तानेवं कर्त्तुं निषेधयति। (बालरामायणम्, ७.१८३)' कथं ननु रामदेवेन निषिद्धमात्मोपवर्णनमादशरथस्वर्गारोहणश्रुतेरादशकण्ठवधम्' इत्यनेन वचनेन कार्यस्यारम्भाख्यावस्थाआरभ्यते अस्मिन्नेव प्रसङ्गे यत्नाभिधानावस्थापि प्रारभते। फललाभाय रामरावणयुद्धोद्यमे लङ्काप्रवेशाय च सेतुबन्धविन्यासः कथामेतदर्थमेव प्रवर्त्तयतः, यतो हि यत्ने फलावाप्त्यै त्वरितोद्योगो लक्ष्यते। यत्ननाम्न्यवस्थापि अष्टमाङ्कं यावच्चलति। प्राप्याशाया आरम्भो ऽपि काले ऽस्मिन्नेव भवति। सेतुनिर्माणावसरे सीतायाश्छिन्नं शिरो विलोकयन् रामः कुशङ्काभिः शोकाकुलो जायते, स्वोद्यमैः खिन्नेन तेनोच्यते, 'धिङ्निष्फलं हनुमतः प्लवनं तदब्धौ, धिग् निष्फलः स माचलसेतुबन्धः।' इयं प्रत्याशायाश्चरमा परिणतिः।

अस्मिन्नेवाके छिन्नशिरसः कृत्रिमत्वज्ञानेन रामशिविरे उल्लासस्योद्भव एव नियताप्तेः प्रारम्भः। द्विगुणितेनोत्साहेन शत्रुपक्षं विनाशयन्ती सेनाग्रे ऽग्रे प्रसरति। यत्र रामे दशकन्धरस्य मस्तकच्छेदं विदधति तत्र नियताप्तिः फलागमसमीपमायाति। सीतासम्प्राप्तिः, रामनिर्वासनावधिसमाप्तिः रामराज्याभिषेकश्च फलागमं प्रस्तुवन्ति।

रावणस्यामरणं सीतां प्रति शत्रुत्वं, रामेण चाऽरावणवधं स्वयशोगानप्रतिषेधोमुखसधिं सूचयतः। रावणपक्षे सीताहरणं रामपक्षे च सीतालाभाय यत्नरूपः सेतुबन्धः प्रतिमुखसधिं सूचयतः गर्भसंधेरारम्भो निर्वाहश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रामरावणयोर्मानससंघर्षेण भवतः, रावणक्षिप्तेन मायासीतायाश्छिन्नेन मस्तकेन रामचेतसि यच्छोकमभूत्तत्तु सत्यज्ञानेन प्रतिशोधस्य तीव्रभावनायां परिणतः युद्धं तत्परिणामतश्च रावणवधोऽवमर्शसन्धिं प्रकटयतः। सीताप्राप्तौ रामाभिषेके चोपसंहारसन्धिः प्रकटितः। बालरामायणे प्रत्यङ्कं विष्कम्भकस्य प्रयोगो जातः। अर्थोपक्षेपकेषु विष्कम्भको भूतं भविष्यच्चार्थं सूचयति। एतस्य विस्तरः अङ्कापेक्षया न्यूनो भवति। एष द्विविधः। प्रथमश्शुद्धविष्कम्भको यस्मिन् मध्यमपात्राणि वृत्तवर्तिष्यमाणानां कथांशानां सूचनां ददति। अपरश्च मिश्रविष्कम्भको यत्र निम्नप्रकृतिपात्राणि मध्यमप्रकृतिपात्राणि च सम्मिल्य वृत्तं सूचयतः बालरामायणे शुद्धस्य मिश्रस्य च विष्कम्भस्योभयविधस्य सम्यक् संयोजनं कृतम्। प्रथमांके शुनःशेपतापसवार्त्तया सीतास्वयंवरस्य, रामलक्ष्मणयोरानयनाय विश्वामित्रागमस्य च संकेतो लभ्यते। उभेअपि पात्रे संस्कृतं व्याहरतः अत एव शुद्धेन विष्कम्भकेन कार्यमिदं सम्पन्नं भवति। द्वितीयेऽङ्के परशुराम-रावण संघर्षस्य सूचना नारदभृङ्गिरिटिसंवादेन मिलति। उभौ संस्कृतभाषिणौ स्तः, अतोऽत्रापि शुद्धस्यैव विष्कम्भकस्य प्रयोगो दृश्यते। तृतीयेऽङ्के मिश्रो विष्कम्भको दृष्टः। अत्र हि सुंवेगा प्राकृतं वदति, चतुर्थेऽङ्के शिष्योपाध्यायसंवादे बटवः प्राकृतभाषया व्यवहरन्ति। अतोऽत्रापि पुनर्मिश्रविष्कम्भकप्रयोगः। प्रथमेऽङ्के शुद्धो विष्कम्भकोऽवतारितोऽतो मायामयमाल्यवतोश्च संलापः संस्कृतेऽस्ति। षष्ठेऽङ्के विष्कम्भशब्दः शुद्धविष्कम्भकस्य द्योतकोऽस्ति। परं तस्मिन् शूर्पणखा स्त्रीपात्रत्वात् प्राकृतमवलम्बते। सप्तमांके भाविनो वृत्तस्य सूचना प्रतिहारिकर्पूरचण्डयोर्वार्त्तया दीयते अत्र शुद्धविष्कम्भकस्यायोजनं कृतम्। अष्टमेऽङ्के सुमुखदुर्मुखयोर्वृत्ते दुर्मुखः प्राकृतभाषी। अतोऽत्र मिश्रो विष्कम्भकः। नवमांकवृत्तसंयोजनं चित्रगुप्तेन शुद्धविष्कम्भकेन कृतम्। दशमांकसंलापेषु च शुद्धो विष्कम्भकः प्रयुक्तः।

विष्कम्भकेन समं स्वगतभाषणं, आकाशभाषितं नेपथ्यवचनं च वृत्तस्याभिनयप्रदर्शने महत्त्वमादधति। महाकवेः राजशेखरस्य स्वगतभाषणानि पात्रस्यावस्थां दर्शयन्ति। सम्पूर्णे नाटके पञ्चाशत् स्थलानि सन्ति यत्र स्वगतोक्तिप्रयोगः कृत।" राजशेखरस्य शिल्पविधानकौशलस्यैकं वैशिष्ट्यं नेपथ्ययोजनायां दृश्यते। संपूर्णे नाटके सप्तत्रिंशद्वारं नेपथ्यस्य प्रयोगो विलोक्यते,[१२] यत्र निषिद्धदृश्यानां वृत्तं सूच्यते। समस्तनाटकस्याकर्षणपूर्णं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्णनं तत्र दर्शितगर्भांक प्रयोगे वर्त्तते। बालरामायणस्य तृतीयेऽङ्के सीतास्वयंवर-नामके नाटकस्य भागे परवर्त्तिभिराचार्ये सौन्दर्यसाधको गुणोऽवलोकितः।[१३] उपर्युक्तेन विश्लेपणेन प्रतीयते यद् राजशेखरस्य रूपकाणां कथावस्तुषु प्रकृतीनामवस्थानां सन्धीनां य सुयोजनं, तद्वच्च विष्कम्भकस्य, स्वगतभाषण-स्याकाशभाषितस्य, नेपथ्योक्तेश्च प्रयोगो महता कौशलेन कृतो विद्यते। शास्त्रीये मानदण्डे सम्यक् तोलितो बालरामायणनाटको नाटककारस्य वस्तु-विन्याससामर्थ्यं प्रकटयति। नाटकं श्रव्यकाव्यमपि भवति। तस्मिन् प्रगीतात्मक-सौन्दर्यस्य प्रतिष्ठापनमप्यावश्यकं प्रतिभाति।[१४] अत एवात्र काव्यप्रणेत्रा षण्णाम् ऋतूनां चक्रवालस्य, सायंकालस्य, मध्याह्नस्य, सूर्योदयस्य, सूर्यास्तस्य च सरसं मनोहरि च वर्णनं नवनवोन्मेषशालिन्या प्रतिभया कृतो दृश्यते।

राजशेखरस्य वस्तुविन्यासे नाट्यप्रयोगादृष्ट्या विस्तृताः काश्चन घटना आधिकारिककथा पोषिकाः सन्तिः, प्रथमाङ्के शुनःशेपतापससंवादः, द्वितीयेऽङ्के भृंगिरिटिनारदसंलापः, तृतीयेऽङ्के गृध्रमिथुनवार्तालापः, चतुर्थे गुरुशिष्यसंलापः, नवमे यमेन मृत्युलेखावर्णनं, दशमे च लङ्कालकयोः संवेदनाभिव्यक्तिश्च मूलकथामेव परिपोषयन्ति।

निष्कर्षरूपेण वक्तुं पार्यते यत् नाट्यप्रयोगदृष्ट्या राजशेखरस्य वस्तुविन्यासे तत्पात्राणि कुशलतया निर्मितानि। राजशेखरः कुशलो नाट्यकला-मर्मज्ञः, भाषा तद्वशवर्त्तिनी भावानुरूपं वचनविन्यासं कर्त्तुं क्षमा अस्ति। एतेन तन्नाटकविन्यासे विस्तरतया शैथिल्यं प्रयोगे काठिन्यं च विलोकयतां धारणा अग्राह्या इति दिक्।

सन्दर्भाः

१. अहोरात्रैस्त्रिभिर्वीरः कथञ्चिद् विनिपातितः
निरामित्रः कृतोऽस्म्यद्य निर्यास्यति हि रावणः।। (बा.रा.युद्ध. ६२/१६)

२. द्रष्टव्य - डॉ. श्यामावर्मा कृत आचार्य राजशेखर पृष्ठ - ५६-६२

३. ब्रूते यः कोऽपि दोषं महदिति सुमतिर्बालरामायणेऽस्मिन्,
प्रष्टव्योऽसौ पटीयानिह भणितिगुणो विद्यते वा न वेति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यद्यस्ति स्वस्ति तुभ्यं भव पठनरुचिर्विद्धि नः षट् प्रबन्धान्
नैवं चेद्दीर्घमास्तां नटवटुवदने जर्जराकाव्यकन्था। बालरामा. १/२

४. साहित्यदर्पणे ६/४२/४४

५. व्यापि प्रासंगिकं वृत्तं पताकेत्यमिधीयते। सा. दर्पण ६/४७

७. प्रासंगिकं प्रदेशस्य चरितम् प्रकरी मता। सा. दर्पण ६/४८

८. साहित्यदर्पण ६/७४,

९. दशरूपके प्रथमप्रकाशे।

१०. बा. रामायणे १/२

११. काव्यमीमांसायाम्।

१२. द्रष्टव्य - डॉ. श्यामावर्माकृत - आचार्य राजशेखर पृ. ६६

१३. तदेव

१४. तदेव

१५. तदेव पृ. ६३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुभाषितरत्नसन्दोहे पूर्ववर्तिकाव्यानां प्रभावः

महेशदत्त शर्मा

संस्कृतकाव्यकाराणां मध्ये जैनाचार्येष्वन्यतमस्य महाकवेरमितगतेः प्रमुखं स्थानं विद्यते। अस्य कवेः सुभाषितग्रन्थेषु "सुभाषितरत्नसन्दोहः" इति नामकं प्रसिद्धं सुभाषितकाव्यं वर्तते। आचार्यामितगतेः समयो दशमशतकैकादशशतकयोर्मध्यकाले (९७०-१०२०) ख्रिष्टाब्दः विद्यते। सुभाषितरत्नसन्दोहोऽस्ति एकस्यैव कवेः कृतिर्यस्यां कविना सरल-सरस-कोमल-कान्त-पदावलीमाश्रित्य स्वानुष्ठितानां जैनधर्मसिद्धान्तानां प्रतिपादनं हृदयवर्जकैर्द्वाविंशत्युत्तरनवशततमैः (९२२) अतिरमणीयैः पद्यैः कृतम्। अमितगतिना काव्येऽस्मिन् अनेके विषया वर्णिताः परं सर्वत्र सुभाषितानां स्थितिः सूत्रे प्रोता मणिय इव दृश्यते। सर्वे श्लोका पूर्वापरनिरपेक्षास्तथापि कवेरत्र जैनसिद्धान्तानामेव वर्णनं प्रधानम्, तस्मात् पर्यायबन्धमुक्तककाव्यमिदं भवति।

अत्र सर्वत्र कल्याणमुद्रा सुखावहा, मोक्षमार्गप्रवर्तकानां महत्त्वशालिनां जैनसिद्धान्तानां प्रचार-प्रसार-दृष्ट्या प्रशंसार्हा अस्ति। अनुप्रासोपमारूपकश्लेषार्थान्तरन्यासाद्यलंकारैरलंकृता पदे पदे चारुभावशान्तरस- सन्निवेशा ग्रन्थस्यास्य भाषापद्धतिः सुमनोहरा वर्तते। यद्यप्ययं ग्रन्थोऽस्ति एकस्यैव कवेर्मौलिक-प्रतिभाप्रयासो जैनसिद्धान्तानां च प्रतिष्ठापकस्त- थापि काव्येऽस्मिन् बहुत्र पूर्ववर्तिनां काव्यकाराणां प्रभावो दृश्यते। अत्र कानिचिदुदाहरणानिप्रस्तूयन्ते।

सुभाषितरत्नसन्दोहे मधुनिषेधवर्णनेऽधो लिखितं पद्यं विद्यते यत्र मनुस्मृतेः प्रभावः।

ददाति लाति. यो भुङ्क्ते निर्दिशत्यमनुमन्यते।
गृह्णाति माक्षिकं पापः षडेते समभागिनः।।
(सु.र.सं., श्लोकः ५९०/१२)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मनुस्मृतौ पद्यं मांसभक्ष्याभक्ष्यप्रसंगे यथा -

अनुमन्ता विशसिता निहन्ता क्रयविक्रयी।
संस्कृता चोपहर्ता च खादकश्चेति घातकः।।
(मनु. ५.५)

अस्य मनुस्मृतिवचनस्यैव शब्दान्तरैर्भावप्रतिपादनं सुभाषितरत्नसन्दोहे ग्रन्थकारेण कृतम्। सुभाषितरत्नसन्दोहे सुजननिरूपणावसरेऽधोलिखितः श्लोको वर्तते। यथा -

नैतच्छ्यामा चकितहरिणीलोचना कीरनासा
मृद्धालापा कमलवदना पक्वबिम्बाधरोष्ठी।
मध्ये क्षामा विपुलजघना कामिनी कान्तरूपा
यन्निर्दोषं वितरति सुखं संगतिः सज्जानानाम्।।
(सु.र.सं. श्लोकः ४५१/२)

श्लोकोऽयं कालिदासप्रणीतं मेघदूतस्याधोलिखितं पद्यं पदशय्या-माध्यमेन संकेतयति। यथा -

तन्वी श्यामा शिखरिदशना पक्वबिम्बाधरोष्ठी
मध्ये क्षामा चकितहरिणीप्रेक्षणा निम्ननाभिः।
श्रोणीभारादलसगमना स्तोकनम्रा स्तनाभ्यां
या तत्र स्याद् युवतिविषये सृष्टिराद्येव धातुः।।
(मेघ. उत्तर. १६)

सुभाषितरत्नसन्दोहेऽधोलिखितं पद्यं देवनिरूपणप्रकरणे पठ्यतेः -

अशुभोदये जनानां नश्यति बुद्धिर्न विद्यते रक्षा।
सुहृदोऽपि सन्ति रिपवो विषमविषं जायतेऽप्यमृतम्।।
(सु.र.सं., श्लोकः, ३७१/२६)

अत्र चतुर्थचरणे या सूक्तिः तत्सदृशी सूक्तिः कालिदासप्रणीते रघुवंशेऽजविलाप-वर्णनेऽधो लिखितरूपेण दृश्यते -

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्रगियं यदि जीवितपहा हृदये किं निहिता न हन्ति माम्।
विषमप्यमृतं क्वचिद् भवेदमृतं वा विषमीश्वरेच्छया।।
(रघु. ८.६७)

रघुवंशस्थितस्यास्य श्लोकस्य उत्तरार्द्धे या सूक्तिः सैव सुभाषितरत्नसन्दोहे शब्दपरिवर्तनं विधाय उपन्यस्ता। अतोऽत्र सुभाषितरत्नसन्दोहे कालिदासस्य प्रभावः। सुभाषितरत्नसन्दोहे सुजननिरूपणप्रकरणे पद्यमिदं दृश्यते-

धृत्वा धृत्वा ददति तरवः सप्रणामं फलानि
प्राप्तं प्राप्तं भुवनभृतये वारि वार्दाः क्षिपन्ति।
हत्वा हत्वा वितरति हरिर्दन्तिनः संश्रितेभ्यो
भो साधूनां भवति भुवनेकोऽप्यपूर्वोऽत्र पन्थाः।
(सु.र.सं. श्लोकः ४५३/४)

अस्य श्लाकस्यानुकृतिमूलकं पद्यं कालिदासस्याभिज्ञानशाकुन्तले भर्तृहरेश्च नीतिशतके दृश्यते। यथा -

भवन्ति नम्रास्तरवः फलोद्गमे-
र्नवाम्बुभिर्दूरविलम्बिनो घनाः।
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम्।।
(अभि.शा.५.१२, भर्तृ.नीति.७)

यद्यपि सुभाषितरत्नसन्दोहे नवीनशब्दगुम्फनैर्मनोहारि काव्यं तथापि तद्भावदृशा कालिदासस्य भृर्तहरेश्च निर्दिष्टपद्यस्य स्मरणं कारयति। सुभाषितरत्नसन्दोहे वेश्यासंगनिषेधप्रकरणेऽधोलिखितं पद्यम् -

संदधाति हृदयेऽन्यमनुष्यं यान्यमाहृवयति दृष्टिविशेषः।
अन्यमर्थिनमतो भजते तां को बुधः श्रयति पण्यपुरंध्रीम्।।
(सु.र.सं., श्लोकः ६००/५)

शूद्रकस्य मृच्छकटिके पद्यं दृश्यते -

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्यं मनुष्यं हृदयेन कृत्वा अन्यं ततो दृष्टिभिराह्वयन्ति
अन्यत्र मुञ्चन्ति मदप्रसेकमन्यं शरीरेण च कामयन्ते।
(मृच्छकटिकम् ४.१६)

उपरिनिर्दिष्टस्य सुभाषितरत्नसन्दोहस्य पद्यस्य त्रीणि चरणानि मृच्छकटिकनिर्दिष्टेन पद्येन सह भावसादृश्यं भजन्ते। सुभाषितरत्नसन्दोहे मिथ्यात्वसम्यक्त्वनिरूपणप्रसंगेऽधोलिखितः श्लोको दृश्यते -

पयो युतं शर्करया कटूयते यथैव पित्तज्वरभाविते जने
तथैव तत्त्वं विपरीतमंगिनः प्रतीपमिथ्यात्वदृशो विभासते।
(सु.र.सं., श्लोकः १३४/...)

पद्येऽस्मिन् पूर्वार्द्धभागे नैषधीयचरितस्याधोलिखितस्य श्लोकस्योत्तरभागस्य प्रभावः। सुभाषितरत्नसन्दोहे शब्दपरिवर्तनं कृत्वा पूर्ववर्तिनः कवेः श्रीहर्षस्य भावः प्रस्तुतः। यथा -

त्वया विधेया न गिरो मदर्थाः कृधा कटुष्णे हृदि नैषधस्य।
पित्तेन दूने रसने सितापि तिक्तायते हंसकुलावतंस।।
(नैषधीयचरितम् ३.९४)

अस्मिन् ग्रन्थे भर्तृहरिप्रणीतनीतिशतकस्य प्रभावो बहुत्र दृश्यते। अत्र सुभाषितरत्नसन्दोहस्य केचन श्लोका द्रष्टव्याः। इमे श्लोका यथाक्रमं कोपनिषेधज्ञाननिरूपण-सुजननिरूपण- प्रकरणेषु विद्यन्ते।

वैरं विवर्धयति सख्यमपाकरोति
रूपं विरूपयति निन्द्यमतिं तनोति।
दौभार्ग्यमानयति शातयते च कीर्तिं
रोषोऽत्र रोषसदृशो न हि शत्रुरस्ति।।

तमो धुनीते कुरुते प्रकाशं शमं विधत्ते विनिहन्ति कोपम्।
तनोति धर्मं विधुनोति पापं ज्ञानं न किं किं कुरुते नराणाम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हन्ति ध्वान्तं रहयति रजः सत्त्वमाविष्करोति
प्रज्ञां सूते वितरति सुखं न्यायवृत्तिं तनोति।
धर्मे बुद्धिं रचयतितरां पापबुद्धिं धुनीते
पुंसां नो वा किमिह कुरुते संगतिः सज्जनानाम।।
(सु.र.सं.,श्लोकाः ४२/२१,१८६/१०,४६८/१६)

यद्यपीमे श्लोकाः पृथक् पृथग् विषयावलम्बिनस्तथाप्येतेषां चतुर्णां रचनापद्धतिः, पदशय्या, भावाभिव्यक्तिरलंकारयोजना च प्रायेण समाना एव। नूनमिमे श्लोका भर्तृहरिप्रणीतस्य निम्नलिखितस्य श्लोकस्य स्मारकाः सन्ति, तेनैव च श्लोकेन इमे भाविताः। यथा -

जाड्यं धियो हरति सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति पापमपाकरोति।
चैतः प्रसादयति दिक्षु तनोति कीर्तिं
सत्संगतिः कथय किं न करोति पुंसाम्।।
(भर्तृ. नीति. २३)

सुभाषितरत्नसन्दोहे जातिनिरूपणप्रकरणेऽधोलिखितः श्लोको विद्यते। स च यथा -

मनोभवशरार्दितः स्मरति कामिनीं यां नरो
विचिन्तयति सापरं मदनकातरांगीं परम्।
परोऽपि परभामिनीमिति विभिन्नभावे स्थितां
विलोक्य जगतः स्थितिं बुधजनास्तपः कुर्वते।
(सं.र.सं. २६८/१०)

अस्य श्लोकस्य प्रथमचरणत्रयं भर्तृहरेर्नीतिशतकस्य भावरूपेण आद्यं श्लोकं स्मारयति। यथा -

यां चिन्तयामि सततं मयि सा विरक्ता
साऽप्यन्यमिच्छति जनं स जनोऽन्यसक्तः।
अस्मत्कृते च परितुष्यति काचिदन्या
धिक् तां च तं मदनं च इमां च मां च।।
(भर्तृ. नीति. २)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनेन प्रकारेणेदं निर्णीयते यद् आचार्यामितगतये स्वकीये सुभाषित-रत्नसन्दोहे पूर्वकविभिर्यन्निगदितं प्रणीतं वा यद् यद् रोचते तत् प्रत्येकं क्वचिच्च साररूपेण विषयानुकूलं परिगृह्य काव्यप्रतिभाबलेन नवीनं नै काव्यमेकं विरचितम्। अनेन प्रकारेण सत्यपि मौलिके काव्ये काव्यस्याम अन्यच्छायायोनित्वं सिध्यति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतनामकरणविचारः

मल्लादिगोपालकृष्णशर्मा

अनादिकालतोऽस्मन्मातृभूमिः आसेतुशीतनगं परिव्याप्ता, 'भारतवर्ष', ब्रह्मावर्त, आर्यावर्तादिभिर्नामभिः व्यवह्रियते। अमरकोषकार इदं वर्षमधिकृत्येदं बभाण

"लोकोऽयं, भारतं वर्षम्" इति

(अमरकोषः, द्वितीयं काण्म्, भूमिवर्ग ८)

उदाहृतं श्लोकं व्याकुर्वन् श्रीमान् भानुजीदीक्षित आह- "अयं जम्बूद्वीपनवमांशः। भरतस्य राज्ञ इदम्। तस्येदम्' पा.सू. ४-३-१२)।

वर्षशब्दस्याभिधेयतानिरूपणावसरे भारविं प्रमाणयन्निदमलिखत्- "वर्षं स्थानं विदु : प्राज्ञा, इमं लोकञ्च भारतम्" इति भारविः। इति। अत्र रभस - (कोषकार) - स्योक्तिमपि उदाहरन्निदमलिखत्-

"महर्षि व्यासरचिते, जम्बूदीपे च भारतम्" इति। अथास्य भारतस्य सीमानं वर्णयन्निदमाह- उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणम्। वर्षं तद् भारतं नाम 'भारती' यत्र संततिः।। इति (रामाश्रमीव्याख्या)

परन्त्वत्रेयं विचिकित्सा भवति, स सार्वभौमो भरतः कः, यस्य नाम्नेदं भारतं वर्षमिति व्यवहृतमिति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एतत्समाधानत्वेन श्रीमद्भागवतकारस्य मतं प्रथमं प्रस्तूयते। श्रीमद्भागवतकार ऋषभदेवस्य वंशानुवर्णनावसर इदमाह- ऋषभदेवस्य 'जयन्ती' नाम्न्याः पत्न्याः शतं पुत्रा आसन्। तेषां 'भरतः' सर्ववरिष्ठ आसीत्। स बहून् वर्षान् राज्यं पालयित्वा, सांसारिकेभ्यो भोगेयो विरक्तस्सन् स्वपुत्रेषु राज्यभारं निक्षिप्य वनवासाय प्रतस्थे। तस्य महायोगिनो भरतस्य चारित्रं निर्वर्णयन् श्रीमद्भागवतकारोऽलिखित् -

"येषां खलु महायोगी भरतः ज्येष्ठः, श्रेष्ठगुण आसीत्, येनेदं 'भारतम्' इति व्यपदिशन्ति।।" इति (श्रीमद्भा. ५-४-३)

भरतात्पूर्वमस्य वर्षस्य किं नामधेयमासीदिति प्रश्नं समादधन् श्रीमद्भागवतकारोऽकथयत् - भरतस्य राज्ञः पूर्वमयं वर्षः 'अजनाभवर्षः' इति व्यवह्रियमाण आसीत् तद्यथाह।

"अजनाभनामैतद्वर्षं भारतमिति यत आरभ्य व्यपदिशन्ति" इति (श्रीमद्भा. २-७-३)

परंतु महाभारतप्रणेतुः कृष्णद्वैपायनस्येदं मतम् यत् दुष्यन्तात्मजस्य-शकुन्तलायामुत्पन्नस्य, भरतस्य सार्वभौमस्य नाम्नाऽस्याः भूमे 'भारती' इति, तद्वंशजातानां परवर्तिनां राज्ञां च 'भारता' इति च लोके व्यपदेश आसीदिति।[1]

परन्तु दौष्यन्तेर्भरतात्पूर्वमस्या भूमेः किं नामाऽसीदिति, कृष्णद्वैपायनो नाकथयत्। द्वयोरपि मतयोः, श्रीमद्भागवतकारस्य मतमेष सोपपत्तिकं दृश्यते, यतः -

शाकुन्तलेयाद् भरतात् ऋषभदेवस्य पुत्रो भरतः निश्चयेन प्राक्तनः।[2] अस्याः पृथिव्यास्सार्वभौमश्च। द्वितीयं कारणं तु, 'भारत' मितिव्यपदेशात्पूर्वमपि व्यवहृतस्य नाम्नोऽभिधानात्।

परन्त्ववेदमस्वारस्यं यत् 'अजनाभ' नामकस्य कस्यापि सार्वभौमस्य, तद्राज्यपालनस्य वोल्लेखस्य न कुत्रचिद् उपलब्धिः। तादृशस्य नाम्नोऽस्तित्वेपि न किमपि प्रमाणान्तरं दृष्टिगोचरं भवन्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्रोपात्तयोर्द्वयोरपि मतयोरिदं सामान्यं यत्, उभयोस्सार्वभौमयोः पूर्वमपि अस्य भारतस्य वर्षस्य विद्यमानत्वम्। अत एते द्वे अपि मते न श्रद्धेये।

वैदिकस्य वाङ्मयस्यानुशीलतेन, इदं तथ्यं दृष्टिगोचरं भवति, यदेतस्या भूम्या 'भारतम्', इति सृष्टेरादित एव व्याहारोऽस्तीति। तत्रोपपत्तयः प्रदीयन्ते-

वैदिकं मतमनुसृत्य, अग्निरेवप्रजापतिः। सर्वेषां लोकानां धारकत्वेन प्रजापतिरूपोऽग्निरेव 'भरत' इति व्यपदिष्टः। अत एव शातपथं ब्राह्मणमिदं निगदति -

"प्रजापतिरेषोऽग्निः।
प्रजापतिर्वै भरतः. सहीदं सर्वं बिभर्ति।।"
(शत.ब्रा. ५-५१४)

अग्निरूपस्य प्रजापतेः कृत्स्नस्य विश्वस्य धारकत्वनिरूपकमन्त्रानपि पश्यत -

"यो भानुना पृथवीं द्यामुतेमां, ततातरोदसी,
द्यावापृथिवी अप्रथेताम् ।।
(ऋक्संहिता)

तत्र मुख्यो हेतुः परमेश्वरस्य सृष्ट्यास्सङ्कल्पोदयसमय एव अग्नेरेव सर्वप्रथमजत्वम्। अतएव श्रुतिर्निर्दिशति -

"अग्निः प्रथमजा ऋतस्य ।। (ऋ.१०/५/७)इति।

यदा प्रथमं प्रलयानन्तरं परमेश्वरस्य सृष्टिसंकल्पो बभूव, तदा प्रथममग्निर्देवएव समुत्पन्नः यतस्स व्यापकः गत्यात्मकश्च। अस्यैव देवस्योक्ताद् गुणद्वयात् न केवलं द्यावा- पृथिव्यावेव विस्तारिते, अपितु देव-तिर्यङ्मनुष्य-वन-पर्वतादिकं जडचेतनात्मकं सर्वमपि लोकजातं समुन्पत्नम्। गत्यात्मकादग्नेस्समुत्पन्नत्वेनैव कृत्स्नस्यास्य लोकजातस्य "जगत्" (निरंत्तरगमनात्मकम्) इति व्यवहारः।

अथ प्रलयानंतरं संपन्नायास्सृष्ट्याः स्वरूपं निर्वर्णयन् मनुराह-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"अप एव ससर्जादौ तासु बीजमवासृजत् ।"
"तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् ।
तस्मिञ्जज्ञे स्वयं ब्रह्म सर्वलोकपितामहः ।। इति
(प्रथमोऽध्यायः)

अनेनेदं स्पष्टं यत् 'आपः' स्वयं जडभूताः । ता न किमपि वस्तु स्रष्टुममर्हति । अतः प्रजापतिः गर्भस्थानीयासु तासु सृष्टिबीजभूतो योऽग्निस्तद्रूपस्सन्नतर्विवेश, तेन हैमोऽण्डस्समुत्पन्नः, यस्मात्सर्वेऽपिलोकाः प्रादुर्भूताः। पिण्डाण्डस्य समुत्पत्तिप्रकारस्याऽवलोकनेनाऽयं विषयः स्पष्टो भवति । लोकेऽपि, अप्स्थानभूते मातृगर्भे, पुरुषबीजरूपस्याग्नेर्निक्षेपेण गर्भस्समुत्पन्नो भवति, यतः कोपि प्राणी प्रादुर्भवति । येन नियमेन (वैश्वेन) ब्रह्माण्डस्योत्पत्तिः, तेनैव नियमेन पिंडांडस्योत्पत्तिरपि भवति ।
अतएवेयं श्रुतिरपि संगच्छते, यत् - तत्सृष्ट्वा तदेवाऽनुप्राविशत् ।। इति

अनेनेदं स्पष्टं यत् सर्वस्यापि जड-चेतनात्मकस्य जगतः स्रष्टा अग्निरेवेति । अतएव स प्रजापतिरभिहितः । सर्वस्य विश्वस्योत्पादकत्वेनैव हेतुना सोऽग्निर्देवः सर्वदेवत्यरूपेण, सर्वासां देवतानां (विश्वपालिकानां, नियन्त्रीणां च शक्तीनां) तत्स्वस्वरूपत्वेन तच्छरीरत्वेन च वैदिकैर्ऋषिभिरभिवर्णितः । पश्यताऽधोदत्तान्मंत्रवर्णान् -

" सर्वदेवत्योऽग्निः" ।। (शत.ब्रा. ६-१-२२)
"विश्वेदेवास्तहर्ह्यग्निः" ।। (तै. ब्रा. २-१-१०-२)
"अग्नेर्वाएतास्तत्वो यदेता देवताः, इति च । अतएव वैदिकानामृषीणामयं निश्चितोऽभिप्रायः, यत् सर्वकारणभूतस्याग्नेरेकस्य देवस्य यजनेन सर्वा देवता इष्टा भवंतीति, यथा -

"सर्वाभ्यो वा एष देवताभ्यो जुहोति,
यदग्निहोत्रं जुहोति ।। इति (तै.ब्रा. २-१-७)

अग्निर्देवो न केवलं त्रैलोक्यानां प्राणिनामुत्पादक एवाऽपितु पोषकश्चापि । कथं स सर्वान् देवमनुष्यादीन् पुष्यतीति प्रश्नं समादधत् श्रुतिरिदं कथयति -

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भगवतो विविधशक्तिरूपा एव देवताः। ता एवामुंप्राणिजातं वृष्टिप्रदानादिना पोषयंति। तेषां यजनेन मनुष्यस्ताननुकूलयति। कथमिति चेत्, मनुष्यस्तत्तद् देवताप्रीणनायाग्नौ, तत्तदेवता उद्दिश्य हव्यानि समर्पयति। अग्निस्तत्तद्रव्यानि सर्वदेवतात्मकत्वेन, तत्तदेवताः प्रापय्य ता यजमानाय अनुकूलाः करोति। यजमानेन समर्पितानि द्रव्यानि प्राप्य तास्ता देवताः तत्तद्यजमानेभ्योऽदृष्टमपि फलं दत्त्वा पोषयंति। एवं देवतायजमानौ परस्परं पोषयतः। श्रुतिरग्नेर्देवस्य, देवतावयोऽर्पितानां हविषां वाहकत्वं बहुत्र प्रत्यपादयत्। स्थालीपुलाकन्यायेन कांश्चिन्मंत्रवर्णानत्रोदाहरामः -

"अग्निर्यज्ञस्य हव्यवाट्।।" (ऋ.वे. ३-२७-४)

"देवास ईड्यं विश्वमिदं हव्यवाहमदधुरध्वरेषु"
(ऋ. वे. ३.२६.७)

"त्वां दूतमग्ने अमृतं युगे-युगे हव्यवाहं दधिरे पायु (पालकं)
मीड्यम् " (ऋ. वे. ६-१५-८)

"क्रतुं हव्यस्य वसवोजुषन्त, अथा देवा
दधिरे हव्यवाहम्"।।
(ऋ.के. ७-११-४)

"इहैवाऽयमितरो जातवेदा देवेभ्यो हव्यं वहतु प्रजानन्।।
(ऋ.वे. १०-१६-६)

"सुजातं जातवेदसं, अग्निं वैश्वानरं विभुं।
हव्यवाहं हवामहे।। (अथ.वे. ४-२३-४)

अत एव विष्णुपुराणकारो देवातानां मनुष्याणाञ्च परस्परमुपकारित्वं निरूपयन्नाह -

"यज्ञैराप्यायिता देवा वृष्ट्युत्सर्गेण वै प्रजाः।
आप्याययंते धर्मज्ञ यज्ञाः कल्याणहेतवः ।।
(विष्णुपुराणम्)

महाकविःकालिदासोपिचाह-

"दुदोह गां स यज्ञाय सस्याय मघवा दिवम्।
संपद्विनिमयेनोभौ दधतुर्भुवनद्वयम्।।
(रघुवंशः, प्र.सर्गः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अग्नेर्देवानां हव्यवाहकत्वं निरूपयन्मनुराह

"अग्नौ प्राप्ताहुतिरसम्यगादित्यमुपतिष्ठते।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः।। इति
(मनुस्मृतिः)

अर्थात्, आहवनीयेऽग्नौ यजमानो विधिपूर्वकं यानि हव्यानि समर्पयति, तानि मंत्रस्य बलेन (तेजोरूपाणि, दग्धावाशिष्टानि हव्यानि सूर्यमंडलं नीयन्ते। सूर्यस्तत्तदुद्दिष्टदेवताभ्यस्तत्तद्रव्यानि प्रापयति। तत्तदेवतास्तद्रव्यप्राप्त्या संपुष्टा यजमानायाभीष्टफलं ददति।

उक्तविषयस्य निरूपणमत्रापेक्षितमावश्यकञ्च। अतस्तन्निरूप्यते-

मया प्रथममेव निवेदितम् यत् पिंडांड-ब्रह्माण्डयोस्संचालन प्रकार स्समानंनियममाश्रित्यैव भवति। अतः पिण्डांडे (Micro-Cosm) यो नियमो यद्विषये प्रवर्तते, स एव ब्रह्मांडेपि (Macro-Cosm) घटते।

वयं पिंडांड इदं नित्यमनुभवामो यदयं प्राणिनां देहो वैश्वानरेणाऽग्निना धार्यत इति। कथमिति चेत्। अत्र वदामः। पिंडांडस्य पोषणाय आवश्यक आहारस्तु मुखे निक्षिप्यते। मुखनिक्षिप्त आहारः पाचननग्निं (वैश्वानराख्यमग्निं) प्राप्नोति। स, पाचकोऽग्निस्तमाहारं सप्तधातुरूपतां नीत्वा, येन धातुना यस्याऽवयवस्य पोषणं भवति तद्धातुं तदवयवान् प्रापयसि। एवं समुच्चित्य सर्वावयवसमष्टिभूतो देहो वैश्वानरेणैवाऽग्निना पोष्यते। यदि, देहधारकत्वेन देहस्य नाभिप्रदेशे पाचकोऽग्निः (वैश्वानरोग्नि)- र्न भवति, तर्हि सर्वेपि प्राणिनो विनष्टा भवेयुः इदं तथ्यं लोकाय प्रकटयन् भगवान् वासुदेवोप्याह-

"अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम्।। इति
(भगवद्गीता)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथा पिंडांडस्य धारकोऽग्निर्देवस्तथैव ब्रह्माण्डस्यापि, सूर्यवाय्वग्न्यात्मना स एव देवो धारकः, तदन्तर्यामित्वात्। यथा पिंडांडस्य अन्नपाचनादिना धारणं वैश्वानरः करोति तथा ब्रह्माण्डस्यापि हव्यादिप्रापणादिना अग्निदेवः पोषणं करोति।

अतएवाऽग्निर्देवः जगतां जननेन, पोषणेन, अन्तर्यामितया प्रवेशेन च हेतुना 'जगद्धारक' इति वेदैरभिहितः। जगद्धारकत्वेनैव हेतुना वैदिकै ऋषिभिस्सदेवः ''भरत'' इति व्यपदिष्टः। पश्यताऽधोदत्तान्मंत्रवर्णान् '

''अग्ने महाँ असीत्याह । महान् ह्येष यदग्निः।
XXXXभारतेत्याहैष देवेभ्यो हव्यं भरति।।
(कृ. य. सं. २-५-६)

''अग्ने भारत द्युमदजस्रेणविद्युतत्।।''
(ऋ.वे. ६-१६-४५)
''अग्निरगामिभारतो वृत्रहो पुरुचेतन।''
(ऋ. वे. ६-१६-१६)
''तस्मा अग्निर्भारतः शर्म यंसत्।।
(ऋ.वे. ६-२५-४)

शातपथं ब्राह्मणमपि

''प्रजापतिरेषोऽग्निः प्रजापतिर्वैभरतः।
सहीदं सर्वं बिभ्रति।।'' इति (शत.ब्रा. ६-५-५-१४)

अपि च-

''एष हि देवेभ्यो हव्यं भरति। तस्माद् भारतोऽग्नि-
रित्याहुः। एष उ इमाः प्रजाः प्राप्यो भूत्त्वा बिभर्ति,
तस्मादेवमाह, भरतवदिति''
(शत.१-४-२-८)

अनेनायं निष्कर्षः कर्तुं शक्यते यत् अग्निरेव देवः भरतः। सोऽमुं भारतं वर्षं प्रथममाविश्चकार। भारत्यां भूम्यामेव प्रथममग्निना प्राणिसृष्टिः, मानुषी सृष्टिश्च कृता। भारत्यां भूम्यामुत्पन्ना जना एव भारताः। ते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वसर्वकामापूरणाय, प्रथममग्निं समिध्य तमाराधयामासुः। अतएव (भारते जनिमत्त्वेन भरतस्याग्नेराराधकत्वेन च हेतुना) भारतवासा जना अपि 'भारता' इति व्यवहृताः। पश्यताधोदत्तान्मन्त्रवर्णानपि-

''विश्वामित्रस्य रक्षति ब्रह्मेदं भारतं जनम्।।
(ऋ.वे.३-५३-१२)

''अमंथिष्टां भारता रेवदग्निम्।।
(ऋ.वे. ३-२३-२)

भारता वै जनाः ।। (जैमिनीयं ब्राह्मणम्)

अग्निमिच्छध्वं भारताः।। (तै. आरण्यकम्) इत्यादयः

अनेनेदं स्पष्टीभवति

१. अग्नि वैदिकैर्ऋषिभि 'भरत' इति 'भारत' इति च व्यवहृतः।

२. भारते सृष्ट्यादितः कृतावासा जना अपि 'भारता' इत्येव वैदिके वाङ्मये व्यपदिष्टाः।

३. भरतेनाथवा भारतेन अग्निना प्रथममाविष्कृतं वर्षं (स्थानं) अपि 'भारत' मित्येव व्यपदिष्टम्।

अतः 'भारतं वर्षम्' इति 'भारताजनाः' इति च व्यपदेशः प्रजापतिरूपादग्नेरेव बभूव। अतोऽस्य वर्षस्य नाम, न कस्यचिदपि सार्वभौमस्य राज्ञो नामतो बभूवाऽपितु प्रजापतेर्भरतस्य नामत एव इति निश्चयेन वक्तुं शक्यते।

एवञ्च श्रीमद्भागवतकारमहाभारतकारयोर्मतद्वयस्य निरासेन समं तत्पक्षद्वयोत्थापिताक्षेपपर्युदासोपि सहजमेव भवति।

अथ ब्रह्मावर्त, आर्यवर्तादीनां नाम्नां संगतिर्यथा- मनुर्ब्रह्मावर्तदेशं निरूपयन्नाह-

सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम्।
तं देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते।
(म.स्मृ.प्र.अ.)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनेनेदं स्पष्टं यत् प्रथमं अग्निना प्रजापतिना सरस्वतीदृषद्वत्योर्नद्योर्यो मध्यभागः, (वर्तमानकालिकः) स एव सृष्टः। अत एव, स देवनिर्मितो देश इत्यभिहितः।

तदनंतरं स देशः विस्तारितो बभूव, यस्यनाम ब्रह्मर्षिः इति। यथा -

"कुरुक्षेत्रं च मत्स्याश्च पञ्चालाश्शूरसेनकाः।
एषब्रह्मर्षिदेशो वै ब्रह्मावर्तादनंतरम्।।
(म.स्मृ.प्र.अ.)

ततो भारता जना ब्रह्मर्षिदेशान्मध्यदेशपर्यतं व्याप्ता बभूवुः। स एव मध्यदेश इति व्यपदिष्टः। तथाहि।

"हिमवद्विन्ध्ययोर्मध्यं यत्प्राग्विनशनादपि।
प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्तितः।
(म.स्मृ. प्रथमोऽध्यायः)

(विनशनात् = सरस्वत्यन्तर्धानदेशात्।।)

यथा यथा काले गच्छति सति क्रमशः जनानां विस्तारो बभूव तथा तथा भारता जना मध्यदेशमप्यतिक्रम्य, विंध्यान्समतिक्रम्य दक्षिणसमुद्रपर्यतं व्याप्ता बभूवुः। अयमा सेतु शीतनगं परिव्याप्तो महान्देश 'आर्यावर्त' इतिव्यपदिष्टः।
तथाहि --

आ समुद्रात्तु वै पूर्वादासमुद्रात्तु पश्चिमात्।
तयोरेवान्तरं गिर्योरार्यावर्तं विदुर्बुधाः।।
(म.स्मृ. प्रथमोऽध्यायः)

अथ आर्यावर्तशब्दस्य व्युत्पत्तिं प्रदर्शयन् व्याख्याता कुल्लूकभट्टोऽलिखत्-

आर्यावर्तः, आर्याअत्राऽवर्तते, पुनः पुन रुद्भवन्तीत्यार्यावर्त इति।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनयैवा दिशा 'ब्रह्मावर्त' इति पदस्येयं व्युत्पत्तिर्भवति, ब्रह्म-सृष्ट्या बृंहणं, अत्रावर्तते पुनः पुनः (प्रलयानंतरं) भवतीति।

एवमजनाभशब्दस्यापि संगतिरधोदत्तात् मंत्रवर्णाद् भवति, यथा -
''अजस्यनाभावध्येवमर्पितं यस्मिन्त्विदं विश्वंभुवन-
मधिश्रितम्।। इति (कृ.य.सं. ४-६-२-३)

सायण आचार्यो दत्तस्य मंत्रवर्णस्येमां व्याख्यां चकार यत् - जन्मरहितस्य परमेश्वरस्य, नाभौ नाभिस्थानीये स्वरूपमध्य एकं किंचिद् बीजमर्पितं, यस्मन् बीज इदं विश्वं सर्वमपि भुवनमधिश्रितं अधिकत्वेन स्थापितं तद्बीजमर्पितम्। तथा च स्मर्यते -

अप एव ससर्जादौ तासु बीजमवासृजत्।
तदण्डमभवद्धैमं कोटिसूर्यसमप्रभम्।। इति

अनेनेदं स्पष्टं यत् अत्रैव ब्रह्मावर्तदेशे, ब्रह्मणो नाभिप्रदेशात् भुवनकोशस्य निर्माणं प्रलयादनन्तरं यतो बभूव, यस्माच्च सर्वाणि भुवनानि विस्तारितान्यतोयमजनाभ देश इति सर्वमवदातम्।।

संदर्भाः

१. महाभारतम्, आदिपर्व - २-९६ एवं ७४-१३१.

२. ऋषभदेवः - ब्रह्मणः पुत्रस्य स्वायंभुवस्य यवोः संतत्यां, चतुर्थपुरुषान्तरं संबद्धः। दौष्यंतिर्भरतस्तु ब्रह्मणः पौत्रस्य चन्दमसो वंशावलयां चतुर्दशपुरुषानन्तरसंबद्धस्य दुष्यंतस्य महाराजस्य पुत्रः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैदिकं देवरहस्यम्

मिताली देव

वैदिकानि तत्त्वानि पञ्चधा विभज्यन्ते। ऋषयः, पितरः देवाः, असुराः गन्धर्वाश्चेति। एतेषां समष्टिरेव सूक्ष्मं जगदित्याख्यायते। सूक्ष्मं जगदेव देवानां मुख्यं प्रतिपाद्यम्। एषां पञ्चानां विज्ञानेन सर्वं वैदिकं तत्त्वं सुविज्ञातं भवति। वैदिकं सर्वमपि विज्ञानं प्राणतत्त्वमाधारीकृत्यैव प्रवर्तते। आधुनिकस्य विज्ञानस्याधारभूता यथा विद्युच्छक्तिः तथा वैदिकस्य विज्ञानस्य मूल आधारः प्राणतत्त्वमिति प्रतीयते। प्राणश्च रयिश्चेति द्वे मूलतत्त्वे। तत्र प्राणो मुख्यः, रयिस्तु तदधीना। तदुक्तम् -

> "प्रजाकामो वै प्रजापतिः, स तपोऽतप्यत स तपस्तप्त्वा मिथुनमुत्पादयते। रयिञ्च प्राणञ्चेत्येतौ मे बहुधा प्रजाः करिष्यत इति। आदित्यो ह वै प्राणो रयिरेव चन्द्रमाः। रयिर्वा एतत्सर्वं यन्मूर्तञ्चामूर्तञ्च, तस्यान्मूर्तिरेव रयिः।"
> प्रश्नोपनिषद् १/४-५

अनया हि श्रुत्या सर्वेषां प्राणानामायतनं सूर्यः रयेश्चायतनं चन्द्रमा इति दर्शितम्। सर्वाश्च मूर्तयः पिण्डरूपा रयिनामकात्तत्त्वाज्जायन्ते। प्राणरयी स्थूलताप्राप्तिक्रमेणाग्नीषोमौ भवतः। अग्नीषोमाभ्यां च सर्वं जगदुत्पाद्यते -

"अग्नीषोमात्मकं जगत्" बृ. जा. २/४ प्राण एव सर्वस्यादिः स एव स्थूलामवस्थां गतो रयिपदवाच्यां भूतभौतिकावस्थां गच्छतीत्यप्यन्यत्रोक्तम्।

असद्वा इदमग्र आसीत् तदाहुः किन्तदसदासीदिति, ऋषयो वाव तेऽग्रेऽसदासीत्, तदाहुः के त ऋषय इति प्राणा वा ऋषयः। शत.प. ब्रा.६/१/१/१.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्र हि पूर्वमसत्पदेन प्राणरूपाणामृषीणामभिधानं कृतम्। प्राणा एव सत्तारूपेण सर्वत्रानुप्रविशन्ति। प्राणेषु किञ्चिदन्यत् तत्त्वं सत्तारूपेण न प्रविशतीति तेषामसत्वमुक्तमिति।

शतपथब्राह्मणस्य चतुर्दशकाण्डे बृहदारण्यकोपनिषत्पदाऽभिधेये जनकसभायामृषीणां परस्परं ब्रह्मोद्ये शाकल्यस्य प्रश्नानां याज्ञवल्क्येनोत्तरेण देवानामपि प्राणरूपता सुस्पष्टमाम्नाता। एवं हि तत्र शाकल्ययाज्ञवल्क्ययोः प्रश्नोत्तराणि श्रूयन्ते -

> "कति देवा याज्ञवल्क्येति। स हैतयैव निविदा प्रतिपेदे यावन्तो वैश्वदेवस्य निविद्युच्यन्ते त्रयश्च त्री च शता त्रयश्च त्री च सहस्रेत्योमिति होवाच। कत्येव देवा याज्ञवल्क्येति। त्रयस्त्रिंशदित्योमिति होवाच" बृहदारण्यकोपनिषद् ३/६/१

अनन्तरं पुनः पुनः प्रश्ने षट्, त्रयः, द्वौ, अध्यर्ध, एक इति क्रमेण देवसंख्या भगवता याज्ञवल्क्येन निर्दिष्टा। विवरणप्रश्ने च अष्टौ वसवः एकादश रुद्राः, द्वादशादित्याः, इन्द्रश्च प्रजापतिश्चेति त्रयस्त्रिंशत्। तेषां संक्षेपेण –अग्निश्च पृथिवी च वायुश्चान्तरिक्षं च द्यौश्चादित्यश्चेति षट्, तेषामपि संक्षेपे तत्रापि लोकदेवयोरेकीकरणेन त्रयः, तत्राप्यनुस्यूततया अन्नं प्राणश्चेति द्वौ।

ततश्च कतमो अध्यर्थ इति प्रश्ने – "योऽयं पवत इति। तदाहुर्यदयमेक इवैव पवते। अथ कथमध्यर्ध इति। यदस्मिन्निदं सर्वमध्याध्नोंत्तेनाध्यर्ध इति।" एवमुत्तीर्य "कतम एको देवः" इति प्रश्नः "प्राणः" इति समाहितः, तस्यैव च बृंहणात् सर्वमिदं जातमिति तस्यैव ब्रह्मत्वमुक्तम्। "अमृतः पुरुषः" इत्यपि तस्य विवरणं तत्रैव कृतम्।

तदेतत्प्रकरणपर्यालोचनेन प्राण एव मुख्यो देवः। स च यद् भूतभौतिकमुत्पादयति तत्तस्य वशगत्वादर्धं गण्यत इत्यध्यर्धो देवो निर्दिष्टः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"यो यं पवते" इत्युक्तया च वायुरूपता तस्योक्ता। वायुरयं न भौतिकी वायुर्मन्तव्यः, अपि तु तस्य परिचालक आन्तरिक्ष्यः प्राणविशेषो वायुपदेन निर्दिष्टः। तस्यैकस्यैवाग्निः, वायु, आदित्य इति त्रीणि रूपाणि स्थानभेदेन प्रतिष्ठितानि। स्थानानां पृथिव्यन्तरिक्षदिवामपि स्थानिभिः सह परिगणने तु षड् देवाः। अग्न्यादीनामेकैकस्य पृथक् पृथगवस्थागणने, केन्द्रस्थस्येन्द्रस्य सर्वमण्डलव्यापकस्य प्रजापतेश्चापि सह गणने त्रयस्त्रिंशद् देवाः सम्पद्यन्ते। एषां चैकैकस्यानन्तकार्यकारित्वात् त्रयस्त्रिंशच्छतानि त्रयस्त्रिंशत्सहस्राणीत्यादि देवानां संख्या आख्यायते। इदानीन्तु पुराणाद्याधारेण त्रयस्त्रिंशत् कोटय इत्यपि प्रसिद्धिः। सेयं सर्वाऽप्यनन्तकार्यकारित्वाद् बोध्या। पृथक् पृथङ् नामग्रहणं तु त्रयस्त्रिंशत एव श्रुतिपुराणादिषु दृश्यते। त्रयस्त्रिंशत् संख्याया विवरणं तु ऋङ्मन्त्रेष्वपि श्रूयत -

इति स्तुतासो असथा रिशादसो येस्थ त्रयश्च त्रिंशच्च।
मनोर्देवा यज्ञियासः - ऋक् ८/३०/२

शाखान्तर मन्त्रे वस्वादिविवरणमपि श्रयूते -

अग्निः प्रथमो वसुभिर्नो अव्यात्सोमो रुद्रेभिरभि रक्षतुत्मना।
इन्द्रो मरुद्भिर्ऋतुथा कृणोत्वादित्यैर्नो वरुणः शर्म संयत्॥
आश्वलायन श्रौत सूत्र २/११

संक्षिप्त देवतात्रयं तु भगवान् यास्कोऽपि देवतकाण्डे देवतानिरूपणे सिद्धान्तयति - "तिस्र एव देवता इति नैरुक्ताः, अग्निः पृथिवीस्थानः, वायुर्वा इन्द्रो वा अन्तरिक्षस्थानः, सूर्यो द्युस्थानः"

निरुक्त देवतकाण्ड। अ. प्रथमः

अत्र निरुक्तकृता स्थानिनः प्राण विशेषा एवं मुख्यतया देवपदवाच्या उक्ताः। अग्निवायू चेमौ निरुक्तकृता निरूप्यमाणौ न भौतिकौ, अपि तु प्राणरूपौ देवविशेषावेव।

"यत्किञ्चिद्दार्ष्टिविषर्यामग्निकर्मैव तत् या च
का च बलकृतिरिन्द्रकमैव तत् यत्किञ्चित्
प्रवह्णीतमादित्यकर्मैवतत्। (निरु. दै.का. १अ.)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति तेनैव तद्देवतास्वरूपव्याकरणाद् अन्तरिक्षे वायुर्वा इन्द्रो वेति विकल्पो य आख्यातस्तस्याशयमेवं भाष्यकारः श्रीदुर्गाचार्य आह् यद् येषां कार्य प्रत्यक्षं दृश्यते, त एव देवा अत्रोक्ताः। भूम्यामग्निकार्यम् दिवि चादित्यकार्यं प्रत्यक्षं दृश्यते। अन्तरिक्ष इन्द्रकार्यं विद्युदादि तु सदा न दृश्यते, कदाचित् वर्षादावेव दृग्गोचरीभवतीति सदा दृश्मानकार्यो वायुरेव समुचिततयाऽत्रोपात्तः। किन्तु यस्य स्तुतिर्वेदेषु शतशस्सूक्तैस्समाम्नायते स देवराज इन्द्रोऽपि नोपेक्षामर्हतीत्यन्तरिक्षे द्वावपि देवावुपात्तौ। सदा दृश्यकार्यत्वाद् वायुः सर्ववेद-प्राध्यान्यान्तु इन्द्र इति।

तदितत्थमृषयो देवाश्च प्राणविशेषा एवेति सम्यक् प्रमाणैः प्रसाधितम्। तत्र ऋषय आद्याः देवास्तु तज्जन्या इत्यपि शतपथप्रमाणेन संकेतितम्। भगवान् मनुरप्येषां जन्यजनकभावमाह–

ऋषिभ्यः पितरो जाताः पितृभ्यो देवदानवाः।
देवेभ्यस्तु जगत्सर्व चरं स्थाण्वनुपूर्वशः।।
(मनु. सं. ३/२०१)

देवाश्च असुराश्चेति द्विविधाः प्राणाः पितृभ्य उत्पद्यन्ते। तत्र प्रकाशे देवानां प्राधान्यम् तमसि त्वसुराणाम् प्राधान्यम् केचित् मन्यन्ते। अत एव रात्रिमासुरीमाहुः। ब्रह्मसूत्रेष्वपि देवताधिकरणे भगवता बादरायणेन देवानधिकृत्योक्तम्– "ज्योतिषि भावाच्च" १/३/३२ इति ज्योतिषि संसक्ता एव देवा न तु शरीरभृतः। तेषां ब्रह्मविद्यायामधिकारः कथं संभवेदिति तदभिप्रायः। एतत् सूत्रं व्याख्यातं श्रीशंकराचार्यपादैः शारीरकभाष्ये – "यदिदं ज्योतिर्मण्डलं द्युस्थानमहोरात्राभ्यां बभ्रमज्जगदवभासयति, तस्मिन्नादित्यादयो देवतावचनाः शब्दाः प्रयुज्यन्ते, लोकप्रसिद्धेर्वाक्यशेषप्रसिद्धेश्च, न च ज्योतिर्मण्डलस्य हृदयादिना विग्रहेण चेतनतयाऽर्थित्वादिना वा योगोऽवगन्तुं शक्यते मृदादिवदचेतनत्वावगमात् एतेनाग्न्यादयो व्याख्याताः"

तेन सूर्यमण्डलसंसक्ततैवादित्यादीनां देवानां स्फुटीकृता। मण्डले संसक्ताश्च तत्परिचालकाः प्राणविशेषा एव देवपदवाच्या इत्युक्तं भवति यत्वग्रिमसूत्रे देवानामप्यधिकारः प्रतिपादितौ यच्च तत्र भाष्यकृद्भिर्व्याख्यातम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"ज्योतिरादिविषया अपि आदित्यादयो देवतावचनाः शब्दाश्चेतनावन्तमैश्वर्या-द्युपेतं तं तं देवतात्मानं समर्पयन्ति, मन्त्रार्थवादादिषु तथा व्यवहारात्। अस्ति ऐश्वर्य योगाद्देवतानां यथेष्टं च तं तं विग्रहं ग्रहीतुं सामर्थ्यम्"।।

तदेतद् द्वैविध्यं देवानामग्रे व्याख्यास्यते। इह तु एतावदेव वक्तव्यं यत् प्रकाशभागो देवैः सम्पाद्यते, तत्रैव च त आवर्तमानास्तिष्ठन्ति। तमस्त्वसुरप्राणैः, सम्पादितम्, तत्रैव चासुराणां स्थितिः। एते देवा असुराश्च पितृप्राणेभ्य आविर्भवन्ति, एभ्यश्चाग्रे गन्धर्वप्राणः। तत्र ऋषयः सप्त, पितरोऽष्टौ, देवास्त्रयस्त्रिंशत्, असुरा नवनवतिः, गन्धर्वाः, सप्तविंशतिरिति।

मानवास्तु मनोः प्राणादुत्पद्यन्ते। स चार्द्धेन्द्ररूपः। प्राणरूपा देवास्तत्संख्या त्रयस्त्रिंशच्च पूर्वं प्रतिपादिता। तेऽप्यध्यात्मादिभेदेन नाना-विधत्वं प्रतिपद्यन्ते--

अग्निर्वाग् भूत्वा मुखं प्राविशत् वायुः भूत्वा नासिके प्राविशत्,
आदित्यश्चक्षुर्भूत्वा अक्षिणी प्राविशत्। (ऐ.उ.द्वि.क.४)

श्रुतिषु इन्द्रियाणां देवत्वमाध्यात्ममाम्नातम्। अधिदैवतं तारामण्डलेऽपि देवा विव्रियन्ते। सूर्यस्य तु सर्वदेवसमष्टित्वं प्रतिपादितम् -

"चित्रं देवानामुदगादनीकम् (ऋ.१/११५/१) इति सर्वत्र सुप्रसिद्धे सूर्योपस्थानमन्त्रेऽपि देवानां चित्रमनीकं सूर्य इति स्पष्टीभवत्येव। एवं चन्द्रमा देवता, नक्षत्रादि देवता, इत्याद्यपि रुद्राध्यायादिषु समाम्नायते, तेषु तेषु नक्षत्रेषु तद् योगतारानाम्ना ज्योतिर्विद एकां तारां व्यवहरन्ति। सा देवरूपैव मन्यते। तामाश्रित्यैव च तत्तन्नक्षत्रदेवानां यागस्तैत्तिरीयब्राह्मणे तृतीयकाण्डे सुविस्तृतं वर्णितम् -

स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्वदेवाः।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु।।

(यजु. सं.२४/१६)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्य पर्यालोचने क्रियमाणे संशयोऽयमुदेति यदिन्द्रस्य, पूष्णः, तार्क्ष्यस्य बृहस्पतेश्च कः परस्परं सम्बन्धो येन ते मिलिता अत्र निर्दिष्टाः। द्विविधो हि देवानां सम्बन्धो निरुक्तकृता व्याख्यातः - संस्तविकश्च, एकहविर्भक्तिश्च। उभयविधोऽपि नैष क्वाप्यन्यत्र दृष्टः। नैषां सम्मिलितानामुद्देशेन क्वापि हविर्दानं विहितम्, नाप्येकस्थानस्थिताः, न चाप्यन्यत्र सहस्तुतिः श्रूयते।

यथा प्राणरूपा देवा वेदे प्रसिद्ध्यन्ति तथा प्राणिरूपा अपि ते वेदे समाम्नायन्ते।

"अन्वाख्याने त्वदुद्यते, इतिहासे त्वत्", शतपथ ब्रा.११/१/६/ अत्र शतपथब्राह्मण उत्पत्याख्याने सृष्टिप्रक्रियायां देवा अन्ये भवन्ति, इतिहासे त्वन्य इति स्फुटमुक्तम्। इतिहासस्य संबन्धः प्राणिरूपैर्देवैरिति तदाशयः संकेतितम् --

सत्रस्य ऋद्धिरस्यगन्म ज्योतिरमृता अभूम।
दिवं पृथिव्या अध्यारुहामाविदाम देवान् स्वर्ज्योतिः॥
(यजु. सं.'८/५२)

अत्र द्युलोकारोहणानन्तरं देवानां ज्ञानमाम्नातम् तेन द्युलोके प्राणिभूता देवा निवसन्तीति संकेत्यते। सृष्टिक्रमे विकासवादो वेदपुराणादिष्वपि वर्णितः आधुनिकैर्वैज्ञानिकैरापि च स एव सिद्धान्ततेन मन्यते। तत्र वैदिकदृष्ट्या पार्थिवेषु प्राणिषु प्राणिषु सूर्याकर्षणं यावद्वर्धत स एव प्राणिनां विकासः प्राणिषु बुद्धिः सौरप्राणेभ्य एव प्रादुर्भवति वर्द्धते चेत्यस्मादाराध्येन ब्रह्म गायत्रीमन्त्रेणैव सुप्रसिद्ध्यति। यावदधिकं च यस्मिन्प्राणिनि सौरप्राणजनितं सूर्याभिमुखमाकर्षणं तावदेव स पृथिव्या आकर्षणाद् विमुच्यते बुद्धौ च तस्य प्रागल्भ्यं प्रवर्धते।

दैवसर्गान्तर्गताः प्राणिनस्तु स्वाभावादेव पृथिव्या आकर्षणाद् विमुक्ता अन्तरिक्षे दिवि च सदैव विचरणशीलाः। तेषां शरीरस्य सूक्ष्मभूतजन्यतया विद्याप्रभावेणान्तर्धानशीलतया च तेऽस्मत्प्रत्यक्षा न भवन्ति। लोकान्तरस्थ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देवा अपि द्विविधाः शास्त्रेष्वाख्यायन्ते- (१) अजानदेवाः, (२) कर्मदेवाश्च। सर्गारम्भ एव ये देवत्वं प्राप्तास्ते अजानदेवाः। ये तु मनुष्या यज्ञादिबलेन देवत्वं प्राप्नुवन्ति ते कर्मदेवाः। कर्मणा देवलोकप्राप्तिरपि श्रुतिषु बहुधाऽऽम्नायते- "दिवं पृथिव्या अध्यारुहाम" इति मन्त्रे 'मर्तासः सन्तो अमृतत्वमानशुः" ऋ. १/११०/४।

पूषा त्वेतश्च्यावयतु प्र विद्वाननष्टपशुर्भुवनस्य गोपाः।
स त्वैतेभ्यः परिददत् पितृभ्योऽग्निर्देवेभ्यः सुविदत्रियेभ्यः।।
(१०/१७/३)

इत्यत्रापि चाग्नेर्देवेषु प्रापणं मृतानां श्रूयते।

एवं बहुषु मन्त्रेषु द्रष्टव्यम्। एत एव देवाः "अष्टविकल्पो दैवः" इति सांख्यकारिकायां चतुर्दशविधभूतसर्गो व्याख्यातः। इतोऽन्येऽपि पृथिवीस्था अपि देवाः श्रुतिष्वेवं श्रूयन्ते। तदुक्तं वाजसनेयश्रुतौ - "द्वया वै देवा देवाः अहैव देवाः अथ ये ब्राह्मणाः शुश्रुवांसोऽनूचानास्ते मनुष्यदेवाः" शतपथ २/२/२/२६ पृथिवीस्थेष्वप्यस्ति द्वैविध्यम्। उत्तरस्यां दिशि शर्यणावतः पर्वतस्योत्तरभागे प्रकृतिरचितां देवसंस्थामुपजीव्य पुरा पृथिव्यामपि देवसंस्था प्रकल्प्यते स्म - " देवविशः कल्पयितव्यास्ता अनु मनुष्यविशः कल्प्यन्ते" ऐ.ब्रा. २/३२ इत्याद्यासु ब्राह्मणश्रुतिषु तत्संकेतः स्पष्टमुपलभ्यते।

तदित्थं सङ्कलनया सप्तविधा अत्र देवा मया दिग्स्वरूपेण प्रदर्शिताः मुख्याः (१) प्राणरूपा देवाः (२) तेषामाध्यात्मरूपं (३) अधिदैवतं तारामण्डलादिषु रूपम् (४) अधिभूतमग्निवाय्वादि (५) लोकान्तरस्था प्राणिनो देवाः (६) भूमण्डलस्थाः सुमेरुप्रान्तवासिनो देवाः (७) भारतस्था विशिष्टा विद्वांसो वीराश्च देवाः। एतेषां सर्वेषां परस्परं कः सम्बन्ध ? कुतश्चैकस्यैव देवशब्दस्य तद्विशेषवाचकानामिन्द्रवरुणादिशब्दानां च विभिन्नेषु प्रवृत्तितिरत्येवं वैदिकं देवरहस्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्रन्थसमीक्षणम् -(१)

रमाकान्त पाण्डेय

त्वां कथं विस्मरामि, प्रणेता- राजेशोभारद्वाजः, प्रका.- विश्वात्मा प्रकाशनम्, बरेली, १९९८, मू. २९ रु.

अनुभूततत्त्वानां पुनः पुनरनुसन्धानेनैव अभिव्यज्यते कविमनस्यपूर्वः कश्चन बन्धः सहृदयानन्दकारीति सिद्धान्तितमेव काव्यतत्त्वविद्भिः। चिन्तादिभि निर्मित्तैरुद्बुद्धसंस्कारश्चिन्तनारूढकविः परानुभूतविषयानपि स्वप्रातिभशक्त्य साक्षात्करोतीत्यपि न तिरोहितं तद्विदाम्।

'त्वां कथं विस्मरामि' इति काव्यस्यास्य प्रणयनव्याजे संस्कृतकाव्यरचनाभूमौ पदं निक्षेप्तुकामः कवी राजेशभारद्वाजः काव्येऽस्मि पत्नीमरणानन्तरं प्राप्तां स्वगुरोरवस्थां काव्यविषयत्वेन अङ्गीकरोति। सरल प्रसादोपेतया भाषया भावानां तेषां तेषामभिव्यक्तौ कविरिह भजते साफल्यम्

तव चिरमुपवेशः मत्सकाशं सुशान्तं
मम वपुषि च दिव्या दुग्धकुल्येव दृष्टिः।
मधुरमधुविदग्धामुज्ज्वलां वा स्मृतिं हा।
कथमहमविकल्पं मोचये हन्त ! तस्याः ।।११।।

पुनः पुनरावृता अपि केचन भावाः चिन्तनसातत्येन जायमानस्मृतिधा वाहिकतया काव्यगुणत्वं भजन्त इह। अलङ्काराणां सहजता शब्दा भावानुरूपता भाषायाः भावाभिव्यञ्जकता च कवेरस्य कवित्व चातु निरूपयन्ति। भावानामभिव्यक्ति प्रयासोऽपि क्वचित् सार्थकः।

अभवदपि विवादश्चावयोः क्वापि मध्ये
क्वचिदपि न सपर्दं भाषितञ्चैकवारम्।
इयमपिसुखदासीच्चारुता सुप्रियायाः
कथमहमविकल्पं मोचये हन्त! तस्याः।।१४।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

च्युतसंस्कृत्यादयो दोषाः क्वचिदक्षिलक्ष्यीभवन्ति। तदितरेऽप्यवाचकत्वादयोऽपि केचन दृष्टिपथमायान्ति। ''ध्वनति च परभृच्चेत् पुष्पितायां लतायां'' (२४) अत्र क्विबन्तपरभृच्छब्दस्य कोकिलार्थवाचकत्वेन प्रयोगः किन्तु कौषादौ तस्य काकार्थवाचकत्वेनैव प्रसिद्धेरास्कन्दत्ययं चिन्त्यपदवीम्।

कवी राजेशोऽतिशयोक्त्यादिनिरूपणे न विश्वसिति। यद्यपि पारम्परिका एव भावास्त एव विषयाश्चेह काव्यत्वं भजन्ते तथापि कवेः प्रथमकृतित्वेन काव्यमिदमवश्यं श्लाघ्यनीयं सहृदयैरिति दिक्।

तर्कामृतम् (आङ्ग्लानुवादसहितम्) अनु. बलिरामशुक्लः, प्रका. निमित्तप्रकाशनम्, १९९७, मू. ४० रु.

जगदीशतर्कालङ्कारविरचितोऽयं तर्कामृतमित्याख्यो ग्रन्थः न्यायशास्त्रविविदिषूणां बालानां महानुपकारक इति सुविदितमेव विपश्चिताम्। तस्य चाऽयं बलिरामशुक्लकृत आङ्ग्लभाषानुवादः भजते किञ्चिद् वैशिष्ट्यम्, तत्तत्सिद्धान्तानां पारिभाषिकशब्दानां च व्युत्पत्तिपुरस्सरं ग्रन्थादौ विवेचितत्वात्। त्रिष्वंशेषु विभक्तेऽस्मिन् ग्रन्थे प्रथमांशे केषाञ्चन पारिभाषिकशब्दानां विवेचनं कृतम् द्वितीये ग्रन्थस्तृतीये च तस्यानुवादो दत्तौ। तत्तत्पदार्थानां विवेचनव्याजेन तत्तच्छास्त्रीयाणां तद्विषयकसिद्धान्तानां सङ्केतोऽपीह कृतोऽनुवादकेनेति विद्यार्थिनोऽवश्यमुपकृताः स्युः ग्रन्थेनानेति नो विश्वासः।

भूषणसार-समीक्षा, डॉ.के.वि. रामकृष्णमाचार्यः, राघवप्रकाशनम्, तिरुपतिः, १९९६, मू. २०० रु., पृ. ४१५

भूषणसारसमीक्षेति ग्रन्थोऽयं तत्कृता श्रीमद्रामकृष्णमाचार्यमहोदयेन 'पी.एच.डी.' इत्युपाधये प्रस्तुतस्य शोधप्रबन्धस्य परिष्कृतं स्वरूपम्। त्रिष्वध्यायेषु विभक्तोऽयं ग्रन्थः शाब्दबोधविषयकान् तांस्तान् सिद्धान्तान् पुरस्करोत्यपूर्वतया भूषणसारस्य समीक्षामिषेणेति अभिनन्दनीयौ ग्रन्थप्रणेता तत्प्रयासश्च।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रथमभागस्य प्रथमाध्याये पाणिनिशास्त्रोपासकानामैतिह्यं दत्त्वा द्वितीय-तृतीयाध्याययोः शास्त्रीयां तत्त्वसमीक्षां प्रस्तुतवान् ग्रन्थकारः। दर्पणादिप्राचीनव्याख्याकृतां सिद्धान्तानां समीक्षणे यथा प्रीतिर्ग्रन्थकृतस्तथैव प्रभादिनूतनटीकाकृतामपीति प्राचीनार्वाचीनसिद्धान्तानां कश्चन अभिनवोऽत्र सङ्गमः।

धात्वाख्यातार्थविषये नाऽस्ति मतैक्यं तत्त्वच्छास्त्रानुयायिनामिति सुविदितमेव विपश्चिताम्। तथैवेह दृष्टिपथमायान्ति अन्विताभिधानाभिहितान्वयवादसंसर्गमर्यादावाद-स्फोटवादादयो नैके शाब्दबोधवादास्तत्तत्प्रस्थानप्रसिद्धाः। तान् सर्वान् शाब्दिकदृशा निराकृत्य स्फोटसिद्धान्तस्य प्रतिष्ठा कृता ग्रन्थकारेण शिवदत्तदत्तात्रेयजोशीप्रभृत्यर्वाचीनानामपि मतसमीक्षणपुरस्सरम्।

धात्वाख्यातार्थनिर्णयनाम्नि द्वितीयाध्याये भावनाया धात्वर्थवादिनां निरासेऽथ च नैयायिकाभिमतधात्वाख्यातार्थनिरासे च ग्रन्थकर्तुः शास्त्रपाण्डित्यपटुता तत्त्वचिन्तनचातुरी च द्रष्टुं शक्येते सुधीभिः। तत्तन्मतानुयायिनां तत्तत्सिद्धान्ताङ्गीकारे कानि तत्त्वानि कारणायन्त इति सविवेकं समीक्षितम्। नानाविधतर्कप्रदर्शनपुरस्सरं स्वोक्तिस्थापनेऽपि भजते वैशिष्ट्यमयं मनीषी एवं प्रथमान्तमुख्यविशेष्यकशाब्दबोधे च नास्ति किञ्चित् प्रमाणम्। यच्च सर्वनाम्नां प्रधानपरामर्शित्वं पुरस्कृत्य प्रथमान्तस्य मुख्यविशेष्यत्वमुपपाद्यते तदपि न युक्तम्। सर्वनाम्नां सर्वत्र प्रधानपरामर्शित्वस्य असिद्धत्वात् (पृ.१७३)

एवमेव लकारार्थादिनिरूपणेऽपि सुधीरयं दृश्यते निर्भीकः सफलश्च।

सुबर्थनिर्णयनाम्नि तृतीयाध्याये विभक्त्यर्थ-नामार्थ- समासशक्तिशक्त्यादिविषयनिरूपणपूर्वकं निष्कर्षत्वेन स्फोटसमीक्षा कृता ग्रन्थान्ते। तच्चोचितमेव शाब्दिकसिद्धान्ते तस्यैव निष्कर्षभूतत्वात्। अत्रापि तेषां तेषां सिद्धान्तानां सम्यक् समीक्षा कृता। विरोधिनां मतनिरासे स्वसिद्धान्तोपस्थापने चेहापि वैशिष्ट्यमवलोक्यते ग्रन्थकृतः। यथा च प्रभाकरमतखण्डने -

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"जातिव्यक्त्योः समानवित्तिवेद्यत्वं किं प्रत्यक्षे उत शाब्दे नाद्यः। दूरस्थस्य एते आम्राः पनसा वा इति संशयदर्शनेन प्रत्यक्षेण व्यक्तिग्रहेऽपि जात्यग्रहात् ...... (पृ.६६)

हर्याद्युक्तिप्रमाणाधिकरणेन स्फोटविरोधिनां मतनिराकरणे पण्डितप्रवरस्य श्रीकन्दालवेङ्कटरामकृष्णमाचार्यमहोदयस्य पाण्डित्यप्रकर्षोऽभिनन्दनीयः। स्फोटस्य शाब्दिकाभिमतस्वरूपनिरूपणे सत्यमभिनवां विचारभूमिमवगाहते ग्रन्थकारः। न केवलं शाब्दिकाभिमतशाब्दबोधविषयके सिद्धान्तानामपितु न्यायादिततदितरशास्त्राभिमतसिद्धान्तज्ञानायापि विद्यार्थिभिर्विद्वद्भिश्चावश्यं सङ्गृहीष्यते ग्रन्थोऽयमिति दृढतरोऽयं नो विश्वासः।

धात्वर्थनिर्णय एवं धात्वर्थनिरूपण का तुलनात्मक अध्ययन, लेखिका- हरीश, प्रका. - विद्यानिलयम्, २७/२८ शक्तिनगर, दिल्ली, १९९८, मू. १०३ रु.

"धात्वर्थनिर्णय एवं धात्वर्थनिरूपण का तुलनात्मक अध्ययन" इत्याख्यो ग्रन्थोऽयं दिल्लीविश्वविद्यालयस्य 'पी.एच्.डी.' इत्युपाध्ये प्रस्तुतः शोध-प्रबन्धः। हरीशेत्याख्यया लेखिकयेह भूषणसार-परमलघुमञ्जूषयोर्धात्वर्थविषयकाः सिद्धान्ताः सविवेकं समीक्षिताः शब्दशास्त्रीयपरम्परामुनसृत्येति ग्रन्थोऽयं महानुपकारकः शब्दशास्त्रीयसिद्धान्त जिज्ञासूनाम्।

षडध्यायेषु ग्रन्थेऽस्मिन् कौण्डभट्टस्य धात्वर्थनिर्णयं नागेशस्य धात्वर्थनिरूपणं चाश्रित्य कृतो विचारः शब्दशास्त्रीयां शाब्दबोधपद्धतिमाविष्करोति। ग्रन्थस्य प्रस्तावनारूपेण कल्पिते प्रथमाध्यायेऽनुसन्धानसमस्यामुपस्थाप्य लेखिकया द्वितीय-तृतीय-चतुर्ष्वध्यायेषु धात्वर्थः, क्रिया, भावना, तिङर्थः, लकाराश्च विषयत्वेन गृहीताः। पञ्चमषष्ठयोः पुनः मीमांसकनैयायिकयोः सिद्धान्तान्निराकृत्य व्याकरणशास्त्रानुसारी सिद्धान्तः प्रतिष्ठापितोऽन्ते।

शाब्दबोधसदृशकठिनतरविषयस्य लोकभाषामाध्यमेन प्रस्तुतिप्रयासोऽयं लेखिकाया अभिनन्दनार्हः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाट्यशास्त्रविश्वकोश, प्रणेता सम्पादकश्च - राधावल्लभत्रिपाठी, प्रकाशः - प्रतिभाप्रकाशनम्, २९/५ शक्तिनगर, दिल्ली १९९९, पृ. १६१९, मू. ३७३ रु. (प्रत्येकभागस्य)

'नाट्यशास्त्रविश्वकोश' इति चतुर्षुभागेषु प्रकाशितोऽयं कोशः श्रीमद्राधावल्लभत्रिपाठिमहाभागानां विद्याव्यवसनजन्यः कश्चन महाप्रबन्धः। प्रणेता नेह पारिभाषिकशब्दव्याख्यानमात्रे विद्यते दत्तावधानोऽपि तु पाश्चात्त्यनाट्यपरम्पराणां विकासक्रमादिव्याख्यानेऽपि तस्य महती प्रीतिः। विश्वकोशस्य अस्य भूमिकारूपेण प्रणीते प्रथमभागे भारतीयनाट्यशास्त्रस्य परम्परां प्रसमीक्ष्य पाश्चात्त्यपरम्परोन्नायकानां, तेषां वैशिष्ट्यस्य चेह सम्यग् व्याख्यानं कृतमिति नाट्यशास्त्रविश्वकोश, इति ग्रन्थनाम्नोऽन्वर्थता।

द्वितीय-तृतीय-चतुर्थ- भागेषु अकारादिक्रमेण पारिभाषिकशब्दानामैतिहासिकविवेचनं प्रस्तुतमिति कोशकृतः कोशरचनापद्धतिरपीह भजते वैशिष्ट्यम्, प्राचीनार्वाचीनसिद्धान्तानां तस्मिन्नेव स्थले व्याख्यातत्वात्। यथा चानुकरणशब्दस्य व्याख्याने भरतस्य अवधारणामुपस्थाप्य पाश्चात्त्यनाट्यचिन्तनेऽनुकरणस्य स्वरूपं विवृण्वानः कोशकारो वक्ति -

पश्चिम में अनुकरण की प्रारम्भिक अवधारणा प्लेटो के विवेचन में मिलती है। प्लेटो ने अनुकरण शब्द का प्रयोग गर्हित अर्थ में किया है। उनकी दृष्टि में कला या कविता अनुकृति की भी अनुकृति मात्र है, इसलिए वह सत्य से दो गुना दूर है'' (पृ.२६०)।

एवं बहुत्र तत्तत्सिद्धान्तानां समीक्षणे तद्विकासक्रमप्रदर्शने च श्रीमतो राधावल्लभत्रिपाठिनो व्याख्यानपटुत्वं द्रष्टुं शक्यते सुधीभिः।

शास्त्रान्तरे क्वचित् पृथगर्थप्रतिपादकत्वेन प्रसिद्धस्य परम्परायामस्यां च भरतप्रवर्तितायामन्यार्थप्रतिपादकत्वेन प्रसिद्धशब्दस्य व्याख्यानेऽपि आचार्यप्रवरा भजन्ते वैशिष्ट्यम्। यथा च 'रस' इति शब्दस्य आयुर्वेदादिशास्त्रेषु तत्तदर्थप्रतिपादकत्वं सम्यङ्निरूप्य स्वशास्त्रीयसिद्धान्ता उपस्थापिता ग्रन्थकृता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वस्तुतो नाट्यशास्त्रविश्वकोशोऽयं न केवलं तत्तत्पारिभाषिकशब्दानां परिज्ञानाय रचितः कश्चन शब्दार्थप्रदर्शनपरः कोशग्रन्थः, न वा तत्तन्नाट्य-सिद्धान्तानां परिष्कारप्रदर्शनाय निर्मितः सङ्ग्रहग्रन्थोऽपि तु भरतप्रवर्तिताया भारतीयनाट्यपरम्परायाः प्राच्यपाश्चात्त्य निकषे परीक्षणस्य कश्चन सफलोऽयमद्वितीयः प्रयासः इति श्रीमद्राधावल्लभत्रिपाठिनां स्वाध्यायतपोजन्यमिदं ग्रन्थरत्नमनुसन्धित्सूनां विदुषां चोपकाराय, अथ च भारतीयनाट्यपरम्परायाः प्रचाराय प्रसाराय च नूतनाः सम्भावना आविष्करिष्यतीति दिक्।

रूपमालाविमर्शः प्रणेता सम्पादकश्च - सुरेशचन्द्रशर्मा, प्रकाशकः नागप्रकाशकः, दिल्ली, १९९४, मू. ६८रु.

रूपमाला नाम पाणिनिसूत्राश्रयेण प्रणीतं तत्परम्पराया अद्वितीयः प्रक्रियाग्रन्थः। पाणिनिसूत्राण्याश्रित्य प्रणीते प्रथमे रूपावतारेत्याख्यप्रक्रियाग्रन्थे वैदिकोदाहरणानामभाव एव ग्रन्थरचनाया अस्याः प्रवृत्तिबीजम्। भवतु नामेह वैदिकप्रयोगप्राधान्यं रूपमालायां, तत्प्रणेता यतीन्द्रो विमलसरस्वती रूपावतार-कर्त्रेऽधमर्णस्तेनैवादौ कातन्त्रादिपरम्पराप्रसिद्धप्रक्रियापद्धतौ पाणिनिसम्प्रदाया-नुकूलत्वप्रतिपादनात्, तदाश्रयेण प्रथमप्रक्रियाग्रन्थनिबन्धनाच्चेति।

रूपमालाविमर्शेऽस्मिन् शोधप्रबन्धे पाणिनिसम्प्रदाये प्रक्रियाग्रन्थानामा-विर्भावविकासक्रमादिपरिशीलनपुरस्सरं रूपमालादृशा शास्त्रस्य प्रस्तुतिप्रयासो विमृष्टः। रूपावतारे यथा अवतारशब्दस्य प्रयोगः प्रकरणसमन्वयाय कृतस्तथैवेह परिव्राजकाचार्यैः, श्रीमद्विमलसरस्वतीभिः 'माला' शब्दः प्रायोजि। एवं संज्ञामाला, सन्धिमाला, अजन्मालेत्यादिनाम्ना प्रकरणानि विभक्तानि।

रूपावतारे यथा कातन्त्रस्य तथैव रूपमालायां बोपदेवस्य प्रभावोलक्ष्यते। वस्तुतो रामचन्द्रप्रणीतप्रक्रियाकौमुद्यां तु वोपदेवस्य बहून्युदाहरणानि लभ्यन्ते। किन्तु रूपमालाकारेण 'इत्येके' इति केचित् इत्यादिरूपेण नामनिर्देशपूर्वकं वा केषाञ्चिन्मतानि प्रदर्शितानि। इहापि काशिकानुसारी पाठः स्वीकृतः सूत्राणाम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विदुषा सुरेशचन्द्रशर्मणाऽस्मिन् शोधप्रबन्धे रूपमालागतं सर्वमपि वैशिष्ट्यं नैपुण्येन निरदेशि। अष्टाध्यायात्मकेऽस्मिन् ग्रन्थे प्रक्रियाग्रन्थैः सह रूपमालायास्तौल्यविचारः वार्तिकः श्लोकवार्तिकानां विवेचनं परिभाषाणां च समीक्षणं मनोहारीणि।

तत्तच्छब्दानां प्रक्रियाप्रदर्शने सूत्राणां पाठभेदादिनिर्धारणे च श्रीसुरेशचन्द्रशर्मणः प्रयासोऽयं बालानां विदुषां च सहाय्यं विधास्यतीति विश्वासः।

ग्रन्थसमीक्षणम् -२

अच्युतानन्ददाशः

पं. खड्गनाथमिश्रः, सिद्धान्तलक्षणतत्त्वालोकप्रकाशः (गङ्गेशोपाध्याय-रघुनाथशिरोमणिजगदीशतर्कालङ्कार - धर्मदत्तानां चिन्तामणिदीधिति - जागदीशी - तत्त्वालोकसंयलितः)। संपादक :- श्रीकृष्णशर्मा, प्रकाशकः - दर्शनविभागः, राजस्थानविश्वविद्यालयः, जयपुरम्। प्रथमोभागः - १९९६, पृ. , मूल्यम् ४०० रु. द्वितीयभागः - १९९७, पृ. , मूल्यम् ४०० रु.

नव्यन्यायदर्शनाध्ययनं नाम अयश्चणकचर्वणमिति नैके मन्यन्ते। सेयं दर्शनपरम्पराऽस्तंगतेति केषाञ्चिन्मतम्। साम्प्रतन्तु पण्डित-श्रीखड्ग-नाथमिश्रमहोदयैः विरचितं सिद्धान्तलक्षणतत्त्वालोकप्रकाश 'इति नव्यन्यायपरम्परायामतिमहत्तरं ग्रन्थरत्नं विलोक्य नूनमाश्चर्यचकिताः भवेयु-स्तत्तन्त्रनिष्णाता विद्वांसः। सेयं नव्यन्यायपरम्परा न तिरोहिता अपि नु निरवच्छिन्नतया प्रसन्नगम्भीरमुद्रया भगीरथखातावच्छिन्नजलप्रवाहवन्निरन्तरं प्रवहमाना अद्यापि विचारचातुर्यं प्रख्यापयन्ती पूर्णयौवनारूढेव राराजत इति प्रमाणयतीयं पण्डितवरेण्यानां श्री-खड्गनाथ-मिश्राणां रचनाचातुरी। अस्य तत्त्वालोकप्रकाशग्रन्थस्य सन्दर्शनेन ते ते वावदूकमिश्राः ये नाम नव्यन्यायपरम्परां हेयां मन्यन्ते नूनं दिवान्धा इव भीतभीताः अन्धकाराच्छन्नं गहरमन्वेषणपरायणा भवेयुरिति मे मतिः। अन्यथा स्वमतनाशेन स्वात्मनाश इति तेषां सत्तापि दुरुपपादा दुर्धरा वा स्यात्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्याः परम्पराया अयमारम्भो यद्यपि श्रीमतां गङ्गशोपाध्यायानां पूर्वजैः शशधरमिश्र-प्रभृतिभिः कृतमासीत्तथापि श्रीगङ्गशोपाध्याया एव अस्य मार्गस्य मार्गदर्शि-महर्षय आसन् इति न कस्यापि वैमत्यं तिष्ठति। प्राचीन-न्यायशास्त्रं प्रमेयशास्त्रं नव्य-न्यायशास्त्रं च प्रमाणशास्त्रमिति सामान्यतः व्यपदिश्यते। नैयायिकैः परिग्रहीतानां चतुर्णां प्रमाणानां प्रत्यक्षानुमानोपमान-शब्दानामाधारेण खण्डचतुष्टयात्मकः तत्त्वचिन्तामणिरिति महान् ग्रन्थः श्रीमद्भि-र्गङ्गेशोपाध्यायैः विरचितः। नव्यन्यायशास्त्रं प्रमाणशास्त्रमिति वादस्यायं हि ग्रन्थः प्रतिष्ठाभूमिः यत इत एव प्रमाणविचारचर्च्चा महदाडम्बरेण समुल्लसिता। तत्रापि अनुमानखण्डे विद्वद्धौरेयाणां श्रीरघुनाथ-श्रीमथुरानाथ-श्रीजगदीश-श्रीभवानन्द-श्रीगदाधर-श्रीधर्मदत्त-प्रमुखानां व्याख्याः सुचिरात् प्रथिततमाः विद्वन्मनांसि आवर्जयन्ति। अत एव न्यायं नामानुमानमिति प्रत्यक्षसिद्धमर्थमपि अनुमानेन बुभुत्सन्ते तर्करसिका इति वादाः प्रचलिता दृश्यन्ते।

अनुमानस्य मूलं खलु व्याप्तिज्ञानम्। व्याप्तेः स्वरूपपरामर्शं विना न न्यायं प्रवर्त्तते। अतः व्याप्तेः लक्षणमधिकृत्य यद्यपि चिन्तामणिग्रन्थे महान् विचारो दृश्यते तथापि तत्र प्रसिद्धं चतुर्दश-लक्षणजालं प्रस्तूय अन्ते सिद्धान्तलक्षणतया प्रस्तौति श्री गङ्गशोपाध्यायः -

> "प्रतियोग्यसमानाधिकरणयत्समानाधिकरणात्यन्ताभाव-प्रतियोगितावच्छेककाविच्छिन्नं यन्न भवति तेन समं तस्य सामानाधिकरण्यं व्याप्तिः" इति।

अनुमानस्य प्रतिष्ठा अस्यैव व्याप्तिलक्षणस्य प्रतिष्ठामुपजीव्य जीवनीति न्यायविद मन्यन्ते। मन्येऽनेनैकेनैव लक्षणेन विज्ञानेन सर्वोऽपि व्याप्तिग्रहः सुतरां सुलभग्राह्यो भवति इति तर्करसिकाश्चिन्तयन्तीति।

अस्यैव एकस्य लक्षणवाक्यस्य व्याख्यापरम्परामुज्जीवयन् अयं सिद्धान्तलक्षण - तत्त्वालोक-प्रकाशे नाम महान् ग्रन्थः अस्माकं पुरस्ताद्राराजते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्य भागद्वयमेवाधुना प्रकाशित उपलभ्यते इतोऽपि तृतीयो भागः प्रकाशनमपेक्ष्यमाणस्तिष्ठति। तत्र प्रथमे भागे श्रीगङ्गेशोपाध्यायविरचितेन सिद्धान्तलक्षणेन समं दीधिति - जागदीशीग्रन्था अपि सन्निविष्टा सन्ति। तेन मूलान्वेषणे तदनुरोधेन ग्रन्थार्थावगमनेऽपि सुकरता भवति। ग्रन्थस्यास्य सम्पादकमहोदयेन श्रीकृष्णशर्म्मणा ग्रन्थभागं खण्डशः विभज्य तत्र १ तः १२० पर्यन्तं ग्रन्थभागान् आदाय प्रथमोभागः प्रकाशितः। तेनोत्तरोत्तरव्याख्याभागानां परिशीलने ग्रन्थानुपूर्वकविचारविमर्शे च महानुपकारोऽध्येतृणामुपकल्पित इति नेदं साधारणकार्यं सम्पादकानाम्। द्वितीये भागे पुनः तत्त्वालोक-प्रकाशस्य १२१ खण्डतः आरभ्य २१६ खण्डान्तं यावत् ग्रन्थभागाः सन्निवेशिताः। अतः परं तृतीये भागे प्रकाशयिष्यन्ते इति सम्पादकमहोदयः प्रतिजानते।

जागदीश्यामुपरि पं. श्रीधर्मदत्त (बच्चा झा) - महोदयानां गूढार्थतत्त्वालोकः प्रकाशितपूर्वं विद्यते। किन्तु गूढार्थतत्त्वालोकस्य गूढमर्थजातं व्याख्यानमन्तरेण विदुषामपि न चेतसमधिरोहति किमुत सामान्यानां तर्कप्रक्रियाऽसंस्कृतमतीनामस्मादृशम्। अतः पण्डित-मण्डल-चक्रवर्तिनां श्रीधर्मदत्तझामहोदयानां गूढार्थतत्त्वालोकस्योपरि तदीयान्तेवासिभिः नैका व्याख्या विरचिताः। तेष्वन्यतमा आसन् षष्ठीनाथमिश्राः। तस्य पुत्रः शिष्यश्चासौ पं. खड्गनाथमिश्रः। अस्य जन्म १५.१०.१९२१ खीष्टाब्दे बिहारप्रान्ते मधुवनी मण्डलान्तर्गतं लालगञ्जग्रामेऽभूत्। अनेन महाभागेन स्व-परमगुरूणां श्रीधर्मदत्त-झा-महोदयानां तत्त्वालोकस्योपरि अयं प्रकाशामिधः व्याख्याग्रन्थः विरचितः। यद्यपि व्याख्याग्रन्थः व्याख्येयग्रन्थमाधारतयावलम्ब्य प्रवर्त्तते तथापि व्याख्या ग्रन्थे व्याख्यातुर्मौलिकमेव चिन्तनं सर्वत्र परिलक्ष्यते। सिद्धान्त लक्षण-गूढार्थतत्त्वालोकस्योपरि श्रीकृष्णमाधव-झा-महोदयेन सुबोधिनी-व्याख्या विरचिता। यद्यपि श्रीकृष्णमाधवझा- महोदयाः श्रीखड्गनाथमिश्राणां गुरुकल्पा सन्ति इति स्वयं विनम्रतया उद्घोषयन्ति खड्गनाथमिश्रास्तथापि तैः सह प्रतिस्पर्धामाना इमे प्रकाशाख्यममं ग्रन्थं व्यरीरचन् इति डॉ. किशोरनाथ - झा-महाभागः स्वीय - न्यायशास्त्रानुशीलनग्रन्थे (पृ. १२९, प्रकाशनम् -

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१६६८) अभिप्रैति। पं. खड्गनाथमिश्रचरणैः श्रीकृष्णमाधवझा-शर्म्मणां मतानि नैकत्र विशिष्य त्रिषु स्थलेष्वपाकृतानि। कस्तत्र समीचीनमतावलम्बी को वा गूढार्थतत्त्वालोकस्याशयं याथार्थ्येनावगच्छतीति तु नव्यन्याय विवेचनापटीयांस एव विद्वांसः निर्णेतुमर्हन्तीति शम्।

नवीन प्रकाशनानि

१. **नाट्यशास्त्रविश्वकोशः** हिन्दी भाषायां चतुर्षु खण्डेषु
प्रणेता - राधावल्लभः

२. **प्रख्या - तृतीयो भागः**
शुकसारिका - निरङ्कुशतानिराकृति
शास्त्रार्थ विचारपद्धति - ग्रन्थत्रयात्मकः
सम्पादकौ - राधावल्लभः, रमाकान्तपाण्डेयः

३. **उपाख्यानमालिका** - नवीनान्युपाख्यानानि
प्रणेता - राधावल्लभः

४. **तण्डुलप्रस्थीयम्**
दशाङ्कं प्रकरणम् - राधावल्लभः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्रन्थसमीक्षणम्(३)

राधावल्लभः

वेदधर्मव्याख्यानम् : विद्यावाचस्पतिमधुसूदनओझाविरचितम्। हिन्दीभाषानुवाद-सहितम्। प्रधानसम्पादकः- डॉ०गणेशीलालसुथारः।सम्पादकः- डॉ० दयानन्दो भार्गवः, अनुवादकः- डॉ० सत्यप्रकाश- मिश्रः। प्र०-मधुसूदनओझा शोधप्रकोष्ठः, संस्कृतविभागः, जयनारायणव्यासविश्वविद्यालयः, जोधपुरम्। १९९९। मूल्यम्-२५० रूप्यकाणि।

वेदधर्मव्याख्याने पण्डितप्रवराणां मधूसूदनओझामहोदयानां अति नूत्नं नहि, नहि अतिप्रत्नं रहस्यम्, वेदधर्मविभक्तिरहस्यम्, पुराणसमीक्षा, वैदिकवैभवम् चेति चत्वारि व्याख्यानानि सङ्कलितानि। प्रथमं व्याख्यानं परिशिष्यानुग्रहनाम्नो महाग्रन्थस्यांशभूतम्। इदं व्याख्यानमोझामहोदयैः लण्डननगरे १९०२-तम-खिस्ताब्दे प्रदत्तम्, मैक्डॉनल-बेडल-टॉमस-प्रभृतिभिः पश्चिमैर्विपश्चिदपश्चिमैर्भृशं प्रशंसितं च। अस्य पुस्तकाकारं प्रथमसंस्करणं १९५२-तमे क्रिस्ताब्दे प्राकाश्यं गतं, सम्प्रति दुर्लभम्। अत्र आर्यानार्यधर्मयोः स्वरूपमुन्मीलयद्भिर्व्याख्यानकारैरार्यधर्मवैशिष्ट्यं साकल्येन प्रकटीकृतम्, ज्ञानशक्तिक्रियाशक्त्योर्विशेषाश्च कीर्तिताः (पृ०२१-३२)। विराट्-तैजस्-प्राज्ञरूपेण ब्रह्मणस्त्रैविध्यं विचार्य विद्याया अपि आधिदैविकाधिभौतिका- ध्यात्मिकेति त्रैविध्यं प्रादर्शि ग्रन्थकृता (पृ०३२-३३)। तृतीये वेदविभक्तिरहस्यमिति व्याख्याने वेदधर्मयोर्विशेषः सविशेषं प्रतिपादितः। जगति यत् किमपि विद्यमानं क्रियमाणं वा वरीवर्ति तस्याशेषस्य सम्बन्धो वर्तते वेदधर्माभ्यामिति साधयत्यत्र व्याख्यानकारः। सत्तर्कस्तृतीयो वेद इति मतमप्यत्र विस्तारेण समर्थितम्। तृतीये पुराणसमीक्षेति शीर्षकेण निबद्धे व्याख्याने अर्थवादस्य स्वरूपं परामृष्टम्। अत्रैव भाषायाः स्वरूपं विविच्य संस्कृतभाषाया वैशिष्ट्यं सङ्कलय्येत्थं प्रकटीकृतम्-

तस्मादिह सर्वाशङ्कानिवृत्तिपुरस्सरं याथातथ्येन धर्मतत्त्वं विज्ञातुमिच्छद्भिरवश्यमेषा देवभाषापरनाम्नी संस्कृतभाषा भूयसा परिष्कारेण प्रयत्नशिक्षया विज्ञातव्या। तद्विज्ञानमन्तरेण धर्मविज्ञानस्य सर्वथैवाशक्यत्वात्। संस्कृतभाषाविज्ञानेन च वैदिकग्रन्थानां हृदयानि विकसितानि भवन्ति। सर्वे च तत्रत्याः पदार्थाः याथातथ्येनोद्भासन्ते। ततः सर्वे धर्म्या हृदयतो विज्ञायन्ते। उत्पद्यते च धर्मे भूयसी श्रद्धा। श्रद्धया चानुष्ठिता धर्मा अवश्यमस्माकमभ्युदयाय

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्युर्निःश्रेयसाय चेति पश्यामः।(पृ० ३४३)

अस्मिन्नेव व्याख्याने वैदिकपदार्थानां देवतत्त्वस्य प्रजापतेश्च गूढं स्वरूपमपि वाचस्पतिना व्याख्यानकारेण विवृतम्(पृ० ३९३-९५)। सर्वलोकव्यापी सर्वरस एव इन्द्र इति ओझा महोदयानां मतम् (पृ० ३९६)। ज्ञानसापेक्षस्य प्रजापतिशब्दस्य क्रियासापेक्षस्य यज्ञशब्दस्य च विवेकः विस्तरेण विषयीकृतः (पृ० ३९३-२८)।

निश्चप्रचमेव मधुसूदनमहोदयोऽस्माकं युगस्य भास्करो भाष्यकारः। तस्य इमामनुपमां कृतिं तथैवान्यानपि तदीयान् ग्रन्थान् प्रकाश्य पण्डितमधुसूदनओझा-शोधप्रकोष्ठः सर्वथा साधुवादपात्रं जात इति न संशीतिः।

पुरा यत्र स्रोतः - प्रणेता- हर्षदेवो माधवः। प्र०- संस्कृत साहित्य अकादेमी, गान्धीनगरम्, गुजरात। १९९८। मू०- ६० रूप्यकाणि।

साम्प्रतिकसंस्कृतसाहित्यं विविधैः नवप्रयोगैः समृद्धिं नयतः प्रत्यग्रकल्पनोन्मेषधनस्य कवेः हर्षदेवमाधवस्य नवमोऽयं काव्यसङ्ग्रहः। अत्र सप्ततिर्नवीनानि काव्यानि तदीयानि सङ्कलितानि। एतानि काव्यानि १९८०ई०तः १९९५ई० मध्ये विरचितान्यपि प्रायशो माधवस्य पूर्वप्रकाशितकाव्यसङ्ग्रहेषु न दृश्यन्ते। कवितासु सौन्दर्यभावना, निसर्गरामणीयकम्, प्रणयिहृदयस्य नाना दशाश्च विषयीकृताः। अस्पृष्टकल्पनासहचरिता वैदग्ध्यभङ्गीभणितिः सर्वत्र कवेः समाधिगुणं प्रत्याययति। वर्ण्यविषयस्य नूतनतया सह उदात्तं विषयवस्त्वपि हर्षदेवस्य कविता उन्मीलयति। तद्यथा-

टावरकण्ट के
समयवृश्चिकः प्रतिपालयति भक्ष्यम्।
तदा
ईश्वरः
पिपीलिकायाः
सूच्यग्रमिते हृदये
श्वसिति। (पृ० ६)

अस्य सङ्ग्रहस्य काव्येषु कोमलभावनाः सविशेषं परिस्फुरन्ति। कवियत्मनः सरसतामित्थं विवृणोति- *कामम् ओष्ठयो शोषः/ हृदये तु सरः* (पृ० ६)। आधुनिकजीवने प्रवर्धमानां यान्त्रिकतां कृत्रिमतां वा सविशेषं परामृशति कविर्माधवः। अस्य काव्येषु क्वचित् कोकिलाः दूरभाष्येण वार्तालापं कुर्वन्ति, "*दिनाङ्कपत्राणि/ पतङ्गपक्षौ परिधाय/उड्डीयन्ते भित्तौ*" (पृ०८), अथवा "*कक्षे/ प्लास्टिकपुष्पवक्षसि/ ऋतुहृदयध्वनिं श्रोतुं/ प्रभ्रष्टः पतङ्गः प्रयतते*" (तत्रैव)।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समकालिक- राजनीतेर्विडम्बनापि क्वचिदस्य काव्ये सममर्दारणमनुभूयते, ... बीभत्समानोऽयं प्रार्थयते- *"राजनीतिज्ञानां/ सत्तान्धहस्तानां मध्ये/ ... पिपीलिकाप्रतिच्छाया- मितमीश्वरं देहि"* (पृ०९)। "न्यायालय" इति ... न्यायपालिकायाः कार्यप्रणाली उद्घाटिता। वस्तुतो हर्षदेवस्य काव्यससारे ... संसारो नवायते। प्रत्येकं दृश्यं नूतनदृशायं विलोकयति। प्रथम... वर्णयन्नयमाह-- *"पिपीलिकानां पक्षेषु/ गगनं जातम्"* इति (पृ० १०)। "विवि...

, "दीवग्रामः" इत्यादिकाव्येषु निसर्गचित्राणि मनोहारीणि ... अलकनन्दामधिकृत्य बहूनि नवीनानि काव्यानि अस्मिन्नपि सङ्ग्रहे ... अलकनन्दा काप्यज्ञाता रहस्यमयी चिरन्तनप्रणयिनी विद्यते। तामधि... अलनन्देति काव्यसङ्ग्रहः पूर्वमेव कविनानेन प्रस्तुतः। अत्राप्यलकनन्दा ... सरीसर्ति कवेश्चित्तवृत्तीनां प्रवाहः, अत इत्थं वक्तुं शक्यते यदलकनन्दा... कवेर्माधवस्य प्रायशः दशकत्रयपर्यन्तायाः काव्ययात्राया एकः स्थायीभावः। वस्तु... जीवने यत्किमपि स्पृहणीयं, वरेण्यं ऊर्जस्वी उत्तुङ्गतमं वा दि... तत्सर्वमलकनन्दायां प्रतीकायते। अत एव अलकनन्दां कविराह-

कामं ते समीपे नास्ति किञ्चिदपि
तर्हि
एकं स्फुलिङ्गमन्विच्छ
प्रज्ज्वालय
शुष्कतृणसदृशमस्तित्वं मे। (पृ० २५)

आत्मनोऽस्तित्वं कविरलकनन्दायां निमज्जयितुमुत्कायते। आत्मरूपान्तरस्य भाव... इह सर्वत्र जागरितः। तद्यथा- *घटिकायन्त्रं भूत्वा/श्रोष्यामि/ त्वत्स्वप्नचरणशब्दम्।/निर्झरो भूत्वा स्नापयिष्यामि/त्वन्मौनम्।* (पृ० २६)। अथवा- *अहं त्वन्नेत्रयोरवतरामि/ स्वप्नशुक्तिसम्पुटेषु कुत्रचिन्निहितं/प्रेममौक्तिकमन्वेष्टुम्* (पृ०२७)। अलकनन्दाविषयक- काव्येषु आध्यात्मिकीभावना, प्रणयरोमाञ्च... मांसलता, रहस्यान्वेषणम्, नवीनकल्पनाश्च अहमहमिकया परापतन्ति। तथाहि *"मयि वनमेकम्/त्वद्वसन्तं प्रतिपालयति/"* (पृ० ३६), *श्रुतेररुदात्तस्वरोऽस्ति ... मन्त्रः/त्वमसि/अप्रज्ज्वलिता वह्निज्ज्वालायाः कल्पना/(पृ० ३९), विषादयूपे ... बद्ध्वा /हुतोऽस्मि/विरहज्ज्वालासु आत्मानं प्रक्षिप्य/ (पृ० ४०)।* "प्रौढावस्था... प्रविशन्तीं पत्नीं दृष्ट्वा" "मृत्युकाव्यम्". "मां वध्यस्थाने निक्षिप्य" इत्यादीनि काव्यान्यस्य सङ्ग्रहस्य संस्कृतसाहित्यगता महत्त्य उपलब्धयः सन्ति। क्वापि ... एव भावाः, उपमाः, बिम्बविधानानि वा मुहुर्मुहुरावर्तन्ते, तेन अनवीकृत... वैरस्यमपि क्वचिद...

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कस्मात् क्षिपसि
हिरोशिमानगरोपरि चन्द्रिकासमां
दृष्टिम्
कस्मात् स्पृशसि/
लावाद्रवदग्धविषुवियसपर्वते वृष्टिवत्
मम म्लानगात्रम्? (पृ० ४३)

एतादृश्यः कल्पना अन्यत्रापि कविना प्रस्तुता एवेति दिक्।

युगोचितनवीनशब्दरचनायां अस्पृष्टपदावल्या आविष्कारे च पटुर्हर्षदेवो माधवः। अत एव अयोनि काव्यं रचयितुमसौ क्षमते। अस्मिन् सङ्कलने महालय (हिन्दीभाषायां महल इति) रङ्गमहालयः, नौदण्डः (हिन्दीभाषायं पतवार इति) वस्त्रपटः (हिन्द्यां नौकायाः पाल इति) इत्थमेव केचनान्ये शब्दाः नवनिर्मिताः।

प्रतिभासंस्कृतमार्गदर्शिका- डॉ० भागीरथिर्नन्दः, प्रतिभाप्रकाशनम्, नवदेहली, १९९९, मूल्यम्-२०० रूप्यकाणि.

संस्कृतच्छात्राणां कृते प्रतियोगिपरीक्षोपयोगिपुस्तकानामभावो वर्तते। डॉ भागीरथिर्नन्दः स्वयमपि पुरा विश्वविद्यालयानुदानायोगस्य कनिष्ठशोधवृत्तिपरीक्षा (जे०आर०एफ०- नेट) उत्तीर्णवान्। सम्प्रययं हरियाणाप्रान्तस्य एकस्मिन् विद्यापीठे प्राध्यापकः। स्वानुभवं स्वाध्यायं चानुसृत्यानेन पूर्वशिक्षाशास्त्रि-नेट्-प्रभृति-प्रतियोगिपरीक्षाणां कृत उपादेयेयं मार्गदर्शिका निरमायि। समग्रोऽपि ग्रन्थोऽयं संस्कृतभाषयैव विरचितः। अत्र संस्कृतसाहित्यशास्त्रादिविषयकाः सम्भाविताः प्रश्नास्तु सोत्तरं विन्यस्ता एव, सामान्यज्ञानविषयका अपि प्रश्नाः ससमाधानं विदुषा लेखकेन ग्रन्थेऽस्मिन् स्थानं लम्भिताः। ग्रन्थोऽयं सर्वेषां संस्कृतच्छात्राणां कृते नितरामुयोगीति निश्चप्रचम्।

संस्कृतसाहित्यमाँ महात्मा गान्धी- प्रधानसम्पादकः- डॉ० गौतम पटेल, सम्पादकः- डॉ० हर्षदेवमाधवः। प्र०- संस्कृसाहित्यअकादेमी, गान्धीनगरम्, गुजरातम्। १९९९। मू०- २०० रूप्यकाणि।

ग्रन्थोऽयं संस्कृते महात्मानं गान्धिनमधिकृत्य विरचितं साहित्यं परिचाययति, इतरभाषासु च तमेव महात्मानमाश्रित्य रचितानां काव्यादीनां संस्कृतेऽनुवादानपि च पुरस्करोति। साकल्येनात्र ३४-शोधलेखाः, ४०-नवीनानि संस्कृतकाव्यानि, ७१-अनूदितानि काव्यानि, १११-पूर्वप्रकाशितसंस्कृतकाव्यानि च सङ्कलितानि, परिशिष्टे च संस्कृते गान्धिविषयकसाहित्यस्य सन्दर्भसूचिरपि योजिता। नूनं [illegible]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Contribution of Gujrat to Sanskrit Literature : प्रधानसम्पादकः डॉ० गौतम पटेल, सम्पादकाः- श्री एम०के० प्रजापतिः, डॉ० हंसाहिण्डोचा, डॉ० एच्०आर० पटेलश्च। प्र०- डॉ०मणिभाई-प्रजापतिषष्टिपूर्तिसम्मानसमितिः पाटणम्। १९९८। मूल्यम्- ६२५-रूप्यकाणि।

ग्रन्थेऽस्मिन्नभिनन्द्यविदुषः मणिभाई-प्रजापतेर्जीवनस्य कृतित्वस्य च परिचयं प्रस्तूय तदनु गुर्जरप्रान्ते विरचितं संस्कृतसाहित्यमधिकृत्य ६५लेखाः सङ्कलिताः। एतेभ्यो लेखेभ्यः वेदेतिहासविविधशास्त्रललितकाव्यादिविषये गुर्जरप्रान्तस्य आप्राचीनात् कालादद्यावधि यदवदानं तत् साकल्येन प्रकाशितं भवति। निश्चप्रचमनुसन्धित्सूनां कृते नितरामुपादेयोऽयं प्रबन्धः। सङ्कलितलेखेषु क्वचित् सर्वथा दुर्लभा नवीना वा सामग्री विचारसरणिर्वा सम्मुखमायाति। यथा- गुर्जरराज्ये पुराणरचनामधिकृत्य श्रीकाण्टावालामहोदयस्य लेखे कपिल-कणादगौतमानामेतद्देशप्रसूतत्वमाश्रित्य वसन्तपारेखमहोदयानाम् स्वातन्त्र्योत्तरसंस्कृतसाहित्यविषये च राजेन्द्रनाणावटीमहोदयस्य वा लेखे।

श्वेतदूर्वा : कथासङ्ग्रहः, प्रणेता- प्रभुनाथद्विवेदी। प्र० वाराणसेयसंस्कृतसंस्थानम्, सा०-२७/६४, जगदगञ्जम्, वाराणसी-२२१००२। १९९७। मू० ७०रूप्यकाणि।

अर्वाक्तनसंस्कृतसाहित्ये स्वल्पा एव रचनाकाराः हिन्दीभाषायां कहानीति आङ्गलभाषायां च शॉर्ट ष्टोरीति व्यपदिष्टायां विधायां रचनारता दृश्यन्ते तेषु द्वित्रा पञ्चषा एव वा साध्व्यः कथनिका निबध्नन्ति। प्रभुनाथो द्विवेदी एतेषु नूनमुल्लेखमर्हति। अस्य प्रथमं कथासङ्कलनं कथाकौमुदीति सागरिकायां समीक्षितचरम्। कथाग्रथने स्वकीयमक्षुण्णं कमपि पन्थानमयं प्रथमादेव स्वकथासङ्ग्रहात् प्रकटीचकार। प्रस्तुते सङ्ककलने एकविंशतिः कथाः सङ्कलिताः सन्ति। एतासु कथासु संस्कृतकथनिका स्वकीयं आत्मानमाविष्कुर्वन्ती प्रतिभाति। प्रभुनाथो द्विवेदी न सर्वथा परम्परां जहाति, न च इतस्माभात् प्रचलितायाः नवीनकथाशैल्याः सर्वथा अनुकुरुत इत्यस्य विशेषः। तथाहि सर्वासु कथासु सद्भावना विश्वासश्च भारतीयां जीवनदृष्टिं प्रत्याययतः। आशाबन्धः कुसुमस्तबकसमं कथाबन्धं रक्षति। क्वचिदयं व्यङ्ग्यविडम्बनशैलीमाधुनिकीं प्रयुनक्ति, कथासु सहसोपक्रमं विधाय मनोभावविचारतरङ्गततेरनिर्बाधं वा चित्रं कुर्वाणो नव्यां रीतिं समाश्रयते; क्वचिच्च वर्णनेषु बाणभट्टीयां पाञ्चालीमवतारयति, रसावेशवैशद्येन चमत्कारं च तनोति। युक्तमुक्तं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शुभाशंसकः श्री शिवजी उपाध्यायः वस्तुतो वस्तुनिष्ठा व्यक्तिनिष्ठाश्च विविधविधात्मकाः व्यवहर्तिस्थी इति प्रकृतिमेदुराः हास्यव्यङ्ग्योपदेशसन्देशनिर्भराः संवादसल्लापपराः परार्थस्वार्थपरमार्थाः मीलसत्त्वराः सामाजिकसांस्कृतिकसांयोगिकसान्दर्भिताघटनाप्रस्काराः यथार्थप्रस्ताराः कथाः प्रणयता डॉ० द्विवेदिना सकलसहृदयसंवादभाजनीभूय "भूयोभूतिमधिश्रित्य देदीप्यते" इति।

मुख्यमसृणपेशलत्वं प्रभुनाथीया कथाशैली कथावस्तु च प्रायशः सर्वत्र व्याप्नोति। एतादृशकथासु 'श्वेतदूर्वा' इति कथा निश्चप्रचं मनोहारिणी। पुरा दूर्वाचित्रकाया कथाविशेषाङ्के प्रकाशं गतेयं कथा ऽस्मत्प्रशंसापात्रमभूत्। कथायामस्यां गुरुशिष्यसम्बन्धस्यात्यन्तमेव हृद्यं निरवद्यं रूपं तदनुरूपं गद्यं निबध्य प्रकटीकृतं कुशलेन कथाकारेण। अत्रैकाः कथाः आकाशवाण्या प्रसारणाय लिखिताः क्रमपि समस्याविशेषं चित्रयन्त्यन्विष्यन्ति च तत्समाधानम्। यथा-'कायाकल्पः' इति कथायां कुसङ्गत्या दुश्चरित्रं भजतः पुत्रस्य मादकपदार्थसेवनं अन्ततश्च तस्य सुबुद्धिप्राप्तिश्चित्रिता। 'भाटकावाससमागमनमिति' कथा महानगरेषु भाटकावासप्राप्तिः कथं दुष्करा माध्यमकस्य साहाय्येन कथं तत्र सौकर्यं भवतीति रोचकतया निर्दिष्टम्। नवावतारः श्रवणकुमारः आधुनिकस्य निर्मर्यादस्य पुत्रस्य जुगुप्सितं चरित्रं प्रस्तौति। 'अतिथिरिति' कथा अतिथिच्छद्मना गृहमायातेन दस्युना सद्गृहस्थस्य सर्वस्वापहरणं असतोगत्या तदीयं निग्रहणं निरूपयति। त्रिचत्वारि कथास्तु आधुनिकीं 'पर्यावरण'-समस्यां चित्रयन्ति। न च सर्वाः कथाः अत्र आधुनिककथाप्रतिमानं सत्यापयन्ति। तद्यथा- गृहस्वामी, गृहस्वामिनी, द्विजिह्वः, वरयात्रा, महाकविः, वैद्यराजः, जल्पाकः इत्याद्याः कथा आधुनिक्याः शब्दचित्रेति विधाया व्यङ्ग्य (satire)-विधाया वा उदाहरणानि। चरित्रविशेषविवरणमिह बाणभट्टस्य जरद्द्राविडधार्मिकनिरूपणमनुसरति।

काव्यात्मकगद्यबन्धानां गुम्फने किमपि पाटवं प्रकटीकरोति प्रभुनाथः। यथा "श्वेतदूर्वायाम् अथास्तङ्गते भगवति सवितरि दिवसावसाने गोव्रजरजःसङ्गसमाच्छन्ने दिशि पथि, वत्सोत्कुलीगोग्रीवावलितनक्वणितघण्टिकाकूरसेषु दिक्षु, चरुच्चावनीताहारादानोत्सुकशिशुकरवसङ्कुलनीडेषु खगकुले, नभोविकीर्णभानुरश्मिस्पर्शनकामे तुङ्गतरुशिखरे, महानिशामिलितधूमवलयवेष्टिते ग्रामे, दक्षिणकरविधृतायरकोटिनिबद्धरिक्तपाथेयपात्रपोट्टलिको यष्टिं स्कन्धमारोप्य वामेन करेण गोपुच्छरोमगुच्छं परामृशन् गोपालः शनैश्शनैर्निजगृहमाजगाम।" (पृ० २) क्वचिदमन्दं स्पृशन्ती क्वचिन्नर्म तन्वन्ती वैदग्ध्यभङ्गीभणितिः प्रभुनाथकथाप्रपञ्चे प्रभविष्णुतां प्रकटयति। यथा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

भाटकावासमार्गणखिन्नस्य जनस्येदं चित्रणम्- "भाटकावासमार्गणप्रपञ्चानुयुक्तं सुखशान्तिरहितं जनमपहाय बुभुक्षा पिपासा निद्रापि दूरमपयान्ति। मृगमरीचिकावद् गृहप्राप्त्याशा तं जनं दूराद् दूरं नयति। आगृहप्राप्तेः तस्मै किमपि न रोचते। स तमेवालपति, तमेव शृणोति, तमेव बहु मानयति, यस्तं कञ्चिद् रिक्तावासं सूचयति।" (पृ० २१)। तथैव माध्यमकस्य (दलाल इति संज्ञकस्य) अयमात्मपरिचयः सर्वथा भूतार्थकथनपाटवं कथाकारस्य परिचाययति- "भद्र वयं माध्यमकाः। माध्यमकवंशोत्पत्तिर्बहुरूपरचनाचतुरस्य भगवतो विष्णोरंशादेव भूतेति पौराणिकमाख्यानम्। क्षीरोदधिमन्थनावसरे पीयूषकलशोद्गमनेन तदमृतरसपानाय देवदानवयोर्मध्ये विवादो जातः। तत्र भगवान् विष्णुरेव मोहिनीरूपमाध्यमको भूत्वा विवादशान्तिमकरोत्। ततः प्रभृति माध्यमकवृत्तिः प्रचलति। अद्यापि सामाजिकजीवने एतादृशीं निःशुल्कवृत्तिं स्वीकृत्य बहवो जनाः विवादविवाहादिप्रयोजनाय सेवार्पणं कुर्वन्ति। . . वंशपरम्परयाहं गृहभूम्यादिकेषु कर्मसु माध्यमकभूमिकां निर्वहामि। - - भाटकावासानां महतीमनुपलब्धिं नगरेष्वनुभूय मयाऽस्मिन् कर्मण्यपि पदं धत्तम्।"(पृ० २२)।

नवीनानां शब्दानां रचनायां नवीनाभाणकानामपि चाविष्कारे पटुर्वर्तते कथाकारः। तथा- पटहानां सभामध्ये मृदङ्गस्य अहो ध्वनिः (पृ० १८), उलूखलाय शिरोदाने मुसलानां भयम् (पृ० २०), पदतलात् धरणी स्खलिता (पृ० ११८)। एवमेव अवतरणपटलम् (Railway Platform), कालवनी, प्रापकः (telephone receiver) इत्यादयो नवीनाः शब्दा अत्र प्रयुक्ताः। कथासु मध्ये मध्ये परिकरा श्लोकाः शोभां तन्वन्ति, कथाया अवसाने च समाहारः श्लोकैर्दत्तः। तेन सर्वथा कथाया आशयोऽभिधया स्फुटीभवति।

राष्ट्रसूक्तम् : काव्यम्, गिरिजाशङ्करमिश्रः.प्र०- जनपदसाहित्यसभा, बिसवाँ, जि०-सीतापुरम्, १९९६, मूल्यम्- ५०रूप्यकाणि।

राष्ट्रसूक्तप्रणेता प्रसन्नभारतमहाकाव्यकर्ता कविर्गिरिजाशङ्करमिश्रोऽस्याः कृतेः रचनाभूमिं भूमिकायामित्थं विशदीकरोति- "अस्माकं सनातनं मनः संस्कृतिसंहारैर्घटनाचक्रैरभिहन्यमानं यं दुःखार्णवं सृजति तस्यैव विप्रुषः प्रस्तुतरचनाः सन्ति।----रसराजशृङ्गाराय रचितोऽत्राञ्जलिः।" इति। सत्यमेवामुष्मिन् काव्य- सङ्ग्रहे सुकविरयं राष्ट्रदर्शनमुन्मीलयति, राष्ट्रदेवतायाश्च साक्षात्कारं ऋषिरिव विधत्ते, देवानां चावाहनं द्रष्टेव कुरुते। तद्यथा सूर्यस्तवे-

वेदैर्वेद्यमनेकदेशमनुजैरभ्यर्च्यमानं च यन्-
नानादैवतनामभिर्बहुविधै रूपैश्च यल्लक्ष्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वाधारसहस्रसंख्यकिरणैर्विश्वं व्यवस्थापयन्-
मूर्त ब्रह्म तदेव सूर्यमिषतः साक्षात्पुरः खेलति।।

राष्ट्रभावनायाः कापि प्रबला अभिव्यक्तिः गिरिजाशङ्करमिश्रस्य काव्ये तज्जाता। राष्ट्रसेवैकव्रती कविः स्वात्मसमर्पणभावमित्थं प्रकटीकरोति-

दूरं गच्छत लाभलोभनिचयास्तृष्णा वितृष्णा भव
पत्नी-पुत्र-सुता ममत्व! भवते कुर्मो नमश्चान्तिमम्।
अस्माकं सविधेऽधुना तव कृते नैवावकाशक्षणः
संसेव्यं मम जीवनस्य परमं राष्ट्रात्मकं दैवतम्।।

'वागीश्वरीस्तवे' कविः स्वमनोभावं प्रकटीकुर्वन् वागीश्वरीं प्रति याच्ञाभङ्ग्या राष्ट्रहितकामनामेव पुरस्करोति-

याचे सैन्यसहस्रतुल्यधिषणं चाणक्यमेकं पुनः
कुर्याद् भारतभूमिभापहरणाद् यो भारतं भारतम्।. (पृ० ५)

चतुश्चत्वारिंशल्लघुकाव्यानीह सङ्कलितानि। तेषु 'वागीश्वरीस्तवः' श्रीसूर्यस्तवः' 'श्रीललितास्तुतिः' , 'कविकुलगुरुः कालिदासः' , 'वश्यवाक् तुलसीदासः' इत्यादीनि स्तुतिप्रशस्तिपराणि, 'सामाजिकन्यामालक्ष्य धर्माचार्यान् प्रति' 'हं हो संस्कृतज्ञाः", 'नवशिक्षे' शेध्वे कथं पण्डिताः!' 'ब्राह्मण उत्तिष्ठ!' इत्यादिकानि योपदेशपराणि अन्यानि कानिचिद् विडम्बनपराणि समस्यापूर्तिपराणि शिष्टानि राष्ट्रभक्तिपराणि च सन्ति। दैवस्तुतिपरककाव्येष्वपि राष्ट्रचिन्तैवोदग्रा कवेः व्यक्तिमुपयाति। तद्यथा श्रीसूर्यस्तवे सवैयाच्छन्दसाऽसावाशास्ते-

यो ज्वलदुज्ज्वलचण्डमरीचिधरोऽखिललोकतमस्तविहारी
भारतराष्ट्रमुदञ्चितमद्य करोतु स कोऽपि खमण्डलचारी।.(पृ०२)

विद्वत्कविरयं क्वचित् 'श्रीनः' , 'मगाः' इत्याद्यल्पप्रचलितान् शब्दान् प्रयुज्य शास्त्रपाटवमपि स्वीयं प्रकटीकरोति संवर्धयति च सुरभारतीशब्दसम्पदम्।

शिखरिणी-पञ्चचामरादिपारम्परिकच्छन्दोभिः समं घनाक्षरीसवैयादिव्रजभाषाच्छन्दसां रसमाधुरी अत्र मनोहारिणी। नवाः भावाः नवयुगगानं च लसति राष्ट्रसूक्तेऽस्मिन्। कविः श्रमिकाणां शोषितानां दीनजनानामुदयं काङ्क्षति-

श्रमिकशोषणकर्मकुलव्रता-
स्त्यजत भो धनिका धनदुर्मदम्।
नवयुगागमने भविष्यति
श्रमवतामुदयः सवितुर्यथा।। (पृ०३९) (अत्र श्रमवतामुदयो इति ग्रमादिकः पाठः)।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नव्या स्मृतिर्नैव कथं प्रणेयेति काव्ये क्रान्तकारिरूपं संस्कृतकवेरुन्मुखीभवति दिक्।

वनवल्ली-काव्यसङ्ग्रहः। प्रणेता-रवीन्द्रकुमारपण्डा, प्र०-लायंस इंटरनेशनल, वडोदरा। १९९६। मू०-२० रूप्यकाणि।

प्रतिध्वनिः- काव्यसङ्ग्रहः, प्रणेता स एव। सम्पादको वनमाली विश्वाल प्र०-उत्कलसाहित्यसमाजः, प्रयागनगरम्, १९९६, मूल्यम्-५० रूप्यकाणि।

उर्वी- प्रणेता स एव। प्र०- परममित्रप्रकाशनम्, डी०-पॉकेट-२१४, दिलशाद गार्डन, दिल्ली। १९९९। मू०-१७५ रूप्यकाणि।

वनवल्ल्यां तरुणस्य कवेः रवीन्द्रकुमारस्य ४३लघुकाव्यानि, प्रतिध्वनिरिति काव्यसङ्कलने ८७लघुकाव्यानि, चरमे च उर्वीति काव्यसङ्ग्रहे १३० कवि... विलसन्ति। कवितासु आधुनिकजीवनम्, महानगरगता विडम्बना, निसर्गदृश्यं कवेरन्तर्गतः भावसंसारश्च प्रामुख्येन विषयाः। रवीन्द्रः आत्मबोधसंवलितं कवयि... क्वचिद् दार्शनिकं चिन्तनमपि काव्यजगदमुष्य प्रभावयति। यथा-

शुष्कतायां य आनन्दोऽस्ति
स एव प्रवाहे
जीवने य आनन्दोऽस्ति
स एव मरणे
कथने आनन्दोऽस्ति
स एव व्यथने। (प्रतिध्वनिः पृ० ४८)

यद्यपि सर्वत्राभिधाप्राया कवेः शैली, न विशेषोऽत्र वक्रोक्तीनां विन्यासो वा प्रतीयमानस्यानन्त्यम्, परं क्वचिदलङ्काराः अपृथग्यत्ननिर्वर्त्याः प्रभावयन्ति तथाहि

सुखस्य सर्वे सहचराः
दुःखस्य न कोऽपि।
यदा नदी जलपूर्णा
तदा नौकानाविकधीवराः
यदा शुष्का, नायाति कोऽपि। (वनवल्ली, पृ०२१)

अत्र 'दृष्टान्तः। क्वचिच्च कविरयं वस्तुनोऽलोकसामान्यस्वरूपमुद्घाटयति। यथा वनवल्ल्याम् एव सूर्य इति शीर्षककाव्ये-

नोदेति
न चास्तमेति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्य न दिवा
न च रात्रिः।
न शय्या, न च तस्याः सुप्तिः
सूर्यः स
सदैव सरति
उदयास्तं तस्य
लीलाया रतिः।(पृ० २४)।

प्रायशः सर्वेषु काव्येषु कविना क्षणिकमनस्तरङ्गा अभिव्यक्तिं नीताः। उर्व्यां कवेरनुभवससारः विकसिततरः प्रतिभाति। क्वचिदसंस्कृतशब्दा अत्र काव्येषु दृश्यन्ते। यथा जाग्रत इति शब्दस्य प्रयोगः उभयोः काव्यसङ्कलनयोः कृतः।

अधुना-(काव्यसङ्ग्रहः)- प्रधानसम्पादकः- गौतमपटेलः, सम्पादयित्री- रीता त्रिवेदी, प्र०- गुजरातराज्य संस्कृतसाहित्य अकादेमी, गान्धीनगरम्। १९९९। मू०-७०रूप्यकाणि।

अधुनेति काव्यसङ्ग्रहे गुजरातराज्यस्थानां सप्तविंशतिसंस्कृतकवीनां नूतनानि मौलिकसंस्कृतकाव्यानि सङ्गृहीतानि। भूमिकायां सम्पादयित्र्या वर्तमानसाहित्य आधुनिकतायाः लक्षणम्, संस्कृतसाहित्ये गुजरातराज्यस्य चावदानमिति विषयद्वयं स्पृष्टम्। सङ्कलितकाव्येषु विषयाणां वैविध्यं विधानां वैपुल्यं च वर्तते। कानिचित् काव्यान्यवसरोचितानि सन्ति, कानिचित् पारम्परिकैश्छन्दोभिर्बद्धान्यपराणि मुक्तच्छन्दसा ग्रथितानि कानिचित् पुनः मण्डलगीतस्य (गरबा इत्यस्य)अनुकृतिपराणि। हर्षदेवमाधवादिद्वित्रान् विहाय शिष्टानां कवीनां रचनाः कवित्वशून्या एव। अन्ते समेषां कवीनां परिचयोऽपि दत्तः।

मातृगीताञ्जलिः (गीतिसङ्ग्रहः) हरेकृष्णमेहरः। प्र०-कालाहाण्डीलेखकपरिषत्, भवानीपाटना, ओडिसा।१९९७। मू०-६०रूप्यकाणि।

सङ्कलनेऽस्मिन् समायोजिताः गीतिकाः आधुनिकसाहित्ये प्रचलितायां नव्यगीतविधायाः समं च विविधरागेषु निबद्धत्वात् पुरातनरागकाव्यविधायां अपि निदर्शनं जाताः। तथा च - एकेन रागेण गीयते इति काव्यं, विविधैः रागैर्गीयते इति रागकाव्यमिति उपरूपकेषु काव्यरागकाव्ययोः लक्षणमुदाहरति आचार्योऽभिनवगुप्तः। प्रास्ताविके रचयिता श्रीमेहरोऽपि लक्षणमिदमनुहरति-

भावैः सतालैर्विविधैश्च रागै-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गानानुकूलै रचना मदीया।
सङ्गीतविद्भिर्मधुरानुरागै-
र्मात्रानुरूपं परिवेषणीया।।

सर्वासु गीतिकासु लयतालयोर्निर्वाहः अन्त्यानुप्रासविधानं च श्रियं समेधयतः। तथाप्यन्त्यानुप्रासनिर्वाहाय वृथा पदयोजनापि क्वचित् क्वचित् कविना विहिता, तेन निरर्थकत्वाधिकपदत्वादिदोषाणां शङ्का भवति। यथा-

काव्यवनी त्वं
पेशलसमासिनी
प्राञ्जलसुशासिनी
शतदलनिवासिनी
सुविमलसुवासिनी।

गीतेषु सम्भृता उदात्तभावना राष्ट्रियता च काव्यकलाया भव्यतामिहादधाति। सर्वाण्यपि गीतानि श्रीमेहरस्य लोकम्पृणानि लोकप्रियत्वं प्राप्तुमर्हानि च। दिङ्मात्रमुदाह्रियते-

यत् त्रिरङ्गं ध्वजं विदधद् वर्षमार्षं पूज्यते
लोकतन्त्रं सार्वभौमं स्वीयभूम्ना मान्यते।
ऐक्यमैत्रीभावसूत्रं परम्परया सम्भृतम्
विजयतां नो वन्दनीयं सुन्दरं धामामृतम्।।
भव्यभुवनं भारतम्।(पृ० २६)

प्रबोधपराणि, आध्यात्मिकानि, राष्ट्रभक्तिमयानि, स्तुतिरूपाणि, शिशुगीता- नीति नानाकोटयो विलसन्ति सङ्कलनेऽस्मिन् गीतानाम्।

शृङ्गेरीशतकम्- सूर्यमणिरथः। प्र०- कवितारथ, पुरी। १९९९। (निःशुल्कवितरणाय)

काव्येऽस्मिन् शृङ्गेरीशारदापीठसम्बद्धमैतिह्यं, तत्र स्वर्णध्वजनिर्माणं भोजनागारनिर्माणं वर्णयित्वा वेदान्ततत्त्वं विवृतम्। काव्ये ओजःसमासभूयिष्ठता, प्रसादरम्यता च समं विलसतः। तथैव धर्म-दर्शन-संस्कृति-समासः शृङ्गारलालित्य- माधुर्यविलासश्चापीह युगपद् विभ्राजते। पौराणिकतया सहैतिहासिकताया रक्षा साधु कविना विहिता।

चम्पोद्भासि सुगन्धितं विलुलितं चोत्कम्पितं नीलभं
तूङ्गोद्भूतसमीरणेन ललनाशाम्पोपलिप्तालकम्।
विद्युद्भानयनो घनीकृततनुर्वृष्टिच्छलेनाम्बुदः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

साम्याभाववशाद् विलोक्य नितरां यत्राश्रु मुञ्चत्ययम्।।(१३)

शृङ्गारविलासो यथा-

सौन्दर्यप्रतियोगिताविजयिनौ हृष्टौ युवानौ नवौ
सङ्गोष्ठ्यां निजभावगोपनपरौ मानत्रुटेः शङ्कया।।
दैवात् सम्मिलितौ कदाचिदपि तौ निर्मक्षिकायां भुवि
धत्तो यत्र दृशस्त्रिभागमसकृच्चान्योन्यवक्त्रे पुनः।।)२१)

पत्रसौधः- एस० जगन्नाथः। सुरभारती प्रकाशनम्, बैंगलूरु। १९९९। मू० ३०रूप्यकाणि।

स्वल्पमेव साहित्यं संस्कृते पत्रलेखनविषयकं प्राप्यते। अभावोऽयं जगन्नाथेनेह सम्यक् पूरितः। सङ्ग्रहेऽस्मिन् सन्ति ८७-पत्राणि तेषु तेषु अवसरेषु लेखनीयानि विविधविषयानवलम्ब्य प्रेषणीयानि च। विरामप्रार्थना, कृतज्ञताप्रकटनम्, अभिनन्दनम्, आरोग्यवार्ताजिज्ञासा, पुस्तकप्रेषणाय विज्ञापना, गृहसङ्केतज्ञापनार्थ विज्ञप्तिः, प्रवासायामन्त्रणम् इति विविधाः विषयाः सन्ति। पिता पुत्राय, माता पुत्र्यै वा कथं संस्कृतेन पत्रं लिखतु इति निदर्शनं प्रस्तुतम्। संस्कृते पत्रलेखन- कलाशिक्षणाय सङ्ग्रहोऽयमुपादेयः।

आक्षरी : साधुशरणसिन्हा। प्र०-भारती प्रकाशनम्, जे०बी०एल०मार्केट, खजांची रोड, पटना- ८०० ००४। १९९८। मूल्यम्- १०० रूप्यकाणि।

आक्षर्या विषयवस्तु, प्रणेतुरभिप्रायो वैशिष्ट्य त्रुटयः संस्खलनानि च सर्वमेतत् अभियन्तृ (इञ्जीनियर)-पदभाजः साधुशरणसिन्हामहोदयस्येताभ्या-मुपोद्घातपद्याभ्यां ज्ञातुं शक्यते-

याज्ञवल्क्यमण्डनमिश्रयोः ध्वनिः
भ्रमति कदाचिन्निस्सीम्नि गगने।
समीपे आगताः मया श्रुताः शैशवे
सस्वरपाठाः सर्वे आक्षर्या समागताः।।

त्रुटिकारणेन क्षन्तव्योऽहं
सन्ति ये आक्षरी-पुस्तके।
विज्ञानराजनीतिवैराग्यं च
सर्वविषयाः आश्रयन्ते।।

त्रिंशत्प्रायेषु काव्येषु(?) सिन्हामहोदयस्यैवंविधं त्रुटयच्छन्दस्कं प्रकीर्ण स्खलदसमञ्जसमञ्जुजल्पितं राराजते। साहित्य- दर्शनाध्यात्म -राजनीति -महात्म

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चरित-भगवत्प्रार्थनादिविपुलविषयसम्भारः इह श्रीजतोरिसिंहमहोदयस्य स्वोपज्ञ-माङ्गलभाषानिबद्धं काव्यद्वयमप्यन्ते सङ्कलितम्।

नन्दनवनकल्पतरुः प्रथमा शाखा। प्र० श्रीजैनग्रन्थप्रकाशनसमितिः, खम्भात। १९९९।

श्रीविजयनन्दसूरीश्वरस्य जन्मशताब्दीवत्सरे प्रकाशितमिदं गद्यपद्यात्मकं विविधविषयसंवलितं सङ्कलनम्। विजयशीलसूरिः, धर्मकीर्तिविजयः, रत्नकीर्तिविजयः, कल्याणकीर्तिविजयश्चेमे मुनयः सङ्कलितारः विविधरचनाप्रणेतारः। प्रथमे खण्डे स्तुतयः, द्वितीये आस्वादशीर्षके चिन्तनधारा, धर्मरसिकानां सत्त्वे प्रतिष्ठितमिति निबन्धत्रयम्, तृतीये काव्यानुवादयुगलम्, चतुर्थे रत्नकीर्तिविजयकृताश्चत्वारः कथाः, हास्यपूर्णाः प्रसङ्गाश्च निबद्धाः सङ्कलिताः। सर्वा धर्मप्रचारकैः प्रणीतं साहित्यं केवलं प्रेरणास्पदं रोचकमपि।

नीरवस्वनः (कथासङ्ग्रहः) वनमालीविश्वालः। पद्मजाप्रकाशनम्, प्रयाग। १९९८। मू० १०० रूप्यकाणि।

वनमालीविश्वालस्य त्रयः काव्यसङ्ग्रहाः लोके पाण्डित्यपूर्णाः ग्रन्थाः प्रकाशिताः। कविनानेन सद्य एव कथाप्रणयनेऽपि पदं दत्तं, तत्र च मथुरानाथ-क्षमाराव-राजेन्द्रमिश्र-अभिराजराजेन्द्रमिश्र-शुक्ल-द्विवेदि-प्रभृतिभिः कथाकारैः चासनमयं निर्मातीति प्रामाणिकम्। ... अस्मिन् सङ्ग्रहे सन्ति। प्रास्ताविके आसां वैशिष्ट्यमित्थं प्रतिपादितम् (विश्वालेन) कृतयः कथाः सर्वथा आधुनिकसाहित्ये प्रचलितायाः लघुकथायाः मानदण्डमङ्गीकृत्य प्रवर्तिताः। लक्ष्यते चात्र नूतनः कश्चनार्थप्ररोहः। तद्यथा—कथानामेतासां पात्राणि चम्पी-धोयीदास-सनियाऽगणिसदृशानि भारतीयग्रामेषु वसता निम्नवर्गेण सम्बद्धानि। कथाकारस्याकृत्रिमा सहानुभूतिरेतादृशेषु दलितपीडितनिम्नवर्गजनतां प्रति स्पन्दते। रेलयात्रा तथा मे सहयात्री, सुरा, स्वर्गे, प्रथमपरिचित इत्यादिकथासु विलक्षणं व्यङ्ग्यं, शिष्टानर्मवचो चातुरी च मनो हरति। वस्तुवैविध्यमासां कथानां सर्वथा श्लाघनीयम्। ... विशदयतीव विस्तारं वर्ण्यविषयाणां निरूपयति निरुपमं चायं कथासंसारम्। ग्रामजीवनं महानगरजीवनं चायं कथाकारो युगपन्नैपुण्येन विवृणुते। ... कथास्वासु विषयनिष्ठताया विषयिनिष्ठतायाश्च वरीवर्ति विशेषोऽन्वयः। अपमृत्यो, पुनर्जन्म, चक्रव्यूह इत्यादिषु कथासु नारीजीवनस्य ... मर्मस्पर्शि चित्रणं कथाकारेणोद्घाटितम्" इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राक्कथने सुकविसमीक्षको जगन्नाथपाठकः विश्वालकथासंसारस्य वैशिष्ट्यमित्थं विशदयति— "श्रीविश्वालेन स्वगता समाजगता च व्यथैव मन्ये व्यथेति काव्यसङ्ग्रहगतासु कवितासु नीरवस्वनः इत्याख्यलघुकथासङ्ग्रहगतासु कथासु च निर्माणे हेतुतां भजते इति।"

पाठकवर्य

एतासु कथासु कथाकलायां वस्तुवर्णनक्षमतायां मनोदशाचित्रणस्य च साधु सामञ्जस्यमपि प्रतिपादयति। नवोदितकथाकारमाशीभिर्वर्धयितुमेतत् कथनं सर्वथा युक्तम्। अतिथिः, प्रियतमा मे दैनन्दिनी तथा मे श्रीमती इत्याद्याः कथा वस्तुतो व्यङ्ग्यनिबन्धाः (satire) सन्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Reg. No. 13043/67

संस्कृत विभाग,

डॉ. हरीसिंह गौर, विश्वविद्यालय, सागर

संस्कृत परिषद के महत्त्वपूर्ण प्रकाशन

१. संस्कृत कवियों के व्यक्तित्व का विकास : डॉ. राधावल्लभ त्रिपाठी, २५रु.।
२. वाल्मीकिविमर्श : ले. वही। संस्कृत में (अप्राप्त)
३. आदिकवि वाल्मीकि : हिन्दी में (ले. वही। मूल्य २५रु.।)
४. नाट्यमण्डपम् : प्राचीन भारतीय रंगमंच पर नया प्रकाश । ले. वही ।
५. भारतीयरङ्गवृत्तम् : प्राचीन नाट्यपरंपरा पर शोध कृति। मूल्य १० रू.।
६. कुन्दमाला : संस्कृत नाटक का सरस सुपाठ्य हिन्दी अनुवाद। (अनु. वही)
७. प्रबुद्धरौहिणेय : (१९८३) संस्कृत नाटक का हिन्दी अनुवाद ५रु.।
८. मुकुन्दविलासम् : अप्रकाशित दुर्लभ महाकाव्य। (सं. वही। १५रु.)।
९. न्यायसत्रम् : (संपादक वही। मूल्य ६०रु.)।
१०. संस्कृत साहित्य को इस्लाम परम्परा का योगदान : (सं. वही। ७०रु.)।
११. संस्कृत कविता की लोकधर्मी परम्परा : (ले. वही प्रकाश्य। अनु. २०रु.)।
१२. आधुनिकसंस्कृतसाहित्यानुशीलनम् : (सं. रामजी उपाध्याय। मूल्य ३०रु.)
१३. श्री हर्ष के रूपक : (डॉ. गोकुलप्रसाद त्रिपाठी। मूल्य ४०रु.)।
१४. सिन्धुलिपिरहस्योद्घाटनम् : (डॉ. फतेहसिंह (सचित्र) मूल्य १५रु.)।
१५. कर्णभार : हिन्दी अनु. (डॉ. फतेहसिंह। सचित्र मूल्य १०रु.)।
१६. अप्राप्त नाट्यशास्त्रीय ग्रन्थ : (सं. राधावल्लभ त्रिपाठी, मूल्य २०रु.)।
१७. भरटकद्वात्रिंशिका : (प्राचीन कथा संग्रह सं. वही, मूल्य १५रु.)
१८. महाकवि भवभूति ओर उनका नाट्यलोक : (सं. वही, मूल्य १५रु.)।
१९. सन्धानम् : संस्कृत काव्य संग्रह। (राधावल्लभ त्रिपाठी, मूल्य १५रु.)
२०. लहरीदशकम् : संस्कृत काव्य संग्रह। (ले. वही। मूल्य ३०रु.)
२१. प्रख्या : संस्कृतकाव्य सीरीज। (सं. वही। मूल्य ३०रु.)
२२. कालिदासपरिशीलन : (सं. वही। मू. २५रु.)
२३. कालिदास की समीक्षापरम्परा : (ले. वही। ३०रु.)
२४. भारतीयनाट्य : स्वरूप और परम्परा : (ले. वही । २५रु.।)
२५. शब्दादर्श : (सं. डॉ. बालशास्त्री। २०रु.)
२६. वाक्त्रयी : (पालि–प्राकृत–अपभ्रंशसंग्रह)–(डॉ. अच्युतानंद दाश, २५रु.)
२७. वेददीपिका : (सं. डॉ. बाल शास्त्री, डॉ. रमाकान्त पांडेय, मूल्य ३०रु.)
२८ गीतधीवरम् – (काव्यसंग्रह) राधावल्लभ त्रिपाठी, मूल्य ३०रु.

प्राप्तिस्थान : संस्कृत परिषद् संस्कृत विभाग, सागर विश्वविद्यालय, सागर

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सागरिका

संस्कृतत्रैमासिकी

29/8/2002

चतुस्त्रिंशद्वर्षे चतुर्थोऽङ्कः

LIBRARY
Gurukul Kangri Vishwavidyalaya
HARDWAR

३४/४
विक्रमसंवत् २०५६

सागरिकासमितिः

संस्कृत विभागः

डॉ.हरीसिंहगौरविश्वविद्यालयः, सागरम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महाविद्यानुप्रयोगविषये चित्सुखाचार्यस्य दृष्टिः

प्रकाशपाण्डेयः

अतिरोहितमिदमान्वीक्षिकीविद्भ्यः यन्नव्यन्यायोदयः बौद्धन्याय-प्रतिपक्षरूपेण जात इति। तर्कस्य स्वभावतस्सूक्ष्मत्वादतिपरोक्षवृत्तिधर्माणां अवेद्यत्वशून्यत्वस्वप्रकाशत्वादीनां निर्णयेऽभिव्यक्तिकाठिन्यनैपुण्यमनुपदं न्यायवेदान्तबौद्धमुख्येषु शास्त्रेषु पश्यामो वयम्। नव्यन्यायोद्भवप्रक्रियाकाले शब्दनित्यत्ववादिनः मीमांसका अपि पूर्वपक्षरूपेण नैयायिकान् तुतुदुः। तन्निराचिकीर्षया कश्चित्कुलार्काख्यः नैयायिकतान्त्रिकः कालीतारादिभक्तेष्टदाः महाविद्या अनुकुर्वन् काञ्चित्तद्वाद्यभिमतसाधिकां महाविद्याभिधानामनुमान-शैलीं रचयामास एकादश शताब्दकालखण्डे। यद्यपि भट्टवादीन्द्रकृत महाविद्याविडम्बनमिति ग्रन्थस्य व्याख्यात्रा भुवनसुन्देरण महाविद्याविर्भावविषये एवमभिहितम् -

भाट्टा नित्यं शब्दं यौगाद्या वादिनस्त्वनित्यं च।
प्रतिजानीते ततोऽयं जातस्तेषां विवादोऽत्र।।
तत्तस्यानित्यत्वं प्रतिपादयितुं तु भट्टवादीन्द्रान्।
यौगाचार्यो वर्यः कृतवानेतां महाविद्याम्।।

अत्र यौगाचार्यपदाभिधेयः नैयायिकाशिरोमणिः कुलार्क एवेत्यनुमिन्वन्ति विद्वांसः। महाविद्याप्रयोगप्रौढिचमत्कारात् सर्वमपीप्सितार्थसाधनं यः कोऽपि यस्मिन् कस्मिन्नपि शास्त्रे कर्तुं प्रभवेदिति विवृणोति भुवनसुन्दरः स्वटीकायाम्। तद्यथा -

शब्दस्यास्थितरोपलक्षणमिदं साध्यं तु चित्तेप्सितम्।
दृष्टान्ताय च केवलान्वयितया स्थाप्याः पदार्थाः समे।।
सर्वत्रैव यथार्थसिद्धियुगलावृत्तिर्विचार्या त्रिधे -

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्याद्यं सर्वमवेक्षणीयमखिलप्रौढानुमानेष्विह ।। (तत्रैव)

इत्थञ्चास्य प्रौढानुमानस्य क्षेत्रं स्वरूपपञ्चोक्तं भवति। एवं हि प्रयोग क्षेत्रं विशदयति भुवनसुन्दरः-

अन्वयव्यतिरेकित्वोपेत भूतलानुमानविधौ।
महाविद्यानुमानं प्रयोज्यं केवलान्वयि ।। (तत्रैव)

अथास्य लक्षणं प्रत्यक्तत्त्वप्रदीपिकायाः नयनप्रसादिनीतिटीकाकृता प्रत्यक्-स्वरूपेण भगवता अनुमालक्षणखण्डनावसरे प्रदत्तम्। यथाहि -
'केवलान्वयि व्यापके प्रवर्तमानो हेतुः पक्षे व्यापकप्रतीत्यपर्यवसानबलादन्वयव्यतिरेकिसाध्यविशेषं वाद्यभिमतं साधयन् हि महाविद्येत्युच्यते' इति । (प्रत्यक्तत्त्वप्रदीपिका)

किञ्च कुलार्कपण्डितेनास्य केवलान्वयि व्यापके प्रवर्तमानस्य हेतोः षोडशमुखत्वं दशसु श्लोकेषु यथा सूत्रितं तथोपस्थाप्यतेऽत्र प्रज्ञावतां मोदाय।

१. अपक्षसाध्यवद्वृत्ति विपक्षान्वयि यन्न तत्।
साध्यवद्वृत्तितायुक्तं साध्यते साध्यवर्जिते ।।

इति प्रथम सूत्रं, प्रयोगश्चास्य-

आत्मा, शब्देतरानित्यवृत्तित्वानधिकरणानित्यवृत्तिधर्मवान्, मेयत्वात्, घटवत्।

२. अपक्षसाध्यवद्वृत्ति विपक्षे पक्षिते न यत्।
साध्यवद् वृत्तितायुक्तं साध्यते तद्विपक्षगम् ।।

इति द्वितीयं सूत्रं, प्रयोगश्च -

आकाशः, आकाशशब्देतरानित्यवृत्तित्वानधिकरणानित्य वृत्तिधर्मवान्, मेयत्वात्, घटवत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३. **अपक्षसाध्यवद्वृत्ति विपक्षान्वयवर्जितः।**
नानाविपक्षवृत्यन्यभिन्नधर्मोऽस्ति पक्षिते।।

इति तृतीयं सूत्रम्, अस्य प्रयोगो यथा -

शब्दः, अशब्दानित्यनित्यवृत्त्यन्यनानानित्यावृत्त्यशब्दधर्मवान्, मेयत्वात्, घटवत्।

४. **पक्षापक्षगतादन्यत्साध्यवद्वैधवर्णितम्।**
पक्षापक्षगतादन्यत्साध्यवद् वृत्तिपक्षगम्।।

श्लोकेऽस्मिन् पूर्वार्धे चतुर्थं सूत्रं उत्तरार्धे च पञ्चमम्। तयोः प्रयोगो यथा -

गन्धवन्तो, गन्धवद् गन्धावृत्तिगन्धवद्वृत्त्यन्यवन्तः, मेयत्वात्, घटवत्। अथ च- शब्दः, शब्दाशब्दवृत्त्यनित्यवृत्तिधर्मवान्, मेयत्वात्। इति।

५. **तत्तादात्म्यनिषेधान्यतत्स्थाभावविरोधिता।**
स्वीकृतानन्यवृत्तित्वसम्पन्नान्यत्वसाधनम्।।

अत्रापि पूर्वोत्तरार्धयोः सूत्रद्वयं उक्तम्। एवं च षष्ठसप्तमसूत्रयोः प्रयोग-विधिर्यथा -

नित्यत्वं, स्वप्रतियोगिताकान्योन्याभावातिरिक्तशब्दगताभावप्रतियोगि, मेयत्वात्, इति। एवं च शब्दाधिकरणं शब्दाधिकरणादन्यत्, मेयत्वात्।

६. **पक्षापक्षविपक्षान्यवर्गादिकैकमुद्धृतम्।**
भिन्नं साध्यवतस्तद्वदुद्धृतावधि भेदिनः।।

इदमष्टमं सूत्रं प्रयोगश्च-

अयं घटः एतद्घटाङ्कुरान्यान्य सकर्तृकान्यः, मेयत्वात्, आकाशादिवत्।

७. **तस्यैव तद्वृत्तेन योगो वात्र प्रसाध्यते।**
तद्वृत्त्यवृत्तिरथवा प्रोद्धतेऽत्र प्रसाध्यते।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्मिन् श्लोके पूर्वार्धोत्तरार्धयो नवमदशमसूत्रेऽनुस्यूते। तयोः प्रयोगौ-

अयं घटः एतद्घटाङ्कुरान्यान्यसकर्तृकावृत्ति धर्मवान्, मेयत्वात् इति। एवञ्च -

अयं घटः, एतद्घटाङ्कुरान्यान्यसकर्तृकधर्मविरही, मेयत्वात्। इति।

८. **अप्साध्यान्यवियुक्तान्यव्यावृत्तिर्वा प्रसाध्यते।**
असाध्यतद्वियुक्तान्यव्यावृत्तिर्वा प्रसाध्यते।।

अत्रैकादशद्वादशसूत्रयोः निवेशः प्रयोगस्वरूपे च -

शब्दः, साध्याभावान्यैतद्वियुक्तान्यव्यावृत्तिमान्।

शब्दः, साध्याभावतद्वियुक्तान्यव्यावृत्तिमान्। इति।

९. **पक्षेषु ये सन्ति विवादहीनाः विहाय तानन्यतरः प्रसाध्यः।**
पक्षेऽथवा साध्यविनाकृतेन, विच्छिद्यवाऽभाववदन्वितेन।।

अत्र त्रयोदशचतुर्दशपञ्चदशसूत्राणां पूर्वार्धतृतीयचतुर्थवादरूपेण सन्निवेशः कृतः। एतेषां प्रयोगाः यथा -

शब्दः सम्प्रतिपन्नैतन्निष्ठान्यधर्मवान्।

शब्दः, साध्यव्यतिरिक्तैतद्धर्मवान्।

शब्दः शब्दानित्यावृत्तिधर्मवान्, मेयत्वात्, घटाकाशवत्। इति।

१०. **अपक्षसाध्यवद्वृत्ति विपक्षान्वयि यन्नतत्।**
साध्याश्रयविपक्षान्यविपक्षे व्यतिरेकभाक्।।

इति षोडशं सूत्रं, प्रयोगश्चास्य-

शब्दः, शब्देतरानित्यनित्यावृत्त्याकाशान्यनित्यमात्रावृत्तित्वान धिकरणाकाश धर्मवान्।

इत्यतिरहस्योपेतानिकृच्छ्रसाध्यानि सूत्राण्याधारीकृत्य वादीन्द्रेण

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मानमनोहराख्यः कश्चिद् ग्रन्थः विरचितः। तस्यैवापरः ग्रन्थः महाविद्या-विडम्बनमिति विदुषां मतम्। मानमनोहरे महाविद्याप्रयोगभूयस्त्वं विपक्षि-पक्षच्छेदाय स्वीकृतं, किञ्च महाविद्याविडम्बने अस्याः केवलान्वयित्वं महतायासेन निराकृतमिति विस्मापयति विदुषः तर्ककेलिः।

मानमनोहरस्य प्रयोगाः चित्सुखाचार्येण पूर्वपक्षीकृताः। पक्षधर्मता-नुमानलक्षणखण्डनावसरेषु मानमनोहरमुद्धृत्य निराचकार आचार्यः। यद्यप्यात्मनः स्वयम्प्रकाशत्वसाधनावसरे अविद्याया भावरूपत्वसाधनप्रसङ्गे च महाविद्याप्रयोगकौशलं चित्सुखाचार्येणापि प्रदर्शितम्। यथा हिं अवेद्यत्व-प्रसिद्ध्यर्थं 'वेद्यत्वं किञ्चिन्निष्ठात्यन्ताभावप्रतियोगिधर्मत्वात् शौक्ल्यवत्।'[१], इति सामान्यतोदृष्टमनुमानाकारं समुपस्थाप्य, 'अथवा अयं घटः एतद्घटान्यत्वे सति वेद्यत्वानधिकरणान्यः पदार्थत्वात्, पटवत्।'[२] इति महाविद्याप्रयुक्ता। नयनप्रसादिनीकृतापि [३],

वेद्यत्वं स्वस्वेतरवृत्तित्वानाक्रान्ताधिकरणात्यन्ताभावप्रतियोगिवृत्ति-धर्माधिकरणं मेयत्वादित्यवेद्यत्वसाधकं प्रौढमनुमानमुपस्थापितम्। एवमेवान्या-न्यपि महाविद्यानुमानानि प्रकरणेऽस्मिन् स्वमतस्थिरीकरणाय प्रदर्शितानि। तथापि चित्सुखमुनिना महाविद्याप्रयोगालम्बन श्रद्धा न कुत्रापि दर्शिता अस्याः सव्यभिचारादिदोषादनर्थकारित्वाच्च। समवायखण्डनावसरे तु समवायसाधकं वादीन्द्रप्रयुक्तं महाविद्यानुमानं आचार्येण सविस्तरेण निराकृतम्। अनुमानाकारो यथा -

'अयं घटः एतद्घटनिष्ठानित्यत्वानधिकरणभावरूपसम्बन्धवान् सम्बन्धित्वात् पटवत्।'[४] इति। अत्र एतद्घटनिष्ठश्चानित्यत्वानधिकरणं च भावरूपश्च यः सम्बन्धस्तदधिकरणमिति योजना कल्पनीया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रकरणेऽस्मिन्नयनप्रसादिनीकृता चित्सुखाचार्यस्य हार्दं महाविद्यानुमान-विषये इत्थमभिहितम् ।

वादीन्द्रस्येष्टदा तावन्महाविद्या पुलोमजा।
सा च सव्यभिचारादिदोषैः सन्दूषितात्मना।।
तामेव दूषयन्नेष तत्पादे निपतन्नपि।
कथङ्कारं मदोन्मत्तः श्रद्धेयवचनो भवेत्।।
पक्षतद्भिन्नवृत्तित्वाद्युपज्ञाभिश्च रीतिभिः।
आप्ता साधकता सीमा एताः पारिप्लवावहाः।।
नोपादेया महाविद्या मुद्रिता जातु जातयः।
तत्त्वञ्चापि स्वीय यत्नाज्जिगीषयिषुभिर्बुधैः।। इति।।

इत्थं हि कृत्याप्रयोगवन्भमहाविद्याप्रयोगः सदुत्तरं नास्ति। किन्तु वादिवादीन्द्रेण गुणकिरणावलीटीकायां महाविद्याप्रयोगमसदुत्तरं मन्वानेनापि प्रयोगः कृतः। तथा च चित्सुखाचार्येण महाविद्याप्रयोगनिराकरणाय वा तथा-विधः प्रयोगः कृतः। तथापि चित्सुखाचार्यकृतप्रयोगेषु कञ्चिद्विशेषं पश्यामः। नह्याचार्येणैकान्तिकरूपेण महाविद्या प्रयुक्ता, अपितु सर्वत्र स्वमतं सम्यगुपस्थाप्य विकल्परूपेणैव महाविद्याप्रत्याख्यानमपि कृतम्। यथोक्तं नयनपसादिन्यां,

'पक्षधर्मताखण्डनेन महाविद्याजीवनपि खण्डितम् वेदितव्यम्।' स्पष्टीकरोति प्रत्यग्रूपभगवान्,

'केवलान्वयिनि व्यापके प्रवर्तमानो हेतुः पक्षे व्यापकप्रतीत्यपर्य-वसानबलादन्वयव्यतिरेकि साध्यविशेषं वाद्यभिमतं साधयन् हि महाविद्येत्युच्यते। तथा च व्यापकप्रतीत्यपर्यवसानानिरुक्तौ तासामप्यनिरुक्तेः। दग्धसारं चेदं वादीन्द्रदावानलेन महाविद्याविपिनमिति नास्माभिस्तद् भस्मी भावाय संरभ्यते।' (चित्सुखीटीका पृ.२४९)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आलेखे उद्धृत ग्रन्थयो: संस्करण परिचय:

१. **महाविद्याविडम्बनम् भट्टवादीन्द्रविरचितम्**
संपादक: - मङ्गेशरामकृष्ण तेलङ्ग:
केन्द्रीय पुस्तकालयात् बरोदात: प्रकाशित: ।
प्रकाशन वर्षम् १९२० ई.

२. **प्रत्यक्तत्त्वप्रदीपिका (चित्सुखी)**
परमहंस चित्सुखाचार्यविरचिता,
सम्पादक: - रघुनाथ काशीनाथ शास्त्री
निर्णयसागर मुद्रणालयात्, मुम्बईत:
प्रकाशित: । प्रकाशन वर्षम् १९३१ ई.

सन्दर्भा:

१. चित्सुखी पृ. १२
२. तत्रैव पृ. १३
३. तत्रैव टीकायां
४. तत्रैव पृ. २०७-२०८

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऋषयः मन्त्राणां द्रष्टारः- मन्त्रकृत्पदस्यार्थः

वन्दना मालवीय

ऐतिहासिकदृष्ट्या वेदाध्येतॄणां विदुषां वर्गद्वयं प्रसिद्धम्। आद्यानां मते ऋषय एव मन्त्राणां कर्तार इति स्वीक्रियते। ऋग्वेदे नैकेषु स्थलेषु[1] ते मन्त्राणां ऋषिकर्तृकत्वस्य सङ्केतान् पश्यन्ति स्वमतपुष्ट्यर्थं प्रमाणरूपेणोपस्थापयन्ति च-

द्वितीयवर्गीयाणां विदुषां मते ऋषयः द्रष्टार एवासन् न तु कर्तारः। ते वाक्सिद्धा आसन्[2]। मन्त्रेषु एव ऋषीणां द्रष्टृत्वस्य प्रमाणानि सन्ति इति भारतीयानां मतम्। प्रमाणत्वेन ऋग्वेदस्य नैकेषु स्थलेषु[3] प्रमाणरूपेण उदाह्रियन्ते। तथा च ऋषीणां मन्त्राकृदिति समाख्याकरणे तेषां द्रष्टृत्वगुणमेव हेतुः। यथा सायणः लिखति "यद्यपि अपौरुषेये वेदे कर्तारो न सन्ति, तथापि कल्पादौ विश्वेश्वरानुग्रहेण मन्त्राणां लब्धारो मन्त्राकृदित्युच्यन्ते"[4]। सायणः[5] मन्त्राकृद् इति पदव्याख्यायां √ कृञ् धातुं दर्शनार्थकं स्वीकरोति "ऋषिरतीन्द्रियार्थद्रष्टा मन्त्रकृत्। करोति धातुस्तत्रा दर्शनार्थः"।

वेदानपौरुषेयान् स्वीकुर्वन्तो विद्वांसः √ कृञ् धातोरनेकार्थत्वात् मन्त्रकृदिति पदस्य व्याख्यानावसरेषु करोतीत्यर्थं अस्वीकुर्वन्ति। भिन्नेषु वैदिकग्रन्थेषु आगतस्य मन्त्रकृदितिपदस्य व्याख्या आचार्यैः विविधेष्वर्थेषु कृता वर्तते।

√ कृञ् धातोरर्थः करोतीति प्रसिद्धः। किन्तु धातोरस्य प्रयोगः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतवाङ्मये बहुष्वर्थेषु दृश्यते। पाणिनि:[६] स्वयमेव धातुमनेकार्थं स्वीकुर्वन् "गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञ्" इति सूत्रयति। "अधे: प्रसहने:[७] इति सूत्रानुसारेण शत्रुपराजय: अभिभवादिकरणञ्च कृञ: अर्थविस्तर:। वे: शब्दकर्मण:[८] इति सूत्रानुसारेण विकृतशब्दकरणेऽपि √ कृञ् धातो: प्रयोग:। अस्मिन्नेव स्थले महाभाष्ये विमलीकरणं निक्षेपणं स्थापनं इत्यर्थेषु कृञ: प्रयोग: समुपलभ्यते। निर्मलीकरणे चापि दृश्यते-"पृष्ठं कुरु पादौ कुरु।" उन्मृदान इत्यवगम्यते। निक्षेपणे चापि वर्तते---"कटं कुरु घटं कुरु स्थापयेतितिगम्यते" इति।

"आदाने करोति शब्द:" इति मीमांसासूत्रं शाबरभाष्ये कृञ: आदानं ग्रहणं वेत्यर्थं प्रकटयति। शाबरस्वामिना[९] स्वभाष्ये √कृञ् धातो: आदानरूपमर्थ: कृतम्आदाने करोति शब्दो भविष्यति। स्वसं करोति, स्वसं आदत्ते। यथा काष्ठानि करोति, गोमयानि करोति आदनि, करोति शब्दो भवति इति।

मन्त्रकृदिति पदे √ कृञ् धातोरर्थद्वयं गृह्यते। प्रथम उपयोगकरणं द्वितीयश्च दर्शनमिति। एतयोरर्थयोर्बहुश: कृञ: प्रयोग: समुपलभ्यते। सेवार्थे पाणिनिना[१०] प्रयुक्तोऽयं धातु: एवं हि मन्त्रकृदित्यस्य मन्त्रणां यागादौ विनियोक्तेत्यर्थोऽवगम्यते। अर्थोऽसौ प्रकरणेऽस्मिन् युक्तियुक्त: प्रतीयते विचिकित्साभावात्। बहुषु स्थलेषु 'मन्त्रकृत्' पदं यज्ञे मन्त्राणां प्रयोक्तारमभिदधाति। यथा तन्त्रवर्तिक[११] उक्तं यथा "शिशुर्वा आङ्गिरसो मन्त्रकृतां मन्त्रकृदासीदित्यत्र मन्त्रकृच्छन्द: प्रयोक्तरि प्रयुक्त: इति। एवमेव रघुवंशे पञ्चमे सर्गे चतुर्थे श्लोके मन्त्रकृतामृषीणामिति पदं व्यचिख्यासु: श्री गोविन्दशास्त्रीमहोदय: लिखति यत् मन्त्रकृत् पदस्यार्थ: मन्त्रणां रचयिता नास्ति। यतो हि एवं सति मन्त्रेष्वनित्यत्वशङ्का पतेत्। अत: अस्यार्थ: यज्ञादौ मन्त्रणां प्रयोक्ता एव गृह्णीयात् "अत्र न मन्त्रान् कुर्वन्तीति मन्त्रकृत

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति व्युत्पत्तिर्गरीयसी, वेदापौरुषेयत्व- भङ्गात्। किन्तु मन्त्रान् कुर्वन्ति प्रयोगाविधिना इष्टलाभाय प्रयुज्जते इति मन्त्रकृतः इति[१२]।

कृञ्धातोर्दर्शनार्थे प्रयोगे मन्त्रेषु निहितगूढार्थाधिगन्ता द्रष्टा वेत्यर्थः भवति। यथा भट्टभास्करः तैत्तिरीयारण्यकस्य[१३] नमः ऋषिभ्यो मन्त्रकृद्भ्यः "इत्यस्य व्याख्यायामेव लिखिति "मन्त्राणां द्रष्टृभ्यः दर्शनमेव कर्तृत्वम्" इति। सायणः √ कृञ् धातुं दर्शनार्थमेव स्वीकरोति[१४]। कर्कः यावन्तो वा मन्त्रदृशः इति सूत्र[१५] मन्त्रकृतपदं दृष्ट्ऋन् प्रति प्रयुङ्क्ते। "मन्त्रकृतो मन्त्रदृश उच्यते इति। रघवंशस्य[१६] व्याख्यायां मल्लिनाथः 'मन्त्रदृष्ट्र' इति लिखति मन्त्रकृदित्यस्यार्थरूपेण मन्त्रकृन्मन्त्रदृष्टा स वाल्मीकिरपि। सुकर्मपापमन्त्रपुण्येषु कृञ् इति क्विप् इति।

स्वामी दयानन्दस्त्वाह कोऽपि मनुष्यः मन्त्राणां रचयितास्ति। यः मन्त्रार्थं प्रकाशितवान् स एव तस्य मन्त्रस्य ऋषिरुक्तः अतो नैव कश्चिन्मनुष्यो मन्त्रनिमतिति। एवं येन येनर्षिणा यस्य यस्य मन्त्रस्थार्थः प्रकाशितोऽस्ति तस्य तस्य ऋषिरेकैकमन्त्रस्य सम्बन्धे नामोल्लेखः कृतोऽस्ति इति[१७]।

सन्दर्भाः

१. ऋ. ७/३५/१४; ७/३४/४;९७/४
२. ऋ. १०/७१/३
३. ऋ. ७/३३/७;८७/४;८८/४
४. तै.आ. ४/१/१
५. ऐ.ब्रा. ६/१
६. भाष्य १/३/३२
७. अष्टा. १/३/३३
८. अष्टा. १/३/३४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

९. ४/२/३
१०. अष्टा. १/३/३२
११. पृ. २३१
१२. रघुंशम् गोविन्दशास्त्रिणा संपादितम्, वेंकटेश्वर प्रेस, मुम्बई, १९६९
१३. ते.आ. ४/११
१४. ऐ.ब्रा. ६/१
१५. का श्रौ.सू. २/१/१३
१६. रघुवंशम् १५/३
१७. ऋग्वेदभाष्यसूत्र

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतीयचिन्तने इस्लामपरम्परावदानम्

राधावल्लभ त्रिपाठी

वन्द्यस्य व्याहरन्नाम प्रारम्भे परमात्मनः।
अपारकरुणापारावारस्य परमात्मनः।।[1]
परमात्मा श्रोतुमर्हो जगतां पालको हि यः।
अपारकरुणापारावारस्यकरुणान्वितः।।
पुनरुत्थानदिवसाधीश्वरः फलदायकः।
भजामहे त्वां साहाय्यं त्वां च याचामहे वयम्।।[2]

अस्मद्देशे मुस्लिमपरम्परा इस्लामानुक्तं चिन्तनं जीवनदर्शनं व वैदेशिकै राक्रमणकारिभिर्बलादानीय समारोपितमिति न युक्तं मन्तुम्। इस्लाममतानुयायिनामाक्रमणकारिणां भारते प्रवेशात् प्रागेव प्रायशः सप्तम्यामष्टम्यां वा शताब्द्यामिस्लाममतानुयायिनः दक्षिणेषु मलाबारप्रान्तमागत्य तत्र वसतिं व्यदधुः। मलाबारराज्ञामनुज्ञया ते तत्र स्वधर्मस्थानानि मस्जिदसंज्ञकान्यपि निर्मितवन्तः। तेषां धर्मप्रचारका फकीर इति संज्ञप्तास्तस्मिन् प्रान्ते धर्मोपदेशं विदधाना विचेरुः।[3] तुर्कानां मोहम्मदीयानां चाक्रमणात् प्रागपि एशियामहाद्वीपस्येतरदेशैरस्य देशस्य सांस्कृतिकसम्बन्धा दृढं स्थापिता आसन्। तथाहि - पञ्चतन्त्रस्य प्राप्यन्त एव चतुर्थ्यां पञ्चम्यां वा शताब्द्यामरबदेशेषु विहिता अनुवादाः। ५५० ई. वर्षे बर्वेजीत्ययं विद्वान् पहेलवीभाषायां पञ्चतन्त्रमनूद्य ईराणदेशं निन्ये। ईराणनृपतये नौशिर्वान-महाभागाय च स्वकृतमिदमनुवादमन्यदपि च साहित्यं समर्पयाम्बभूव। अस्यानुवादस्य अरबीभाषायां पुनरनुवादः ८०० ई. वर्षे कलिल्लाह दिमनाह

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति नाम्ना इब्ने मोकाफा इत्यनेनाकारि। अनन्तरं च बहवोऽनुवाद पञ्चतन्त्रस्य आरब्यदेशीयै- र्विहिता:। भारतेषु चाकबरनृपतिरबुलफैजलेन इयारे दानिश इचि नाम्ना पञ्चतन्त्रमनुवादयति स्म।

वस्तुत: इस्लामप्रवर्तकानां मुहम्मदसाहिबवर्याणां पितृव्यस्य अब्बासवर्यस्य वंशधरा यदा ७५० ई. वर्षे उमय्यावंशं विनाश्य खलीफापदं प्राप्तवन्तस्तदा भारतै: सह तेषां सम्बन्धा दार्ढ्यमापेदिरे। खलीफाशासकेषु मंसूरस्य (७५३-७७४ई.) तथैव हारुनरशीदस्य (७८९-८०९ई.) चावदानमस्मिन् विषये सुप्रथितमेव।

अस्मिन् काले ईराणदेशीयैर्भारतानां सम्बन्धा: सविशेषं ववृधिरे। भारतीया विद्या आरब्यदेशेषु तद्देशानां च विद्या इह प्रसारमापु:। ताजिकनील-कण्ठीकारो नीलकण्ठ: कश्मीरेषु वसन्तं हल्लाजं गत्वा ताजिकं रमलविद्यां वाऽध्यैष्ट। अस्मिन्नेव काले यवनानां विद्या: भारतीयाध्ययनविषयेषु समावेशिता:। तथाहि-शुक्रनीत्यां शुक्राचार्यो द्वात्रिंशद्विद्या: परिगणयन्नाह -

मीमांसातर्कसांख्यानि वेदान्तो योग एव च।
इतिहासा: पुराणानि स्मृतयो नास्तिकं मतम्॥
अर्थशास्त्रं कामशास्त्रं तथा शिल्पमलङ्कृति:।
काव्यानि देशभाषाऽवसरोक्तिर्यावनं मतम्।
देशादिधर्मा द्वात्रिंशदेता विद्याभिसंज्ञिता:॥
(शु.नी.४.२८-२९)

किन्नाम यावनं मतमिति शुक्राचार्य इत्थं व्याचष्ट-

ईश्वर: कारणं यत्रादृश्योऽस्ति जगत: सदा।
श्रुतिस्मृती विना धर्माधर्मौ स्तस्तच्च यावनम्॥
श्रुत्यादिभिन्नधर्मोऽस्ति यत्र तद्यावनं मतम्॥
(तत्रैव, ४.६२-६३)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अदृश्यो निराकारो वेश्वरः श्रुतिस्मृतिप्रमाणवर्जम् इस्लामधर्मे स्वीकृतः। एतदेवात्र यावनं मतमिति प्रत्यपादि शुक्रेण। एतेन इस्लामधर्मस्य तदनुषक्तानां विद्यानां च तदानीं भारतेऽध्ययनमक्रियतेति सुस्पष्टं भवति।

आर्यभट्टविरचितस्य सूर्यसिद्धान्तस्य आरव्यभाषायामनुवादः कालिफ्-अल्-मंसूरस्यादेशेन सञ्जातः। एवमेव अरबदेशे कौटिल्यस्यार्थशास्त्रमपि प्रचारमाप। खलीफा हारुन-उल्-रशीदो भारतीयपण्डितान् स्वराजसभायामामन्त्रयामास। चरकसुश्रुतसंहितयोरनुवादा अनेन आरंब्यभाषायां कारिताः।

महापण्डितोऽल्बिरूनिर्न केवलं पातञ्जलयोगसूत्र- सांख्यकारिका- बृहत्संहिता- लघुजातकादिग्रन्थानामारव्याभाषानुवादेन स्वदेशं सिषेवे, यूक्लिड- टॉलेमी-प्रभृतीनां संस्कृतभाषारूपान्तरैर्देवभाषाया अपि गौरवमसौ संवर्धयामास भारतीयधर्मदर्शनशास्त्रचिन्तने निष्णातः पण्डितोऽल्बिरूनिर्निर्भीकं भारतदेशीयानां स्वदेशीयानां च गुणदोषानुद्घाटयामास। मुहम्मदगजनीमप्यसौ निर्भयं भर्त्सयति। अल्बिरूनीमधिकृत्य गजनीमनसि आसीन्महानादरः, अत एव न केवलं तत्कृतां भत्स्नार्मिसावसहत, तत्प्रेरणया स्वमुद्रासु संस्कृतवाक्यावलिमप्युट्टङ्कयामास। तथाहि - अव्यक्तमेकं ब्रह्म, अवतारो मुहम्मदः नृपतिर्महमूदः, अयं टङ्कः महमूपुरे घटितः इत्युट्टङ्कितं वर्तते। गजनीनृपतेर्मुद्राः अद्यापि हरिद्वारकाङ्गडादिसङ्ग्रहालयेषु सुरक्षिताः सन्ति। मुहम्मदगौरी इत्यस्यापि मुद्रा अस्मिन् प्रसङ्ग उल्लेखमर्हन्ति। चतुर्विधास्तस्य मुद्राः सन्ति। एकस्यां लक्ष्म्याश्चित्रं वर्तते। मोहम्मदगौरी इति देवनागर्यां च नामधेयं सहैवोट्टङ्कितम्। अन्यस्यां शिववाहनस्य वृषभस्य चित्रमुट्टङ्कितम्। अपरस्यां मुद्रायां गौरीविजय इति देवनागरीवर्णा विराजन्ते।

कश्मीरेषु चतुर्दशशतकादिस्लाममतानुयायिनां शासकानां राज्यं प्रारभत। एतेषु केचन सुरत्राणाः सुरभाषां प्रति सादरा अभूवन्। एतेषु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिगाबुद्दीननाम्न: शासकस्य राज्यकाले निकषाऽनन्तनागं कोटिहरग्रामे शिलालेख एक: प्राप्यते यस्मिन्नसौ पाण्डुवंशज इति कीर्तित:। मृते तस्मिन् तद्भ्राता कुतुबुद्दीन: कश्मीरधरां शशास। सोऽपि वैदिकपरम्पराणां शैव-धर्मस्य च संवर्धकत्वेन शंसितो जोनराजकृतराजतरङ्गिण्याम्। कश्मीरशासकेषु जैनुलाबदीनस्य विद्यानुराग: पण्डितानां संस्कृतकवीनां च कृते आश्रयदातृत्वं सुविश्रुतं वर्तते। जोनराज: श्रीवर:, नोत्थसोमो, योधभट्ट: अवतारभट्ट:, शिर्यभट्ट:, कर्पूरभट्ट:, रुय्यभट्टश्चेति बहव: सुधियस्तस्य राजसभां विभूषयन्ति स्म। शासति जैनुलाब्दीननृपतौ कश्मीरेषु संस्कृतविद्या कमपि प्रकर्षं जगाम। बहव: संस्कृतग्रन्थास्तत्प्रेरणया पारसीकभाषायामनूदिता:। स्वयमपि संस्कृतविदसौ राजा प्रतिदिनं नीलमतपुराणवाचनं शृणोति स्म। तस्य सङ्गीतप्रेमवृत्तं विज्ञाय गोपाचलनरेशो डूँगरसिंहस्तस्मै सङ्गीतशिरोमणे: सङ्गीतचूडामणेश्च मातृके प्रेषयामास।

लोदीवंशसमुद्भवस्य लाडखानस्यामात्य: कल्याणमल्लोऽनङ्गरङ्गं कामशास्त्रग्रन्थं तथैव च सुलैमच्चरितं नाम इस्लामसम्प्रदायप्रथितस्य सुलैमानसंज्ञकस्य महापुरुषस्य चरितं न्यबध्नात्।

सन्देशरासककर्ता अब्दुलरहमान: अमरीखुसरो, फैजी, अब्दुलरहीम खानखाना, दाराशिकोहश्चेवमेव बहव इस्लामधर्मानुयायिन: संस्कृतसाहित्यं संवर्धयाम्बभूवु:। पण्डितानामादरास्पदमाश्रयदाता चाभूच्छ्रीमानब्दुलरहीमखान-खाना:। स च संस्कृतपारसीकपण्डितानां परिषदा रामायणमहाभारतपुराणा-दीनां पारसीकभाषायामनुवादान् निष्पादयामास। स्वयमेवासौ सुकवि: हिन्द्यां संस्कृते च काव्यानां शास्त्राणां च रचनया सरस्वतीं सिषेवे। खैटकौतुकम् त्रयस्त्रिंशद्योगावलिरिति ग्रन्थद्वयमनेन ज्योतिषशास्त्रविषयकममरभारत्यां प्रणीतम्। मदनाष्टकगङ्गाष्टक-प्रभृतीनि काव्यान्यप्यनेन संस्कृते विरचितानि। वस्तुत: किमप्यनन्यसाधारणमवदानं खानखानापण्डितस्य विद्यते भारतीय-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परम्पराणां संवर्धने। महाराष्ट्रेषु कीर्तनकाराः प्रायशोऽमुं श्लोकं गायन्ति

रत्नाकरोऽस्ति सदनं गृहिणी च पद्मा
किं देयमस्ति भवते जगदीश्वराय।
राधागृहीतमनसेऽमनसे च तुभ्यं
दत्तं मया निजमनस्तदिदं गृहाण।।

श्लोकोऽयं खानखानाकविकृत एव। भारतीयसाहित्येऽविस्मरणीयं स्थानं रहीमकवेर्वर्तत इति न संशीतिः।

उचितमेवायमित्थमुपश्लोकितः खानखानाचरितकारेण रुद्रकविना –

मन्ये विश्वकृता दिशामधिपता त्वय्येव संस्थापिता
यस्माज्जिष्णुरसि प्रभो शुचिरसि त्वं धर्मराजोऽप्यसि।
राजन् पुण्यजनोऽसि विश्वजनताधारप्रचेता जगत्-
प्राणस्त्वं धनदो महेश्वर इह श्री खानखानप्रभो!।।

श्रीमान् कल्पमहीरुहः किमवनौ किं वा स चिन्तामणिः
किं कर्णः किमु विक्रमः किमथवा भोजोऽवतीर्णः परः।
इत्थं यत्र विलोकिते मतिमतां बुद्धिः समुज्जृम्भते
सोऽयं सम्प्रति खानखाननृपतिर्जीयात् सतां भूतये।।

कलिः कृतयुगायते सुरपदायते मेदिनी
सहस्रकिरणायते भुजयुगप्रतापोदयः।
यशो हिमकरायते गुणगणोऽपि तारायते
सहस्रनयनायते नृपनवाबवीराग्रणीः।।

रहीमकवेः गङ्गाष्टके लालित्यस्य भक्तिभावस्य च मनोहारी समुल्लासोऽनुभूयते। तथाहि –

अच्युतचरणतरङ्गिणि मदनान्तकमौलिमालतीमाले।
त्वयि तनुवितरणसमये हरता देया न मे हरिता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिवोत्तमाङ्गवेदिकाविहारसौख्यकारिणी
ततो भगीरथासङ्गसङ्गमर्त्यलोकचारिणी।
त्रिमार्गगा त्रितापहा त्रिलोकशोकखण्डिनी
जगत्रिदोषतस्तनुं पुनातु जह्नुनन्दिनी।।

जैनुल-आबिदीनः, फकीरुल्लाहः, रोशनजमीरश्च अन्ये नृपतयो विद्वांसो वा राजतरङ्गिणी, रागदर्पणः, सङ्गीतपारिजातश्चेत्यादि ग्रन्थानामनुवादान् व्यदधुः। खान-आरजूनाम भाषाविद् अस्मिन्नेव काले संस्कृतपारसीकभाषायोरैक्यं साधयामास। काव्यशास्त्रक्षेत्रे बडे-साहिब अकबरविहिता शृङ्गारमञ्जरी सङ्गीतशास्त्रक्षेत्रे च मोहम्मदशाह- कृता सङ्गीतमालिका कामपि महत्त्वं भजतः।

एवमेव खण्डनखण्डखाद्यस्यारबीभाषामनुवादः अबुलहसनअहवाजी महोदयेनविहितः। द्वादशशतके मवाफिकुद्दीनेन अरबीभाषायां आयुर्वेदज्ञानां विश्वकोशो व्यरचि। तत्र भारतीयवैद्यानामपि विस्तरेण चरितमुपनिबद्धम्। अरबीभाषाया इमे आयुर्वेदग्रन्थानामनुवादाः पारसीकभाषायां पुनरनूदिताः तत्र फीरोजशाहतुगलक-महमूदशाहबेगड़ा-प्रभृतिशासकानामवदानमितिहास-विश्रुतमेव। सिकन्दरसोदीति राज्ञ आश्रये आयुर्वेदशास्त्रनदीष्णो नदीम-मियाः-त्ताहा इत्याख्यः कविराजो बभूव। चतुर्विंशतिसहस्रमिता आयुर्वेदशास्त्रगता-संस्कृततश्लोका अस्य कण्ठगता आसन्निति श्रूयते। एवमेव गणितशास्त्रग्रन्थाना-मप्यनुवादा अरबीभाषायां तदानीं सञ्जाताः।

सम्राडकबरस्य विद्यानुरागो धर्मनिष्ठा विदुषां कृते सम्मानभावः सुविदिता एव। हीरविजयसूरिः, विजयचन्द्र सूरिः, भानुचन्द्रोपाध्यायः, कृपारसंकोशकर्ता मुनिः शान्तिचन्द्रः, अष्टलक्षीकारः समयसुन्दरः, मुनिः साधुकीर्तिः, कर्मवंशप्रबन्धप्रणेता जयसोमोपाध्यायः, भानुचन्द्रगणिचरितकारो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुनिः सिद्धिचन्द्रोपाध्यः उपाध्यायः पद्मसुन्दरश्चेत्यादयो मुनयः सशिष्याः अकबरेण सम्मानिताः। अकबरीकालिदासविरुदोपेतः सुकविर्गोविन्दस्तस्य राजसभां व्यभूषयत्।

नवरसपुरसंस्थापकः सरस्वतीसमुपासको बीजापुरनरेश इब्राहिमादिल-शाहः (१५८०-१६२७ई.) संस्कृतकवीनामाचार्याणां चाश्रयदातृतया प्रथते। अस्यैव राजसभायां विद्यमानो नरहरिर्नवरसमञ्जरीं नाम कलाशास्त्रस्याभिनवां कृतिं निर्ममे, यत्रासौ उदाहरणपद्येषूपश्लोकयति नृपतिमादिलशाहमेव।

अकबरे शासति सांस्कृतिकसमन्वयस्य शास्त्रपरम्परायां चिन्तने च नवोन्मेषस्य काप्यपूर्वैव प्रक्रिया समारब्धा। अत एव अल्लोपनिषदिति नूतना उपनिषदस्मिन् काले प्रणीता।

जहाँगीरनृपं श्रितः कविः कर्णपूरस्तस्यैव नृपस्य प्रेरणया संस्कृत-पारसीकपदप्रकाश नाम कोशग्रन्थं निर्मितवान्।

पण्डितमण्डलीमण्डनः दर्शनशास्त्रविशारदो दाराशिकोहः भारतीय-चिन्तनपरम्पराया देदीप्यमानो नक्षत्र इति न संशीतिः। सिर्रे-अकबर इति संज्ञया स ५२ - उपनिषदां पारलीकभाषायाऽनुवादं व्यदधात्। योगवशिष्ठस्य श्रीमद्भगवद्गीतायाश्च गहनमनुशीलनमनेन विहितं, पारसीकभाषायां चेमौ ग्रन्थौ स्वनिर्देशेऽनुवादितौ। पारसीकभाषायां मज्म-उल-बहरैन संस्कृतभाषायां च समुद्रसङ्गम इति ग्रन्थः दाराशिकोहस्य मौलिकी दार्शनिकी कृतिः।

दक्षिणेषु कलीमुल्लाहहुसैनी अकबरशाहः विद्वत्सभायां बड़े-साहब इति विख्यातः सप्तदशशतकस्योत्तरार्धे शृङ्गारमञ्जरीं रचयामास। प्रायशोऽस्मिनन्नेव काले मोहम्मदशाहः सङ्गीतमालिकां नाम सङ्गीतशास्त्रग्रन्थं प्रणीतवान्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समुद्रसङ्गमो नाम वेदान्तेस्लाममहासागरयोः सत्यमेव सङ्गमः। अस्य रचना दाराशिकोहेन पण्डितैः इस्लामविद्भिः सूफिभिश्च साकं गहनविचारविमर्शमनु व्यधायि। ग्रन्थारम्भे दाराशिकोहः स्वयमेव ग्रन्थनिर्माण-प्रयोजनमित्थं व्यचष्ट -

> अथ कैश्चित् परिपूर्णवैदिकैः सह विशेषतश्चैतन्य-स्वरूपज्ञानमूर्तिसद्गुरुश्रीबाबालालास्यान्तिके तपश्चर्यायाः ज्ञानस्य सौबुध्येश्वरफलप्राप्तेः शान्तिं च प्राप्तवान् तेन सह पुनः पुन सङ्गतीर्गोष्ठीश्चाकरवम्, परं परिभाषाभेदारिक्तं कमपि भेदं स्वरूपावाप्तौ नापश्यम्। अतश्च द्वयोरेकवाक्यता-मकवरम्। **(समुद्रसङ्गमः, पृ.२)**

कुराणे अकम्प्या वर्तते दाराशिकोहस्यास्था। कुराणं तेन "अस्माकं वेद" इति संज्ञप्तम्। परं वैदिकपरम्परानुशीलनमपि तेन साभिनिवेशमकारि। अत एव तात्पर्यदृशा तत्त्वदृष्ट्या वा वेद-कुराणयोः एकार्थकतामसौ प्रामाणिकतया प्रतिपादयति। धर्मदर्शनयोर्मूलतत्त्वानि विदुषा दाराशिकोहेनात्मसात्कृतानि स्वानुभूतिसहजं च स्फुटमिहाभिव्यक्तिं नीतानि। अद्वैतवादं स्थापयन्नसावाह -

> प्रतिवेशी सवासी च सहगः सर्वमेव च।
> पटच्चरे दरिद्रस्य क्षौमे राज्ञः स सर्वतः।।
> भाति संसदि भेदोऽयमभेदो रहसि स्फुटः।
> ईशस्य शयनं भूयस्तच्छयः सर्वमेव सः।।
>
> **(समुद्रसङ्गमः, पृ. १-२)**

सृष्टिप्रक्रियाविवेचने, पदार्थतत्त्वनिरूपणे मोक्षप्रतिपादने च दाराशिकोहः वैदिकेस्लामचिन्तनयोर्मूलभूतमैक्यं सम्यक् प्रतिपादयति। तथाहि यथा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतीयचिन्तने पञ्चमहाभूतेभ्यः सृष्टिः प्रजायत इति स्वीकृतं तथैव इस्लामपरम्परायामपि। तत्र पञ्चमहाभूताः उन्सूरे-आजम-वाद-आतश-आब-षोकेति व्यपदिष्टाः। "एतान्येव मुनिभिराकाशं वायुस्तेजो जलं पृथिवीति व्यवहृतानीति (समुद्रसङ्गमः पृ ५)। इस्लामदर्शने आकाशस्त्रिविधः भूताकाशश्चित्ताकाशश्चिदाकाशश्च। चिदाकाशस्तावदजन्यः। "तज्जन्यत्वस्य तद्विनाशस्य च वेदेऽस्मद्वेदे वा क्वचिदपि कण्डिकायामप्रतिपादनाद् युक्त्यसहत्त्वात् च" (तत्रैव, पृ.५)। चिदाकाशात् "इश्क" (प्रेम) नामा पदार्थः प्रादुरभूत्। "स च वैदिकमुनिभिर्मयिति उच्यते" (तत्रैव) मायाया जीवात्मा प्रादुरभूत्, स एव हिरण्यगर्भ इति वेदे निगदितः। इस्लामपरम्परायामयमेव "अमा" इत्युच्यते।

इत्थमेव मनोबुद्ध्यहङ्कारादीनामिन्द्रियाणां च निरूपणं कुर्वन् दाराशिकोहस्तत्रापि वैदिकेस्लामदृष्ट्योः साम्यं स्थापयति। जलालश्च जमालश्चेति गुणद्वयमेव सृष्टेरुद्भवे इस्लामपरम्परामनुसृत्य स्वीकृतं ग्रन्थकारेण, वैदिकपरम्परामतेन तु सत्त्वरजःतमोभिस्त्रिभिर्गुणैर्भवति सृष्टिः। इस्लामदृशा जमालेनैव उद्भवः पालनं च सम्भवति।

रूहापरपर्यायस्य आत्मनो निरूपणे ग्रन्थकार आह - "रूहस्य द्विविधत्वम् - रूहजू जई, रूहकुली च। मुनयः एतौ द्वौ जीवात्मानं परमात्मानं च वदन्ति।" इति। जीवात्मपरमात्मनोः सम्बन्धमसौ जलतरङ्गन्यायेन प्रतिपादयति। "शुद्धस्वच्छजलमत्र भवति शुद्धचैतन्यस्थानीयमिति। तत्रोत्पन्ना लहर्यश्च जीवस्थानीयाः।" (तत्रैव, पृ. १७), एवमेव जाग्रत्-सुषुप्ति- तुरीय-संज्ञकानि चत्वारि जगन्ति दाराशिकोहमतेनेस्लामपरम्परायां नासूत-मलकूत-जबरूत-लाहुतेति व्यपदिश्यन्ते।(तत्रैव, पृ. १९-२०)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ईश्वरस्य साक्षात्कारं विषयीकृत्य यद्यपि विद्यते भूयान् भेदो वैदिकेस्लामसूफीतत्त्वचिन्तेषु, तथापि दाराशिकोहस्तु त्रयाणामप्येतेषां विशेषं प्रतिपाद्य मूलभूतमैक्यमेव गवेषयति स्थापयति च। न चर्मचक्षुषा सम्भाव्यते ईश्वरदर्शनम्। न निस्सीम सीम्नि बद्धुं शक्यते। यदा द्रष्टुरेव भवति निस्मीमत्त्वं, तदा स स्वयमेवेश्वररूपतां प्रपद्यते। तदानीं न भवति द्रष्टुर्दृश्यस्य च विशेषः। अत एव ईश्वरस्य साक्षात्कारः कृतः कर्तु वा शक्यत इति लाक्षणिको व्यवहारः। तस्माच्च परमेश्वरो न साक्षात्कर्तुं शक्यते केवलं प्रकाशएव तदीयो दृश्यत इति पैगम्बरीयं कथनमपि न्याय्यमिति वक्तुं शक्यते। परमतत्त्वस्य स्वयंप्रकाश्यता ज्योतीरूपता चोपनिषत्स्वपि प्रतिपादिता। वस्तुतः ईश्वरसाक्षात्कारस्यानुभवोऽनिर्वचनीय इति द्रष्टुमसौ शक्यते न च द्रष्टुमसौ शक्यत इति परस्परविरुद्धा व्याख्या सम्भवन्ति। पैगम्बरमतस्य निष्कृष्टार्थं विवृण्वन् दाराशिकोहोऽभिप्रैति यत् तत्त्वदृशा तु सर्वथा परमेश्वरस्य साक्षात्कारः सम्भाव्यत इति –"सर्वेषामप्यपौरुषेयग्रन्थवतां परिपूर्णानां दर्शनवतां किं तौराववतां किमिञ्जीलवतां प्रतिपन्नमस्मिन्नर्थे श्रद्धास्ति। अज्ञानिनोऽन्धाश्च ते ये स्वस्वमार्गे परमेश्वरप्रत्यक्षं नाङ्गीकुर्वन्ति । सर्वसामर्थ्यवतः परमेश्वरस्य स्वप्रत्यक्षकरणे कुतो न सामर्थ्यम्।" (तत्रैव, पृ.२९)। ईश्वरदर्शनस्य कोटयोऽनेन निर्धारिताः। प्रथमदर्शनं स्वप्ने मनश्चक्षुषा जायते। द्वितीयं दर्शनं जाग्रदवस्थायां मस्तिष्कदृशा विधीयते। तृतीयं दर्शनं स्वप्नजागरणयो-र्मध्ये निरहंकारेण प्रमात्रा क्रियते। चतुर्थं दर्शनं परिमितप्रमातृचैतन्ये जायते। पञ्चमे च भवति ईश्वरेण सर्वथा सायुज्यम्। एतदनुसारेण मुक्तेरपि सम्भवन्ति तास्ताः कोटयः। तथाहि मुक्तिरपि त्रिविधा- जीवनन्मुक्तिः, सर्वमुक्तिर्नित्य-मुक्तिश्च। प्रथममुक्तिद्वये सापेक्षत्वम्, नित्यमुक्तौ सर्वथा नैरपैक्ष्यमिति विशेषः। कुञ्जान-अकब्बरे लयो नाम महामुक्तिः परममोक्षो वा।

तात्त्विकदृष्ट्या पर्यालोचने कृते वैदिकेस्लामसूफीमतेषु मौलिकमैक्य-मेव। परमात्मनो निःश्वासेन प्रणव ओङ्कारो वा प्रादुर्भवति। अरबीभाषायामय-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मेव 'कुन' इति निगद्यते। शुद्धनादरूपतयेयमेव सरस्वती। अनाहताहतभेदेन नादो द्विविधः। शुद्धनादः सरस्वतीरूप इस्लामपरम्परायाम् 'इस्म-आजम' इत्युच्यते।

भारतीयचिन्तकेषु दाराशिकोहो नूनं विशिष्टं स्थानमर्हति।

सन्दर्भाः

१ पण्डितगुलामदस्तगीरअब्बासअलीबिराजदारविहितः "बिस्मिल्लाह उर्रहमान. - इति कुराणमन्त्रस्यानुवादः।
२ तेनैव कृतः फातिहा इत्यस्यानुवादः।
३. Tarachandra : A Short Hostory of Indian People. Macmillan, p. 86-87, 120.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वमीमांसकाणां मते मोक्षस्वरूपम्

सोमनाथः नेने

भारतीयदर्शनशास्त्रस्य प्रायः सर्वेष्वपि प्रस्थानेषु परमपुरुषार्थत्वेन 'मोक्षस्य' प्रतिपादनं प्रामुख्येन विचिकित्सितं परिलक्ष्यते। नास्तिकास्तिक-भेदयोर्वैदिकावैदिकभेदयोर्वा विभक्तेषु दर्शनभेदेषु स्वसिद्धान्तदृष्ट्या 'मोक्षस्य' विशदरूपेण प्रतिपादनार्थं सर्वेषां प्रकाशतेऽत्र महती प्रवृत्तिः।

दर्शनवीथिकायां विराजमानेषु चिन्तनप्रस्थानेषु स्वपदवाच्यस्यात्मन-स्तद्भिन्नेभ्यः सकलेभ्यः पदार्थेभ्यस्सम्बन्धस्य राहित्यात्मकं मोक्षस्वरूपमभिमतं मन्ये। अनात्मपदार्थेभ्य आत्मनः सम्बन्धस्य राहित्यात्मकत्वेन मोक्षस्वरूपस्य सर्वेषामभिमतत्वेऽपि मोक्षस्यास्य साधनविषये परिलक्ष्यन्ते दार्शनिकानां परस्परभिन्ना दृष्टयः।

दार्शनिकप्रस्थानेषु मौलिकभूतत्वेनाभिमतस्य मोक्षस्य बन्धराहित्या-त्मकत्वात् बन्धस्य चालीकवास्तविकभेदेन द्विविधत्वात् मोक्षस्यापि वास्तविकावास्तविकत्वेन सुवचमेव वर्तते द्वैविध्यम्। नास्तिकवर्गे विद्वद्भिः स्थापितस्य बौद्धदर्शनस्य क्षणिकविज्ञानवादशून्यवादसम्प्रदाययोर्बन्धस्य संवृत्तिरूपतया अलीकत्वात् पारमार्थिक्यामवस्थायां मोक्षोऽप्यत्र अलीक एव इति शक्यते प्रतिपादयितुम्। एवमेवास्तिकवर्गेऽपि सांख्ययोगवेदान्त दृष्ट्या बन्धस्यावास्तविकत्वमेव प्रतिपादितम्। सांख्ये प्रकृत्या सह पुरुषसम्बन्धस्या-विवेकग्रस्तत्वमेव स्थापितं परिलक्ष्यते सांख्यग्रन्थेषु। बन्धस्यात्रालीकत्वादेव विवेकज्ञानेन प्रतिपाद्यते निवृत्तिरस्माद्बन्धात् महामुनिना कपिलेन तत्त्व-समाससूत्रे-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'एतत् सम्यग्ज्ञात्वा कृतकृत्यः स्यात्।
न पुरस्त्रिविधेन दुःखेनाभिभूयते[1]।। इति।

य च प्रसिद्धे सांख्यदर्शनसूत्रे -

विवेकान्निःशेषदुःखनिवृत्तौ कृतकृत्यता नेतरान्नेतरात्[2]
इति।

सांख्यवद् योगशास्त्रेऽपि "विवेकख्यातिरविप्लवा हानोपाय"[3] इत्यनेन सूत्रेणाभ्यासवैराग्यसहकृतस्य विवेकज्ञानस्यैव प्रदर्शितं परमर्षिणा पतञ्जलिना मोक्षहेतुत्वम्। सांख्ययोगवद्वेदान्तेऽपि प्रातिभासिक व्यावहारिकपारमार्थिकीषु त्रिविधासु सत्तासु ब्रह्मसाक्षात्कारात्मिकां पारमार्थिकीं सत्तां विहायाविद्याकार्यभूतयोरुभयोरेव प्रातिभासिक- व्यावहारिक सत्तयोरङ्गीक्रियते बन्धस्यावस्थितिः। अस्य बन्धस्यालीक त्वादेव 'दशमस्त्वमसीतिवत् 'तत्त्वमसी'[4]त्यादिभिर्बोधकवाक्यगम्य स्याधिकरणात्मकस्य ब्रह्मणो ज्ञानादेवाङ्गीक्रियते सिद्धस्यैव मोक्षस्यावाप्तिर्वेदान्तिभिः।

उक्तदिशा नास्तिकेषु दर्शनेषु क्षणिकविज्ञानवादशून्यवादाभ्यां सह वैदिकान्तर्गतानि सांख्ययोगवेदान्तप्रस्थानानि विहाय वैदिकेषु जैनदर्शनेन सह वैदिकान्तर्गतिषु न्यायवैशिषकमीमांसादर्शनेषु बन्धस्य वास्तविकत्वान्मोक्षस्यापि वास्तविकत्वं परिलक्ष्यते।

मीमांसकानां मते मोक्षस्वरूपम्

वेदार्थनिर्णयार्थं प्रवृत्तायां मीमांसायां सर्वेषां वैदिकवाक्यानां कर्मण्येव तात्पर्य-प्रतिपादनादियं मीमांसा कर्ममीमांसा इत्यनयाऽपि संज्ञया विद्वत्समवाये प्रथिता। यद्यपि मीमांसाशब्दनोपनिषद्वाक्यानामर्थनिर्णयार्थं प्रवृत्तायाः वेदान्तापरसंज्ञिकाया उत्तरमीमांसाया अपि जायते बोधस्तथापि मीमांसाशब्दमात्रेण

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कर्ममीमांसाया एव झटिति बोधात् कर्म प्रतिपादक एव शास्त्रे रूढोऽयं मीमांसा-शब्दः। अस्य मीमांसाशास्त्रस्य कर्मपरत्वात् शास्त्रप्रवर्तके जैमिनि-विरचिते सूत्रग्रन्थे सूत्रार्थवैशद्यात्मके च 'शाबरभाष्ये' नास्ति कोऽप्युल्लेखोऽस्यात्मनः स्वरूपावस्थानरूपस्य देहन्द्रियकर्मफलादिसम्बनधरहितस्य मोक्षस्य।

प्रभाकरसम्प्रदाये मोक्षस्वरूपम्

मीमांसाशास्त्रे सूत्राभाष्यग्रन्थवद्यद्यपि गुरोः प्रभाकरस्यापि नोपलभ्यते मोक्षविषयकं साक्षादभिमतं किञ्चित्तथापि प्रभाकरमतावलम्बिना शालिकनाथेन प्रकरणपञ्चिकायां विशदीकृतमेतन्मोक्षस्वरूपम्। साक्षाद्रीत्या प्रभाकरस्यात्र प्रतिपादनाभावेऽपि शालिकनाथस्य प्रभाकरमतपक्षपातित्वात्प्रकरण पञ्चिकायामालोकितं मोक्षस्वरूपं प्रकाराभिमतमित्यङ्गीकारेऽपि न प्रतीयते काऽपि विप्रतिपत्तिः।

प्रकरणपञ्चिकायां शालिकनाथेन **'आत्यन्तिकस्तु देहोच्छेदो निश्शेष धर्माधर्मपरिक्षयनिबन्धनो मोक्ष इति युक्तमि''**[५] त्यनया पङ्क्त्या प्राप्तशरीरस्य धर्माधर्मयोः पूर्णविनाशादात्यन्तिकोच्छेदत्वेन प्रकाशितं मोक्षस्वरूपम्। स्वविरचितस्य मोक्षस्वरूपस्य वैशद्यार्थमेभिः कृतं विवेचनं चरणत्रयेण पल्लवितुं शक्यते -

१. धर्माधर्मजन्यफलोपभोगायैव जायते शरीरेण सहात्मनः सम्बन्धा-रूपोबन्ध अत एव धर्माधर्मयोरेव वर्तते बन्धस्य हेतुत्वम्।

२. धर्माधर्मयोरेवात्मनशरीरसम्बन्धात्मकस्य बन्धस्य हेतुत्वाद्वयोरेत-योर्विनाशाज्जन्मकारणस्याभावादात्मनो जन्ममूलत्वेन सञ्जातस्य शरीरेन्द्रियसम्बन्धस्य साध्यते परिसमाप्तिः।

३. आत्मनः शरीरमनइन्द्रियसम्बन्धस्य सुखदुःखहेतुत्वादस्य परिक्षयादेव समस्त सुखदुःखात्मकस्य प्रपञ्चात्मकस्य बन्धस्य या परिसमाप्तिः सा एवैतेषामभिमता वर्तते मुक्तिः -

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
"धर्माधर्मवशीकृतो हि जीवस्तासु तासु योनिषु संसरति। स तयोरेकान्तोच्छेदे व्यपगतदेहेन्द्रियसम्बन्धस्समुत्खातनिखिलसांसारिकदुःखानुबन्धो मुक्त इत्युच्यते।''[६]

प्रभाकरमतावलम्बिनः शालिकानाथस्याभिमतं मोक्षस्वरूपं प्राच्यप्रतीच्योभयविद्यानदीष्णैराचार्यवर्यैः डॉ. गङ्गानाथ-झा-महाभागैः '**पूर्वमीमांसा-इन-इट्स-सोर्सेस**- संज्ञके स्वविरचिते ग्रन्थे चतुश्चरणेषु विशदी- कृतम् -

१. भूमौ स्वकीये जीवने दुःखानामनुभवात् प्रथमं तावदुत्पद्यते दुःखविषयिणी वितृष्णा।

२. यद्यपि प्राथमिके चरणे सुखेषु वितृष्णा नोत्पद्यते परन्तु चिन्तनपरम्परायां समारूढेऽस्यां व्यक्तौ सर्वेषां सुखानामवश्यमेव दुःखोत्पादकत्वमस्तीति समुत्पद्यतेऽनुभूतिः। अनयाऽनुभूत्या एव निखिलस्य प्रपञ्चस्य दुःखात्मकत्वानुभवादस्माज्जायते विरक्तिः। दुःखात्मकप्रपञ्चान्तर्गतानां सुखानामपि दुःखमिश्रितत्वेन सह दुःखोत्पादकत्वानुभवादाभ्यां सुखदुःखाभ्यां विरहितंमोक्षमवाप्तुम् ऐभ्यस्सुखेभ्योऽपि समुत्पद्यते विरक्तिः।

३. विरक्तस्तावन्मोक्षाय काम्यनिषिद्धकर्मवर्जनपुरस्सरं भोगेन प्रारब्धकर्मजन्यदुःखप्रणाशाय प्रवर्तते।

४. उक्तदिशा काम्यनिषिद्धकर्मपरित्यागात्तज्जन्यानां दुःखानामनुत्पादेऽपि सञ्चितकर्मराशेरनन्तत्वादस्या विनाशाय यदा मुमुक्षुः शमदमब्रह्मचर्यादीनां साधनानामवलम्बनेन सहात्मज्ञानमप्यवलम्बते तदा बन्धहेतुभूतानां कर्मणां त्यागान्नित्यकर्मणामनुष्ठानसहकृतेनात्मज्ञानेन शरीरेन्द्रियादिभ्यः सम्बन्धस्य विनाशादात्मनः मोक्षमधिगच्छति।[७]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रामानुजाचार्याभिमतं मोक्षस्वरूपम्

प्रकरणपञ्चिकाकर्तुः पृष्ठवर्तिभिर्धर्मपुरीवास्तव्यैः रामानुजाचार्यैः मोक्षोऽपि सकलदुःखोच्छेदरूपतया विलक्षणः पुरुषार्थ''[८] इत्यनया पङ्क्त्या निखिलदुःखविनाशात्मकं मोक्षस्वरूपं संसाध्य "तत्प्राप्तिस्तु 'आत्मावाऽरे द्रष्टव्य-[९] श्श्रोतव्यो मन्तव्यो निदिध्यासितव्यः[१०]. तरति शोकमात्मविदत्यादि[११] श्रुति विहितादात्मज्ञानादित्यनया पङ्क्त्या ज्ञानमात्रस्य मोक्षहेतुत्वं प्रतिपादितम्।[१२]

भाट्टमीमांसायां मोक्षस्य द्वैविध्यम्

मीमांसायाः कुमारिलभट्टप्रवर्तितायां शाखायां मोक्षस्वरूपस्य यत्र कैश्चित्सुखदुःखाभावत्वमङ्गीक्रियते तत्रैव केचिद्भाट्टमतावलम्बिभि-र्मीमांसकैश्स्य मोक्षस्यानन्दात्मकत्वमपि प्रतिपाद्यते। सुखदुःखाभावत्वेन मोक्षमङ्गीकुर्वत्सु मीमांसकेषु भट्टपादैस्सह पार्थसारथिविश्वेश्वरभट्टप्रभृतयो विशेषेणोल्लेखनीयाः सन्ति। आनन्दरूपतावादे चिदानन्दनारायणपण्डित-कमलाकरभट्टकाण्वशङ्करशुक्लादीनां सुतरां विराजन्तेऽभिमतानि।

मोक्षस्याभावात्मकत्वे कौमारिलं मतम्

भाट्टमीमांसायामपि शरीरेण सहात्मनस्सम्बन्धस्य बन्धत्वमङ्गी- कृत्य तदभावस्यात्मनस्स्वातन्त्र्यात्मकत्वेनाभिमतं मोक्षस्वरूपम्। भोगायतनं तावच्छरीरं वर्तते। मनस इन्द्रियाणाञ्चाभिमतं भोग- साधनत्वं, शब्दस्पर्शादीनां विषयाणां भोग्यत्वञ्च सर्वेष्वपि दार्शनिक- प्रस्थानेषु प्रायः निरूपितं संलक्ष्यते। एभिश्शरीरेन्द्रियविषयैर्यदात्मना सह जायते सम्बन्धस्तदास्य प्रपञ्चसम्बन्धस्य बन्धत्वमुररी क्रियते मीमांसकैरपि। अस्यात्मसम्बन्धादात्मनो विरह एव वर्तते भाट्टाभिमतो मोक्षः।

भाट्टप्रस्थानप्रवर्तकाः कुमारिलभट्टपादाः मोक्षस्य सुखरूपत्वं नाङ्गीकुर्वन्ति। एतेषां दृष्ट्याऽभावात्मकत्वेनैवाभिमतं मोक्षस्वरूपम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आनन्दात्मकत्वेनाभिमतं मोक्षस्वरूपमिति चेत् तदाऽस्य स्वर्गरूपत्वमेव स्यात्। तदात्वे स्वर्गस्य कर्मजन्यत्वादस्य मोक्षस्याप्यनित्यत्वमेवापतितं स्यादित्युपन्यस्तं भट्टपादैस्तद्यथा वार्तिके -

सुखोपभोगरूपश्च यदि मोक्षः प्रकल्प्यते।
स्वर्ग एव भवेदेष पर्यायेण क्षयी च सः[१३]।। इति।

अस्य मोक्षस्य सुखात्मकत्वाङ्गीकारे कर्मजन्यत्वं कर्मजन्यत्वाच्चास्यानित्यत्वमेव स्यात्। यतोहि कर्मकारणस्य भावपदार्थस्य नोपपद्यते नित्यत्वमत एवात्र मोक्षत्वं न सुखरूपत्वमपितु शरीरादिभ्यस्सम्बन्धाभावत्वमेवास्योपपद्यते स्वरूपम्। भाट्टपादैरत्र निष्पन्नस्य देहस्य प्रध्वंसाभावत्वेनानुत्पन्नानां शरीराणां प्रागभावत्वेन च मोक्षत्वं प्रतिपाद्य बन्धस्य कर्मजन्यत्वात्कर्मक्षयस्यैव मोक्षहेतुत्वमुपन्यस्यते वार्तिके -

न हि कारणवत् किञ्चिदक्षयित्वेन गम्यते।
तस्मात् कर्मक्षयादेव हेत्वभावेन मुच्यते[१४]।।इति।

पार्थसारथिमिश्राभिमतं मोक्षस्वरूपम्

पार्थसारथि-मिश्रा अपि शरीरेन्द्रियविषयात्मकात्प्रपञ्चादात्मनो राहित्यमेव मोक्षरूपत्वं शास्त्रदीपिकायां प्रतिपादयाञ्चक्रुः -

"तदस्य त्रिविधस्यापि बन्धस्यान्तिको विलयो मोक्ष"[१५]।इति।

यतोहि पार्थसारथिमिश्रा मोक्षे दुःखानुरूपं सुखस्याप्युच्छेदं स्वीकुर्वन्ति एतदर्थमेतेषामपि प्रतिपादने मोक्षस्य नास्ति सुखरूपत्वमपितु दुःखाभावत्वमेवेतेषामभिमतं वर्तते मोक्षस्वरूपम्।

गागाभट्टाभिमता मुक्तिः

सप्तदशशतख्रैस्ताब्दकालिकैर्विश्वेश्वरभट्टापरनामधेयैर्गागाभट्टैरपि 'प्रपञ्चस्य सर्वथा विलयो मुक्तिः[१६]' इत्यनया पङ्क्त्या दुःखाभावत्वमेव प्रतिपादितं मुक्तेः स्वरूपं भाट्टचिन्तामणौ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मोक्षस्यानन्दात्मकत्ववाद:

यद्यपि कुमारिलभट्टपार्थसारथिमिश्रप्रभृतिभिर्दु:खाभावत्वेनाङ्गीकृतो मोक्षस्तथाप्यस्यानन्दात्मकत्वेन स्वीकृतेरपि भाट्टप्रघट्ट एव प्रकाशतेऽपरोऽपि पक्ष: । अत्र मोक्षस्यानन्दरूपतावादस्य पक्षधरेषु चिन्तकेषु चिदानन्दनारायण-कमलाकरभट्टशङ्करशुक्लप्रभृतयो विराजन्ते भाट्टमतावलम्बिनो मीमांसका: ।

चिदानन्दस्याभिमतम्

भाट्टमतावलम्बिना चिदानन्देन 'नीतितत्त्वाविर्भवि' 'वयन्तु सकल-दु:खविलये इति नित्यनिरतिशयानन्दाभिव्यक्तिलक्षणं मोक्षमाचक्षमहे[१७] ।' इत्यनेन प्रतिपादनेन मोक्षस्य दु:खाभावासहकृतमानन्दात्मकत्वं प्रकाशितम् ।

नारायणभट्टाभिमतं मोक्षस्वरूपम्

मानमेयोदयग्रन्थस्य कर्तारो नारायण पण्डिता अपि मोक्षस्यानन्दात्मकत्वमेवाचक्षन्ते । दु:खानामत्यन्तसमुच्छेदे सति आत्मनि (स्वरूपतो) विद्यमानस्य सुखस्य या मनसा भुक्ति: सा एवैतेषां दृष्ट्या वर्तते कुमारिलभट्टप्रतिपादिता मुक्ति: । अयमेवार्थ: कारिकया एभि: प्रकाश्यते -

> दु:खात्यन्तसमुच्छेदे सति प्रागात्मवर्तिन: ।
> सुखस्य मनसा भुक्तिर्मुक्तिरुक्ता कुमारिलै:[१८] ।।इति ।

अत्रात्मनि विद्यमानोऽयमानन्द: संसारावस्थायामपि कथमनुभवपथं नायाति चेत्वर्तति पूर्वपक्षस्य प्रश्नस्तर्ह्यस्य प्रश्नस्य समाधानार्थमेभिरुच्यते यत्संसारावस्थायामस्यानन्दस्यानुभूतावपेक्षितायाः कारण सामग्रेरभावादेव नानुभूयते विद्यमानोऽप्ययमानन्द: । आत्मन: स्वरूपभूतस्य मोक्षानन्दस्यानुभूतौ शरीरेन्द्रियादीनामात्यन्तिकविनाशानुगृहीतस्य मनस एव कारणत्वमेतेषामभिमतम् । संसारावस्थायां मनस्तु वर्तते परन्तु शरीरेन्द्रियादीनामात्यन्तिकविनाशसहकृतं तस्यास्तित्वं नास्त्येव । शीरीरेन्द्रियादीनामात्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
न्तिकविनाशात्मकेन विशेषणेनास्य मनसो विशिष्टत्वं मोक्षावस्थायामेव सम्भवति। संसारावस्थायां मोक्षानन्दानुभूते: कारणात् सर्वथा विपरीतस्य शरीरेन्द्रियादीनां सद्भावसहकृतस्य मनस एवास्थानादस्य मोक्षानन्दस्य विद्यमानत्वेऽपि न जायते प्रतीति:।

यद्यप्यत्र "अशरीरं वावसन्तं प्रियाप्रिये न स्पृशत" इत्यनया श्रुत्या मोक्षावस्थायां शरीरेन्द्रियाणामभावात्सुखदु:खानामप्यभावान्मोक्षस्य अभावात्मकत्वमेव श्रुतिसिद्धमित्याक्षिपेरन् पूर्वपक्षिणस्तर्ह्येतेषामयमाक्षेपो नारायण-भट्टानां दृष्ट्या नास्ति क्षोदक्षम:। मोक्षावस्थायाम् इन्द्रियजन्यसुखदु:खादीनाम् अभावप्रतिपादनमेव अस्या: श्रुते: तात्पर्यमित्याशयो वर्तते नारायणभट्टवर्याणाम्। अनेनैव तात्पर्येण एभिरुच्यते यन्मुक्ते: सुखाभावत्वस्याङ्गीकारेऽस्य पुरुषार्थ-त्वमेव न स्यात्, न हि कश्चिदभावसिद्धये प्रवर्तेत। एतदर्थं परमपुरुषार्थ-त्वेनाभिमतस्य मोक्षस्य पुरुषार्थत्वसिद्ध्यै मोक्षस्यानन्दात्मकत्वमेतेषां दृष्ट्यावश्यमेवाङ्गीकरणीयम्[२०] इत्यलमतिपल्लवितेन।

कमलाकरभट्टाभिमतं मोक्षस्वरूपम्

मीमांसाकुतूहलकारैर्भट्टकुलावतंसै: कमलाकरभट्टपादैरपि मोक्षस्य दु:खाभावत्वमात्रं निरस्य "तस्मात्सिद्धं नित्य सुखाभिव्यक्तिरि त्यनयापङ्क्त्या नारायणभट्टानुरूपम् आत्मन: स्वाभाविकस्यानन्दस्याभिव्यक्तिरूपेणैव अस्यानन्दात्मकत्वं निरूपितम्। आत्मनो मुक्तौ आनन्दरूपता कथं भवेदित्यस्मिन् प्रश्ने समाधानार्थं कमलाकरभट्टै: मनसा स्वरूपभूतस्यानन्दस्यानुभूतिरूपं नारायणाभिमतं मतं परित्यज्य 'तत्त्वतस्तु अस्माकं मोक्षो वेदान्ताभिमतादभिन्न एव' इत्यनया पङ्क्त्या कैवल्य लक्षणात्मकमात्मन: स्वरूपभूतावस्थानं वेदान्ताभिमतं मोक्षस्वरूपमेव एतेषामभिमतमिति स्पष्टं प्रतिपादितम्[२१]।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शङ्करशुक्लाभिमत मोक्षस्वरूपम्

उज्जयिन्यां सिन्धियाप्राच्यविद्याशोधप्रतिष्ठाने पाण्डुलिपित्वेन वर्तमानस्याप्रकाशितस्य 'मीमांसार्थप्रदीप' संज्ञकस्य ग्रन्थस्य लेखकैः काण्व - शङ्करशुक्लमहाभागैरपि कमलाकरभट्टानुरूपं 'नित्यनिरतिशय- सुखाभिव्यक्तित्वं मोक्षत्वम्' इत्यनया पङ्क्त्या मोक्षस्यानन्दात्मकत्वं संसाध्य' एवं ब्रह्मसुखावाप्तौ नित्यत्वान्निरतिशयत्वाच्च लक्षण- समन्वय'[२२] इत्यनया पङ्क्त्या मोक्षलक्षणस्य समन्वयं स्वीकुर्वद्भिरात्मनो वेदान्तपक्षपातित्वमपि सुतरां प्रकाशितम् ।

'मोक्षे' उभयमतयोः समन्वयः

भाट्टप्रस्थानान्तर्गतानां मीमांसकानां मोक्षस्वरूपस्य प्रतिपादनेषु मोक्षस्य अभावात्मकत्वानन्दात्मकत्वयोः स्वरूपयोरापाततः प्रतीयमानेऽपि विरोधे विचार्यमाणेऽत्र विरोधाभास एव वर्तते न तु वास्तविको विरोधः । भट्टपादास्तावत्स्वर्गस्य भावात्मकत्वात्कर्मजन्यतयानित्यत्वाच्चास्य 'सुखोपभोगरूपश्च' इत्यनेन पूर्वोक्तेन वार्तिकेन मोक्षात्मकत्वं यद्यपि निराकुर्वन्ति तथापि अग्निहोत्रादीनामवश्यं फलवत्वनियमादेतेषामनुष्ठानस्य परित्यागाज्जैमिनेः शास्त्रनोल्लङ्घनदोषस्य च समुत्पन्नत्वादत्रोच्यते भट्टपादैर्यत्तदेव कर्म फलोत्पादकत्वाद् बधजनकं भवेत् यद् फलकामनाबुद्ध्या एवानुष्ठीयेत। फलकामनाविरहितेन चेतसा यदा कर्तव्यबुद्ध्या एवानुष्ठीयते तदा तदेव कर्म न बन्धजनकमपितु फलाजन्यत्वान्मोक्षसाधनमेव इत्यङ्गीक्रियते-

'प्रार्थ्यमानं फलं ज्ञातं न चानिच्छोर्भविष्यति'[२३] इति।

वार्तिकमिदं विवृण्वद्भिः पार्थसारथिमिश्रैरपि न्यायरत्नाकरव्याख्यायां भगवद्वाक्यमाश्रित्य प्रस्तूयते समाधानम् । भगवद्गीतायां भगवता कर्मफलविषयिणीं कामनां विहाय कर्तव्यभावनया कर्मानुष्ठानरतानामेव संन्यासित्वं योगित्वञ्च रूपितम् -

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनाश्रितं कर्मफलं कार्यं कर्म करोति यः।
स संन्यासी च योगी च न निरग्निर्न चाक्रियः[२४]।।

भगवद्वाक्यस्यानुरोधादत् पार्थसारथिभिरपि -
'सत्यम्, तानि तु फलाभिसन्धिकृतानि स्वफलदानेन पुरुषं बध्नन्ति, न त्वनभिसन्धिकृतानीति'[२५]। इत्यनया पङ्क्तया फलकामनाबुद्ध्यानुष्ठितानामेव कर्मणां बन्धजनकत्वमङ्गीकृत्य फलासक्तिविरहितेन चेतसानुष्ठितानां फलाजनकत्वमेव प्रतिपाद्यते।

भट्टपादानां स्वर्गस्य मोक्षत्वेनाङ्गीकारस्य निराकरणेन सह स्वर्गफलोत्पादकानां नित्याग्निहोत्रादीनामनासक्तिभावेन विहितस्य प्रतिपादनस्य समन्वयात्मिकया दृष्ट्या पर्यालोचनेन प्रतीयते यदेतेषां दृष्ट्या फलकामनाबुद्ध्यानुष्ठितकर्मजन्यस्य स्वर्गस्यैव मोक्षत्वमेभिर्निराकृतम्। निरतिशय - प्रीत्यात्मकेन यस्यानन्दस्य मोक्षत्वम् आनन्दरूपतावादिभिः प्रतिपादितं, तस्यापि विषयजन्यानन्देन वैलक्षण्यात् वैषयिकसुखाभावात्मकत्वेनात्मनः स्वरूपत्वमेव वर्तते। अस्यात्मनः स्वरूपभूतस्य सुखविशेषत्वेनाभिमतस्य स्वर्गस्य जन्य सुखदुःखानामभावात्मकेन मोक्षस्वरूपेण सह नास्ति कोऽपि विरोधः।

अस्य विवेचनस्य निष्कर्षस्तु अयमेव वर्तते यन्मोक्षस्यानन्दरूपतावादोऽपि जन्यसुखाभावस्यैव वर्तते एकाभावात्मिका प्रतीतिः। वस्तुतस्तु जन्यसुखदुःखानामभावस्य मोक्षत्वमुभयवादि-सम्मतम्।

ज्ञानकर्मणोः समुच्चयस्य मोक्षकारणत्वम्

अनेकेषु विषयेषु सत्स्वपि विरोधेषु मोक्षसाधनत्वनिर्णये प्रभाकर-कुमारिल योरुभयोरपि मतैक्यं परिलक्ष्यते। प्रभाकरमतावलम्बिनां शालिकनाथानां वर्तते प्रतिपादनमिदम् शमदमब्रह्मचर्यादिभिः साधनैः सहकृतेन आत्मज्ञानेन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न स पुनरावर्तत[२६]' इत्यनेनापुनरावृत्तिप्रतिपादकस्य श्रुतिवाक्यस्यानुरूपं निखिलं कर्माशयं नाशयन् मुमुक्षुर्मुक्तो भवति। अत्रज्ञानस्य प्राधान्यं वर्तते कर्मणो वा? इत्यत्रा एकस्मिन्नपि पक्षे प्राधान्यनिर्णयार्थं विनिगमनाभावात्परस्परमुभयो रङ्गाङ्गीभावस्य असिद्धत्वादगत्या ज्ञानकर्मणोः समुच्चय एवाङ्गीकरणीयो वर्तते[२७]।

भट्टपादानामपि सिद्धान्ते ज्ञानकर्मणोः समुच्चय एव मोक्षसाधन-त्वेनाङ्गीकृतो वर्तते। एतेषां वर्तते इदं प्रतिपादनम् -

'आत्मज्ञाने समुत्पन्ने, प्रारब्धकर्मणां भोगेन नाशे सञ्जाते, नित्यनैमित्तिकानां कर्मणामनुष्ठानान्निषिद्धानाञ्चाननुष्ठानादुत्तरकर्मराशेरभावात्तस्यैव च शरीरोत्पत्तौ कारणत्वात् कर्माशयाभावात् शरीराभावात्मको मोक्षः सिद्धो भवति।

अत्र ज्ञातात्मतत्त्वानां भोगात् पूर्व क्रियाक्षये।
उत्तर प्रचयासत्त्वाद् देहो नोत्पद्यते पुनः[२८]।।

मोक्षेऽस्मिन् ज्ञानमात्रस्य हेतुत्वं भट्टाभिमतं नास्ति। आत्मज्ञानेन सह काम्यनिषिद्धकर्मवर्जनपुरस्सरमकरणे प्रत्यावायोत्पादकानां नित्यनैमित्तिक - कर्मणामनुष्ठानस्यापि मोक्षहेतुत्वं कुमारिलभट्टपादैः सम्बन्धाक्षेपपरिहार- वार्तिके स्पष्टरूपेणोपन्यस्तम् -

मोक्षार्थी न प्रवर्तेत तत्र काम्यनिषिद्धयोः।
नित्यनैमित्तिके कुर्यात् प्रत्यवायजिहासया[२९]।।

भट्टपादैर्विरचितस्य 'तन्त्रवार्तिकस्य' राणकापराभिधस्य प्रसिद्धायां 'न्याय-सुधायां' व्याख्याकारैर्भट्टसोमेश्वरैरपि "ननु निश्श्रेयसं ज्ञानाद्बन्धहेतोर्न कर्मणः' इत्यत्र प्रथम पङ्क्तौ 'ननु' शब्देनाशङ्कामुत्थाप्य -

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वमीमांसकाणां /३८

'नैष्कर्म्यादपि तत्किन्तु ज्ञानकर्मसमुच्चयाद् '

इति द्वितीय-पङ्क्तौ प्रस्तूयते इदमेव समाधानं यज्ज्ञानकर्मणोः कस्याप्येकस्यावलम्बनेन यतोऽपि न साध्यते मोक्षोऽयं, तस्मात् कारणादनयोरुभयोः समुच्चयस्यैव कारणत्वमङ्गीकरणीयमिति । ।

दर्शनप्रस्थानेषु कर्मणि प्रवर्तयितुमेव वर्तते मीमांसादर्शनस्य प्रवृत्तिः। सर्वसाधारणतया कर्मत्यागसहकृतेन ज्ञानेनैव मोक्षस्यावाप्तिः प्रतिपाद्यते दार्शनिकैः। अस्य मोक्षस्य स्थूलदृष्ट्या कर्मप्रवृत्तौ बाधकत्वम्पश्यद्भिरेव सूत्रकारभाष्यकारप्रभाकरैरत्र मौनमवलम्बितमिति प्रतीयते। कालान्तरे मोक्षविरहितस्यात्मनः पक्षस्य दर्शनत्वमेव कदाचिदङ्गीकृतं न स्यादित्यनया भीत्या मन्येऽग्रवर्तिभिर्भाट्टप्रभाकर- सम्प्रदायान्तःपातिभिराचार्यैः विशदीकृतं मोक्षस्वरूपम्।

अस्य विवेचितस्य 'मोक्षस्वरूपस्य' सूत्रभाष्यग्रन्थयोरनुल्लेखादेवात्र मीमांसकैर्न्यायवेदान्तप्रस्थानयोरात्मनो रुचेरनुरूपमाकर्षितं मोक्षस्वरूपम्। येषां न्यायदर्शने आसीदभिरुचिस्तैरभावात्मिका मुक्तिरङ्गीकृता। वेदान्त - पक्षपातिभिस्तु न केवलं मुक्तेरानन्दात्मकत्वं स्थापितमपितु स्वपक्षस्य वेदान्ताभिन्नत्वमपि कण्ठतः स्वीकृतम्। मोक्षस्वरूपस्य निर्धारणे यद्यप्यङ्गीकृता मीमांसकैः न्यायदिशा वेदान्तदिशा वा, तथापि मोक्षसाधनत्वनिर्णये ज्ञानेन सह कर्मणामपि मोक्षसाधनत्वाङ्गीकारेणात्मनः कर्मप्रतिपादकत्वलक्षणं मीमांसकत्वमपि परिरक्षितमित्यलम्।

सन्दर्भाः

१. तत्त्वसमाससूत्रम् सूत्रसंख्या २२, पांतञ्जलयोगप्रदीपे १०७ पृष्ठे उद्धृतम्. पा.यो.प्र. गीताप्रेस - गोरखपुरम्, सं. २०५१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२. सांख्यदर्शनम् अ.३, सू. संख्या ८४ पृष्ठम् ५१० चौ.सं. संस्थानम् १९८७.

३. पातञ्जलयोगदर्शनम् पाद संख्या २ सू.सं. २६

४. तत्त्वमसि छान्दोग्योप ६/८/०७

५. प्रकरणपञ्चिका पृ ३४१ का हिं वि वि. वाराणसी १९६१

६. प्र. पञ्चिका पृ. ४३१

७. प्र. पञ्चिका पृ. ३४१ एवं *Purvamīmāsa* in its sources p-31. B.H.U. Varanasi 1964.

८. तन्त्ररहस्यम् पृ. २४, Boroda Central Library 1923

९. आत्मावाऽरे द्रष्टव्य: बृहदा. उ. २/४/५ तथा ४/५/६

१०. श्रोतव्यो मन्तव्यो निदिध्यासितव्य:

११. तरति शोकमात्मवित् छान्दोग्योप. ३/२/९

१२. 'तन्त्ररहस्यम्' पृ. २४

१३. श्लोकवार्तिके सम्बन्धाक्षेपपरिहारवार्तिकम् वा.सं. १०५

१४. श्लोकवार्तिके सम्बन्धाक्षेपपरिहारवार्तिकम् वा.सं. १०६

१५. शास्त्रदीपिका पृ १२५ पङ्क्ति: ३० कृष्णदासअकादमी, वाराणसी, १९८८

१६. भाट्टचिन्तामणि: पृ. ४३ पङ्क्ति: ०३ चौ.सं. सीरीज- आफिस वाराणसी १९३३

१७. 'मानमेयोदय:' पृ. २१२ थियोसोफिकल-पब्लिशिंग-हाउस आड्यार-मद्रास-नगरी, १९३३

१८. 'अशरीरं वावसन्तं प्रियाप्रिये न स्पृशत:'

१९. ननु यदि संसारावस्थायामात्मसमवेत एवायमानन्द: तर्हि कथं नानुभूयते। अनुभवहेतोरभावादिति ब्रूम:। देहेन्द्रियादीनामात्यन्तिक-परिध्वंसानुगृहीतं मनस्तदनुभवसाधनम्। किं तर्हि तादृशानन्दसद्भावे प्रमाणम् ? आनन्दं ब्रह्मणो रूपं तच्च मोक्षेऽभिव्यज्यत इति श्रुतिरेव।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न च श्रुतिरानन्दानुभूतिबाधकेतिवाच्यम्। तस्या वैषयिकप्रियाप्रियस्पर्श-निवृत्तिमात्रापरत्वात्। अन्यथा मुक्तेरपुरुषार्थत्वप्रसङ्गात्। मानमेयोदय पृ. १२

२० तस्मात्सिद्धं नित्यसुखाभिव्यक्तिर्मुक्तिरिति। तत्त्वतस्तु अस्माकं मोक्षो वेदान्तिमतादभिन्न एव। मीमांसाकुतूहलम् पृ. ५२, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः वाराणसी १९८७

२१. "किं नाम मोक्षत्वं, नित्यनिरतिशयसुखाभिव्यक्तित्वं मोक्षत्वम्। एवं ब्रह्मसुखावाप्तौ नित्यत्वान्निरतिशयत्वाच्च लक्ष्यसमन्वयः। तदतिरिक्तसुखावाप्तौ नातिव्याप्तिः। तत्र नित्यत्वनिरतिशयत्वा भावात्।" मीमांसार्थ-प्रदीपः पृ. ११. सि. प्रा.शो. प्र. उज्जयिनी।

२२. श्लोकवार्तिकस्य सम्बन्धाक्षेपपरिहारे वार्तिकम् वा.स. १११

२३. 'अनाश्रितं कर्मफलं' भगवद्गीता ६, ४१

२४. "सत्यम् तानि तु फलाभिसन्धिकृतानि स्वफलदानेन पुरुषं बध्नन्ति न त्वनभिसन्धिकृतानीति।" सं. क्षेप प. वार्तिकस्य न्यायरत्नाकरव्याख्या।

२५. 'न स पुनरावर्तते' छान्दोग्योप. अ.८

२६. शमदमब्रह्मचर्यादिकाङ्गोपबृंहितेनाऽऽज्ञानेन न स पुनरावर्तत इत्यपुनरावृत्तये चोदितेन निश्शेष-कर्माशयं नाशयन् मुच्यते। प्रकरण-पञ्चिका. पृ. ३४१

२७. श्लोकवार्तिकम् सम्बन्धाक्षेपपरिहारवार्तिकसंख्या १०८

२८. श्लोकवार्तिकम् सम्बन्धाक्षेपपरिहारवार्तिक संख्या ११०,

२९. प्रकरणपञ्चिकायामात्मवादपरिशिष्टम् पृ. ३५२.
प्रकरण-पञ्चिका, का.हि.वि.वि. वाराणसी, १९६१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अद्यावध्यप्रकाशिता : शृङ्गारमाला

शिवशङ्कर त्रिपाठी

भारतीय काव्यशास्त्रे भानुकवेः 'रसमञ्जरी', हजरतसय्यद-अकबर हुसैनीकृता 'शृङ्गारमञ्जरी', कविदेवदत्तविरचिता 'शृङ्गार विलासिनी'ति ग्रन्थाः विशेषेण गणनीयाः। तत्रा नायिकानां भेदोपभेदाः स्वतन्त्ररीत्या विवेचिताः सन्ति। एतेषां ग्रन्थानामेव परम्परामनुसृत्य श्रीमत्सुखलालमिश्रेणापि 'शृङ्गारमाला' इत्याख्यो लक्षणग्रन्थो लिखितः। ग्रन्थोऽयं अद्यावद्य-प्रकाशितोऽस्ति। हस्तलिखिताऽस्य प्रतिरेका 'भारतीय मनीषा-सूत्रम् संस्थाने (दारागञ्जे इलाहाबादनगरेऽवस्थिते) सुरक्षिता। सुस्पष्टा लिपिः। ग्रन्थस्यास्य लेखनकालं कृतिकारेण निगदितम् -

सुखलालेन सुकविना रचिता
शृङ्गारमणिमयी - माला।
कण्ठे सा रसिकानां सगुण -
सुवर्णा विलासमातनुताम्।।
सुधांशुव्योमवस्विन्दौ (१८०१)
वर्षे ज्येष्ठसिते रसे।
शुभे शृङ्गारमालेयं
रविपुष्ये सुगुम्फिता।।

शृङ्गारमाला ३/११५-१६

इयमेव पुष्पिका, अलवरराज्यान्तर्गति प्राप्तानां हस्तलिखितसंस्कृतग्रन्थानां विवरणसूच्यां कश्मीरराज्यस्य संस्कृतग्रन्थसूच्यामपि वर्तते। अतः शृङ्गार - मालेति ग्रन्थस्यास्य रचनाकालविषये नास्ति विवादावसरः। तत्रैव तृतीय -

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विरचिने कविनाऽत्मपरिचयोऽपि लिखितः (पद्यानि ११०-११४)। अ
सुखलालमिश्रः श्रीमतोहृदयरामस्य पौत्रः बाबूराममहाभागस्य च पुत्रः। श्रीम
गङ्गेशमहाभागानाञ्च शिष्यः। कवेः पूर्वपुरुषाणामेको दामोदर नामधे
स्वपुरं घरौण्डां' विहाय काश्यामागत्य निवसितवान्। स तत्र स्ववैदुष्यचमत्का
लोकान् विद्वत्समाजं च प्रभाव्य बैरमपुत्रस्यामात्यपदमलञ्चकार। इदमे
तथ्यं उद्घाटितं तत्रैव -

तस्यात्मजोऽस्मादगमत्तु काश्यां
षड्दर्शनी बैरमपुत्रामन्त्री।
दामोदरो वैद्कग्रन्थकर्ता
श्रीरामकृष्णस्तदपत्यमासीत्।। (तत्रैव, १११)

नायिकानिरूपणेन समुल्लसितेयं शृङ्गारमाला। त्रिषु विरचिनेषु विभक्तोऽस्
विवेचनोपक्रमः। प्रथमे विरचिने तत्रा नायिकाभेदकथनम्, यथा अन्येषु एत
विषयकेषु ग्रन्थेषु। नास्त्यत्र काचिदपि विशिष्टाऽवधारणा। नायकभेदक
न विद्यतेऽत्र शृङ्गारमालायां यथाऽन्येषु लक्षणग्रन्थेषु। नायकस्यानुरागमनु
भवन्तु रसिकाः :

क्वचिद्भूमौ माला, क्वचिदपि च वंशीगतरवाः
क्वचित्पीतं वासः क्वचिदपि किरीटं निपतितम्।
क्वचिद्यष्टिस्त्वेयं जलधररुचिर्विस्मृतवपुः
यतो राधे किं ते नयनविशिखाभ्यां कृतमिदम्।।
-प्रथम विरचिनम् ४६

द्वितीयं विरचिनं विवेचनदृष्ट्या नवीनम्। कवेर्नायिकास्वरूपं प्रति मनोज्ञारीति
यतः नायिकानिरूपणविषयकेष्वन्येषु ग्रन्थेषु नखशिखवर्णनप्रक्रिया केनापि
नाङ्गीकृता। विरचिनेऽस्मिन्, कविना संयोजिताऽभिनवाऽभिरुचिविलसित
स्निग्धावधारणा रसिकजनमनांसि प्रसभं हरति। हिन्दीभाषायां रीतियुगीना

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मतिरामपद्माकरादयः कवयः लक्षणग्रन्थेषु नायिकाविवेचनावसरं भेदादिभिः समं नखशिखकथनमपि यदकुर्वन् तत्तु शृङ्गारमालाकारस्यैव प्रभावः इत्यनुमानविधौ नास्ति संशयावकाशः। रसरसिकेभ्यः, नखशिखवर्णनात्मके द्वितीयेविरचिने प्रतीयन्ते तत्र उच्छलीत इव रसावर्णवविन्दवः। कतिपया-न्युद्धरणानि, यथा चिबुकम् -

चिवुकमध्यगतं शितिलक्षणं
रसिकमानसमोहनदक्षिणम्।
स्थलजपुष्पपरागरसश्रितः,
किमु सखे ! सुविभाति मधुव्रतः।।

- द्वितीयं विरचिनं/६२

सर्वाङ्गवर्णनं यथा -

उद्यद्विद्युदमन्दकान्तिरुचिरास्ताम्बूलतामाधरा
राकाचन्द्रमुखी विलोलविलसन्नेत्राञ्जना सुस्मिता।
कौसुम्भातिमनोज्ञचारुवसना निर्दोषभूषावृता
कान्तानिर्जितपद्मगन्धनिचया दृष्टाद्य सा कामिनी।।

- तत्रैव/७६

नायिकायाः नखशिखवर्णनक्रमे एकेकैः श्लोकैरेव प्रायशे तस्याःकेशललाट-कर्ण-भ्रू-नासिका-नयन-कपोल-मुखाधर-वाणी-ग्रीवा- बाहु- करोदर-रोमालि-नितम्ब-पृष्ठ-जघनादीनां वर्णनं कविना स्निग्धभावेन सरसवाण्या च कृतम्।

अन्तिमे तृतीये विरचिने वसन्तादीनाम् ऋतूणां, पर्वतचन्द्रकला, विविध वृक्षाणाञ्च वर्णनं, महादेव कृष्ण-राम-गणेश-सूर्य-ब्रह्मा सरस्वती-कामदेवादि देव प्रभृतीनां स्तुतिं विधाय श्रीमद्गङ्गेशमिश्रस्य स्वगुरोः प्रभाववर्णनमपि कृतं कविना -

संसारसर्पमुखमर्दनतार्क्षरूपाः
विज्ञनतनापटलपाटितमोहकूपाः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

येषां कटाक्षकलिता: फलिता: लसन्ति
गङ्गेशमिश्रगुरव सततं जयन्ति।।

- तृतीयविरचनं/१०९

स्ववासस्थान - परिचयं कविना एकेन श्लोकेन दत्तम् -

पानीयपथ्यात्परतस्तुमार्गो
षट्क्रोशमध्ये हि घटोत्कचस्य।
ग्रामौ घरौण्डेति प्रसिद्धनामा,
पूर्वे स्थिता तत्र पुरी मदीया।।

- तत्रैव/११०

पुन: तत्रस्थ प्रस्ताविकस्येकं श्लोकमुद्धृत्य विरामि-

सुभामिनी भोगरसज्ञता च,
मनोज्ञता सज्जनशीलवृत्ति:।
सुकीर्तिरत्युज्जवल संततिश्च
भवन्तिलोकेऽखिल भाग्यभाजाम्।।

-तत्रैव/ ९.९

अद्यावध्यप्रकाशितोऽयं ग्रन्थ: काव्यशास्त्रसेविनां सहृदयरसरसिकाञ्च कृते उपादेयो भवेदि दृढो विश्वास:।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

केशवचन्द्रदाशस्य काव्ययात्रा

धर्मेन्द्रकुमारसिंहदेवः

सनातनीयं काव्यपरम्परा। कवयस्तु कवयन्ति। तथापि तत्र प्रतिक्षणं ग्रन्थनकौशलमेव नवीनतां सृजति। तथा हि - 'तथापि नव्यं भवति काव्यं ग्रन्थनकौशलात्'। अतो जायते काव्येषु प्रवृत्तिः। परमाधुनिके युगेऽस्मिन् विज्ञानस्य प्रगतिधारया मानवानां मनांसि विपरिवर्तन्ते। निर्वाति तेषामभिरुचिदीपशिखा प्राचीनशास्त्रार्थपरम्परावगाहने। पुनश्चापि तदर्थं परिवेशो दूरायते।

तथापि कालस्रोतसि भौतिकवादिनां मानवानामेव मोदाय सद्यो विकसन्ति नवनवकवीनां काव्यकुसुमानि। यत्र च नवीना शैली नूतना च भावधारा तेषां प्रणयिनी। तत्रापि - 'क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः'। अत एतस्मिन् समयमञ्चे रमणीयमार्गेऽवतरति भुवनविदितो दाशः केशवचन्द्रः। यस्य लेखनीलताप्रसूतानि काव्यकुसुमान्याधुनिकसाहित्यप्रपञ्चे सुरभिमातन्वन्ति, आकर्षयन्ति च सचेतसां चित्तम्। तथा चान्यभाषासाहित्येषु यत् प्रसरणशीलं परिवर्तनं प्रतिपदं वर्धते, तदपि संस्कृतसाहित्यधारायाम् आनयने कविरेष सर्वथा प्रयतते। अतो नवनवप्रतिभासम्पन्नो युवा कविरयं गद्यं पद्यञ्च समं ग्रथयति। तत्रापि भिन्नामेकां काव्यरचनाधारां सृजति।

तस्मात् कथमस्य लेखनीलतासु काव्यकुसुमविलासः ? कीदृशो वा तत्र सुरभिशृङ्गारः ? कीदृशी वा मानसी प्रतिक्रिया ? ... एतदर्थमस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

काव्यानामध्ययनं मननं समीक्षणञ्च नितान्तमावश्यकम्। अतः शोधपत्रेऽस्मिन् दाशकवीनां रचनाप्रपञ्चस्य परिचयो यथावसरं किञ्चिद् विशिष्य प्रस्तूयते।

१.१ कृतयः

पद्यकाव्य्

१.प्रणयप्रदीपम् (काव्यम्)

प्रणयप्रदीपं नाम प्रीतेरवगुण्ठनविमोचनात्मकं काव्यम्। लघुकाव्यमिदं नवसु खण्डेषु विभक्तम्। प्रीतिप्राणता काव्यस्य मुख्यविषयबिन्दुः। पुनर्जागरणं मानवीयं जीवनेऽऽवश्यकमिति कृत्वा काव्यनायकः प्रथमतो नायिकां जागरयितुं प्रयतते -

प्रभातीता हि शान्ता रजनी जागृहि शशिमुखि। (पृ.१)
व्यस्तशयनं मुञ्च मानिनि नयनमुन्मीलय..। (पृ.३)

अत्र संसारस्य मलिनरूपतायाश्चित्रणं पुनर्जागरणाय प्रेरणास्रोतः। काव्येऽस्मिन् प्रणय एव मानवजीवने प्रियतमः सहचरः, येन समाजे पुनश्शान्तिः प्रतिष्ठापनीयेति निष्कर्षः।

'प्रणयप्रदीपं' कवेर्दाशस्य काव्यजगति प्रथमः प्रयासः। अत्र यथार्थस्थितिः सर्वत्र परिलक्ष्यते। कलापक्ष-भावपक्षयोः सहभावो दृश्यते। समाजस्य दुर्दशाया विसङ्गतेश्च प्रतिपदमुपस्थापनं कवेः समाजसंस्कारोन्मुखभावान् प्रकटयति। कलुषितसमाजस्य वास्तवरूपवर्णनेऽपि न विजहाति कवेर्नैपुण्यम्। काव्येऽस्मिन् कविः प्रकृतेरुपासक इति बहुशो लक्ष्यते। प्रभात-सन्ध्या-रजनीनां सरलगिरा रामणीयकचित्रणं सचेतसां चित्तं नितरामावर्जयति, आह्लादयति च तद्भवविलासः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाषा प्रसादमयी मनोहारिणी च विद्यते। कुत्रापि अपशब्दं न प्रयुनक्ति कविरेष:। कवेरयं प्रथम: प्रयास:, अतो भाव: सुबोध:। शैली प्रवाहात्मिका रसानुकूला। 'बङ्गलाश्री'रिति उत्कलच्छन्दसा उपनिबद्धं काव्यमिदमनुप्रासोपमारूपकादिभिरलङ्कारैर्विमण्डितम्। समग्रे काव्येऽभिधाप्रधाना शैली कविनावलम्बिता। चिन्तनस्य प्रौढिर्नैव परिलक्ष्यते। तथापि कवेर्जीवनदृष्टे: प्रथमोन्मेष: सर्वथा स्फुटीभवति।

२. हृदयेश्वरी

हृदयेश्वरी नाम आत्मपरिचिति: आत्मसत्ता दिव्यसत्ता वेत्यर्थ:। हृदयेश्वरीति ४२ - लघुकविताना संग्रहात्मकं काव्यम्। तासामपि कवितानां प्रसङ्गानुसारेणातिरिक्तानि नामानि वर्तन्ते। परन्तु सकला: कविता आत्मपरिचय एवैकरूपतां भजन्ति। काव्यनायकस्ता: सर्वा अपि कविता हृदयेश्वरीं श्रावयति। तस्य काव्यनायकस्य सकलसम्बोधने हृदयेश्वरी आत्मपरिचये तादात्म्यं तनुते। आत्मन आविष्कृतिरेव काव्यस्य लक्ष्यम्। मानवजीवने दौर्बल्यमेव विफलतामावहति। अत्र दौर्बल्यं नाम मानवजीवने कर्मणां सीमातिक्रम:। प्रत्येककर्मण: सीमाज्ञानम्, आत्मन: शक्तेश्च परिचयो निर्देशरूपेण प्रस्तूयते। स्वपरियचे आत्मस्थदैविकसत्ताया: परिचय: प्रस्तुत:। सैव दिव्यसत्तात्र हृदयेश्वरीरूपेण वर्णिता। यद्यपि सर्वत्र सम्बोध्यरूपेण हृदयेश्वरी प्रतिष्ठिता तथापि आभ्यन्तरदृष्ट्या हृदयेश्वरी आत्मसत्तेति सकलासु कवितासु प्रतिपाद्यते। आत्मसत्ताया: परिचयेन शान्ति: प्रतिष्ठापनीयेति निर्देश: कविना विहित:। "आत्मा वारे द्रष्टव्य: श्रोतव्यो मन्तव्य'' इत्यौपनिषदिकं वचनं कवेश्चिन्तने प्रतिफलितम्। अत्र मानवीयमूल्यबोध: प्रधानबिन्दु:। आत्मनिरीक्षणद्वारेण क्रमशो मानवस्योन्नतिर्भविष्यतीति काव्यस्य सार:।

काव्येऽस्मिन् माधुर्यशैली चमत्करोति। भाषा तु सरला। क्वचिदेकवाक्यस्य वाक्यान्तरेण सह सम्बन्धस्त्रुट्यति इति तत्र वाक्यार्थबोधे किञ्चित्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

काठिन्यं परिलक्ष्यते। तथापि तत्र कवेश्चिन्तनशीलता हि ध्वन्यते। उपमानुप्रासादयोऽलङ्कारा अपि नवीनरीत्या काव्येऽस्मिन् सुप्रयुक्ताः। शान्त एवात्राङ्गीरसरूपेण प्रवहति। दार्शनिककवेर्दाशस्य हृदयेश्वरीव सहृदयानां हृदयमाह्लादयतीति निश्चप्रचम्।

३. महातीर्थम्

महातीर्थं नाम जीवनस्य नामान्तरम्। जीवनमेव महातीर्थम्। काव्यसङ्ग्रहेऽस्मिन् ३५-लघुकविताः ससंज्ञं संगृहीताः। कविरेव काव्यनायकत्वेन जीवनस्य रहस्यमुद्घाटयति। तदेवास्य काव्यस्य विषयवस्तु। रहस्यवादिभावधारा काव्येस्मिन् प्रवहति। प्रतीकात्मकभङ्ग्या जीवनस्य रहस्योद्घाटनमत्र कविना विहितम्। प्रथमतो 'निजपृष्ठे' (प्रस्तावनायां) काव्यस्य रहस्यं किञ्चिदुन्मोचितम्। यथा -

> महातीर्थं जीवनस्य नामान्तरम् । वलयः कर्मणो नेपथ्यनीतिः।
> मानविकता गतिः। सौमनस्येन कर्मसमापनं पर्याप्तिः।
> सिद्धान्त इह विश्वासस्य पुरोवाक्। निर्लिप्तता दीप्तिः,
> संस्कारप्राणता शुभक्रान्तिः।

जीवनमत्र महातीर्थरूपेण वर्णितम्। जीवनयात्रार्थं प्रस्तुतिः, तल्लक्ष्यञ्च कवितासंग्रहस्य विषयपर्याये आयाति। कर्मणः पूर्वभागे मानवीयभावनायाः संस्थापनं सौमनस्यञ्च काव्यस्य लक्ष्यम्। प्रतिक्षेत्रं संस्कारप्राणता नवीनस्य चावाहनं काव्यस्य मनस्तात्त्विकं बिन्दुद्वयम्। अत्रापि प्रतीकात्मकरीत्यातीतस्य विमर्शनं भाविकल्पस्यच निर्देशः प्रस्तूयेते। तीर्थयात्रायां (जीवनयात्रायां) मनस्थितेः विश्लेषणमत्र काव्यप्राणतामावहति। अन्तर्जगत्येव अन्तर्यात्रा विधेययेति कवेर्भावः। वस्तुतः सामाजिकस्थितिषु प्रणयस्य प्रत्यक्षसंसारेण सह सम्बन्धो दिशान्तरं निरदिशत्। तदेव 'महातीर्थम्' इति संज्ञामात्मसादकरोत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परमत्रानुभवे अपरा दिग् उद्भासिता। भेदबोधश्च निर्यासः सञ्जातः। संस्कृतकाव्यधारायां रहस्यवादस्य प्रतिष्ठा प्रसारश्च कवेरभिप्रेतौ।

४. अलका

अलका नाम सुखसौभाग्यकल्पनानगयरी। सा वस्तुतो मनोविलासमात्रम्। काव्यसंकलनमिदं ४० - आधुनिककवितानां संग्रहपरं वर्तते। अलकेति प्रतीकात्मकं शीर्षकम्। मानवस्य गन्तव्यं निश्चिनोति। 'गन्तव्या ते वसतिरलका .. इति मेघदूते परिकल्पितम् आनन्दस्वरूपं स्थानं गन्तव्यत्वेनात्र चित्र्यते मानव ईश्वरस्य सहगन्तृरूपेण वर्णितः। मनुष्यस्यान्तिमा परिणतिः संस्कारात्मना आनन्द एव पर्यवस्यति। प्रणयद्वारेण स्वयं च मनुष्य ईश्वरयितुं प्रवर्तत इति काव्यस्य भावः।

काव्येऽस्मिन् पौराणिकी प्रवृत्तिः पृष्ठभूमिः। वस्तुतः अलकानाम यक्षेश्वरस्य कुवेरस्य राजधानी ऐश्वर्यशालिनीं नगरी यदुक्तं भामिनीविलासे-

विभाति यस्यां ललितालकायां मनोहरां वैश्रवणस्य लक्ष्मीः।

(२.१०)

अत्र सैवालका मानवस्य शाश्वतसुखप्राप्तये गन्तव्यस्थलत्वेन कल्पिता। कवेर्मनोविष्लेषणमत्र काव्यशैलीं नियमयति। यथा -

अमावस्यानिशाशेषे रतिकलान्तसहस्राक्ष इव
अहमन्विष्यामि मम कवचकुण्डलादीनि.....
क्व मेघः, क्व च वारिधारा ....
आकाशेऽस्मिन् क्व हरीतिमा,
सर्वत्र तु पाषाणी अहल्या स्थिरा ....स्थविरा..बर्बरा।(पृ.१)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथा चात्र एतासां कवितानां दुरूहता भावबोधस्य च जटिलता साधारणीकरणे रसप्रतीतौ वा बाधते। आस्वादः क्वचिदवसादे परिणमति। तथापि आधुनिक-संस्कृत-साहित्यस्य प्रयोगक्षमत्वं नूतनतत्त्वग्रहणसामर्थ्यं च परिचाययितुमवश्यमेताः कविताः स्वागतयोग्याः।

५. ईशा

ईशा नाम कवेः केशवस्य पञ्चमं काव्यसंकलनम्। सा ईशा तु तमःप्रकाशयोः तादात्म्यगीतिका। अत्र १०० कविताः संकलिताः विद्यन्ते। वस्तुतः सङ्गतिकरणमत्र भाववस्तु। सङ्गतिकरणं नाम यज्ञः। यज्ञे यथा मन्त्रा-देवता-द्रव्यदीनां संगतिकरणं भवति तथैव मनुष्यस्य लक्ष्यं सङ्गतिकरणात्मकं भवति। यथा -

सङ्गतिकरणस्य शुभारम्भे
अहमद्य यजे ...... । (पृ.१)

काव्ये संगतिकरणमवधारितं सत्यम्। तेन मुक्तिः, ऐश्वर्यसिद्धिश्च। सा एव सिद्धिरत्र 'ईशा' पदेनोच्यते। भावविषयस्तु शाश्वतसंयोगे मानसव्यापारमावहति। मौलिकमायाया मूल्याङ्कनमेवात्र मूलाधारम्। आध्यात्मिकतायाः समुन्नतं चित्रणं काव्यस्य निर्यासं प्रस्तौति।

ईशा नाम संस्कृतकवितासङ्ग्रहः कवेः काव्ययात्राया अग्रेक्रमणं पिशुनयति। अन्वेषणं हि काव्यस्य प्रमुखः स्वरः। पर्याकुले जीवने पन्थानं गवेषयति कवरियं स्वकम्। भूमिकायामसौ असङ्गतिषु सङ्गतिं काव्यशैलीं मनुते। यत्र च -

कविता सञ्जायते मम अनुभवलिपिः
फाल्गुनं च जीवनान्तरम्। (पृ.५)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुख्यतो भावस्य चिन्तनस्य च प्राधान्यम्, जीवत्परिवेशस्य संरचनम्, विषयगाम्भीर्यम्, संक्षिप्तवर्णनम् इत्यादयः काव्येऽस्मिन् विशिष्यन्ते। काव्ये आधुनिकी शैली चमत्कारितामासादयति। परं सर्वत्र प्रतीकात्मकभङ्ग्या वस्तुविर्शनं काव्येऽस्मिन् सुप्रापमेव। प्रधानतो ध्वनिप्राधान्यमेव काव्यस्य प्रमुखं वैशिष्ट्यम्।

६. भिन्नपुलिनम्

अस्मिन् कवितासङ्कलने ३५-कविताः सन्ति। आधुनिकभाव-बोधस्य स्फुटः परिपाक एतासु कवितासु प्रथमतया लक्ष्यते। अद्यतने जीवने आदर्शस्य यथार्थस्य च भूयान् भेदः सञ्जात इति कविरनुभवति।

लघुकथासङ्ग्रहाः

७. निम्नपृथिवी

अत्र ४०- कथाः सङ्गृहीताः। एतासु कथासु दारिद्र्यदैन्यग्रस्तनां भारतीयानाम् आशा उद्देश्यहीनता च मार्मिकदृष्ट्या चित्रिताः।

८. ऊर्मिचूडा

संकलितासु ४०-कथासु गद्यबन्धानां शक्तिमत्ता वाक्यरचनायाः सहजता सौन्दर्यमूलकता पात्राणां सजीवनमःस्थितयश्च भृशं प्रभावयन्ति। अत्र इमे विशेषा दृश्यन्ते - (१) मुक्तगद्यबन्धवाक्यरचनाशैली, (२) प्रवाहमयीसौन्दर्य-प्रतीतिः, (३) जीवन्ती संवादमयी भाषा। सोऽयं कथासंग्रहः स्वसजातीयेषु विरलतरः प्रयोगात्मकदिशा आदर्शस्थानीय इति राराजते।

बालकथासङ्ग्रहाः

४. महान्

एष एकादशबालकथानां सङ्ग्रहात्मको ग्रन्थः। कथासु कौतुकं नूतनं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिदृश्यम् अभिरुचिश्च विलसन्ति। पर्यावरणसम्बन्धिसचेनात्मकतां मनःसु अध्यारोपयति कथासंग्रहः। प्रत्येकं कथा उपदेशसमन्विता वर्तते। तथा च प्रत्येकमपि कथा एकैकेन नीतिवाक्येन समाप्तिमेति।

११. एकदा

अत्र १०-शिक्षाप्रधाना आदर्शकथाः सहजसरलया भाषया सुनिबद्धाः। अनेन सरलभाषाप्रयोगेण कथासंग्रहोऽयं बालमनःसु नैतिकतामादधाति। बालकेषु जागरूकताया आधानं कथानां लक्ष्यं वर्तते।

बालोपन्यासः

१२. पताका

अत्र भारतस्य स्वतन्त्रताया अधिगमो वर्णितः। पृष्ठभूमौ प्रणयभावना मानवीयकर्तव्यं तादात्म्यानुभूतिश्च प्रकटीकृताः।

उपन्यासाः

१३. तिलोत्तमा

अत्र सामाजिकी कथा विषयीकृता। मानवस्य दुर्बलता विफलता च आधारभूमिः। कथाः सदसत्तत्त्वयोः शारीरिकाध्यात्मिकसंवेदनयोः मध्यपातिता एव सन्दृश्यन्ते। वर्तमाने समाजे परिवर्तमानेषु मूल्येषु प्रेमभावनायाः स्वरूपं कथाकारेण परीक्षितम्। समाजे उदात्तचरितानां पाखण्डानाम् आध्यात्मिकानां तत्त्वानां वासनानां च प्रवर्तमानं द्वन्द्वं कथाकारः सविशेषं विषयीकृतवान्।

१४. शीतलतृष्णा

उपन्यासोऽयं कयोश्चिद् दम्पत्योः जीवनमधिकरोति। यत्र परस्पर विरोधिनी प्रवृत्तिरुपलक्ष्यते। उभयोर्मध्ये जीवनादर्शस्य लक्ष्यस्य च विरोधो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्तते। पतिरादर्शप्राणतया अनुप्राणितो दृश्यते, पत्नी च भौतिकवादेन ग्रस्ता। अत्रापि सनातनमूल्यानाम् औपनिषदिकचिन्तनस्य च पीठिका संस्थापिता।

१५. प्रतिपद्

आदर्शजीवनचर्यायाः समक्षं यानि खलु विपर्ययविजृम्भाणानि वर्तन्ते, तान्येव प्रतीकात्मिका कथेयमुद्भावयति। अत्र प्रमुखं तत्त्वं - गमनात् पूर्वमेव गन्तव्यं स्थलं सुविचारणीयम्, तत् तमसावृत्तं वा ज्योतिर्मयं वेति। अतः सर्वैमानवैरात्मान्वेषणं करणीयमिति कथाकारस्य सन्देशः।

१६. आवर्तम्

उपन्यासेऽस्मिन् इन्द्रवृत्रयोर्वैदिककथानकस्य वर्णनव्याजेन भारतस्य सांस्कृतिकमूल्यानाम् आधुनिकभौतिकसभ्यतायाश्च द्वन्द्वं तज्जनितसङ्कटश्च विशिष्य प्राकाशि। अस्माकं समाजव्यवस्था प्रमोदप्रधानक्रियामधितिष्ठति। सा हि सर्वप्राचीनं इन्द्रवृत्रयोः सत्यानृतद्वन्द्वप्रयुक्तं युद्धं विषयीकरोति। तच्चाद्यतन-समाजे जीवनस्य प्रमुखं लक्षणं वर्तते।

१७. अरुणा

अत्र महानगरे निवसतां निम्नवर्गाणां जनानां जीवनं चित्रितम्। जनतायाः संघर्षश्च प्रेरणास्पदं चित्रितः। संघर्षस्य काचिद् वृथा परिणतिरपि कविना सूचिता।

१८. निकषा

निकषा नाम निकटवर्तिनी समस्या। समस्येयं पारम्परिकी, सामाजिकी, सामूहिकी च। अत्र जीवनतत्त्वं प्रेम प्रेमविषयश्च वर्णिताः। मानवीयव्यवहारस्य दुरूहता अप्रत्यभिज्ञा च विशेषतया प्रकाशिता। तया चोद्भिद्यमाना आशा प्रकटीकृता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

१९. ऋतम्

उपन्यासेऽस्मिन् सत्यान्वेषणं विषयवस्तु। अत्र जीवनदर्शनस्यानुभवः स्फुटं प्रकाशमायाति। जीवनदर्शने प्रकाशितं सत्यम्, अनुभवे व्यवहारे च कथं प्रतिफलतीति प्रत्यक्षमेव कविना निबद्धम्। जीवने आदर्शस्य नैतिकतायाः सत्यानुसन्धानस्य च पन्थाः दर्शितः।

२०. मधुयानम्

इतिहासस्य प्रवृत्तिरिह पृष्ठभूमिः। विषयः काल्पनिकः। महायानम् ... हीनयानम्... इव मधुयानम् परमं तृप्तिक्षेत्रम्। प्रेमास्पदपूर्वकसुखात्मक उपसंहारः। मानवीयमूल्यबोधः प्रधानबिन्दुः। अत्र आदर्शसंवलिता प्रेमकथा विलसति। यस्याः पर्यवसानम् आत्मसाक्षात्कारे छद्मभावानां निराकरणे च सम्भवति। अर्थादात्मनिरीक्षणेनैव क्रमशो मानवस्योन्नतिर्जायत इति सारः।

२१. अञ्जलिः

अञ्जलिरत्र दृश्यादृश्ययोः सेतुमुद्रा, ईश्वरानीश्वरयोः एकाग्रबन्धनी, आगमनप्रस्थानयोः सायुज्यरतिभूमिः। अत्र उद्योग-निरुद्योगयोः दम्पत्योः जीवनगताः समस्या हृदयस्पर्शितया चित्रिताः। जीविकोपार्जनेन सह जीवने परितोषः कथं जायेत इति कथाकारेण विमृष्टम्।

२२. विसर्गः

उपन्यासेऽस्मिन् इच्छां निश्चयं चाभिव्यनक्ति कविः। केवलं भौतिक-साधनानामुपलब्धौ एव मानवजीवनस्य अभ्युन्नतिर्नैव पर्यवस्यति। आध्यात्मिकी दृष्टिरपि जीवनयात्रायामपेक्ष्यते इति कथाकारस्याशयः। तेन च परम्परायाः स्वारस्यं प्रकाशितम्। आत्मोपलब्धये भौतिकदेहोऽपि उपकरणायते। आधुनिकसमाजस्य प्रवृत्तिरत्र दिग्दर्शिता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२४. शशिरेखा

आधुनिके जीवने अहंकारस्य विस्फोट: कथं सर्वनाशकारी जायते, तस्य च शमनं कथं स्यादिति विविधानां पात्राणां जीवनचरितेन प्रदर्शितम्।

२५. ओम् शान्ति:

उपन्यासोऽयं कवेश्चिन्तनस्य पराकाष्ठां प्रकटयति। वर्तमानस्यातीतस्य च विस्तृतेन विचार उपस्थापित:। समाजस्य नियतेश्च विमर्शने कथाकारस्य दार्शनिकी आध्यात्मिकी च दृष्टि: सर्वथा चित्तं प्रभावयति।

अन्येऽपि शोधपरका ग्रन्था आङ्गलोभाषायां प्रकाशिता वर्तन्ते। अधुनापि संस्कृता-ङ्गलयोडिया-भाषाभि: कविरयं सततं नवीना रचना: प्रस्तौति।

१.२ पद्यवैभव:

"जयन्ति ते सुकृतिनो रससिद्धा: कविश्वरा:" इति न्यायेन दाशकवेरपि शृङ्गारस्य परिपाक: सहृदयानां हृदयं सततं समुल्लासयति। तथा हि -

रिक्तभुजद्वये भर प्रियतम ! उष्णालिङ्गनस्य मधु।

(प्रणयप्रदीपम् पृ. ३४)

ओमरखैयाम इत्याख्यस्य पारसीककवे: प्रभाव: परिलक्ष्यते। तथा हि (संस्कृतानुवादम्)

उद्यानं प्रविश प्रिये स्पृश तथा माध्वीकमोष्ठाधरे
शैत्यग्लानिमत: समर्पय हसैर्वासन्तहर्षाध्वरे। इति खैयामस्य।

केशवस्य यथा एहि रे लोलाक्षि, विस्मर संसारं परिधेहि प्रेमपटम्।
प्रविश प्रणयनिकुञ्जकुटीरे मोचय चित्तकपाटम्।।

(तत्रैव.पृ.१६)

एवमन्येऽपि। तत्रानुप्रासस्य लालित्यं यथा -

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जीवनं सुन्दरम्, सुन्दर: संसार:, सुन्दरश्च परिवेश:
सुन्दरी च धरा, त्वमपि सुन्दरी, सुन्दरो न परिशेष:।
(तत्रैव. पृ. १३)

अत्र नवीना उपमा: काव्यस्य शोभातिशयमावहन्ति। यथा
संसार: सुन्दरि, भूषितगणिकास्मितमिव प्रतिभाति।
जीवन्मृतमिव नयति जीवनं जन: सत्यं विस्मरति।।
(तत्रैव. पृ. ३२)

कानिचिन्नवीनान्युपमानानि यथा-
अनुदिनम् यामिनीमञ्चे
वामनी भवति मध्याह्नच्छाया इव। (हृदेश्श्वरी, पृ.२०)
आत्मधौतं करिष्यामि खेलालुशिशुरिव
तवाङ्के मस्तकं विलीय .... । (तत्रैव, पृ.२२)
अणुच्छिन्नपरमाणुरिव अदृश्योऽहम् ...। (तत्रैव, पृ.३५)

अनुप्रासस्यापि चारुता चित्तं रमयति। यथा -
विपदीया स्थिति:। आकुला प्रस्तुति:।।
जीर्णव्याहृति: । अस्थिरा रति:।।
कुण्ठितविश्रान्ति:। निराश्रयगति:।। (तत्रैव, पृ.२८)

भाषाया अपूर्वा स्फीतिरप्रस्तुतविधानस्य, नवीना परिकल्पना, जटिलं बिम्ब-विधानं च कवेरस्य कवित्वसृष्टेर्वैशिष्ट्यानि भवन्ति। अनुभूतय: सर्वथान्तर्भावं प्रकाशयन्ति। तथा हि -

अनभिज्ञशरीरतो मम मनो विगलति
यथा कश्चिद् वयस्कप्रणव:
वृत्तित्यक्तब्राह्मणस्य मुखात्। (अलका, पृ.८)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपि च, ... सन्देहेषु निद्रा दरिद्राति
अन्धवीथिसन्धितश्च भयं समायाति। (तत्रैव, पृ. १४-१५)

चित्रोपमशैली काव्ये हृदयङ्गमतां साधयति। तथैवामूर्तभावानां मूर्तीकरणं चाक्षुषप्रभावं वर्धयति। यथा -

क्षणाय श्राम्यति निदाघपूर्वाह्णम्
स्नानपूतजननीचरणयुगले
पिप्पलमूलेऽस्मिन् छायाशीतले। (तत्रैव, पृ.४८)

बिम्बविधानेऽस्य दार्शनिकी चेतना चमत्करोति -

अर्पयति जलानि सरसी छायाधारे तपनस्य करे,
यथा काचित् लज्जाशीला सुललिता
जलयाच्ञातले कुण्ठायते अवगुण्ठनस्य लहरीताले।
(तत्रैव, पृ.४९)

कवेरस्याप्रस्तुतविधाने भिन्नैव कापि निरुपमा रीतिश्च राराजते बैम्बिकीछटा। यथा -

प्रश्नहासे विराजते तस्या लपनश्रीः,
साक्षादेका घूर्णितवाताहता विदीर्णा विपणी..। (ईशा, पृ.५)

अपि च, अस्तशिखरे ...
धरा दूरायते धूसरदूर्वातः। (तत्रैव, पृ.८३)

इत्यादिषु पङ्क्तिषु कल्पनासंसारमद्भुतमेव प्रत्यग्रं च यथार्थबोधमुन्मीलयति कविरसौ। नवीनोपमायाः प्रयोगश्चात्र श्लाघ्यः। यथा -

नगरस्य रविवासरीयमार्ग इव
शान्तायते मनः..... । (तत्रैव, पृ.२०)

एवञ्च, ग्रहणकवलतो विषयः स्खलति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विधवा-सैनिकवधूशृङ्गारतो
यथा वीरत्वसारांशः ..... । (तत्रैव, पृ.७१)

तथा च, नि:सहायमातुः वृत्तिहीनपुत्र इव
प्रतिष्ठते दिवसस्य वियुक्तमह्नांशः । (तत्रैव, पृ.७२)

कवेरस्य पद्यबन्धे कल्पनावैभवः नवीनप्रतीकानि, पुरातनकल्पानां समुचितः प्रयोगः, भावशवलत्वम्, सरला भाषा, प्रसन्नाः काव्यपङ्क्तयः, मधुरा शब्दावली, शास्त्रगभीरा अर्थरमणीयता, आधुनिकसंवेदनाया अवतारः व्यञ्जनाक्षमत्वं शब्दानाम्, रुचिरा शैली .... एवमादयो गुणाः केशवस्य लेखनीं विभूषयति ।

१.३. गद्यवैभवः

कविरयं गद्यं पद्यं च समं ग्रथयति। यद्यप्यस्य गद्यबन्धः सरलः सरसः समासरहितश्च विद्यते तथापि भावगम्भीरता सर्वत्र विलसति। क्वचिच्च सांस्कृतिकमूल्यबोधस्योपनिषदिकस्य च चेतना कथमव्याहता स्यात्, तदर्थं कविः स्वाभिव्यक्तये नवीनां भाषामपि निर्माति। यथा -

प्रकाशस्वरूपे दिवसो विषयवशः। अर्जनलोभने कर्मनिर्मन्थ
श्रमविरसः। उत्कोचरचनायां कार्यालयपुस्तिका मसीविकल
ईर्ष्यावर्षणे परस्परपथरोधिनी कर्मशाला। वञ्चनवाञ्छातले
चतुरविपणी रजस्वला। (ऋतम्, पृ.६८)

कवेः सर्वथा नवीना बिम्बयोजना किमपि भावान्तरमभिव्यनक्ति-

नदी झरीयति। झरी च नदी भवति। स्रोतस्तु यथा तथा।
उपचये श्रीमती सहस्रधारा। अपचयेऽपि तथैव श्रीधारा।
वहने क्षालनप्लावनयोः अद्वैतप्रतीतिः। परं नदीयं तु कदाचित्
प्लावयति। केवलं क्षालयति। इयं ही चेतना नदी।
(वही, पृ. ५९-६०)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्वचिच्च बिम्बानां सघनतायां कवेर्भाव: दोलायमान इव प्रतिभाति -

दहनं साधारणीकृत्य रात्रि: तया व्यतीता। विषयो विमृष्ट:। विवादो विचारित:। समाधानम् अन्विष्टम्। आत्मा अवबुद्ध:। उपाय: चिन्तित:। परं कालाधारे सर्वमद्य शिथिलम्। सर्वं च विफलम्। बहु अवसानम्। अनेकं च अवसन्नम्।

(अञ्जलि:, पृ.४६)

एवं गद्यबन्धस्य वैशिष्ट्यं दिङ्मात्रं प्रदर्शितम्।

सर्वतोन्मुखिप्रतिभासम्पन्नोऽयं महाकवि: सव्यसाचिवत् पद्यं पद्यं च समं कवयति। अस्य गद्यबन्धे भाषाया: सरलता, कल्पनाया नवीनता, वस्तुविन्यासस्य चातुर्यम्, वर्णनवैविध्यम्, अर्वाचीनताया: सुभग: संयोग:, नूतनशब्दरचनानां प्रकर्ष:, बिम्बविधानस्य कौशलम्, आत्मनिवेदनस्य गाम्भीर्यम्, घटनानां चमत्कारिक उपयोग:, कवित्वसृष्टे: रुचिरं दर्शनम्, वास्तविकताया मनोरम: स्वीकार ... एवं स्वागतार्हा: सिद्धयो विलसन्तीति।

१.४ उपलब्धय:

शाश्वतीयं काव्यधारा। कवयस्तु मध्यस्था: पथिका:। पान्थो नवीभवति। वाग्व्यवहाररीतिस्तदीयाभिव्यक्तिश्च नवायते। तत्र तथ्यमुद्धरति भट्टो जयन्तपाद: -

कुतो वा नूतनं वस्तु वयमुत्प्रेक्षितुं क्षमा:।
वचोविन्यासवैचित्र्यमात्रमत्र विचार्यताम्।।

किं तर्हि नवत्वं नामेति। तथा हि -

त एव पदविन्यासास्ता एवार्थविभूतय:।
तथापि नव्यं भवति काव्यं ग्रन्थनकौशलात्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवमेव कवेर्दाशस्य गतिः। तस्यात्मदृष्टिस्तु अदृश्यप्रणयिनीव भाति। तस्य काव्ययात्राया उपलब्धयः सीमाविहीना दृश्यन्ते। परमत्रामवकाशस्तु सीमितः। अतः स्थूलरूपेण तदुपस्थाप्यते-

१. संस्कृतभाषायाः सरलस्वरूपस्योपस्थापनम्, तेन चाधुनिकसंस्कृत-साहित्यपठने पाठकानाम् अभिरुचिसम्पादनम्।
२. विषयवर्णनस्य संक्षिप्तीकरणेन सरलनिरूपणरीतेश्च प्रवर्तनेन संस्कृतसाहित्यस्य गतिशीलत्वं व्यवहारोपयोगित्वं सम्पादितम्।
३. सरलवाक्यविन्यासेन नवीनमौलिकमार्गस्य प्रवर्तनम्।
४. संस्कृते मौलिकप्रवृत्त्या आधुनिकविषयाणां प्रयोगक्षमत्वं विधानम्।
५. कवितारचनासु सरलरीत्या जटिलबिम्बविधानम्।
६. लघुनिरूपणविधिना वस्तुस्थतेः पूर्णप्रतिबिम्बनम्।
७. यथार्थवादचिन्तनस्य दृढीकरणम्।
८. कथाकल्पे लघुविधानस्य समुच्चयीकरणम्।
९. उपन्यासरचनासु गद्य-गद्य-नाट्यसमुत्थमिश्रशैल्या अभिनवता-सम्पादनम्।
१०. जीवनसन्दर्भे सूक्ष्मदार्शनिकतत्त्वानां प्रत्यग्रीकरणम्।
११. सरलभाषामाध्यमेन जटिलपरिकल्पस्य परिचितिः।
१२. मानवस्य सामाजिकपतनं नैतिकपतनं च निवार्य नूतनसन्दर्भे जीवनस्य व्याख्यानम्।
१३. सौन्दर्यबोधेन सह शाश्वतभावस्य चित्रणरीतिः।
१४. विनिमयतादात्म्यं साधारणीकरणस्य विशेषविधिः।
१५. प्रगतिशीला शैली।
१६. सरसभाषाविन्यासे प्रसन्नगम्भीराया दार्शनिकचेतनाया उपस्थापनम्।
१७. कला-दर्शनयोः समन्वितिः।
१८. रचनासु समसामयिकजीवनप्रवृत्तिः प्रमुखधारा।
१९. परम्पराया भावस्पर्शः चिन्ताधारायां नेपथ्यप्रलेपः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२०. निरूपणरीतिषु संस्कारप्राणता रमणीयमौलिकता च।

एवमनेकात्मकः काव्यसंसारः। नानाभावात्मकं वस्तु। परमत्र सार एव प्रस्तुतः।

१.५ जीवनदर्शनम्

कवेर्जीवनस्य दर्शनम् अथवा जीवने दर्शनम् इति विवादपदम् एव विषयः। कविस्तु कवयति। तत्र पुनः कथं दर्शनमिति अद्भुतोऽयं प्रश्नः। परमाधुनिकसाहित्येऽस्य निर्णय एव गरीयान् मानदण्डः। वस्तुतः कवेः प्रवृत्तौ कीदृशः अनुभवः, कीदृशी वा गतिः, कुत्र श्रद्धा, कुत्र वाग्रहः, का च रुचिः, कुत्र वाभिरुचिः, कश्च सन्तोषप्रदेश ... एवमादयः पदार्थाःकवेर्जीवनदर्शनस्य निरूपणे नियामका भवन्ति। परमेते सर्वे काव्याद् विशिष्यैवप्रकटीभवन्ति।

प्रथमतः कवेरस्याभिरुचिः संस्कृते। परं विज्ञानस्य प्रगतिधारया सह मानवस्य मनो विपरिवर्तति। रुचिरपि संस्कारायते। किमस्यां स्थितौ संस्कृतस्य गतानुगतिकी शैली सर्वदा सर्वथा च ग्रहणीया स्यात् ... ? नैतत् सम्भावयितुं शक्यते। एतदपि मनसि निधाय कविना भाषाप्रयोगे शैलीविन्यासे, कथासंयोजने, विषयचयने, लेखनस्य प्रवृत्तिनिर्माणे च केचन संस्कारमूलाः पदक्षेपाः संगृहीताः। तस्माद् गतिस्तस्य भिन्ना। संस्कृतभाषा एका मुक्तभाषा इति सम्मतिस्तदीयमुक्त-चिन्तायां तादात्म्यं वहति। अतो रूढिवादे न लसति तस्य श्रद्धा। न वा परम्पराया निष्कारणबन्धने आग्रहः। यन्मानवीयं यच्च मौलिकजीवनपाथेयं यत्र च जीवनस्य महत्त्वम्, तत्र तस्य रुचिः। अतो रचनासु जीवनतत्त्वमेवानुभव-विषयत्वं ग्राहयति। शान्तिबीजारोपणमेव काव्ययात्रायां वेगः। शब्देन अशब्दतादात्म्यमिह लक्ष्यम्। प्रमुखतो यद् दृश्यं तत्तु रुचिरतरमिति अनुभवस्तस्मिन् काव्योदये कश्चन हेतुः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्रेयं पर्याप्तिः। सोऽयं केशवः स्वभावतो दार्शनिकः, तथापि कविहृदयसम्पन्नः। अन्यतमस्रष्टा। अभिनवकविः। साम्प्रतिके संस्कृतसाहित्ये महान् चिन्तकः। संस्कारेच्छुः। समाजसुधारक इति। केशवस्य काव्यसंसारः सर्वात्मना चमत्करोत्येव।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऊँकारस्वरूपं महत्त्वञ्च

शिवदर्शनतिवारी

ओङ्कारश्चाथ शब्दश्च द्वावेतौ ब्रह्मणः सुतौ।
कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ।।

ऊँकारविषयकं स्मृति निगदितमिदं कथनं तस्य माहात्म्यं स्फोटयति। प्रायः सर्वेष्वपि वेद-पुराण-स्मृतिउपनिषदत्सु न्यूनाधिक्येनास्य स्वरूपं महत्त्वञ्च प्रतिपादितं वर्तते। ऊँकारः प्रणवपदेनापि व्यपदिश्यते। वैदिकमन्त्राणामुच्चारणाद् प्रागद्यापि क्रियते ऊँकारस्योच्चारणम्। परमतत्त्वस्य विग्रहस्वरूपोऽयं वैदिकं धर्मदर्शनयोः मूलम्। अस्य निरन्तरध्यानेन निगूढस्यापि देवस्य दर्शनं कर्तुं शक्यते। माण्डूक्योपनिषदि आदावेवास्य स्वरूपमधिकृत्य उक्तं यदोमित्येत-दक्षरमिदं सर्वं तस्योपव्याख्यानं भूतं भवद्भविष्यदिति. सर्वमोङ्कार एव। यच्चान्यत् त्रिकालातीतं तदप्योकार एव। सङ्क्षेपेणोक्तमिदं वचनं किञ्चिद्-विस्तरेण प्रस्तूयतेऽस्मिन् निबन्धे।

अ-उ-म- इत्यक्षरत्रययुतं ऊँकारपदं ब्रह्मवाचकम्। पदेऽस्मिन् चतुर्थी-मात्राऽपि विद्यते। अवर्णं वैश्वानरस्य प्रतीकं, यस्योपासनया सर्वेषामभिलाषा प्रपूर्यति। उकारः तैजसस्वरूपः, यं विना न कापि क्रिया सम्भवति। क्रियाविहीनं मनस्तु निर्बलं सञ्जायते। उत्कर्षवाचकोऽयं तैजसः, वैश्वानरप्रज्ञयोर्मेलनं कारयित्वा स्वयमेतयोः सञ्चालको भवति। अस्योपासनया सर्वे मित्राणि भवन्ति। यो हि तैजसमुपासते तस्य कुले न कोऽपि मूढो भवति। तृतीयं म-अक्षरं सीमावाचकम्, यस्योपासकाः, वैभवशालिनः भवन्ति। चतुर्थी मात्रा ब्रह्मणः तुरीयस्थितिसंसूचिका।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऊँकारः ब्रह्मणश्चतुर्णां पादानां वाचकः। अकारेणाव्ययपुरुषस्य, उकारेणाक्षरपुरुषस्य मकारेण अक्षरपुरुषस्य अर्धमात्रया च परात्परपुरुषस्वरूपस्य बोधो जायते। ऊँकारस्य ज्ञानेनोपासको सर्वज्ञः भवति। सर्वे वेदा अस्यैव व्याख्यां कुर्वन्ति, महर्षयः विविधानि तपांसि तप्यन्ते ब्रह्मचारिणश्च ब्रह्मचर्यमाचरन्ति। यथोक्तम्-

सर्वे वेदा यत्पदमामनन्ति तपाँसि सर्वाणि च यद् वदन्ति।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति, तत्ते पदं संग्रहेण ब्रवीम्योमिति।।

कठोप. १/२

ऊँकारः परमात्मनः सर्वोत्तमं नाम। वेदज्ञाः ऊँकारपूर्वकं वेदमन्त्रमुच्चारयन्ति। सर्वेषु जैन-बौद्ध-शाक्त-तन्त्रादिषु सम्प्रदायेष्वस्य महत्त्वं स्वीक्रियते। ऊँकारस्य प्रथमाक्षरमाविर्भावस्य द्वितीयमभ्युत्थानस्य तृतीयञ्च लयस्य द्योतकमस्ति। एतेषां विस्ताररूपा एव ऋक्-यजुष् सामादित्रयोवेदाः, भू-भुवः-स्वश्च तिस्रो व्याहृतयः। एतानि सृष्टि-स्थिति-लयादीनां प्रकाशकानि। एभ्यः सत्-चित्-आनन्दाः आविर्भूताः। ऊँकारः पूर्णब्रह्मवाचकः। अन्य व्याख्याने शास्त्राणि ब्रुवते -

ऊँ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।

सृष्टौ सर्वप्रथमं ऊँकार एव जातः। अस्यैव तिसृभ्यः मात्राभ्यः त्रिपदा गायत्री, गायत्रीभ्यां त्रयोवेदाः वेदेभ्यश्च सर्वाणि शास्त्राणि स्मृतिपुराणादीनि वाङ्मयानि सञ्जातानि। उपनिषंदत्सु उकारः प्रणवपदेनापि वर्णितः। अथर्वशिखोपनिषदो व्युत्पत्यनुसारेण प्राणन्न्सर्वान् परमात्मनि प्रणाययतीत्येतस्माप्रणवः। बृहन्नारदीयोपनिषदनुसारेण उकारप्रयुक्तानि त्रीण्यक्षराणि क्रमशो ब्रह्म-विष्णु-शिव-वाचकानि। कतिपयशास्त्रकारैः अकारो परमात्म वाचकः, उकारः, जीवात्मपरमात्मसम्बन्धवाचकः मकारश्च जीवात्म वाचकः स्वीकृतः। उकारः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शब्दब्रह्म परब्रह्मणोरेकत्वप्रतिपादकः शब्दः। ये जना उकारमुच्चार्य भगवन्तं स्मृत्वा च स्वशरीरं त्यजन्ति, ते ब्रह्मपदं प्राप्नुवन्ति। उकारस्य श्रवण-मनन-निदिध्यासनेन मानवाः स्वजीवनस्य लक्ष्यं साध्यन्ति। मुमुक्षवोऽविद्यां प्रणाश्य परब्रह्म प्राप्नुवन्ति मनुष्याणाञ्च जनन-मरणादिनानाविधदुःखजालानि शैथिल्यमुपयान्ति। प्रणवस्य स्वरूपमुपदिशन् यमो नचिकेतसम् माह -

एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परम्।
एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत्।। १-२-१६
एतदवलम्बनं ज्ञात्वा ब्रह्मलोके महीयते।। १-२-१७

अथर्वशिखोपनिषदपि उकारस्वरूपं निर्दिशन्ती भणति यत् प्रत्यगानन्दं प्रणवस्वरूपं अकार उकारो मकार इति। ते अनेकधा समभवन्देतदोमिति यमुक्त्वात योगी जन्मसंसारबन्धनात् प्रमुच्यते। यजुर्वेदानुसारेणोङ्कारः खमिव 'अवतीत्योम् आकाशमिव व्यापकत्वात् खम्। प्रणवः सर्वेभ्यः बृहत्वात् ब्रह्मपदेन व्यपदिश्यते। ऋग्वेदेऽयं विविधदेवचाचको शब्दः।

इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यस्य सुपर्णो गरुत्मान्।
एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः।।
१-१६४

छान्दोग्योपनिषदपि प्रणवस्योपासनं कीर्तयन्ती निर्दिशति यत् 'ॐ इत्येतदक्षर-मुद्गीथमुपासीत ओमिति।

भारतीयैर्महर्षिभिर्दिव्येन चक्षुषा यान्याध्यात्मिकानि तत्त्वानि साक्षात्कृतान्यासन् तेषामेव निधयः उपनिषदः। अद्यापि एतेषामध्यात्मशास्त्रा-म्बुधिसमुद्भूतानामुनिषदां ज्ञानं परमावश्यकम्। अस्माकं चेतनाप्रतिबिम्बभूतो ब्रह्माण्डः पृथिवी विद्यते, अस्मासु शरीरम्। ब्रह्माण्डे चन्द्रः, अस्मासु मनः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्रह्माण्डे सूर्यः, अस्मासु बुद्धिः। ब्रह्माण्डे परमेष्ठी, अस्मासु महत्। ब्रह्माण्डे स्वयम्भू, अस्मास्वव्यक्तम् वर्तते। इत्थं वयमेव जगत्। जगदिदं पूर्णं वयमपि पूर्णाः। उपनिषदध्ययनेन ज्ञानं प्राप्य जनाः त्रिविधशान्तिं समधिगच्छन्ति। इत्यलम् पल्लवितेन।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतकोशेषु रूपभेदसङ्ग्रहणम्

प्रातूरिश्रीनिवासः

यस्यां कस्यामपि भाषायां कालक्रमेण परवृद्धिर्भविष्यति। एतादृशी वृद्धिः तद्भाषाकोशेष्वपि द्रष्टुं शक्यते। संस्कृतभाषायामपि निघण्टुग्रन्थादारभ्य कोशप्रमाणं वृद्धिमवाप। सा च वृद्धिः द्विधा विभक्तुं शक्यते पर्यायपदवृद्धिः नानार्थपदवृद्धिरिति।

संस्कृतकोशेषु पदसंवर्धनं सम्यक् ज्ञातुं प्रथमं पदसंख्या विषये किञ्चित् प्रस्तूयते। वैदिकनिघण्टावध्यायत्रये पर्यायपयानि सङ्कलितानि। अस्मिंश्च ग्रन्थे प्रथमाध्यायत्रये प्रायशः २२०० पदानि सन्ति। ततोऽमरकोशे आद्यकाण्डद्वये पर्यायपदानि सञ्चितानि। तत्र च प्रायशः २२,००० पदानि विद्यन्ते। यादवप्रकाशकृतवैजयन्त्यामपि पञ्चकाण्डेषु पर्यायपदानि परिगणितानि। तत्र प्रायशः २२,००० पदानि विद्यन्ते। विश्वनाथकृतकोशकल्पतरौ काण्डत्रये पर्यायपदानि एकत्रीकृतानि। तेषां च संख्या २४,०००। तत्रः कल्पद्रुकोशे स्कन्धत्रये ३०,००० पर्यायपदानि लभ्यन्ते। एवं संस्कृतकोशेषु पदानां क्रमवृद्धिः द्रष्टुं शक्यते।

एतादृशवृद्धेः कारणं किमिति परिशीलने कानिचन कारणानि दरीदृश्यन्ते। तानि च -

१. पूर्वकोशकारैः यानि पदानि समुपलब्धान्यपि न सङ्गृहीतानि पश्चात्कोशकारैस्तेषां सञ्चयनम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२. पूर्वकोशकाराणामनन्तरकाले नूत्नवस्तूत्पादनं, तेषां नामप्रकल्पनं, सङ्ग्रहणं च।

३. काव्यनाटकशास्त्रादिकर्तृभिस्स्वोपयोगार्थं परिकल्पितनूत्नशब्दबन्धानामर्थानां च पश्चात्कोशकारैस्सङ्ग्रहणम्।

४. पदेषु पर्यायपरिवर्तनेन नूतनपदानां प्रकल्पनम्।

५. सामान्यजनव्यवहारेण ये रूपभेदाः सञ्जायन्ते तेषामपि पश्चत्कोशकारैस्सञ्चयनम्।

६. परभाषापदानामवगमनार्थं संस्कृते नवीनपदबन्धनिर्माणम्।

७. परभाषापदानां साक्षात्सङ्ग्रहणम्।

एतेषु कारणेषु रूपभेदसङ्ग्रहणमधिकृत्य किञ्चित्प्रस्तूयते।

रूपभेदसङ्ग्रहणं वैदिकनिघण्टावपि परिदृश्यते यथा क्ष्मा-क्षमा (२-२); पृथ्वी-पृथिवी (२-२); उपरः-उपलः २-२); तुक्-तोकम्-तोकम-तकम २-२); मर्त्याः -मर्याः-मर्ताः २-३); शुष्यम्-शुष्णम्-शूषम् (२-५); अत्सः-प्सुः (३-७); मिमिढ्ढ -मिमीहि (३-२९); रिरिढ्ढ-रिरीहि (३-२९); दाशति-दासति (३-२९); इत्यादयः। अत्र केषाञ्चनपदानां रूपचतुष्टयमपि प्रदर्शितम्।

अमरकोशेऽप्येवंविधरूपभेदप्रदर्शनं दृश्यते यथा शतद्रुः-शितद्रुः (पृ.६६); शैवालः-शैवलः (पृ.६७); सीमन्-सीमा (पृ.७९); देवः-देवरः (पृ.२३०) इत्यादयः।

अनन्तरकाले कोशकारैर्जनसामान्ये ये ये रूपभेदा उपयुक्तास्तेऽपि कोशेषु सङ्कलिताः। कालक्रमे तेषां च संख्या परिवर्धिता यया - 'कान्यकुब्जमिति पदममरकोशे न दृश्यते। अस्य पदस्य त्रिकाण्डशेषे पुरुषोत्तमदेवेन 'कान्यकुब्जमिति' (पृ. ३२), वैजयन्त्यां 'कान्यकुब्ज' इति (पृ.२९९), भिन्नरूपे प्रदशिते। कोशकल्पतरौ विश्वनाथेन कन्याकुब्जं, कन्यकुब्जमिति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रूपद्वयं (पृ.२२०), केशवेन कल्पद्रुकोशे कन्यकुब्जः कन्या कुब्जः कान्यकुब्जः इति रूपत्रयं (पृ.२०), च प्रदर्शितम्। एवमेकस्यैव शब्दस्य कालान्तरे रूपभेदानां वृद्धिकारणात् कोशेषु शब्दवृद्धिःसञ्जाता।

अपरमुदाहरणं यथा - 'द्वारक' शब्दः अमरकोशे नास्ति। त्रिकाण्डशेषे 'द्वारवती' (पृ. ३२) इति रूपं गृहीतम् वैजयन्त्यां 'द्वारका' 'द्वारवती' इति रूपद्वयं (पृ.२९९), कल्पद्रुकोशे द्वारवती-द्वारावती-द्वारका-द्वारिका- इति रूपचतुष्टयं (पृ.२०), च सङ्कलितम्।

तथैव 'महिला' शब्दस्यामरकोशे 'महिला' इत्येकमेव रूपं (पृ.२२३), कोशकल्पतरौ ' महेला' इत्यपि रूपान्तरं (पृ.२०२), प्रदर्शितम्। ततः कल्पद्रुकोशे केशवेन 'महेला-मेहली-मेहला-मेहिला-महिकी-महिला' इति रूपषट्कं (पृ.२४८) सङ्कलितमित्यस्य पदस्य व्यवहाराधिक्यं परिलक्षितुं शकयते।

'कफोणी' शब्दस्यैकमेव रूपं (पृ.२४२) गृहीतमरकोशे, वैजयन्त्यां तु' कफोणिः-कफणिः इति रूपद्वयं (पृ.२७९) विश्वनाथेन कोशकल्पतरौ कफोणिः, कपोणिः कफणिः इति रूपत्रयं (पृ.२२७) कल्पद्रुकोशे केशवेन कफोणिः-कफाणिः-कपणिः कफणी-कफणिः-कपोणिः इति रूपषट्कं (पृ.३९) च समुपदर्शितम्।

पर्षदशब्दस्यामरकोशे 'पारिषदः' इति एकं रूपं (पृ.२७) त्रिकाण्डशेषे पर्षत्, परिषदः इति रूपद्वयं (पृ.९७), वैजयन्त्यां पारिषदाः इत्येकं रूपं (पृ.७) कोशकल्पतरौ पर्षदः-परिषदः परिषद्वलाः इति रूपत्रयं च (पृ.३३५-६) प्रदर्शितम्। ततः केशवः कल्पद्रुकोशेः पारिषदाः-परिषद्वलाः-परिषदाः पर्षद्याः-परिषद्वलाः - परिषद्याः -पार्षदाः - पार्षद्याः पर्षदाः -पारिषदकः इति दशरूपाणिं (पृ.७६) प्रदर्शयामास।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

फलवाचकेष्वप्येवंविधपदवृद्धिर्द्रष्टुं शक्यते यथा अमरकोशे नारिकेल-शब्दस्य 'नारिकेल: इति रूपमेकमेव (पृ.२२२) सङ्कलितम्। वैजयन्त्यां तु नालिकेर इति वर्णव्यत्ययेन (पृ.६३) शब्दोऽयं परिकल्पित:। ततस्त्रिरूपकोशे नारिकेल:-नालिकेर: नाडिकेर: इति रूपत्रिकं (श्लो.३५) कोशकल्पतरौ नारिकेल: नारीकेल: नारिकेलि: -नारिकेर: इति रूपचतुष्टयं (पृ.२४६) च सङ्गृहीतम्। अत्र केशव: कल्पद्रुकोशे 'नारिकेर:-नारीकेर:-नाडीकेर:-नाडिकेर:-नाडिकेल:-नारीकेल:- नारिकेल:-नालीकेल' इति रूपाष्टकं (पृ.२५५) सङ्कलयामास।

एवं बहुत्र रूपभेदवृद्धिं द्रष्टुं शक्यत इति, अनया वृद्ध्या कालक्रमेण कोशेषु पदवृद्धिस्साधितेति निश्चीयते।

सन्दर्भा:

१. निघण्टु और निरुक्त, यास्काचार्य सं. छज्जूरामशास्त्री, मेहरचन्द लक्ष्मणदास संस्कृत पुस्तकालय दिल्ली, १९६३.

२. अमरकोश:, अमरुक:, कविकल रामस्वामिशास्त्रुल एंड सन्स मद्रास, १९२०.

३. त्रिकाण्डशेष:, पुरुषोत्तमदेव: सं. शिलख्खन्दमहाथेर:, वेङ्कटेश्वर प्रेस, मुम्बई, १९१६.

४. वैजयन्तीकोश:, यादवप्रकाश:, वाविल्ल प्रेस, मद्रास, १९५८.

५. कोशकल्पतरु: विश्वनाथ: सं. म.म. पटकर कृष्णमूर्तिशर्मा, डेकन कॉलेज, पूणे, १९५७.

६. कल्पद्रुकोश:, केशव: सं. रामावतार शर्मा, गायकवाड ओरियन्टल सीरीज, बड़ोदा, १९२८

७. त्रिरूपकोश:, जल्हण:, तञ्जोर सरस्वतीमहकालेब्ररी क्रमसंख्या, ४७५९.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्रन्थसमीक्षणम् (१)

अच्युतानन्ददाशः

Christian Influence on *Madhvācārya* : A Myth Explored by Dr. N.V. Kamath, Samshodhana Series - 8, Pub. Suvarn Prakashan, Mangalore, (1998) pages IV+54, Price Rs. 50.00

(श्रीमन्मध्वाचार्याणामुपरि क्रैस्तवानां प्रभावः - एकः उदन्तविस्तरः)

श्रीमन्मध्वाचार्याः भारतीदर्शनजगति सुप्रतिष्ठिताः श्रीमदादिशङ्करभगवत्पादानां प्रतिस्पर्धित्वेन द्वैतमतस्योन्ना यकत्वेन च प्रथितचराः। भक्तिसम्प्रदायस्यान्यतममूर्द्धाभिषिक्ता आचार्या इमे तर्कप्रकर्षस्य धुरन्धरा इति विद्वत्समाजे चिरं प्रातःस्मरणीयाः। श्रीमन्मध्वाचार्या 'पाजक'इति ग्रामे (उडुपी-नगरस्य दक्षिणपूर्वस्यां दिशि १२ किलोमीटर-दूरे) जनिमलभन्त। वैदिकदर्शने सनातनधर्मे चानितरसाधारणप्रतिष्ठामधितिष्ठन्त इमे क्रैस्तवधर्मेणानुप्राणिता इति मतं न विदुषां मनांसि रञ्जयेत्। परन्तु तत्र सन्ति केचन प्राच्यपाश्चात्त्य-विद्वत्तल्लजाः ये ताँस्तथा मन्यन्ते। तेषु ए.एल. बालशम्-आई. पुथैदम्- ए.सि. बर्णेल् - सि.एन. कृष्णस्वामी-अय्यर-महोदयाः श्री एस.एन. दासगुप्त- ग्रीयर्सन- महोदयाश्च विश्रुताः सन्ति। तेषां मतजातमाकलय्य डॉ. एन.वी. कामथ-महोदयः ग्रन्थमिमं प्रस्तौति।

एतस्य मतस्योपोद्वलकतया नैकानि कारणानि कल्पनापथमुपायनीक्रियन्ते विद्वद्भिः। तेषु प्रथमतः श्रीमन्मध्वाचार्याणां जन्मस्थानमेव क्रैस्तवीयानुयायिनां प्राचीनतमं वसतिक्षेत्रमिति प्रमाणयन्ति। (पृ.७-१२)। यीशु-महाभागस्य जन्मनः पूर्वसूचना यथा दिव्यकन्यकया प्रहिता आसीत्तथैव श्रीमन्मध्वाचार्याणां जन्मनः प्रागेव श्रीमदनन्तासन-भगवान् कमपि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुग्धपुरुषशरीरं प्रविश्य तन्माध्यमेन सर्वज्ञस्य षडैश्वर्यसम्पन्नस्य श्रीमन्मध्वाचार्यस्य जन्मविवरणं जनेभ्यः प्रायच्छत्। श्रीमन्मध्वाचार्याणां भगवत्सत्तात्मकतायाः प्रमाणं तेषामलौकिकव्यवहारेण, जलोपरिगमनेन, समुद्रस्य कोपोपशमनेन, सहस्रशः जनानां भोजनोपकल्पनेन, पिशाचोपमर्दनेन चोपलक्षितमासीत्। यीशु-महाभागेनापि सदृशव्यवहारेण लोकोपकारो विहित इति बाइबिल-ग्रन्थाज्ज्ञायते।

श्रीमन्मध्वाचार्याणां दर्शनं भक्तिप्रधानमिति विदितचरमेव समेषाम्। तदीयं भक्तितत्त्वमपि क्रैस्तवीयभक्तिसिद्धान्तमनुकरोतीति श्री एन.वी. कामथमहाभागः ग्रन्थेऽस्मिन् प्रमाणीकरोति (पृ.३४-३९)। क्रैस्तवीय-धर्मदर्शमतेन आत्मतत्त्वं त्रिधा विभक्तम् (१) परमेश्वरः (GOD) (२) जीवः (Soul) (३) पवित्रप्राणः (Holy spirit) इति। अन्यथा वा ते मन्यन्ते (१) पिता (Father) (२) पुत्रः (Son) (३) पवित्रप्रेतः (The Holy Ghost) इति। एतत्त्रितयं "ट्रिनिटी" इति क्रैस्तसम्प्रदाये प्रसिद्धमस्ति। माध्वमतेऽपि वायुरेव मध्यमस्थानीयो वर्तते यन्माध्यमेन पुरुषः परमपुरुषार्थमधिगच्छति। आत्म-परमात्मनोः मध्यवर्त्तितया वायुरेषः क्रैस्तवानां Holy Ghost - स्थानीय इति तद्विदः प्रतिपद्यन्ते। एतावता माध्वदर्शनं क्रैस्तवानां दर्शनेनानुप्राणितमिति ग्रन्थकारः नैकेषां प्राच्य-पाश्चात्त्य-दार्शनिकानां मतान्यनूद्य दृढं प्रतिपादयति। अस्य मतस्योपोद्बलकतया श्रुतिवाक्यान्यपि उदाहरति।

माध्वानां "सोऽहमस्मि" इति मन्त्रं जरथुष्ट्राणां "अह्मि यद् अह्मि" (अस्मि यदस्मि) इति मन्त्रेण समं साम्यं बिभर्त्ति। माध्वा अपि 'अस्मि' इति नाम भगवतः प्रथमं नाम इति मन्यन्ते। एवं बहुभिः प्रमाणैः अस्य प्रबन्धस्य रचनाकारः श्री कामथमहाभागः माध्वचिन्तनं क्रैस्तवानां चिन्तनेन अनुप्राणितमिति उपसंहरति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इदमत्रावधेयम्। केवलेन चिन्तनसाम्येन दर्शनयोः साम्यं तदनु एकमितरानुप्राणिर्हतमिति प्रतिष्ठापयितुमलं वां ? अपि कश्चित्पाश्चात्त्यः (प्राच्यो वा) विद्वान् भास्कराचार्येणानुप्राणितः श्रीन्युटन्-महाभागः पृथिव्याः गुरुत्वाकर्षणशक्तिमुद्भावितवान् इति ब्रूते ? भारतीय-वैदिकदर्शनं तु सर्वतोमुखं वर्त्तते। परन्तु सर्वस्यापि वैदिकवाक्यस्य एकत्ववादे द्वैतवादे वा तात्पर्यं पर्यवस्यतीति ते ते आचार्या अत्याग्रहपरायणतां दर्शयन्ति। तदेव मूलं वेदान्तदर्शनानां परस्परं वैमनस्यभावस्य। अपरं च "एकं सद्विप्रा बहुधा वदन्ति" इत्युक्तेः एकस्य सतः प्रामाण्यं नैव साध्यतेऽपि तु सतः बहुधा-प्रख्यापनस्य प्रामाण्यं प्रतिपाद्यते। किञ्च 'गोसदृशः गवयः' इत्युक्तेः गवयसंरचनायां तत्कर्त्ता गोसंरचनामनुकरोतीति किं प्रमाणम् ? अतएव एकस्यावयवसंरचना इतरेणं तुल्येति युज्यते वक्तुं न तु एकस्य संरचना इतरानुप्राणितेति। मध्वदर्शनं स्वयं अनादि-वेदमूलकतया प्रतिष्ठितमिति नैव शङ्कनीयम्।।

Sex Education : Indian View by Dr. V.K. Hampiboli, Samshodhan Series -II, Pub. Shubhada Publications, Hegde- 581 330, 1998, Pages - viii+xii+87, Price Rs. 100/-

(कामशिक्षा - भारतीया दृष्टिः)

"कामो वामः इत्येकोऽन्तः काम एव धर्मः इत्यपरोऽन्तः। तावुभावनुनिशम्य आधुनिकाः मनोविज्ञानिनः, समाजविज्ञानिनः शरीरविज्ञानिनः केचिद् धर्माचार्याश्च कामशास्त्रामवश्यमध्येयमिति मन्यन्ते। तावता न ते सर्वथा 'कामोवामः' इति पक्षं निराकुर्वन्ति नापि 'कामोधर्मः' इति पक्षं महीयन्ते। ते तु "धर्मार्थकामाः सममेव सेव्याः यो ह्येकभक्तः स नरो जघन्यः" इति महाभारतोक्तिं चरितार्थयन्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मनुष्यः सुखलिप्सुः। सुखं तु त्रिवर्गोपासनया लभ्यते। इहामुत्रसुखस्याधारस्तु त्रिवर्गोपासनमिति कामशास्त्रप्रणेता वात्स्यायनाचार्यो मनुते। तथा हि-

"एवमर्थं च धर्मं च कामं चोपाचरन्नरः।
इहामुत्रं च निःशल्यमत्यन्तं सुखमश्नुते।।
(का.सू.I२.३४)

कामशास्त्रं तु कामविषयकाज्ञाननिवृत्तिद्वारा धर्मपूर्वककामसेवनार्थं प्रणीतमस्ति। शरीर-मनः-स्वजन-परिजन-राष्ट्रजन-हिताय कामशास्त्रमवश्यमध्येयमिति श्रीमान् वी.के. हम्पिबोलिमहाभागः ग्रन्थेऽस्मिन् युक्त्युपपत्तिपुरःसरं प्रस्तौति।

सुखपाठ्योऽयं ग्रन्थः। सुरुचिरया शैल्या वैदिकवाङ्मयादारभ्य आधुनिकानां प्राच्य-पाश्चात्त्य-विद्वज्जनानां मतजातानि भृशमुदाहरन् रमणीयतया विरचितोऽयं ग्रन्थ इति ग्रन्थकर्तुः प्रतिभात्र चकास्ति। "नामूलं लिख्यते किञ्चिन्नानपेक्षितमुच्यते" इति मल्लिनाथीयं प्रतिज्ञावचनं ग्रन्थकारेणात्र चरितार्थतां नीतं दृश्यते।

अत्र ग्रन्थे त्रय एव अध्यायाः सन्ति। तत्रावादावुपोद्घाते पुरुषार्थेषु कामपुरुषार्थस्य महत्त्वमवश्यसेव्यत्वं च निरूपितमस्ति। ततश्च प्राचीनभारतीयपरम्परायां कामशास्त्रप्रणेतॄणां वात्स्यायन-कोक्क-पद्मश्रीज्योतिरीश-प्रौढदेवराज- कल्याणमल्ल- यशोधरवीरभद्रदेवादीनां संक्षेपेण परिचयो विहितः। एभिः यथाक्रमं कामसूत्र-रतिरहस्यनागरसर्वस्व- पञ्चसायक - रतितन्त्रप्रदीपिका- अनङ्गरङ्ग - जयमङ्गला (कामसूत्र-व्याख्या) कन्दर्पचूडामणीति ग्रन्थानां रचनाः कृताः। एतेषु ग्रन्थेषु कामशास्त्रीयाः सिद्धान्ताः विशदतयोपस्थापिता यतोऽधिकं कामचिन्तनम् आधुनिकेऽपि काले नान्यत्रोपलभ्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीयेऽध्याये रतितन्त्रमधिकृत्य जनेषु प्रसृतं भ्रान्तिज्ञानं सकारणं सविस्तरं च वर्णितमस्ति। रतिज्ञानं तु विनोपदेशं सिद्धमिति "स्वकान्तारमणोपाये को गुरुः मृगपक्षिणाम्" इति पूर्वपक्षमुपस्थाप्य "कामशास्त्रं विना भोगो येषां ते पशवो मता" इति सिद्धान्तितम्। कामस्तु धर्माविरुद्ध इति मतमुपस्थाप्य रतिचिन्तनं पापकरं 'नारी प्रत्यक्षराक्षसी' इति ये मन्यन्ते न ते तत्त्वद्रष्टार इति सुविशदं प्रतिपादितं श्रीमता हम्पिहोलिमहाभागेन।

तृतीयेऽध्याये कामविषयिणी भारतीयदृष्टिरनवद्या स्पृहणीयेति वैदिक-साहित्यमारभ्य साम्प्रतिकानां मतजातं मितेन सारेण वचसा विचारितं ग्रन्थ-कारेण। अन्ते च कामशास्त्राध्ययन प्रयोजनमष्टभिः कारणैः साधूपनिबद्धम्।

अद्यत्वे कामशिक्षाया अनिवार्यता विद्यते इति ग्रन्थकारः ब्रूते। अत्र विषये न कोऽपि विप्रतिपद्यते। परन्तु विवदमानविषयस्त्वत्र कस्तत्र प्रकारः को वा क्रमोऽस्य भवतु? के च तेऽध्याप्याः ? कस्मिन् वयसि ? समूहे वा एकान्ते वा ? शालापाठ्यक्रमत्वेन भवत्विति चेत् कस्यां कक्षायां कस्मिन् वा वर्यासि बालास्तत्रोपदेष्टव्याः? का वा स्यात्तत्र प्रायोगिको विधिः ? नैके एवंभूताः प्रश्नाः स्वतः प्रादुर्भवन्ति। परन्तु न कोऽपि तज्ज्ञोऽद्यापि विज्ञानसम्मतं मार्गं सुचिन्तितं सर्वजनानुमोदितमुपदेष्टुं पुरःसरति। न हि किं ज्ञेयं किमविज्ञेयं प्रामुख्यं भजतेऽद्य। अद्यत्वे तु 'कथं ज्ञेयम्' कथमुपदेश्यम् इति प्रश्नाः महत्त्वपूर्णाः सन्ति। तत्र योग्य-देश-काल-पात्र-परिवेशश्च विचारणीयो वर्त्तते। अत्र विषये ग्रन्थकारः मौनं भजते। मन्ये देश-काल-वयोऽवस्थादिभेदेन कामशास्त्रं बहुधा विभजनीयम्। तेन च लोकोपकारः स्यात्। अस्मिन् विषये श्रीहम्पिहोलि-महाभागः विचार्यास्मान् उपकुर्य्युरिति विश्वसिमि। अन्यथा सुरुचिकरोऽयं ग्रन्थोऽह्यश्यमध्येयम् सर्वैरिति म मतिः।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Manusmṛti and Woman ed. by Dr. K.B. Archak, Dharwad, 1998, Rs. 50/- pp. vii+xxxiv+60

संस्कृत-नाटकोत्सव-समिति, कुम्टा- (कर्णाटक)- क्षेत्रे अक्टोवरमासस्य २७-२९ दिनाङ्केषु (१९९५) "मनुस्मृतिः - स्त्री-शूद्र-ब्राह्मणाः" इति विषयमधिकृत्य किञ्चित् तथ्यानुसन्धानपरकं चर्चासत्र प्राचलत्। तस्मिन् चर्चासत्रे प्रस्तुतेषु २३ शोधप्रबन्धेषु अत्र शोधपत्राणि आङ्ग्लभाषया संकलय्य प्रकाशितानि श्रीमता के.बी. अर्चकमहाभागेन। प्राचीनस्मृतिशास्त्राणां विशिष्य मनुस्मृतेः प्रासङ्गिकता युगोपयोगिताऽद्यत्वे वर्तते न वेति विचारस्तद्विदां मनस्सु आगच्छत्येव। "यद्वै किञ्चन्मनुरवदत् तद्भेषजम् इति प्राचीनाः प्रतिपद्यन्ते। साम्प्रतिकास्तु 'मनुरेव मनुजानां वैषम्यविषदायकः'' इति मन्यन्ते। राजनेतारस्तु निर्वाचनयज्ञेषु मनुस्मृतेः हवनेन मताधिक्यप्राप्तिरूप- विजयमीहन्ते। अतः तथ्यात्मकतादृष्ट्या एतादृशं चर्चासत्रं महत्त्वं बिभर्ति।

तत्रादौ प्रास्ताविकं वक्तव्यं श्रीमता प्रो.डी.एन. शानभाग-महाभागेन प्रस्तुतोऽस्ति। स्वीये वक्तव्ये तथ्यान्यत्वविवेचनपटुतापूर्वकं श्रीशानभागमहोदयः मनुस्मृतेः युगोपयोगितां प्रदर्शयति। तत्र नैके विषयाः विचारितास्सन्ति। विद्वत्तायाः श्रैष्ठ्यं, परिवारनियोजनं, मृते राजनि (राजनेतरि) राष्ट्रियशोक-कालः, ग्रामस्वराज्यं, पर्यावरणसंरक्षणं, स्त्रीणां शीलभङ्गः, पति-पत्न्योः सामञ्जस्यम्, विद्यार्थिनामध्ययनविधिः, राज्यसीमानिर्धारणं, सीमारेखायाः पवित्रतासंरक्षणम्, संस्कृत- तदितरभाषासु व्यवहारदक्षता, राजनेतृणां जनतादर्शनम् (जनता-दरवार-इति प्रसिद्धं लोके) इत्यादि साम्प्रतिकलोक-राज्यव्यवहारविषया मनुस्मृतावुपलभ्यते इति श्री शानभाग-महाभागोऽभिप्रैति। वस्तुतः मनुस्मृतिः आचाराणां व्यवहाराणां च रत्नाकरः अस्ति। तत्रोच्यते "अन्त्यादपि परं धर्मम् अमित्रादपि सद्वृत्तं ग्राह्यम्'' (२/२३८-३९)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीये शोधप्रबन्धे डॉ महेशअङ्कोलि-महाभागः पूर्वप्रबन्धस्य विपरीतं मतं स्थापयितुमीहते "अद्यत्वे मनोरप्रासङ्गिकता" नाम्नि प्रबन्धे। स्त्री-शूद्र-ब्राह्मानधिकृत्य चर्चासत्रं प्रवृत्तमिति विषयानुकूलतां प्रदर्शयितुकामोऽसौ क्रमशः स्त्रीणां. शूद्राणां विषये मनोरुक्तिजातमुल्लिख्य तत्सर्वम् आधुनिक-समाजव्यवस्थाया अननुकूलमिति प्रतिपादयति। ब्राह्मणानां सर्वत्र वर्चस्वमपि नास्मै रोचते। वस्तुतः स्त्री-शूद्र- ब्राह्मणानधिकृत्य मनोरन्तर्विरोधोऽस्ति न वेति तथ्यपरकतया विचारयितव्यम्।

तृतीये प्रबन्धे डॉ.वी.के. हम्पिहोलिमहाभागः 'मनुमतेन वध्वाः योग्यता" इति विचारान् प्रस्तौति। रुचिकराः विचारा अत्र प्रस्तुताः सन्ति। वस्तुतः "प्रजनार्थं स्त्रियः सृष्टाः" इति मनोः राद्धान्तो नास्ति। सुस्थ-समाजव्यवस्थायाः संरचनार्थं सुस्थकुलस्य प्रतिष्ठापनार्थं च स्त्री अनतिसाधरणीं भूमिकां धत्ते। सुस्थे कुले समाजस्य स्वास्थ्यं प्रतितिष्ठति। कुलस्य मूलं तु स्त्रीएव। अतएव समाज- व्यवस्थाया मूलं स्त्रीति सम्यगुपपादयति श्री हम्पिहोलिमहोदयः। अतएव विवाहकाले वधोः योग्यता द्रष्टव्या जागरूकता चास्थेया इति तन्मतमादरणीयम्।

श्री नागराज बी-महाभागः मनुस्मृतौ वर्णितो विवाहोऽष्टविध इति विषये स्वीय-शोधपत्रं प्रस्तौति। ततश्च वी.आर. जोशीमहाभागस्य पति-पत्न्योः सम्बन्धः मनुवर्णितरीत्या प्रतिपादयति। कुमारी-शशिकला स्त्रीणां कर्त्तव्यं मनुस्मृत्युक्तदिशा विवृणोति। श्रीमती आर. लक्ष्मी महाभागा स्त्रीणां संरक्षणमधिकृत्य विवेचयति। अन्ते च श्रीमती सुमित्रा वी भट्ट-महाभागायाः स्त्रीधनम् अधिकृत्य प्रबन्धः रुचिकरोऽस्ति।

यद्यप्यत्र ग्रन्थे विषयाः आधुनिककालानुरूपाः सन्ति तथापि साकल्येन नायं ग्रन्थः समेषां विषयाणां तथ्यात्मकतां व्यक्तीकर्त्तुमलमिति मे मतिः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुभाषितम्, समयः सु-मयः कर्तव्यः, विराभ्यासः, चित्रकला, क्रीडाः, आरोग्य-भाग्यम्, जनसङ्ख्यावृद्धिः कुटुम्बकल्याणं च, वरदक्षिणा, परिसरमालिन्यम्, सङ्गणकयन्त्रम्, समूहमाध्यमानि, दूरदर्शनम्, आधुनिकसमाजस्योपरि चलच्चित्रस्य प्रभावः, कृतक उपग्रहः, भारतीया संस्कृतिः, सामाजिकाः कण्टकाः भ्रष्टाचारः, देशस्य अखण्डता तस्या विघ्नाश्च, साहितीकारः, प्रबन्धः तस्य रचना च, जानपदम्, भाषणकला, नाटकम्, नाटक निर्देशकः, भगवान् पाणिनिरित्येते सरलभाषया प्रणीता निबन्धा अत्र सङ्गृहीताः। बालानां कृते एतादृश ग्रन्थानां रचना संस्कृतभाषायाः समृद्ध्यै भविष्यतीत्यवश्यं विधेय एतादृशः प्रयासः।

उवाचकण्डुकल्याणः, प्रणेता - प्रमोदकुमारनायकः प्रका. लोकभाषाप्रचारसमितिः, १९९८, मू. ३०रु.

उवाच कण्डुककल्याणेऽस्मिन् ऊनत्रिंशद्हास्यकथाः सङ्गृहीताः। समाजस्य विविधसमस्यानामाश्रयेण प्रणीता एताः कथा नूनं संस्कृतगद्यसाहित्यो-दधौ कमप्यभिनवमुत्तालतरङ्गमुद्भावयिष्यन्तीति नाऽत्र कश्चन संशयः। शिक्षकसङ्ग्रामसमितिः, केलिकदम्बस्य ईस्पातशिल्पम्, क्रन्दति अनुनासिकः, कादम्बरीनिरोधिनीसमितिः, अहो राजधानी, हासयोगाणकार्यक्रमः, कविता-पाठोत्सवः, प्रगतिपथे, तृतीयनयनम्, श्रीकृष्णस्य दुर्गतिः, उवाच कण्डुकल्याणः, वाए डाडि वाए, प्रौढशिक्षाकेन्द्रम् उपाधिः,दुर्दशा देवगुरोः, नेत्रीरूपेण संस्थिता, अधिवेशनम्, बजेट, डङ्किप्रस्तावः, कीलकानन्दः, अथ च कृषकः, मिलितमन्त्रि-मण्डलम्, नाटकम्, प्रतियोगितालोकलीला, पुनर्नवीकरणम्, पशुपालननीतिः, साक्षात्कारः, वनभाषा इत्येतासु ऊनत्रिंशत्कथासु समकालिकसमस्यानामेव प्राधान्यं दृश्यते। कथाप्रणयनपटुत्वे कथाकारस्य भृशं प्रशंसितं लोकभाषाप्रचार-समितिमहासचिवेन सदानन्ददीक्षितेन -

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पश्यामः । विराम-प्रार्थना पत्रे (पृ.७-८) दिनाङ्क स्यानिवार्यतां प्रति रचयितुः पाठकानां च ध्यानाकर्षणं करोमि ।

सर्वथा स्पृहणीयोऽयमुपक्रमः । अनयारीत्या पत्रसाहित्यं वर्द्धन्ताम् । संस्कतभाषयैव पत्राणि लिख्यन्तां संस्कृतज्ञा इत्याशास्महे ।।

ग्रन्थसमीक्षणम् (२)

रमाकान्तपाण्डेयः

शब्दशास्त्रीयवृत्तिविमर्शः प्रणेता सम्पादकश्चआचार्यो रामप्रसादस्त्रिपाठी, प्रकाशकः - सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयः, वाराणसी, १९९७, मू. ७५रु

शब्दशास्त्रीयवृत्तिविमर्शो नाम सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य सम्मानिताचार्यैः श्रीमद्भीरामप्रसादत्रिपाठिचरणैः पण्डित प्रवरबदरीनाथ-शुक्लस्मृतौ प्रदत्तव्याख्यानानां सङ्ग्रहग्रन्थः । शाब्दबोधानुकूल-पदार्थ- ज्ञान-जनक-ज्ञान-विषया पदपदार्थसम्बन्धविशेषरूपा वृत्तिरिति स्वसिद्धान्तमुप-स्थापयन्तोऽङ्गीकुर्वन्ति तस्यास्त्रैविध्यं शक्तिर्लक्षणा व्यञ्जना चेति भेदात् शब्दतत्त्वविद इत्येतेष्वेव त्रिषु खण्डेषु ग्रन्थोऽयं विभक्तः । वृत्तेर्भाष्यानुसारि स्वरूपमेव ग्रन्थकृतोऽभिमतमिति न केवलं नैयायिकादीनां स्वसिद्धान्त - विरोधिनामपितु तदननुसारि-स्वप्रास्थानिकानां रत्नप्रभाकृदादिमतखण्डने दृश्यते दत्तावधानो ग्रन्थकारः । तथा हि -

"यत्तु लघुमञ्जूषाटीकायां रत्नप्रभायां वृत्तिपदव्यवहार्यत्वम्, पदपदार्थोभयनिरूपितसम्बन्धत्वं वा वृत्तित्वम्" इति वृत्तिलक्षणं प्रदर्शितम् । तत्तु न रोचयामहे --। यदि तु सकलपदपदार्थसाधारण एकजातीयः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्बन्धः, समवायस्तु सकलपदानामाकाश एव, न तु सर्वपदार्थे। कालिकोऽपि पदानाम् अनित्येष्वेवार्थेषु, न तु नित्येष्वित्युच्यते, तदा 'ओमिति ब्रूमहे' मदुक्त एव पर्यवसानात् (पृ:२-३)

वृत्तिज्ञानस्याऽन्यबोधे कारणत्वमुपपाद्य तार्किकाभिमततत्स्वरूपमपि निराकृतवन्तः पण्डितप्रवराः। तादात्म्यस्य शक्तित्वेऽपि न अग्न्यादिशब्देन मुखदाहापत्तिरिति स्वपक्षसाधनाय प्रतिष्ठापितोऽत्र दृढीयान् सिद्धान्तः - "आरोपाभेदघटितयोरेव शब्दार्थयोस्तादात्म्यस्य स्वीकारेण अदोषात्" (पृ.११)

लक्षणाविवेचनमिषेण द्वितीये खण्डे विरोधिमतं व्यक्कृत्य स्वसम्प्रदायानुसारि शक्यतावच्छेदकारोपरूपलक्षणेति लक्षणं समर्थितम् आचार्यचरणैः। ग्रन्थस्य तृतीय भागे व्यञ्जनावृत्तिर्विविचिता। अत्र आलङ्कारिकादिमतोपन्यासपूर्वकं नागेशादिस्वप्रास्थानिका भिमततत्स्वरूपविवेचने ग्रन्थकृतः प्रतिभाप्रसरस्तत्पाण्डित्यप्रकर्षश्च चरमां कोटिमाटीकेते।

दुरूहोऽपि विषय आचार्यचरणानाम् उपदेशवैशिष्ट्यात् भजते सारल्यम्। पण्डितप्रवरबदरीनाथशुक्लोपदिष्टवाच्यवाचकभावस्य यन्महत्त्वं प्रतिपादितमिह तन्नूनमद्यत्वेऽपि शास्त्रचिन्तनसातत्यद्योतनाय अलमिति शाब्दबोधविषयक सिद्धान्तानां सम्यग् ज्ञानाय ग्रन्थोऽयमवश्यमाश्रयणीयः सुधीभिरिति दिक्।

तण्डुलप्रस्थीयम् (दशाङ्कं नवीनं प्रकरणम्हिन्दीभाषानुवादसहितम्) प्रणेता कवी राधावल्लभस्त्रिपाठी, प्रका० प्रतिभाप्रकाशनम्, दिल्ली, १९९९।

तण्डुलप्रस्थीयं नाम प्रकरणमिदं नाट्यतत्त्वविद्भिश्श्रीमद्राधावल्लभ-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्रिपाठिभिर्मुनिकल्पाचार्यबच्चूलालावस्थिमुखाच्छ्रुतलोककथामुपजीव्य प्रणीतमिति स्वयमेवोक्तं कविना समर्पणसङ्केते ग्रन्थादौ -

"बच्चूलाल बुध त्वदीयवचनाल्लोकाश्रिता या कथा
सङ्क्षिप्ताऽपि मया श्रुता प्रकरणे सास्मिन् गृहीता मुदा।
विस्तारं गमिता यथामति चिरान्नाट्यात्मतां लभिता
सा त्वद्वस्तु तवैव हस्तकमले सप्रश्रयं चार्पये"।।

विदेहग्रामवास्तव्यो निरञ्जनाख्यो गोपाल इह नायकायते। नटीमुखात् प्रकरणसारोऽपीहोपस्थापितः कविना -

"अयं बालश्छित्त्वा मातृस्नेहबन्धनं, परित्यज्य ग्रामं गुरुकुलं यास्यति। अयं निरक्षरभट्टाचार्यः मुग्धमधुरवचनविन्यास-विचक्षणोऽधीत्य विद्वत्तल्लजः स्यात्, विद्यां च समापयेत्, तदा विद्योत्तमा काचनैनमूरीकुर्यात्। तदैव तु फलिष्यति नाट्यवल्लरी नः। (पृ.७)

विदेहग्रामाद् विद्याध्ययननार्थं प्रस्थितस्य गोपालस्य प्रणयपुरराजकुमार्या शारदयाऽधिमार्गं परिचयः प्रकरणान्ते तयोर्विवाहत्वेन फलति। निरञ्जनस्य प्रतिज्ञावाक्यत्वेन नाट्यसङ्घटनाऽत्र प्रथमाङ्क एव तिर्दिष्टा -

अधीत्य विद्यां सकलार्थदात्रीं
जलं विदेहेषु न चानयेयम्।
पित्रा यदि त्वां न च योजयेयं
निरञ्जनो नाऽस्मि पितुः सुपुत्रः।।६।।

कल्पनाप्रधानेऽप्यस्मिन् प्रकरणेऽतिशयोक्त्यादिराहित्यमवलोक्यते। गुरुशिष्ययोः पञ्चानननिरञ्जनयोः पारस्परिको व्यवहार एकलव्यकथां स्मारयति। गुरुपत्न्याः वटुत्वेन भोजनार्थं राजप्रासादगमनं हास्यमुत्पादयति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हिन्दीभाषायाः शब्दावलीनामनुवदने प्रयोगे च कविर्दृश्यते सफलः। यथा - "न मे अग्रतः कोऽपि, न मे पृष्ठतः कोऽपि (पृ.१३), किमावयोः शिरसोर्विद्यन्ते शृङ्गाः (तत्रैव), कर्तरीमिव जिह्वां चालयति (पृ.१७), पादौ ते त्रोटयिष्याभि (पृ.१८), सदा त्रिपात्रमनमेव कथं करोति। (पृ.२०), कुत्ना काकिणी (पृ.२३), उच्चैरारोपितोऽस्मि (तत्रैव), लवणमरिचमिश्रणपुरस्सरम् (पृ.२५,८७), वयं च पेषण्यां गोधूमा इव पिष्टा अनयोर्मध्ये, गुरुर्गुडायितः शर्करायितश्च शिष्यः (पृ.४०), सर्पोऽपि मृतो, यष्टिकापि न भग्ना (पृ.४२), नाहं ते गुरुर्न च त्वं मे शिष्यः (पृ.४४), एषा गता एषा चागता (पृ.४६), गालिं किमर्थं ददासि मह्यं श्यालक (५३), चक्षुषी ते स्तः काचगोलकद्वयं वा" (तत्रैव)।

एवं संस्कृते आधुनिकप्रयोगाणां सम्भावनाविष्कारेऽपि कवेस्त्रिपाठिनः प्रयोगाणामेतेषामवदानं स्वीकरणीयमेव। क्वचित् भासादीनां पूर्वकवीनां वचनस्वारस्यमपीह, दृष्टिपथमवतरति- "कर्णकटुभिर्विरावैः शून्यमिदं परिसरं ग्रामीकुर्वन्ति (पृ.१२), अधीतिबोधाचरणप्रचारणैः (पृ.२२), चक्रनेमिक्रमेण नीचैरुपरि च यान्ति (पृ.२६),

प्रकरणे हास्यात्पादनाय क्वचित् शास्त्रीयविषया अपि स्वीकृताः। दृश्यादिविधाने च कवेस्त्रिपाठिनो प्रतिभाप्रकर्षः श्लापनीयः। आधुनिकमपि तण्डुलप्रस्थीयं नाम प्रकरणमिदं संस्कृतसाहित्यस्य नाट्यरचनापरम्परा - मग्रेसारयितुम् अलम्।

यद्यपि लोककथाश्रितमिदं दशाङ्कं प्रकरणं, परन्तु कवेः प्रतिभा अत्र प्रतीकात्मकतया विश्रान्तानतिगभीरानर्थान् प्रतिभया स्फोरयति। नान्दीपद्य एव "अलक्षितो निरञ्जनो" विषयीकृतः। निर्गुण सम्प्रदायेऽयमेव भाषायाम् "अलख निरञ्जन" इति व्यपदिश्यते। स एवात्र नायकः। तस्य च जनको

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्तते व्योमकेशो जननी च धारिणी। शारदा इह नायिका। प्रज्ञा धृति-मति-स्मृतयः सन्ति नायिकायाः सख्यः। इत्थमलंक्षितो निरञ्जनः प्रज्ञादिसखीसहितया शारदया सङ्गच्छते। सर्वथा कथावस्तुनिर्वाहोऽत्र प्रबन्धे गम्भीरं च सूक्ष्मं च तथैव भौतिकं च स्थूलं च धरातलं युगपदाविष्करोतीति दिक्।

उपाख्यानमालिका, प्रणेता सम्पादकश्च- राधावल्लभः, प्रका. प्रतिभा प्रकाशनम्, दिल्ली, १९९९

उपाख्यानमालिका नाम कविराधावल्लभप्रणीतचतुर्णामुपाख्यानानां सङ्ग्रहग्रन्थः। प्रथमे विचित्रोपाख्याने मिनीजरद्गवयोः कथा वर्णिता कविनेति मिन्या विचित्रतयैवोपख्यानस्यास्यैतादृशी संज्ञा। यथा चोक्तं कविना -

"विचित्रैवासीदियं मिनीर्नाम कन्या। वस्तुतस्तु तस्या विचित्रमाचरण-मेवाऽत्र विचित्रोपाख्यानमित्यस्याः संज्ञाया हेतुः" (पृ.७).।

द्वितीये मायाविन्युपाख्याने वर्णिता काचिद् मायाविनी। अभिनवशाकुन्तले गुरुकुलप्रबन्धकस्य साधुशरणसिंहस्य दुहिता शकुन्तला भजते कथाविषयत्वं मदनदहने च कामारिः शिवः। सूत एव यद्यपीह वक्ता तथापि विषयानुरूप-परिवर्तनं तस्मिन् विहितं कविना। अभिनवशब्दावलीनां निर्माणेऽपि कविर्भजते वैशिष्ट्यम्। यावन्ति मुखानि तावन्त्यो वार्ताः (पृ.४). टिमटिमायिताः (पृ.७), तारणहारः (पृ.९). चर्मपुटम् (पृ.१०), गन्त्री जीवनस्याग्रे ससार (पृ.१६), अतिथिरस्म्यहं केषाञ्चिदेव दिनानामस्मिन् जगति (पृ.१७). इत्येतादृशाः प्रयोगा भाषायाः प्रगतिं सूचयन्ति। कल्पनाप्रधानोऽपि सङ्ग्रहोऽयं युगानुरूपतां न जहाति। क्वचित् कादम्बर्यादीनां प्रभावोऽपि स्पष्टं लक्ष्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वस्तुत उपाख्यानामालिकेयं कवेस्त्रिपाठिनः साहित्यसाधनायाः कश्चन अभिनव एव परिणामः । येन संस्कृतगद्यरचनापरम्परा कस्यामपि नूत्नभावभूमौ प्रापितेति सहृदयैरवश्यं सेवनीयोऽयं सङ्ग्रहः । सर्वेषूपाख्यानेषु प्रतीकात्मकता नूतन संविधानं रोचकता च लसन्ति। संस्कृत गद्यसाहित्यविकासज्ञानाय भूमिः काचन निर्मिता ग्रन्थेऽस्मिन्निति दिक् ।

संस्कृतसाहित्य बीसवीं शताब्दी, प्रणेता सम्पादकश्च- स एव, प्रका. राष्ट्रिय संस्कृत संस्थानम् दिल्ली, १९९९।

यथा संस्कृतसाहित्यसर्जनाक्षेत्रे तथैव तत्समीक्षायामपि भजन्तेऽन्यतमत्वं राधावल्लभत्रिपाठिन इति विश्रुतमेव। संस्कृतसाहित्य - बीसवीं शताब्दीत्यस्मिन् राष्ट्रभाषोपनिबद्धेऽभिनवग्रन्थे तैर्विंशतिशतकोद्भवाः कवयस्तेषां कृतयश्च समीक्षिताः ।

विषयावतरणत्वेन कल्पिते प्रथमाध्याये साम्प्रतिकसंस्कृतसाहित्यस्य प्रगतिं प्रसमीक्ष्य ग्रन्थकारो द्वितीयाध्याये तस्योपलब्धीनां चर्चां कृतवान् । म. म. रामावतारशर्मा-भट्टमथुरानाथ-क्षमाराव-महालिङ्गशास्त्रि-दत्तदिनेशचन्द्र-वेङ्कटराघवसदृशसंस्कृतकविधुरीणानामथ च नागार्जुनाद्यप्रसिद्धकवीनां जीवनवृत्तादिसहितं कृतिसमीक्षणमिहोपलभ्यते । तृतीये संस्कृतपत्रिकाणां विवरणं संस्कृतसाहित्यस्याभ्युन्नतिजिज्ञासूनां साहाय्यार्थं दत्तम्। ग्रन्थस्य प्राणकल्पौ चतुर्थपञ्चमाध्यायौ समीक्षकप्रवराणां श्रीमदाधावल्लभत्रिपाठिनां समीक्षण-नैपुण्यस्य द्योतकौ। "समकालीन संस्कृतसाहित्य : चुनौतियां, समस्याएँ और सम्भावनाएँ " इत्याख्ये चतुर्थाध्याये संस्कृत रचनाकृतां विविधसमस्या अवलोक्य वक्ति समीक्षकः-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"आज जो संवेदनशील और दृष्टिसम्पन्न रचनाकार संस्कृत में लिख रहे हैं, उनकी रचनाप्रक्रिया में अटकाव या चुनौतियाँ निम्नलिखित स्वरों पर आ सकती हैं -

१. संस्कृतभाषा की पदावली और अभिव्यक्तियों से जुड़ा हुआ मिथकीय परिवेश
२. इस परिवेश का आधुनिक युगबोध, नये वातावरण से असंश्लेष तथा
३. इस असंश्लेष के कारण रचना में आधुनिकता और समकालीनता का क्षरण'' (पृ.१९०-९१)

संस्कृतस्य परिनिष्ठित स्वरूपेऽपि साम्प्रतिकानां कृते काश्चन समस्या: सन्तीति तद्दृष्ट्वा कथयति समीक्षक: -

"संस्कृत व्याकरण का अत्यन्त परिनिष्ठित व वैज्ञानिक रूप भी अपने आप में रचनाकार के लिए एक चुनौती है। (पृ.१९१)

एवं साहित्यसर्जनस्य विविधपक्षानवगाहमान: समीक्षक: पञ्चमेऽध्याये तस्य नूत्नप्रतिमानान्यपि विशदीकरोति। अत्र बच्चूलाल - केशवचन्द्रदाश राधावल्लभादिप्रसिद्धकवीनां काव्यसौन्दर्यस्य चर्चा कृता।

आधुनिकसंस्कृतसाहित्यस्य भूमिकारूपेण प्रणीतोऽयं ग्रन्थो यद्यपि साहित्यस्य विविधान् पक्षान् पुरस्करोति तथापि गद्यसाहित्यस्य स्वल्प एव नाट्यसाहित्यस्य चात्यल्प: परिचय इह लभ्यते। ग्रन्थकारस्तस्यामपि दिशि दत्तावधानो भविष्यतीति सत्यम्। किन्तु नहि केनाप्येकेन कापि परम्परा निर्मातुं शक्यत इति मनीषिभिरन्यैरपि तथा प्रयासो विधेय इति शम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुधीजनवृत्तम्, प्रणेता - कलानाथः शास्त्री, प्रका. रचनाप्रकाशनम्, जयपुरम्, १९९९

सुधीजनवृत्तं नाम देवर्षिणा कलानाथशास्त्रिणा प्रणीतो राजस्थानोद्भवानां संस्कृतविदुषां जीवनवृत्तादि विषयको ग्रन्थः। अत्र मधुसूदनमैथिल - दुर्गाप्रसादद्विवेद -दुर्गाप्रसादशर्म- गिरिधशर्मचतुर्वेद- भट्टमथुरानाथ - गिरिधरशर्म - नित्यानन्दशास्त्रि - रामधारीशास्त्रि - विद्याधरशास्त्रि - गिरिधरलालशास्त्रि-- गणेशरामशर्म - निरञ्जनदेवतीर्थ - नवलकिशोरकाङ्कर-प्रभृतित्रयोदशमनीषिणां जीवनवृत्तं विस्तरेण वर्णयामास ग्रन्थकारः। बलदेवोपाध्यायप्रणीते ''काशी की पाण्डित्य परम्परेत्याख्ये हिन्दीग्रन्थेऽपि एतेषु केषाञ्चित् परिचयो दत्तस्तथापि तेषां कृतित्वस्य विवेचने ग्रन्थकृतोऽस्य वैशिष्ट्यं स्वीकरणीयमेवेति विबुधानां राजस्थानोदभवानां गुरुपरम्परादिज्ञानाय विदुषां विविदिषूणां च सममेवोपकारकोऽयं ग्रन्थः।

प्रबन्धसौधः, प्रणेता- एस.जगन्नाथः, प्रका.- सुरभारतीप्रकाशनम्, बेङ्गलूरु, १९९९, मू. ३० रु.

प्रबन्धसौधोऽयं प्रबन्धपल्लवनाम्ना पूर्वं प्रकाशितस्य निबन्धग्रन्थस्यैव परिष्कृतं स्वरूपम्। बालानामुपकारका अत्र पञ्चाशन्निबन्धा निबद्धाः। भाषा, पुस्तकम्, पठनम्, ग्रन्थालयः, वनम्, दरिद्रता, सज्जनाः, मम उत्तमं मित्रम्, सत्यस्य महिमा, समुदाचारः, अतिथीनां धर्मः, पक्षिणः, मम शाला, उन्नतः शिक्षकः, शालाया वार्षिकोत्सवः, मम गृहम्, मम देशः, जननी जन्मभूमिश्च स्वर्गादपि गरीयसी, कृषीवलः, कुम्भकारस्य आत्मवृत्तम्, विपणिः, आदर्शः नागरकः, भिक्षुकः, जीवने हास्यस्य पात्रम्, प्रयत्नः, रत्नप्रायं वचनम् अथवा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पत्रसौधः (संस्कृतस्य आदर्शपत्राणि), एस. जगन्नाथ विरचितः प्र. सुरभारती प्रकाशनम्। बेंगलुरु, ५६००८५, १०,०,०,, पृ. ९६ मूल्यम् ३० रूप्यकाणि।

पत्रप्राप्तिः कस्य वा नो जनयेत् तृप्तिम्। प्रातः वृत्तपत्रदर्शनं विना मध्याह्ने तु पत्रदर्शनं विना दिनं तद्विपर्यस्तमिव भवति। भवति च सुखितोऽपि जन्तुः दुःखी। पत्रं तु मित्रं समेषाम्। सुखवार्त्ताविधावुत्साहयत्येतत्, दुःखवार्त्ता-विधावपि शमयति चित्तम्। किन्तु हन्त ! गीर्वाणवाण्यां पत्रलेखनपरम्परा निरन्तरं हीयमाना दृश्यते। पत्रलेखने कापि विशिष्टा रीतिः शैली वानुसर्त्तव्या भवति। तया विना पत्रं न स्पृहणीयशोभि भवति। अतएव पत्रलेखन-शैली-विज्ञान- परकमिदं पुस्तकं बालकानां पत्रं संस्कृते लिलिखिषूणां चोपकाराय स्यादिति धिया ग्रन्थकारेण विरचितोऽयं पत्रसौधः।

अत्र रचयिता तत्रादावुपक्रमे पत्राणां महत्त्वं, तल्लेखने ज्ञातव्याः ध्यातव्याश्चांशाः संक्षेपेण प्रस्तुताः सन्ति। ततः परं वैयक्तिकानि पत्राणि, व्यावहारिकाणि पत्राणि इति पत्राणां द्विधा विभजनं कृत्वात्र ततश्च चतुस्त्रिंशत् (३४) व्यावहारिकाणां पत्राणां निदर्शनं प्रस्तुतमस्ति। आधुनिक-शैल्या इतरभाषासु विरच्यमानानां पत्राणां पद्धतिमनुसृत्य सरलसंस्कृतभाषया पत्राण्यत्र प्रस्तुतानि।

तत्र भाषायां कन्नड-प्रभावः क्वचिद् उपलक्ष्यते। क्वचिच्च तत्र तत्र नूतनं पदजातं कल्पितमस्ति। तत्र तत्र कन्नडभाषया (लिप्या च) आङ्ग्लभाषाया वा प्रतिपदं दत्तमस्ति। यद्यपि अद्यत्वे केचन शब्दाः 'संगणकयन्त्रम्' इत्येवरूपाः कल्पयितव्या भवन्ति तथापि सन्ति केचन शब्दाः व्यवहृतपूर्वाः प्रसिद्धाश्च संस्कृतसाहित्ये, तान्यननुनिशम्य सदृश अन्यादृश-पर-कल्पने मानं तु न

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"हास्यरसाप्लुतसंस्कृतवाङ्मये एतादृश्य: कथास्तु सुतरां विरला:। .. यावदर्वाचीनसंस्कृतसाहित्यस्य धारां जानामि तत्र श्री प्रमोदकुमारनायकस्य अयं प्रयास: संस्कृतसाहित्यजगति प्रथम:''।

सरलयाभाषयोपनिबद्धा इमा: कथा: न केवलं संस्कृतभाषाविदां कृते प्रणीता अपितु स्वल्पज्ञोऽपि संस्कृतभाषावेत्ता नायकस्य प्रमोदकुमारस्य कथाभावानवगन्तुं शक्नोति। युगानुरूपताऽपीह लक्ष्यते पदे पदे। अतश्च भृशं प्रशंसिता इमा: कथा: सदानन्ददीक्षितेन -

"एतासु कथासु विद्यमानानि चरित्राणि वर्तमानसमाजस्य वास्तविकं रूपम् उद्धाटयन्ति। व्यङ्ग्यरूपेण समस्या: प्रतिपादयन्ति। समस्या-समाधानस्य उपायान् च सूचयन्ति। अतो विश्वसिमि समाजसंस्कारार्थं क्रियमाण: प्रयास: अनेन हास्यव्यङ्ग्यसाहित्येन सफलो भविष्यति।

श्री प्रमोदकुमारनायकस्य कथासङ्ग्रहोऽयं संस्कृतभाषाया: प्रचाराय अपेक्षित: कश्चन अभिनवो मार्ग इति दिक्।

गर्त्त:, प्रणेता - स एव, प्रका. सा एव।

गर्तो नाम चतु:पञ्चाशन्मुक्तकानां सङ्ग्रह:। विविधविषयाश्रयेण प्रणीतानीमानि लघुकाव्यानि मानवजाते: स्वभाविकी सुखप्राप्तिप्रवृत्तिं पुरस्कुर्वन्ति। कविर्नायकोऽत्र संस्कृतसाहित्येऽस्पृष्टां कामप्यभिनवां भावभूमिम-न्वेष्टुं यतते -

मनुष्यस्य संज्ञा
मानवीय चिन्ता
आत्मचेतना, अथ विवेचना

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुलभा: कोटिसङ्ख्याका देवा:
अवतारपुरुषा ईश्वरा:
किन्तु
दुर्लभ: एक एव मनुष्य: (पृ.७)

व्यङ्ग्यचारुत्वमपि क्वचिन्मनोहारि -

मदिरालय परिसरे यस्या: चर्चा
चलच्चित्रगृहफलके
यस्या अङ्गदर्शनम्
प्रचारनिमित्तं या माध्यमरूपा
यौतुकं विनां प्रज्ज्वाल्यते या
शास्त्रे शक्तिमयी वन्दनीया सा। (पृ.५१)

सर्वेष्वपि मुक्तकेषु श्रीमतो नायकस्य वचोविन्यासमाधुरी सयहृदयानुरञ्जिनी। गर्त्तेनानेन संस्कृतसाहित्यजगति काचन नूतनभावधारा आविर्भविष्यतीति नो विश्वास:।

सङ्क्रमणम्, प्रणेता - चमू कृष्ण शास्त्री, प्रका.- संस्कृतभारती, बेङ्गलरु:, १९९८, मू.१५रु

सम्भाषणसन्देशे प्रकाशितपूर्वा. सप्तनिबन्धा: सङ्क्रमणेऽस्मिन् सङ्गृहीता:। संस्कृतज्ञानाम् आङ्ग्लभाषालोलुपता स्वभाषाप्रेम्णो न्यूनता च प्रायशो निबन्धानामेतेषां वर्ण्यविषयतां भजेते। संस्कृतपठनपाठनस्याऽपि काचन दिगुन्मीलितेह चमूकृष्णशास्त्रिणेति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपघातः अवधानं च, प्रणेता - म.पा. बावले, नलिनीबावले, प्रका.- तारा ल. जाम्भोरकर, ताराकान्तप्रकाशनम्, ६६ अध्यापकवसाहत, सहकारनगरम्, नं. १, पुणे- ९, १९९० मू. ६० रु.

द्वयोर्भागयोर्विभक्तोऽयम् "अपघातः अवधानं च" इत्याख्यो ग्रन्थो लेखकाभ्यां पीडितानां प्रथमोपचारनिर्देशार्थं प्रणीतः। लेखिका नलिनीमधुकरबावले स्वयमपि बहुषु चिकित्सालयेषु कार्यं कृतवतीति तस्या अनुभवा आपत्कालिक-प्रथमोपचारायावश्यं लाभप्रदाः स्युः। शरीररचना कार्यं चेति ग्रन्थस्य प्रथमभागे "अस्थिसंस्था, सन्धिः, स्नायुः, त्वचा, हृदयं रक्ताभिसरणं च, श्वसनसंस्था, पचनसंस्था, उत्सर्जनसंस्था, जननसंस्था, ज्ञानसंस्था, मज्जासंस्था, द्वितीये च "विषयबाधा, दंशः, दंशकण्टकः, आगन्तुकवस्तु, भर्जनम् आर्द्रदाहश्च, विद्युत्प्रवाहनिमित्तकः, अपघातः, सूर्यस्नानेन भर्जनम्, हिक्का, गात्रस्तम्भः, वान्तिः, शीताघातः, श्वासस्तम्भः, आकस्मिकं जननम्, व्रणः, स्नायूनाम् अपघाताः, मूर्च्छा, विसंज्ञा, अवसादः, रक्तस्रावः, त्रुटितः अवयवः, अस्थिभङ्गः, बन्धपट्टिका, कृत्रिमश्वसनपद्धतिः, मस्तकाघातः, अर्शः, बलात्कारः, उपान्त्यसंस्कार" इत्येते विषयाश्चर्चिताः। विविधप्रयोगविधीनामत्र सभ्यविवेचनं कृतमिति संस्कृतज्ञैरवश्यमङ्गीकरणीयोऽयं ग्रन्थः।

न्यायशास्त्रानुशीलनम्, प्रणेता प्रकाशकश्च किशोरनाथो झाः, गङ्गानाथझाः केन्द्रीयसंस्कृतविद्यापीठम्, चन्द्रशेखर आजाद पार्क, इलाहाबाद, १९९८, मू. १००रु

न्यायशास्त्रानुशीलनं नाम पण्डितप्रवरकिशोरनाथझामहोदयेन ग्रथितानां पञ्चदशशोधनिबन्धानां सङ्ग्रहग्रन्थः। अनन्तलालठाकुरमहाशयानां शुभाशंसनेन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सनाथितेऽस्मिन् ग्रन्थे न्यायशास्त्रीविविधविषया विवेचिता ग्रन्थकृता। केषाञ्चिदप्रसिद्धाचार्याणां मतान्यपि महता श्रमेण सङ्कलय्येहोपस्थापितानीति न केवलं ग्रन्थोऽयं तत्तद्विषयाणामाविष्कारेऽपितु तत्तदाचार्याणां विचारविन्यासेऽपि प्रभवतीति सर्वथाऽभिनन्दनीयो ग्रन्थकारः। त्रिलोचनाचार्यानिरुद्धाचार्यादिन्याय-शास्त्रोपस्थापकानां मतसङ्कलने कियान् श्रमो विहितः श्रीमता किशोरनाथेनेति तु ग्रन्थाध्ययनेन विना ज्ञातुं नैव शक्यते।

न्यायशास्त्राभिमतप्रत्यक्षप्रमाणस्वरूपविवेचने सम्प्रदायग्रन्थानां यो हि प्रमाणव्यूहोऽत्र रचितस्तत्तु किशोरनाथसदृशविद्याव्यसनिनां कृते एव सुकरम्। न केवलं प्राचीनन्यायपरम्पराव्याख्याने नव्यन्यायपरम्पराव्याख्यानेऽपि ग्रन्थकृतोऽनुसन्धानपटुत्वं व्यज्यते।

कुसुमाञ्जलौ प्राचीनाचार्यप्रभावं निरूपयन् ग्रन्थकारो वक्ति-

"उदयनस्तु कुसुमाञ्जलौ प्राचीननैयायिकोद्भावितयुक्तीनां नवीनदृष्टान्तादिप्रदर्शनपूर्वकं विशदव्याख्यां विधाय प्रतिष्ठामुपार्जितवान्। अत एव निपुणगवेषणया दृढं वक्तुं शक्नोति कश्चित् यदयं न्यायसम्मतयुक्तीनां सङ्ग्राहक एवासीन्न तु मौलिकयुक्त्युद्भावकः। (पृ.१९)

शास्त्रीयतत्त्वविवेचने ग्रन्थकृतः पाण्डित्यप्रकर्षोऽत्रावलोक्यते। धर्मदत्तझामहाभागस्य गूढार्थतत्त्वालोकसदृशोऽपि ग्रन्थइह समीक्षित इति प्राचीनार्वाचीनयोरुभयोरपि न्यायमार्गयोर्विवेचनमिह कृतमिति किशोरनाथझा-महाभागानां कृतिरियमवश्यमादतरणीया विद्वद्भिरिति दिक्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्यामानन्दरचनावलिः, सम्पादकः - किशोरनाथो झाः, प्रका.- अखियासलप्रकाशनम्, लालगञ्ज, सरिसबपाही, जिला- मधुबनी, १९९६, मू. ५३ रु.

सम्पादकेन किशोरनाथझामहाशयेन श्यामानन्दझामहाभागानां षड्रचना ग्रन्थेऽस्मिन् सङ्गृहीताः। आचार्यगोविन्दचन्द्रपाण्डेयसदृशोऽपि महामनीषी ग्रन्थममुं प्रशंसन्नाह -

"भर्तृहरिप्रणीतमहाकविनिदर्शितामालङ्कारिकसम्मतां चिरन्तनवागर्थ-प्रतिपत्तिमनुसरतां तेषां श्रुतिसुभगानि चमत्काररमणीयानि पद्यानि नूनं हरिष्यन्ति प्रसभं सहृदयानां मनांसीति मन्ये''।

षड्रचनास्वेतासु कर्णिका, मधुवीथी, वेदना, सुधावल्ली, विडम्बना चेति पद्यकाव्यानि सन्ति। मनोरथश्चोपन्यासः गद्यबन्धेऽपि कवेरनितर-साधारणत्वं प्रतिपादयति। स्वल्पे वयसि महारोगाक्रान्तोऽयं कविः सरस्वतीमनुस्मरन् सहृदयहृदि कारुण्यमुत्पादयति -

गर्वोऽयं किमु मे मृषा यदधुना स्योदेकदेश बुधः।
शास्त्रे नाखिल एव कोविदगुरुश्चेत्तादृशः शारदे ! ।।
नो निर्माणकलाग्रणीः स च भवेन्नैव प्रवक्ता तथा।
चेद् भाषासु न मार्मिको मम समस्तन्मां कथं नेक्षसे।।
नूनं भारति ! रोगदेवकृपया नामैकशिष्टोऽस्म्यहं।
प्रायो मादृगशेषशास्त्रकुशलः प्रान्तीयभाषाबुधः ।।
निर्माणैकविचक्षणः सदसि वाक्पीयूषरत्नाकरो।
नो कश्चिद् भवितातिथिस्तदसमं मां नो कथं त्रायसे।।

(विडम्बनायाम् ५०-५१)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कर्णिकायां तु भर्तृहरिवचनावलीनामास्वाद: प्राप्तुं शक्यते सहृदयै: । अमरुकवचनविलासोऽपीह क्वचिन्मनोहरति -

निपीड्य गात्राण्यधरं विखण्ड्य
नखक्षतानि स्तनयोर्विधाय ।
तथाप्यतृप्तं किमकारि तेन
सख्यो न जानामि कथं वदानि ।।४१।।

शतकस्यास्य पूर्वार्द्धे प्रणीतानां ग्रन्थानामेतेषां सम्पादनं विधाय नूनमुपकृतवान् साहित्य संसारं किशोरनाथझामहाभागोऽन्यथा महाकविरमय-परिचित एव तिष्ठेदिति अभिनन्दनार्होऽयं प्रयास: सम्पादकस्य ।

कैकेयीविजयम्, प्रणेता - रामजी उपाध्याय:, प्रका.- चौखम्भासुरभारती प्रकाशनम्, वाराणसी, १९९९, मू. ५० रु. ।

कैकेयीविजयं नाम उपाध्यायरामजीप्रणीतं लघुनाटकम् । पञ्चाङ्केस्मिन् नाटके कैकेय्या निर्दोषमुदारचरितं वर्णितं कविना पौराणिकाख्यानानामुपजीव्यत-येति कैकेयीचरितस्य कश्चन अविज्ञातपक्षो ग्रन्थेनानेन नाट्यविधिनोपस्थाप्यते मनीषिणामन्वक्षम् । ग्रन्थस्य आमुखे स्वपक्षसाधनाय कथ्यस्य विस्ताराय च तत्तत्पौराणिकोपाख्यानानां कैकेयीचरितसम्बन्धिनां चर्चा कृता । एवं ग्रन्थोऽयं कैकेयीकथाविवेचकोऽन्यतम: प्रबन्ध: ।

कैकेय्या निर्दोषत्वप्रतिपिपादयिषया नाट्यस्य प्रस्तावनायामेव सूत्रधारमुखाद् ब्रूते कवि: -

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"अथ दण्डकारण्ये पुरा रावणादिराक्षसैरुद्वेजितानां देवर्षीणां परित्राणाय ब्रह्मा विष्णुभूतं रामं तत्र प्रेषितुकामो बभूव ... एतदर्थं स मन्थराया दौत्येन राजपत्नीं कैकेयीं समादिशत्।

ब्रह्मणः प्रेरणयैव कैकेयी रामं वनं प्रेषयितुं प्रवृत्ता बभूवेति तस्या निर्दुष्टत्वमेव ग्रन्थकृता प्रत्यपादि। नाटकीयसङ्घटनानां संयोजनेऽपीह कविर्विशिष्यते। दृश्यादिविधाने भरतं प्रमाणतयाऽङ्गीकरोति श्रीमानुपाध्यायः। कैकेय्याश्चरिते यादृगौदार्यमिह निवेशितं तन्नूनं ग्रन्थकृतः प्राचीनर्वाचीन-साहित्यानुशीलनश्रमं द्योतयति। संस्कृतसाहित्ये प्रथमवीराङ्गनारूपेण प्रतिष्ठापितेयं कविना। राष्ट्ररक्षायै तया नैकानि कार्याणि सम्पादितानीति सर्वं तल्लघुनाटकेऽस्मिन् वर्णितम्। तस्या राष्ट्रचिन्तापरिज्ञानाय काश्चन पङ्क्तयोत्रोदाह्रियन्ते -

"राजभवने महाराजस्य पत्नीभूताया मे कार्यभारोऽतिमात्रः सञ्जातः। महादेव्या कौसल्यया, महाराजेन च न केवलमन्तपुरीयाणि, अपि च राजधान्या जनपदानां परराष्ट्राणां च कार्याणि मयि न्यस्तानि। स्वपुत्रस्य भरतस्य विनयार्थमवकाशो मे नासीत्। प्रशिक्षणार्थं स मामकगृहे मया प्रतिष्ठापितः सम्प्रति उत्तरस्मिन् भारते स्थितिः प्रशान्ता वर्तते, किन्तु दक्षिणभारतस्य प्रजाप्रवृत्तिश्चिन्तां जनयति। तत्रत्या ऋषयो राक्षसानामुपद्रवैरभिभूतास्तत्प्रदेशं परित्यक्तुं विवशीकृता एवेति ततः समागतेन ऋषिप्रतिनिधिमण्डलेन सूचिताऽस्मि। दण्डकारण्ये शान्तिं स्थापयितुं सैनिकाभियानं नियोजनीयमुताहो राजकुमारः कश्चित् प्रेषणीय इति मन्त्रिमण्डलेन निर्णय आवश्यकः।" (पृ.-१५)

कैकेयीविजयप्रणेत्रा सम्यगवगाह्य रामायणदिग्रन्थान् देव्याः कैकेय्या निर्दुष्टचरितं महता श्रमेणोपस्थापितं ग्रन्थेऽस्मिन्निति सर्वथाऽभिनन्दनीयोऽयं ज्येष्ठो वरिष्ठः कविर्मनीषी।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतनाट्यवल्लरी, प्रणेता- कलानाथः शास्त्री, प्रका.- हंसा प्रकाशनम्, जयपुरम्, १९९७, मू. २० रु.

देवर्षिणा कलानाथशास्त्रिणा प्रणीतानि अष्टौ रूपकाणि ग्रन्थेऽस्मिन् सङ्गृहीतानि। प्रथमे नाट्यशास्त्रावताराख्ये ध्वनिरूपके नाट्यशास्त्रस्य प्रथमाङ्कमुपजीव्य शास्त्रस्यास्यावतरणकथा वर्णिता। द्वितीये च महाभिनिष्क्रमणमिति नाम्नि रूपके सिद्धार्थस्य गृहत्यागकथोपन्यस्ता। प्रणयसन्देशश्च तृतीयं रूपकं श्रीमद्भागवतमहापुराणस्य रुक्मिणीकथाया नाट्य रूपम्। पृथ्वीराजविजये पृथ्वीराजजयचन्दयोरैतिहासिकी कथा ललितभाविन्यासेन नाट्यविषयीकृता। प्रतापसिंहीयमित्यस्मिन् ध्वनिरूपके महाराणाप्रतापसिंहस्य जीवनं चित्रितम्। धर्मस्य तत्त्वं निहितं गुहायामित्यस्मिन् रेडियोरूपके सामाजिकरूढीनां निपुणं चित्रणं व्यधायि। कविताया मूल्यमिति रूपकं तु महाकवेर्भारवेः जीवनवृत्तं पुरस्करोति। प्रियदर्शिका हर्षप्रणीतनाटिकाया एव रेडियोरूपान्तरणम्।

नाट्यानां वस्तु सर्वथा प्रभावोत्पादकम्। भावगुम्फनमपि कवेर्मनोहारि। ध्वनिरूपकेष्वप्येतेषु नायकगुणरक्षणं दृश्यते । क्वचिन्मूलकथासु परिवर्तनमपि विहितम्। महाभिनिष्क्रमणे रात्रिचित्रवर्णने कवे रचनाचतुरी विशिष्यते -

अहो शून्यता राजप्रसादस्य। सर्वा अपि परिचारिकाः शयानाः सन्ति। इयम् अनङ्गलतिका अनया अद्य रुचिरं दीर्घिकानृत्यं सम्पादितम्। अधुना इयं मदविह्वला स्वपिति -- (पृ.१३)

दृश्यविधानापेक्षया रेडियोरूपकेषु ध्वनिविधानस्यैव भवति प्राधान्यम्। तथात्वे च कविरिह सर्वथा सफलः। संस्कृतनाट्यवल्लीयं संस्कृतनाट्यसाहित्य-जगति कामप्यभिनवां विच्छित्तिं संयोजतीति दृढतरोऽयं विश्वासोऽस्माकम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आनन्दनन्दिनी, प्रणेता - मूलम्पल्लिच्चन्द्रशेखरशर्मा, प्रका.- ग्रन्थकर्ता, १९९९, मू. १५० रु.

आनन्दनन्दिनी नामेदं मातृस्तुतिकाव्यं संस्कृतसाहित्यस्य स्तोत्ररचनाधारायामभिनवप्रयोगस्य कश्चन प्रयासः। यद्यपि शङ्कराचार्यादिभिर्देव्यपराधक्षमापनस्तोत्रादौ मातृस्तुतिर्विहिता तथापि कविरयं मातरि कामप्यलौकिकीमपूर्वां च विच्छित्तिं पश्यति। पञ्चविंशत्युत्तरशतसङ्ख्याकेषु ललितश्लोकेषु मातुस्ते ते भावा वर्णिताः। वात्सल्यस्य काचन मूर्तिरिवोपस्थापिता काव्येऽस्मिन् कविना-

शिरो मे जिघ्रन्ती धियि कलुषभावानिव मुहु -
र्व्यपोहन्ती मुक्ताभरणकिरणैस्सान्द्रललितैः।
समुन्मीलन्नेत्रभ्रमरयुतचाम्पेयसुमन-
स्समोदारा धीराऽवतु जननि ! नासातव शिवा।।

भावविह्वलः कविः शिवसायुज्यसुषमामपि मातरि पश्यति -

शिवानन्दे लीना त्वमसि शिवसायुज्यसुषमा।
यतस्सम्भूतेयं प्रणुतिरखिलालोकललिता।।
पुनस्तस्यामेवार्पितसकलरस्यात्मसुषमा।
समालीना भूयाज्जनति ! जनिदोषप्रशमनी।।

बहुषु खलु श्लोकेषु गभीरा दार्शनिकसिद्धान्ता विद्यन्ते गुम्फिताः। शैवप्रस्थानस्य स्फुट एव प्रभावोऽत्र लक्ष्यते। दार्शनिकसिद्धान्तसिन्धावुन्मज्जन् निमज्जन् च कविः क्वचिद् वात्सल्यस्य महिमानमपि गायति -

मनोज्ञा मे मातस्तव किमपि वात्सल्यलहरी -
परीवाहस्रोतः प्रसृतिरखिलाङ्गेषु प्रसृता।
स्वभावश्रीपूरस्फुरितसकलात्माद्वयरसं
प्रमोदं मोदेकं प्रकटयतु सौम्यं शिवमहः।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शैवागमप्रभावात् स्तोत्रे केचन गूढानिगूढविषया अपि वर्णिताः। वाचश्चातुर्विध्यं स्तोत्रे निरूप्य सम्प्रदायसम्मतं व्याख्यानमपि कृतमिह तस्याः-

परा वाङ्मे मातस्त्वयि सकलतात्पर्य परमा
परां पश्यन्तीं त्वां रविशतसहस्रद्युतिमयीम्।
तथा मध्याऽऽधात्री त्वदनुपमचिन्मूर्तिरसधेः
स्वतस्ते वैखर्या स्फुटयतु सदौमं मह इह।।

आनन्दनन्दिनीकाव्येऽस्मिन् स्तोत्रसाहित्यस्य किमपि पारम्परिकं स्वरूप गोचरी भवति। भाषाभावादीनां प्राञ्जलता कवेरस्य काव्यप्रणयने महार्घतां पिशुनयति। ग्रन्थस्य तत्तत्तत्त्वानां संस्कृते आङ्गलभाषायां च व्याख्यानं विधाय सर्वजनसंवेद्यत्वमुपपादितमिहेति श्रीमतश्चन्द्रशेखरशर्मणः प्रयासोऽयं समधिकं प्रचारं प्रसारं च प्राप्नुयादिति कामये।

ग्रन्थसमीक्षणम् (३)

राधावल्लभः

मानसी (काव्यसङ्ग्रहः) - रामकरण शर्मा, प्रतिभा प्रकाशन, दिल्ली । २००० ई.। मू. २०० रूप्यकाणि।

मानसीकारस्य कवितल्लजस्य रामकरणशर्मणः 'शिवशुकीयम्', 'वीणा', 'दीपिका' इत्यादयः काव्यसङ्ग्रहः, 'सीमा', 'रयीश' इति द्वावुपन्यासौ नैके च ग्रन्थाः प्रकाशिताः। मानसी नामास्य निर्मलमानसजन्मा भव्य उपहारः शारदासपर्यायाम्। अत्र लसति चतुर्दश काव्यानां स्तबकम्। 'मानसमरालीयम्' "नेता विनेता चे' ति खण्डकाव्ययोः प्रत्येकं शतं पद्यानि सन्ति। शिष्टेषु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिष्टविचारसमन्वितेषु द्वादश काव्येषु विविधा विषया विविधानि च्छन्दांसि अनियत संख्यकानि विलसन्ति पद्यानि।

'मानसमरालीयम्' प्रतीकमयी दार्शनिकचेतनासंवलिता भावप्रवणा रम्यरचना वर्तते. यत्रोपक्रमे विडम्बना उपसंहारे च शिवोदर्कं वृत्तम्। अत्र वका अपि हंसायिता. सत्यं शीलं श्रयन्ते, तेन च -

श्रद्धां वा विश्वासं
तर्कधियं वाऽत्र कस्यचित् कश्चित्।
हन्ति न, सर्वः सर्वं
भजति च वेत्ति च बिभर्ति मिथः।।

इत्थं धवलविवेके
सिद्धे शुद्धे द्विजे तदेकस्मिन्।
सर एव शिवं निखिलं
सत्यं सुन्दरमभूद्विमलम्।। (पृ.२०)

'नूतन' जीवन-'मिति षोडशपद्येषु गुम्फितं विमर्शपरं काव्यम्। अत्र स्रग्विण्यां सुमनसा सुकविना भावसुमनसां स्रक् ग्रथिता। पुराणं प्रति सादरः कविर्न नवीनं प्रति मन्दादरः -

पाद एकः स्थिरः स्याद् धरायां क्षणं
यातु चाग्रे पुनः साधु पादोऽपरः।
पृष्ठतः पातु शैली पुराणी शुभा
पातु चाग्रे गतिं काऽपि शैली नवा।। (पृ.२३)

अलङ्कारा रामकरणशर्मणः काव्येऽपृथग्यत्ननिर्वर्त्याः स्वाभाविकीं काव्यश्रियं पुष्णन्ति। तथाहि -

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कनकं वा कुसुमं वा
वाणी वा व्यवहृतिर्बहिर्वान्तः ।
सहजा एव नमस्या
न कृत्रिमा जातु कुत्रापि ।। (पृ.२५)

अत्र दीपकालङ्कारस्य सहजतया समावेशः समजनि । कविः शर्मा न सानुप्रासपदावल्याः कृते यमकादिसन्निवेशस्य कृते वाऽऽयासं विदधाति । तस्य काव्यानि निर्मलमनोमुकुरे स्वयम्प्रकाश्यचैतन्यस्य च्छायाविलसितमाविष्कुर्वन्ति क्वचित् रचयन्ति स्वत एव मसृणमृदुविच्छित्तिमनुप्रासादीनाम् । दिङ्मात्रमुद्राह्रियते -

न मृष्यसे मृणालमार्दवं सरोजरम्यतां
मुधा चिनोषि कर्कशानि लौहपिण्डकानि भोः ।
कथं वशंवदोऽसि हे मनोस्तनूज चर्मणां
विकर्मणां विशर्मणां विवर्मणां विमर्मणाम् ।।(पृ.४१)

भेदभावनानिरासः साम्मनस्य स्थापना च शर्मणः काव्यस्य मुख्यः स्वरः । अवहितोऽयं कविः मानवं स्खलनात् निवारयति प्रबोधकाव्यं सर्वमपि शर्मणः साहित्यं शक्यते संज्ञप्तुम् -

तर्हि हस्तोऽन्यदीयो यथा छिद्यता-
मङ्गुलिश्च स्वकीयाऽमृतैर्लिप्यताम् ।
एष एव क्रमो मानवैः स्वीकृतो -
ऽद्याखिलां दूषयत्येव सर्वसहाम् ।।

अस्ति तावान् निधिर्ज्ञानविज्ञानयोः
सञ्चितो मानवैः पुस्तकेऽन्तर्हितः ।
किन्तु भाष्यं तदीयं सदैवान्यथा
कृत्यमप्यथमेवास्ति तस्यान्यथा ।। (पृ.१०२)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Fourteen Novels of Sanskrit

प्रमोदभारतीय: परिमल पब्लिकेशंस, दिल्ली १९९९।
मू. २०० रूप्यकाणि।

नाम्नोऽनुरूपं ग्रन्थोऽयं संस्कृतस्य समकालिकमुपन्याससाहि परिचाययाति। प्रथमेऽध्याये पुरातनकथासाहित्ये द्वितीये च स्वातन्त्र्योत्त पन्याससाहित्यस्य प्रवृत्तिषु दृष्टिं निक्षिपति ग्रन्थकार:। तत्र श्रीनिवासशास्त्रि 'चन्द्रमहीपति:' सूर्यप्रभा किं वा वैभवपिशाच' इत्यनयो: दुर्गादत्तशास्त्रि 'वियोगवल्लर्या:' जग्गुवकुलभूषणस्य 'जयन्तिकाया' श्च पारम्परिकोपन्यासे आनन्दवर्धनरत्नपारखिण: 'कुसुमलक्ष्म्या:' जीतसिंहखोखरस्य 'प्रीते:' सत् प्रकाशसिंहस्य 'गुहावासिन:' रामकरणशर्मण उपन्यासयो:, केशवचन्द्रदाशस्य पन्यासानां च सामाजिकोपन्यासेषु विश्लेषणं विहितम्। श्रीनाथहसूरकरस्य पन्यासा ऐतिहासिकोपन्यासेषु विवेचिता:। ऐतिहासिकोपन्यासेषु विश्वनाथ शास्त्रि णोऽविनाशि' पौराणिकोपन्यासेषु च रामजीउपाध्यायवर्यस्य 'द्वा सुपर्ण हरिश्चन्द्रोदयम्। चन्द्रविजयभुने: 'अर्जुन[illegible]कारम्' प्रभवप्रबोधश्चे विचारित:। शिष्टेष्वध्यायेषु एतेषामुपन्यासानां वस्तुयो[illegible]ना पात्राणि भाषाशै भावजगच्च विचारितानि।

079076

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri